CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म० म० सुधाकरद्विवेदि–ग्रन्थमाला

[प्रथमं पुष्पम्]

म० म० सुधाकरद्विवेदिप्रणीतया

'सुधावर्षिणी' टीकया

सहितः

सूर्यसिद्धान्तः

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

M. M. SUDHĀKARADVIVEDI-GRANTHAMĀLĀ

[Vol. 1]

SŪRYASIDDHĀNTA

With the Commentary

'SUDHĀVARṢIṆĪ'

OF

M. M. SUDHĀKARA DVIVEDĪ

EDITED BY

DR. ŚRĪ KṚṢṆA CANDRA DVIVEDĪ

Professor & Head

Jyotiṣa Department

Sampurnanand Sanskrit University

Varanasi

VARANASI

1987

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

□

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi–221 002.

□

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi–221 002.

□

First Edition, 1000 Copies
Price Rs. 46·00

□

Printed by—
VIJAYA PRESS,
Sarasauli, Varanasi.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म० म० सुधाकरद्विवेदि-ग्रन्थमाला

[प्रथमं पुष्पम्]

पूर्णआरक्षित

म० म० सुधाकरद्विवेदिप्रणीतया

'सुधावर्षिणी'-टीकया

संवलितः

सूर्यसिद्धान्तः

सम्पादकः

विद्यावारिधिः श्रीकृष्णचन्द्रद्विवेदी

आचार्योऽध्यक्षश्च

ज्योतिषविभागस्य

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

वाराणस्याम्

वाराणस्याम्

२०४४ तमे वैक्रमाब्दे | १९१० तमे शकाब्दे | १९८७ तमे ख्रैस्ताब्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुसन्धानप्रकाशनपर्यवेक्षकः—
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

□

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

□

प्राप्तिस्थानम् :—
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

□

प्रथमं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम्—४६.०० रूप्यकाणि

□

मुद्रकः—
विजय-प्रेस,
सरसौली, वाराणसी।

MAHENDRA SANSKRIT
21009

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

प्राक्कथनम्

[१]

दिग्दन्तावल - कुम्भसम्भव - महासिन्दूरविन्दूत्सवः,
किं वा पूर्वदिगङ्गनापरिलसत्सौभाग्यभाग्योत्सवः ।
आलक्ताक्तमहाजपावलिलसल्लालित्यलीलाद्भुतः ,
राराजीति समस्तलोककुहरे भास्वत्प्रभामण्डलः ॥

[२]

यो ध्वान्तेभनिवारणैकमृगराट्, ध्वान्ताब्धिकुम्भोद्भवः,
ध्वान्तारण्य - समुज्ज्वलद्धुतवहः ध्वान्ताब्जमातङ्गजः ।
यो ध्वान्तावलितूलचण्डपवनः ध्वान्ताहिनागान्तकः,
ध्वान्तध्वंसविधौ विधायविविधं रूपं जयेद् भास्करः ॥

[३]

मोहोद्रेकमहान्धकारपटली मातङ्ग-कुम्भस्थलीः,
यो विद्राव्यहिलीलया स्वयमहो पञ्चाननैकोपमः ।
निश्च्यूतातुलशोणशोणितलसद् दिव्यप्रभैकास्पदं,
भास्वानेषविभाति भातिशयतः सर्वत्र भूमण्डले ॥

[४]

सन्ध्यावन्दन-रक्तचन्दनमिलद् धाराप्रवाहाद्भुतः,
किं वा नन्दनदिव्यपाटलरजोराजत्प्रभाभासुरः ।
गुञ्जन्मञ्जुलशिञ्जितालिपटली राजीवराजीप्रभः,
भूयोभाऽतिवशाद् विभात्यनुदिनं श्रीमान् प्रभुर्भास्करः ॥

[५]

त्रैगुण्यं सफलं जगद्विलसतीत्थं शास्त्रसिद्धं वचः,
तत्सत्यापयितुं मुहुः स्व किरणैर्यः प्रत्यहं चेष्टते ।
नूनं लोहितनील-शुभ्रकमलान्युद्बोध्य चासृष्टितः,
तत् त्रैगुण्यमहोविकासयति यस्तस्मै नमो भास्वते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[६]

स्रष्टुः सृष्टिरियं कुतश्चिदपि नो सम्भाव्यते यं विना,
विष्णुः किं परिपालयेदिह ततः सृष्टिर्यदा नो भवेत्।
शम्भुः किं खलु संहरत्त्वथ यदा सृष्टिर्न सृष्टा भवेत्,
देवानां त्रितयस्य येन तु हृतं नैष्कर्म्यमस्मै नमः॥

[७]

वेदानां ननु निश्चितं मतमिदं कर्मानुसारं जगत्,
कर्मप्रेरितमस्ति तद् भगवता सूर्येण सृष्ट्यादितः।
इत्थं वेदवचः प्रमाणितमभूत् प्रत्यक्षतो यद्बलात्,
तस्मै वेदमयाय सन्ततमहो सूर्याय तुभ्यं नमः॥

[८]

मीमांसाविधयः समेऽपि विहताश्श्रौतप्रयोगं बिना,
तज्ज्ञानाय हि कालखण्डगणना सा सर्वदाऽपेक्ष्यते।
यत्स्थानं प्रथमं हि कालगणना कार्येषु सर्वेष्वहो,
सूर्यो भाति सदा मुदाऽत्र भगवान् ब्रह्माण्डभाण्डोपरि॥

[९]

त्रिस्कन्धं खलु शास्त्रमस्ति सकलं तज्ज्यौतिषाख्यं महत्,
तच्चर्चाऽपि न सम्भवेत् क्वचिदहो स्वल्पाऽपि हा यं विना।
देवोऽयं त्रुटिरेणुकल्पविकला कल्पाब्दमासात्मको,
राराजीति च लोकमूर्धनिमुहुः श्रीसूर्यनारायणः॥

[१०]

ग्रीष्मर्तौ प्रखरैर्निजैर्हि किरणैः संशोष्य सर्वां महीं,
वर्षर्तौ तु पुनः सहस्रगुणितं वर्षत्यहो योऽनिशम्।
इत्थं स्थापयति प्रकाममखिलामौदार्यपारम्परीं,
भास्वान् भाति विभाति रश्मिनिकरैर्यो दानिनामग्रणी॥

[११]

आस्तिक्यं सुचिरं चिरं श्रुतिविधिः यज्ञादिदीक्षा व्रतम्,
गार्हस्थ्यं सकलं तथेष्टिनिवहाः ये चाप्यहीनाः क्रियाः।
वापीकूपतडागनिष्कुट — सु — रप्राणप्रतिष्ठादिकाः,
सर्वा यस्य वशे विभान्ति सततं सूर्याय तस्मै नमः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[१२]

व्योम्नो रत्नमणिः दिशस्तु सुषमा, कालस्य नेमिः पुनः,
धर्मस्यायतनं, महस्तु भवनं काव्यस्य वर्ण्यं परम्।
रामस्यादिकुलं जलस्य जननं कोकस्य शोकान्तकम्,
पद्मस्यापि विकासकं भजसि नो श्रीसूर्यनारायणम्॥

[१३]

तीरे श्रीसरयूत्तरे ननु **भरद्वाजाख्य** गोत्रे पुनः,
सद्ग्रामेऽत्र **सजाँव** नाम्नि समभूत् विप्रो द्विवेदान्वये।
वेदव्रातरतः **कुबेरधर** इत्याख्यातनामा शुचिः,
यो हिन्दूत्व - विचार - रक्षणमतिस्तीर्थाटनैकव्रतः॥

[१४]

चत्वारस्तनया नयान्वितधियस्तस्याभवन् पण्डिताः,
आद्यस्तेषु हि **कृष्णचन्द्र**पदभृत्, दैवज्ञवृन्दाग्रणीः।
सीतारामधरो द्वितीयतनुजो नामानुरूपस्थितिः,
राधेश्यामधरस्तृतीयतनुजो बौद्धागमप्रौढधीः॥

[१५]

श्रीमान् **रामसनेहि**नामकसुतः सोऽयं कनिष्ठोऽभवत्,
सर्वैः पुत्रचतुष्टयैर्ननु नयैः किं वा पुमर्थैरपि।
ऋत्विग्भिः पुनरेव वा श्रुतचयैः कुम्भाख्यतीर्थोत्तमैः,
रेजे धीरवरः **कुबेरधर** इत्याशासु कीर्त्युज्जवलः॥

[१६]

सत्पुत्रान्निजशास्त्रसञ्चयमहापाथोधिमत्थाचलान्,
सम्प्राप्यातिमुदान्विता हि **रजला** देवी कुबेराभिधात्।
रामं वा भरतं च लक्ष्मणमहो शत्रुघ्नमेनं पुनः,
मेने मानधना मनोहरमतिर्मान्याऽप्यनन्या सती॥

[१७]

श्रीमद्**देवरियाख्य**मण्डलमलं भूमण्डले मण्डितं,
भूदेवादि - समस्तवर्णनिवहैर्यद्वर्णितं वर्णतः।
श्रीमद्रामपदाब्जपूत - सरयूनद्याः पवित्रं शुभं,
भूयः क्षालयति प्रसन्नसलिलं रात्रिन्दिवं निर्मलम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[१८]

श्री मन्मान्यमहर्षिभिः कृतयुगे ह्याविष्कृतं सुन्दरं,
विज्ञानाढ्यखगोलशास्त्रमखिलं प्रामाणिकं यत्नतः।
तत्र श्रीलसुधाकरेणविदुषा व्याख्यासुधावर्षिणी,
रम्या या रचितोनविंशतितमे ख्रैस्ताब्दकालेऽधुना॥

[१९]

एतच्छोधमयप्रकाशनविधेः सम्पूर्णताऽनेहसि,
प्राप्तेऽस्मिञ्छुभवत्सरे स्वविषयोद्धारव्रतैकाश्रयः।
सर्वान् मान्यबुधेश्वरान् मुहुरहो सम्प्रार्थयेऽहं भृशं,
श्रीमन्नेत्रकृपाकटाक्षकणतः स्यादुन्नतिः सन्ततम्॥

योऽशेषं तिमिरं निरस्य किरणैर्लोकान् समुद्बोधयन्।
तत्कृत्येषु नियोजयत्यहरहस्तानर्पयन् जीवनम्॥
सोऽयं व्योमचरैकजीवनचणः तान् स्वीयमार्गे श्रयन्।
सर्वं नः कलुषं हरन् शुभकरे कृत्ये धियो योजयेत्॥ १॥

विदितचरमिदं सर्वेषां शेमुषीजुषां यज्ज्यौतिष एव सर्वेषां विद्यानामदिभूतम्। लोकव्यवहारे पारस्परिककृत्यसम्पादनार्थं गणितं परमावश्यकमासीत्। तच्च ज्यौतिषस्य प्रधानाङ्गभूतम्। वेदेषु गणनायाः महत्त्वं सर्वातिशायीति स्वीकृतम्।

यथा चयनयाज्ञे इष्टकोपधानप्रसङ्गे—एकाचमे। त्रिस्रश्चमे। पञ्चचमे। सप्तचमे। नवचम। एकादशचम एकादशश्चमे। त्रयोदशचमे यज्ञेन कल्पन्ताम्। इत्यस्मिन् मन्त्रे संख्यानां वर्गकरणार्थं स्पष्टं निर्देशो विद्यते। १, २, ३, ४ प्रभृतिसंख्यानां वर्गाः १, ४, ९, १६ भवन्ति। ते च १+३+५+७=इत्येवं रूपेण तिष्ठन्ति। सिद्धं यद् उपर्युक्तवैदिकमन्त्रे एकादिसंख्यानां वर्गान्तराणि एव वर्गकरणार्थं पठितानि, एवं संख्यानां दशगुणोत्तराणि स्थानमानान्यपि वेदे एव पठितानि। तद्यथा एकाचमे। दशचमे। शतञ्चमे। सहस्रञ्चमे। अयुतञ्चमे। प्रयुतञ्चमे। नियुतञ्चमे यज्ञेन कल्पन्ताम्। (यजुर्वेदे १७)

यद्यपि गणनायाः प्राधान्यं संसारे सर्वेषु देशेषु आसीत् किन्तु संख्यानां योगः—व्यवकलनं-गुणनं-भजनं-वर्गं, वर्गमूलं, घनं-घनमूलप्रभृतीनां कर्मणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पादनार्थं दशगुणोत्तर-स्थानमानसंख्या भारते एव लब्धप्रतिष्ठा अभवत्। रेखागणितस्य प्रसिद्धो मनीषी 'युक्लिड' संख्यानां योगविभागवर्गमूलादि-प्रक्रियाभिः एकान्तमनभिज्ञ आसीत्। एषु देशेषु संख्यानां व्यवहारार्थं प्रतीकात्मकाः सङ्केताः निर्धारिताः आसन्। तद्यथा घटीयन्त्रे इदानीमपि द्वादशसंख्या सङ्केतार्थं XII एक्सैकः उर्ध्वरेखाद्वयेन निर्देश्यते।

भारतीयास्तु स्थानमानव्यवहारेण दशस्थाने एकं एकस्थाने द्वौ लिखित्वा गणिते सौविध्यं अन्वेषयामासुः—दशगुणोत्तरस्थानमानानां प्रधानाङ्गभूतं शून्यं भारतीयशेमुष्या एवाविष्कारः विद्यते।

योरोपदेशे इयं स्थानमानगणनाप्रणाली 'ब्राह्मस्फुट' सिद्धान्तस्य अनुवादेन अरबदेशे प्रतस्थौ ततः योरोपदेशे अस्याः प्रणाल्याः प्रचारः प्रभूततमोऽभवत्।

योरोपदेशीया इमां स्थानमानगणनाप्रणालीं अरबदेशीयानामेव कृतिं मन्यन्ते। इदानींमनतिचिरे काले केचित् विद्वांसः इदमङ्गीकुर्वन्ति स्म यद् भारतीया एव अस्याः प्रणाल्याः अन्वेषकाः सन्ति।

इयं गणितप्रक्रिया इदानीं संसारे सर्वत्रैव प्रतिष्ठिता विद्यते। भारतीयज्यौतिषेनैवास्याः प्रणाल्याः संसारे ज्ञानमभवत् इति निश्चप्रचम्। इदं हि भारतीयं ज्यौतिषं शास्त्रं वेदाङ्गमस्ति इति तु सर्वथा तथ्यम्। भारतीयानां सर्वेषु धार्मिककृत्येषु रवेरेव प्राधान्यं विद्यते। वेदे "सूर्यो आत्मा जगतश्चक्षुश्च" इत्युक्त्या जड़चेतनानां सर्वेषां वस्तूनां उद्भावकः रविरेवेति स्वीक्रियते। सैव रविः भारतीयज्यौतिषस्यापि प्रधानः प्रवर्त्तको विद्यते। "सूर्यो पितामहो व्यासेत्यादि" श्लोके प्रथमं सूर्य एवोल्लिखितः। सूर्य एव ज्यौतिषशास्त्रस्य प्रथमोद्भावकः अङ्गीकृतोविद्यते। अस्य कृतिः सूर्यसिद्धान्त-रूपेणास्माकं हस्तगता विद्यते। अत्र शङ्केयमुदेति यदाकाशे प्रचलन् रविः कथङ्कारं ज्यौतिषं प्रावर्त्तयत्।

अस्माकं भारतीयानां इयं धारणा विद्यते यत् सर्वेषां वस्तूनां अभिमानी एको देवो विद्यते, जपपूजनादिभिः स देवः प्रसादयितुं शक्यते। मनोभिलषितं कार्यमपि तेनैव सम्पादयितुं शक्यते। सूर्यसिद्धान्ते इदं तथ्यमभिलक्ष्यैव एका कथा विद्यते।

तद्यथा प्रारम्भे सूर्यसिद्धान्ते—

अल्पावशिष्टे तु मयो नाम महासुरः।
रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदाङ्गमग्रचमखिलं ज्यौतिषां गतिकारणम् ।
आराधयन् विवस्वन्तं तपस्तेपे सुदुश्चरम् ।।

तोषितस्तपसा तेन प्रीतस्तस्मै वरार्थिने ।
ग्रहाणां चरितं प्रादात् मयाय सविता स्वयम् ।।

एतेनावसीयते यद्मयतपः प्रहृष्टेन सूर्याभिमानिदेवेनैव सिद्धान्त-ज्यौतिषस्य किं वा खगोलविज्ञानस्य ज्ञानस्फूर्त्तिर्मयान्तःकरणे समभावि ।

तत्र सूर्यसिद्धान्ते स्मृतिषु स्वीकृतकल्पाख्यकालमानेनैव ग्रहाणां गतयः निर्दिष्टाः सन्ति । किन्तु पञ्चसिद्धान्तिकस्थसूर्यसिद्धान्ते कल्पकाले कालगणना न निर्दिष्टा विद्यते । एतेन प्रतीयते यत् सूर्यसिद्धान्तस्य वर्तमानं स्वरूपं पञ्चसिद्धान्तिकस्थ सूर्यसिद्धान्ततो भिन्नं परिष्कृतञ्च विद्यते ।

सूर्यसिद्धान्ते कालमानम्, ग्रहाणां मध्यमगतिः, द्वैविद्ध्यम्, कल्पादितः ग्रहानयनरीतिः, भूपरिधिमानं, ग्रहाणां परमशराश्च मध्यमाधिकारे पठिताः । **स्पष्टाधिकारे** ग्रहस्य मध्यमस्पष्टगतिभेदकारणं ज्ञानायनविधिः, रविक्रान्तिसाधनम्, ग्रहाणां मन्दशीघ्रफलयोः कारणम्, गतिसाधनं, भौमादि ग्रहाणां मार्गवक्रद्वैविध्यकारणम् प्रभृति विषयाः विवेचिताः सन्ति ।

त्रिप्रश्नाधिकारे ग्रहाणां छायातो आकाशीयस्थितिसाधनम्, छायातः कालज्ञानम्, राशीनां लङ्कोदयमानम्, स्वदेशोदयमानम्, लग्नानयनञ्च विद्यते ।

चन्द्रग्रहणाधिकारे रविचन्द्रभूभानां गणितविधिना कोणात्मक-मानमानीय ग्रहणे तदुपयोगः कृतो विद्यते । चन्द्रग्रहणस्य स्पर्श-मोक्ष दिग्ज्ञानमपिशुद्धगणितानुसारि विद्यते ।

आर्यभट्टसिद्धान्ते उत्क्रमज्याप्रकारेण आयनाक्षबलनसाधनं कृतं विद्यते । एतेनावसीयते यदार्यभट्टप्रकारमशुद्धमभिलक्ष्यैव केनचित् विदुषा सूर्यसिद्धान्ते शुद्धः प्रकारः प्रतिपादितः इति प्रतीयते ।

सूर्यग्रहणे चन्द्रश्च्छादकः । चन्द्रग्रहणे भूभा छादिका इति वैज्ञानिकं तथ्यं सूर्यसिद्धान्ते प्रतिपादितं विद्यते । सूर्यग्रहणं सदा अमान्ते न भवतीत्यत्र किं कारणमित्यनेन भारतीयावगता आसन् । लम्बननत्याख्यसंस्कारद्वयेन क्रान्तिवृत्तीयरविचन्द्रयोः योगः सूर्यसिद्धान्ते प्रतिपादितः । कलाद्रिय-स्टालमी— कोपरनिकस प्रभृतिभिश्चोक्तं यद् सूर्यचन्द्रग्रहणयोः यादृशं सुस्पष्टं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साधनं सूर्यसिद्धान्ते विद्यते तादृशमन्यत्र न विहितमिति । एतेनावगम्यते यत् इमे सूर्यचन्द्रग्रहणगणितप्रक्रियायां निष्णाताः अभवन् ।

पञ्चदशख्रीष्टशताब्द्यां कोपरनिकसोऽपि सूर्यसिद्धान्तप्रणालीं नाशिश्रियत् । सूर्यसिद्धान्तीयसूक्ष्माः ग्रहणगणितप्रक्रियाः तदानीं यावत् योरोपदेशे लब्धप्रसारा नाभवन् । ग्रहणस्य परिलेखप्रणाली भारतीयानां स्वकीयाविष्कृतिरेव । यतो हि आलमाजिस्ट कोपरनिकसग्रन्थे च ग्रहणछेद्यकप्रणाली नैतादृशी शुद्धा विद्यते ।

भारतीयखगोलविज्ञाने (सिद्धान्तज्यौतिषे) यवनसिद्धान्तज्यौतिषतः (खगोलविज्ञानतः) भिन्नाः अपि विषयाः स्वीकृताः सन्ति । तत्र शृङ्गोन्नत्यधिकारः, पाताधिकारः योरोपज्यौतिषे न विद्येते । ग्रहयुत्यधिकारे आक्षदृक्कर्म-आयनदृक्कर्मभ्यां ग्रहबिम्बस्योदयास्तकाले ग्रहवेधकरणार्थं स्वीकृतम् । तत्तु जगति भारतीयेतरज्यौतिषे ग्रन्थे क्वापि न दृश्यते । सूर्यसिद्धान्ते भग्रहयुत्यधिकारे नक्षत्राणां ये ध्रुवाः पठिताः ते यवनज्योतिर्विदा हिपार्कसेन विद्धनक्षत्रध्रुवैः साकं साम्यं भजन्ते ।

अत एव योरोपदेशीया कथयन्ति यत् सूर्यसिद्धान्तीया; ध्रुवाः हिपार्कसस्यैवेति किन्तु कथन्नेदं कथनं विपरीतम् । भारतीयाः स्वयमेव बेधकुशलाः आसन् । शुल्वसूत्रेषु दिक् साधनार्थं यो विधिः प्रतिपादितो विद्यते स एव संसारे सर्वत्रैव आदृतो विद्यते । द्वादशाङ्गुलशङ्कोः उपयोगेन ग्रहाणामाकाशीयस्थितिसाधनं भारतीयानां स्वान्वेषणस्यैव परिणामभूतं विद्यते ।

अतः परं भारतीयखगोलविज्ञानशास्त्रस्य विषये तथा प्रख्यातार्षभूतग्रन्थरत्नसूर्यसिद्धान्तोक्तखगोलीयसिद्धान्तानां समीक्षणं विश्लेषणं च पाश्चात्यैः ऐतिहासिकदृष्टया कृतं तच्चेदानीं प्रस्तूयते[1] ।

सूर्यसिद्धान्तस्तावत् हिन्दूनां प्राचीनखगोलीयसमयइति प्रायोविश्वासास्पदम्, तन्मतानुसारञ्च—सत्ययुगान्ते अष्टाविंशमहायुगस्य सप्तमे मन्वन्तरेऽस्य दिव्यः प्रादुर्भावोजातः । मतमिदम्—नवनवत्यधिकाष्टशतोत्तरचतुष्षष्टिसहस्राधिकैकविंशतिलक्षवर्षपूर्वकालिकम् ।

हिन्दवः प्राचीनतमा इति मन्यते, ऐतिहासिकप्रमाणान्यतिक्रम्य इदं साध्यते च, तथापि खलोगविद्यासु तेषां यज्ज्ञानम्, (यत् सूर्यसिद्धान्तेनापि प्रतीयते) तत्तु सूक्ष्मेक्षिकामन्तरा न प्रमाणयितुं शक्यते ।

---

१. प्राचीनः सूर्यसिद्धान्तः; ततः खगोलीय परम्परोदयश्च ।—प्रो० जे० बेण्टली

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कतिपयवर्षेभ्यः पूर्वतः बहुभिर्विद्वद्भिः हिन्दूनामाचारविचार-रीतिस्थितिपरम्परादिविषये, बहुलिखितम्, परन्तु ममायं विश्वासो यत् सकलमपीदं लेखकानां स्व-स्वकालनिर्णायकसिद्धान्तानुसारम्, तथ्यातथ्यात्मकम्, रागद्वेषप्रसूतच्छलकपटमयाद्भुताश्चर्यकृन्मान्यतानुरूपमात्रम् । लेखकैः स्वदेशस्थितैर्यच्छ्रुतम्, देशान्तरतो वा यत्प्राप्तम् तदनुरूपमेवेद-मखिलम् ।

श्रीवेलीमहोदयेन सप्ताशीत्यधिकसप्तदशशततमे ख्रैस्ताब्दे 'पेरिस' नगरे 'भारतीय खगोलविद्या' (चतुर्भागात्मिका प्रकाशिता) विषये, श्री प्लेफेयरमहोदयेन च (Mr. Plvopair) ऊननवत्यधिकसप्तदशशततमे ख्रैस्ताब्दे अस्मिन्नेवविषये एडिनवर्ग (Edinbvagh) पत्रिकायाम् एको निवन्धो लिखितः ।

यद्यपि भारतीयखगोलविद्याविषये एतेषां ज्ञानं पूर्णं नासीत् अथवा अन्येषां योरोपीयजनानां ज्ञानतो भिन्नमासीत्, तथापि प्लेफेयरस्य बहूनि दर्शनानि श्रीवेलीदर्शनादन्यत्र दुष्प्राप्याणि । वस्तुतस्तु—श्रीवेलीमहोदय-दर्शनान्यपि आपाततः, तद्द्वारा च हिन्दूज्यौतिषशास्त्रविषये कश्चनापि निर्णयोऽसम्भवः, अतश्च—सर्वमपीदमवास्तविकमभूत्, एवञ्च (ग्रहगति-परिमाणादिविषये) तदीया गवेषणादिपद्धतिश्च न प्रयोगार्हास्पदम् ।

किं बहुना, एतत्कलियुगारम्भकालिकत्वेन स्वीकृताः श्रीत्रिवालोरे (Trivalore) सारणयोऽपि, कलिप्रारम्भात् त्र्यशीत्यधिकत्रिशतोत्तरचतु-स्सहस्रवर्षेभ्यः परम्, अथवा इतः षोडशाधिकपञ्चशतवर्षेभ्यः पूर्वं कदाचि-ल्लिखिताः, ग्रहाणां वार्षिकगतीनां व्यवस्था, भारतीयखगोलविद्यानुसारं पृथ्व्यां सम्पादिता, तदैव च ग्रहाणां स्वर्गस्थितिरपि गण्यते स्म ।

लेखकेन स्वदृष्टया आसामशुद्धीनां निराकृतिः कार्या । एतद्भ्रमनिवृ-त्तिप्रसङ्गे पूर्वोक्तं प्राचीनं सूर्यसिद्धान्तं यथामति सारल्येन तथा व्याख्या-स्यामि, येन 'कं सिद्धान्तमुपनीय इयं हिन्दूपद्धतिः प्रतिष्ठिता' इति तैः निरूपणीयं स्यात् ।

इदमादौ विवेक्तव्यं यत् – प्रायो हिन्दूपद्धतिषु युगव्यवस्था पूर्वकालिक-प्रस्थानबिन्दुरूपेण निर्धारिता । इदं विश्वस्यते यद् मेषादिकालेषु ग्रहाः सूर्येण संयुज्य एकस्यां रेखायां स्थिताः । एष प्रवर्तनविन्दुसमय एव 'युग' शब्दवाच्यः तत एव दैवज्ञाः कालगणनामारभन्ते,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वास्तविकदृष्टया ग्रहस्थितिषु ज्ञातासु सतीषु, तदानीं दैवज्ञैः स्वगणनास्वङ्गीकृताः ग्रहाणां वार्षिकगतयः वस्तुतत्त्वं प्रकटीकरिष्यन्ति, उत वा दृष्ट्या निश्चिततत्त्वसादृश्यं स्वीकरिष्यन्ति ।

पुरा युगनिर्धारणकाले भारतीयज्यौतिर्विद्भिरिदं ध्यातं यद् ग्रहाणां कल्पितवास्तविकस्थित्योरन्तराले यो भेदः, स समाप्तव्यः, अथवा अ-स्वीकार्यांशो वार्षिकगतिव्यावर्तयतिचेत्तदा निर्धारितेषु, वर्षेषु अवधिषु वा वियोक्तव्यः ।

अत इदमाञ्जस्येन ध्यातव्यं यत्पुरैव कालस्य काचित् स्थितिः कल्पनीया, ग्रहाणाञ्च मुख्यवार्षिकगतिषु निर्धार्यमाणासु, तस्मात्तद्वियोगः कर्तव्यः (मेषादिकालं कल्पयित्वा)। तदानीं ग्रहाणां वास्तविकीस्थितिः प्रेक्षणानुसारिणी एव स्यात्, इत्थं मुख्यवार्षिकगतिः (वियोगे कृतेऽपि) वास्तविकमुख्यवार्षिकगतितोऽभिन्ना (अथवा अस्वीकार्यायामल्पाल्पायां स्थितौ) भविष्यति ।

अथ कदाचिदिदंमन्यताम्—कस्यचन युगस्य मुख्यसंयोजनकालः अष्टचत्वारिंशत्सहस्राधिकषड्लक्षवर्षेभ्यः प्रागस्ति । ग्रहाणां तात्कालिकीं वार्षिकीस्थितिम् (यत्तदानीमज्ञातम्) अज्ञात्वा, स्वयञ्च अपरिश्रम्य इदं स्वीकृतमिति ।

इदं तु प्रथमतोऽवधेयम्—यत् अव्यवहितपूर्वे मुख्यसंयोजनात्मके युगे स्वीकृते सति, तत्समीपगा वर्षिकगतयस्तत्प्रमाणिता भवेयुः, एताश्च वास्त-विकवार्षिकगतिभ्योऽधिकाः, वास्तविकदर्शनानुगताश्च स्युः, अन्यत्र एतद्विप-रीतम्, एतस्मात् परकालिकं युगं कल्पनास्पदमपि अस्मत्कालिकम्, अन्तयोर्यद् व्यवधानम्, तत् गणनानुगुणकालावधिरूपम्, यस्मिंश्च ग्रहस्थितिः मुख्य-संयोजनरेखायामेवभवेत्, अथवा इयति नेदीयसि स्थाने भवेत्, यत् तयोर-न्तरवर्तिकालेन भागे कृते सति, मुख्यवार्षिकगतिस्तदवस्थिता एव स्यात्, परन्तु एवं (द्वितीयविधौ) सति इदमावश्यकं यत् सूर्याचन्द्रमसौ कल्पित-युगस्य संयोजनकाले एकरेखास्थितौ एव स्याताम्, अथवा नितरां नेदिष्ठौ अवश्यं भवेताम्, अन्यथा अनुपातदृष्ट्या गतकालावधिः ज्यौतिषां गणना-प्राप्तसंयोजनम्, वैपरीत्यम्, ग्रहणञ्चेति कस्मिंश्चिदपि विचार्यवर्षे यथाकालं न सम्भवेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युगशब्देन प्रायःकलियुगएवगृह्यते, तत्र वराहमिहिराचार्यैरन्यैश्च हिन्दूज्यौतिर्विद्भिः स्वकाल एव निर्णीतमिदं युगम्, उक्तसिद्धान्तानुसारम्, तदर्थम्, तदा ग्रहाणां वस्तुतो मुख्यसंयोजनकालिकैकरेखायां स्थितिर्नासीत्, किन्तु तदीयः कल्पितः क्रमिको भेद ··· ····· वराहाचार्यकालस्तु व्यतीत-कलियुगे········· ।

किन्तु; एकस्यां समानायां रेखायां क्रमशो विद्यमानायां सत्याम् इदमस्माभिः कल्प्यते कश्चिद् हिन्दूर्ज्योतिर्विद् तत्तद्यन्त्रोपकरणादि-स्यिर्ति प्राप्नोति, यैः ग्रहाणां तात्कालिकी वास्तविकी स्थितिः ज्ञाता स्यात्, एवञ्च, ततः पूर्वाचार्योक्तसिद्धान्तानुपजीव्य नवीनसिद्धान्तस्थापने प्रयतेत । एवङ्कथ्यते—कलियुगाविर्भावकाले ग्रहाणां मुख्यसंयोगप्रक्लृप्त्यै, मुख्या वार्षिकी गतिः का स्यात् ? (तत्सिद्ध्यै च) तादृशीपद्धतिरपेक्ष्यतेऽवश्यम्, येन ग्रहाणां सायने स्वर्गे वा स्थितिः दृष्ट्यनुरूपा सिद्ध्येत्, यथा यूरोपीय-सारणिष्वपि निर्णीताऽस्ति ।

'मेषादिकाल एव ग्रहाणां काचित् ऋज्वी रेखा संयुज्यते' इति मत्त्वा, इदमुच्यते यत् कलियुगारम्भकालात्, फरवरीमासस्य सप्तदशदिनाङ्कऽस्य गुरोः, अष्टादशदिनाङ्केऽस्य भृगोश्च रात्रिमध्ये जूलियनकाले द्वादशोत्तर-षोडशशततमख्रैस्ताब्दे, लङ्कायां मध्याह्ने, ग्रीनविचस्थानात् प्रायः 75 D 50 पूर्वस्थानम्, समयश्च—ग्रहाणां यत्र मुख्यसायनस्थितिः, दृष्ट्या-सिद्येत् स मन्तव्यः, स च, कलिप्रारम्भात् नवशताधिकचतुस्सहस्रवर्षेषु गतेषु भवति, सूर्यश्च तस्मिन् पले, हिदूनां ग्लोबमण्डले मुख्यगत्यनुसारं मेषे भ्रमति ।

अथेदं बोध्यम्—कलियुगारम्भतः नवशताधिकचतुस्सहस्रवर्षेषु गतेषु, सूर्यसिद्धान्तानुसारम्—17,89,767 (अर्थात् सप्तषष्ट्यधिकसप्त-शतोत्तरोननवतिसहस्राधिकसप्तदशलक्षमितानि) दिनानि 54'^{do}24'20'' तदनुसारञ्च—नवनवत्यधिकसप्तदशशतमितख्रैस्ताब्दे, अप्रैलमासस्य द्वादशे दिनाङ्के, श्रीलंकायाम्ये 45'44'' रात्रौ नववादनात् परम् अथवा, पेरिसयाम्ये सायं चतुर्वादनात् परम् 51'40'' भविष्यति । सूर्याचन्द्रमसोर-न्येषाञ्च ग्रहाणां तदानीं मुख्यः संयोजनकालः M. De. La, lande महोदयस्य द्वानवत्युत्तरसप्तदशतमख्रैस्तवार्षिकसारण्यनुसारमित्थं स्यात्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योरोपीयग्लोवे

सूर्यस्य	05	20°	52'	28"	5
चन्द्रमसः	3	22	55	9	3
बुधस्य	3	22	42	42	–
वीनसस्य	2	24	6	14	–
मार्सस्य	3	4	50	40	–
जुपिटरस्य	1	29	58	2	1
सैटर्नस्य	3	24	16	56	1

एवम्, तथैव हिन्दूग्लोबमण्डले रविभोगः—0.5 0° 0' 0" भविष्यति, यतः तदानीं स मुख्यगत्यनुसारं मेषादिकाले प्रविष्ट इति स्वीक्रियते स्म, परन्तु तदानीं योरोपीयसारणीषु मुख्यः संयोजनकालः इत्थम्—05 20' 52' 28" 5 अस्मिन् काल एव अनयोः परिमाणाय, हिन्दू-योरोपीयसारण्योरन्तरं समानं भवति, अत इदं पूर्वकल्पितरवि-योगाद् वियुज्यते, ततश्च हिन्दूसारण्याम् (Sphere) क्रमशः सूर्याचन्द्रमसो-ग्रहान्तराणाञ्च अपेक्षिता स्थितिः इत्थं प्राप्यते—

हिन्दू ग्लोबमण्डले

सूर्यस्य मुख्यसंयोजनम्	05	0°	0'	0"	
चन्द्रमसः ,,	3	2	2	40	8
मर्करीग्रहस्य ,,	3	1	50	13	5
वीनस ,, ,,	2	3	13	45	5
मार्स ,, ,,	2	13	58	11	5
ज्यूपिटर ,, ,,	1	9	5	33	6
सैटर्न ,, ,,	3	3	24	27	6

हिन्दुसारण्याम् (ग्लोबे) सूर्याचन्द्रमसोर्ग्रहान्तराणाञ्च, भोगमानं कलियुगस्य नवशताधिकचतुस्सहस्रवर्षेषु गतेषु इत्थमेव ज्ञातं भवति। अतः परं वयं मुख्यानां वार्षिकीणां गतीनां परिमाणान्वेषणं कुर्मः, यत् (परिमाणम्) आसां वस्तुस्थितिं प्रकाशयिष्यति कलियुगारम्भ एव यथा कस्यचिद् युगस्य मुख्यसंयोजनावधिः स्वीयक्रियते स्म ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यसिद्धान्तानुसारम्, हिन्दूवर्षमानम्—

365 दिनानि, 15 do 31' 31'' 24''' भवति। अस्मिन्नवधौ सूर्यः स्वकक्षायाः पूर्णं चङ्क्रमणं विदधातीति स्वीक्रियते। सूर्यचन्द्रमसोर्ग्रहान्तराणाञ्च अनयोर्दिक्कालयोः मुख्या वार्षिकी गतिः डी० ला लाण्डे (De la lande) महोदयस्य सारण्यामित्थमस्ति—

योरोपीयग्लोबमध्ये

सूर्यस्य मुख्यावार्षिकीगतिः	1r	05	0°	0'	58''	40'''	26
चन्द्रमसः ,,	13	4	12	47	39	17	03
बुधस्य ,,	4	1	24	46	35	36	9
वीनसस्य ,,	1	7	15	12	22	18	4
मार्सस्य ,,	0	6	11	25	17	49	3
ज्यूपिटरस्य ,,	0	1	0	21	49	9	2
सैटर्नस्य ,,	0	0	12	14	8	0	9

हिन्दूग्लोबमध्ये पूर्वत एवावस्थिता इमागतयः, उपर्युक्ताभ्यो गतिभ्यो वियोज्यन्ते चेत्, तदा एकवर्षावधेरन्तरं भविष्यन्ति —58'' 40''' 26।

इमाः मुख्याः गतीः हिन्दूग्लोबमध्ये इत्थं स्थापययामः—

हिन्दूग्लोबमध्ये

सूर्यस्य मुख्यागतिः	1r	05	0°	0'	0''	0'''	
चन्द्रस्य ,,	13	4	12	46	40	36	78
बुधस्य ,,	4	1	24	45	36	56	6
वीनसस्य ,,	1	7	15	11	23	38	1
मार्सस्य ,,	0	6	11	24	19	9	—
जूपिटरस्य ,,	0	1	0	20	50	29	—
सैटर्नस्य ,,	0	0	12	13	9	20	6

(पूर्वकल्पितकलियुगस्य गतकालः 4900 वर्षाणि)

उक्तानां 4900 सङ्ख्याभिः गुणिते सति, सर्वासां ग्रहगतीनां तद्दिग्कालयोरेव सङ्ख्या, प्राप्येत, तदुपेक्षायां ग्रहगतयोऽपूर्णाः, अथच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकस्मिन् प्रतिकल्पिते उपकल्पिते वा भागे समयस्य गणना भवति, यत्र तत्स्थितिर्वास्तविकी नासीत्। यथा हि—योरोपीयसारणीषु, 4900 वर्षेषु गतेषु, अधुना च सम्पूर्णयोगात् 4900 सङ्ख्याविभाजिते सति, बार्षिकगतय इत्थं प्राप्यन्ते—

	हिन्दूग्लोबमध्ये						
सूर्यस्य	1r	05	0°	0'	0''	0'''	
चन्द्रमसः	13	4	12	46	40	41	153
मर्कर्याः	4	1	24	45	12	22	206
वीनसस्य	1	7	15	11	47	40	72
मार्सस्य	0	6	11	24	10	15	814
ज्यूपिटरस्य	0	1	0	21	3	0	4111
सैटर्नस्य	0	0	12	12	53	55	93

एतेनोदाहरणेन, दृष्टया स्वर्गादौ ग्रहस्थितिनिर्धारणेन च, भारतीय-ज्यौतिषसिद्धान्तप्रसङ्गे किञ्चिज्ज्ञानं लभ्यते, तत्तत्कालेषु ग्रहाणां वार्षिक-गतयोऽपि परिगणयितुं शक्यन्ते।

उपर्युक्तसिद्धान्तितवार्षिकगतीनां (सारणीनां) यदा डी० ला० लाण्डे कृतसरिणीभिः समीक्षाक्रियते, तदा अनयोरन्तरमित्थं भविष्यति—

चन्द्रस्य मुख्यवार्षिकगतेः		0''	4'''	4	न्यूनम्
मर्कर्याः	,,	24	34	4	अधिकम्
वीनस्य	,,	24	2	5	न्यूनम्
मार्सस्य	,,	8	53	2	अधिकम्
जूपिटरस्य	,,	12	13	4	न्यूनम्
सैटर्नस्य	,,	15	24	7	अधिकम्

एवं स्थितौ भारतीयसिद्धान्ताऽनभिज्ञो योरोपीयज्यौतिर्विद् भारतीयसारिणीषु इमा गतीर्विलोक्य:, अनुमानमन्तराऽपि स्वीकर्तुं परवशो भविष्यति, कुत्राप्यलभ्यमेतदीयप्राचीनत्वञ्च निरूपयितुमपि परवशो भविष्यति, इदं विचारयन् यदस्य लेखकस्तस्मिन् काले प्रादुरभूद्, यदा एतद्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चारकानुसारं मुख्यवार्षिकगतिपरिमाणानि ग्रन्थस्थितानुपातानुसारीण्येव आसन्। इदं खलु स्पष्टं भवति यद् ग्रहाणां वार्षिकगतिपरिमाणप्राचीनता-सन्दर्भस्य अनुसन्धाने चिकीर्षिते, भारतीज्यौतिषसिद्धान्तज्ञानमपरिहार्यम्। उपर्युक्ता ज्युपिटरमुख्यवार्षिकगतिस्तु—15, 0° 21' 3" अस्ति। परिमाण-मिदं, पाश्चात्त्य (योरोपीय) खगोलशास्त्रोक्तसिद्धान्तातुसारं यत्किंचित् कालिकं पुस्तकमनुहरति, यस्मिन् पुस्तके इदं लभ्यते—गतयः पारेसहस्रं वर्षेभ्यः प्राचीनाः, वस्तुतस्तु कलिप्रारम्भात् 4900 वर्षेषु गतेषु, ग्रहविशेषस्य वस्तुस्थितिं प्रकटयितुं गणनया ज्ञाताः, यूरोपीयसारिणिभिश्च सम्वदन्ति। इत्थमेव समेषां ग्रहाणां गतिस्थितय उपर्युक्ताः। उपर्युक्त-वार्षिकगतीनाम् 4900 सङ्ख्यया गुणनेन इदं स्यात्—

सूर्यग्रहगतिः	4900	05	0^0	0°	0"	
चन्द्र ,,	65507	3	2	2	40	8
मर्करी ,,	20345	3	1	50	13	5
वीनस ,,	7965	2	3	13	45	5
मार्स ,,	2605	2	13	58	11	5
ज्यूपिटर ,,	413	1	9	5	33	6
सैटर्न ,,	166	3	3	24	27	6

तदिदं सर्वं डी० ला० लाण्डे सारिण्या सह सम्वदन्ति। (5 12)

ग्रहाणां मुख्याः सूर्यकेन्द्रिताः सायनसम्बद्धाः उपर्युक्ताः गतयो यद्यपि व्यतीतेष्वपि 4900 कलिवर्षेषु सर्वथा प्रमाणकोटिमाटीकन्ते, तथापि आधुनिकखगोलविदस्तासु, मुख्यवार्षिकगतिषु किमपि पार्थक्यम्, कतिपय-ग्रहगतिषु च किमपि वैधर्म्यं स्वीकुर्वन्ति, ततश्च ता गतयः प्रत्यब्दं क्रमशो यथार्थकोटितो दूरं व्रजन्ति। वस्तुत इदं (यथार्थकोटितो दूरेगमनम्) भारतीयखगोलज्यौतिषविषयेऽपक्षेण वर्तते, यदा दोषोऽयमग्राह्यकोटि-माटीकते, तदा भारतीयज्योतिर्विद् कामपि नवीनां पद्धतिमाविष्कुर्वन्ति, उत वा परिष्कुर्वन्ति, इदमेव 'वीजम्' इति तैः कथ्यते।

खगोलविद्याविषये भारतीयसिद्धान्तास्त्रिधा विभाजयितुंशक्यन्ते। तथा हि—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(क) प्रथमतस्तु—ब्रह्मणः[१] कल्पस्य आदौ अन्ते वा मेषादौ प्रवृत्ते, सूर्यग्रहान्तराणां च तत्तदुपग्रहेषु तत्तत्कक्षासु वा सहैव संयोजन स्वीकारः।

(ख) द्वितीयस्तावत्—वाराहकल्पस्य आदौ अन्त्ये वा यत् संयोजनम्, तेन सह निश्चितानां चक्राणां वर्षाणां वा या स्थितिः, ततः परं मुख्य संयोजनस्वीकारः, अन्ते च, कल्पान्तरस्य युगान्तरस्य वा आरम्भस्य अन्तस्य वा कस्यापि संयोजनस्य अस्वीकारः।

अनयोः प्रथमो ब्रह्मगुप्तकृतिभिः, भास्करीयसिद्धान्तशिरोमणि-प्रभृतिभिश्च समर्थ्यते, यैः एतत्कलियुगारम्भे, ग्रहाणां किमपिसंयोजनं न स्वीक्रियते। द्वितीयस्तावत् सूर्य-सोम-वशिष्ठप्रभृत्याचार्यसिद्धान्तैः पुष्यते, यैः कलियुगारम्भमात्र एव मुख्यं संयोजनं स्वीक्रियते यथा च--वराहस्य जातकार्णवः लिवालोरे महोदयस्य सारण्यश्चः।

(ग) तृतीयश्च--ब्रह्मसिद्धान्त-विष्णुसिद्धान्त-भास्वती द्रुवोरोथोनो-चन्द्रिकाप्रभृतिभिरूरीक्रियते, इदमेव योरोपीयज्योतिर्विद्याया नेदिष्ठम्, (यस्मिन्) मुख्या वार्षिक्यो गतयो न खलु केनापि कल्पितयुगेनाभिभूताः, तथा च–दृष्टान्तरूपेण एतत्कलियुगस्य युगान्तरस्य वाऽरम्भे ग्रहाणां किमपि संयोजनं नाङ्गी क्रियते।

ब्रह्मगुप्त-भास्कराचार्ययोर्मते एकस्य कल्पस्य, अथवा द्वात्रिंशत्को-ट्यधिकचतुर्लक्षवर्षेषु ग्रहगतय एवं स्युः—

---

१. 4,32,00,00,000 भारतीयवर्षपरिमितो ब्रह्मणः कल्पः, स च अस्माद् कलियुगात् 1,97,29,44,000 वर्षेभ्यः पूर्वत एवारब्धः। कल्पनाम्नि ब्रह्मपदं कदाचिदेतल्लेखकेन ब्रह्मगुप्तेन निवेशितम्। वाराहकल्पोऽपि तावत्परिमाण एव, परं तत्प्रारम्भः एतत्कलियुगतः 1,70,64,000 वर्षेभ्यः पश्चात् स्वीकृतः। तन्नाम्नि वराहपदं चं तल्लेखकस्य वराहमिहिरस्य नामानुसारि। अयमेव 'सूर्यसिद्धान्त-जातकार्णवादिग्रन्थान् जग्रन्थ। कल्पाः तेषु तेषु मन्वन्तरेषु युगेषु च विभाज्यन्ते, येन च अतीतकालस्य मानं स्मृतिश्च सरले भवतः, अतोऽधिकमद्यावधि नास्य किमपि उपकर्तृत्वम्।

इदं खलु मन्मनसि किमपि महत्तथ्यं निश्चयमाविर्भवति—यद् कल्प-युग-मन्वन्तराणि पुरा भारते भारतीयैः अर्थान्तरेषु प्रयुज्यन्ते स्म; न खलु अद्य यथेति बोद्धव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यादिग्रहाः	ग्रहगतयः	Apsides	Nodes
सूर्यः	4320000000	480	
चन्द्रः	57753300000	488105858	232311168
बुधः	17936997984	832	511
वीनसः	7022389492	653	833
मार्सः	2296828522	292	267
ज्यूपिटरः	364226455	855	63
सैटर्नः	146567298	41	584

यावति समये, सूर्यचन्द्रादयो ग्रहाः परिभ्रम्य निवृत्यः मेषादिप्रारम्भे एकरेखायां स्थीयन्ते, सूर्यसिद्धान्तानुसारं स कालोऽशीतिसहस्रोत्तरदशलक्षवर्षात्मा एकमहायुगीय[1] पादात्मा वा, तावति समयचके ग्रहस्थिरित्थम्—

सूर्यग्रहगतिः	1080000
चन्द्र ,,	14438334
मर्करी ,,	4484265
वीनस ,,	1755594
मार्स ,,	574208
जूपिटर ,,	91055
सैटर्न ,,	36642

अशीतिसहस्रोत्तरदशलक्षवर्षेभ्यः पूर्वतः इमा ग्रहगतयो मुख्यवार्षिकगतिषु 'एकं कालचक्रं' तुल्याः स्वीक्रियन्ते; गुणनेन एकस्य च ग्रहस्य गतेः षडङ्कान् यावत् अपूर्णमंशंत्यक्त्वा, एकग्रहगतितुल्यम्, तदधिकपरिमाणं वा योजयित्वा प्राप्ता । तदेवम्—

अस्माभिः कलियुगादौ ग्रहाणां रेखायामेकस्यां मुख्यसंयोजनत्वेन स्वीकृता ज्ञाता वा या मुख्यवार्षिकगतयः, (516 एतदनुसारम्), ता अशीतिसहस्राधिकदशलक्षैः गुणिते सति इदं प्राप्येत—

१. सूर्यसिद्धान्ते महायुगकृते ग्रहगतयः प्रयुज्यन्ते स्म, यत्र चत्वारो भागाः अवश्यं स्युः, इतरथा कल्पादौ किमपि मुख्यसंयोजनं न सिद्ध्येत्, अत्र तथैवते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यग्रहगतिः	10,80,000	0_s	0°	0
चन्द्र ,,	1,44,38,333	10	25	0
मर्करी ,,	44,84,260	3	20	0
वीनस ,,	17,55,589	8	25	0
मार्स ,,	5,75,208	6	20	0
ज्यूपिटर ,,	91,052	6	0	0
सैटर्न ,,	36,644	11	10	0

एताभ्यः, एकस्याग्रहगतेः षण्णां सम्पूर्णानामपि अङ्कानां वियोगेन पुनः एकवृद्ध्या, इदं प्राप्येत—

सूर्यग्रहगतयः	10,80,000
चन्द्र ,,	144,38,334
मर्करी ,,	44,84,260
वीनस ,,	17,55,590
मार्स ,,	5,74,209
ज्यूपिटर ,,	91,053
सैटर्न ,,	36,645

गणनानुसारं यत्कालिक्य इमा गतयः सूर्यसिद्धान्तानुसारम् 8522 एतस्यानुरूपम् । तात्कालिक्यामेव गणनायां चिकीर्षितायाम्, परस्परं तुलनायां सत्याम्, अस्माभिर्बुधग्रहस्य गतय इत्थं लब्धुं शक्यन्ते—

तत्कार्यानुसारेण	5 अधिकाः
वीनसस्य	4 अधिकाः
मार्सस्य	1 न्यूना
ज्यूपिटरस्य	2 अधिके
सैटर्नस्य	3 न्यूनाः ।

इमे भेदा एव 'बीजम्' इति हिन्दूज्योतिर्विदः, सूर्यसिद्धान्तदिशा गणनया ग्रहाणां मुख्यं स्थानं परिष्कुर्वन्ति,

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेवम्—सूर्यादिग्रहाणां गतीः अशीतिसहस्राधिकदशलक्षवर्षात्मक-कालचक्रे सूर्यसिद्धान्तोदिशा[1] प्रतिष्ठाप्य, इदानीमहं प्रयते यत्कथं तावत्, कस्मिश्चित् समये, मुख्यसायनाविष्करणे चिकीर्षिते आसां प्रयोगोऽनुष्ठीयते इति उदाहरणम्—

यथा खलु कलियुगस्य 4,900 वर्षेषु गतेषु, 12, अप्रैल, 1799 दिनाङ्के सायम् चतुर्वादिनात् परम्, 51′ 40″ समयः कालः, देशश्च-पेरिसनगरस्य मध्यमभोगः, (Meridiom), एतदनुसारम्, भारताकाशे (Hindu sphare) सूर्याचन्द्रमसोर्ग्रहान्तराणाञ्च सायनज्ञानं चिकीर्षितम्। यथा खलूक्तम् तत्कालचक्रमानम् 10,80,000 वर्षात्मकम्। कलिगताब्दाश्चोक्ता, (इत्थं) पूर्वोक्तावध्वसाने मुख्यसायने आविश्चिकीर्षिते ग्रहगतय एवं भविष्यन्ति—

ग्रहगतयः

सूर्यस्य	$\frac{10,80,000 \times 4900}{10,80,000}$ =	4900	— 0^{5}	0°	0′	0″
चन्द्रमसः	$\frac{14438334 \times 4900}{10,80,000}$ =	65507	— 3	2	12	0
मर्कर्या	$\frac{4484260 \times 4900}{10,80,000}$ =	20, 345	— 3	1	20	0
वीनसस्य	$\frac{1755590 \times 4900}{10,80,000}$ =	7965	— 2	3	40	0
मार्सस्य	$\frac{574209 \times 4900}{10,80,000}$ =	2605	— 2	14	42	0
ज्यूपिटरस्य	$\frac{91053 \times 4900}{10,80,000}$ =	413	— 1	9	54	0
सैटर्नस्य	$\frac{36645 \times 4900}{10,80,000}$ =	166	— 3	3	30	0

१. त्रयोदशोत्तरसार्धैकसहस्रशकाब्दरचिते सिद्धान्तरहस्ये 'बीजम्' 'परिष्कारः 'वा इत्थं कृतम्—ग्रहगतिषु 10,80,000 वर्षाणां कृते—
मर्करी—१ | वीनस—3 | ज्यूपिटर—2 | सैटर्न—3 (योगाय)
ग्रहतरंगिणी 1530 वर्षे, सिद्धान्तमंजरी च 1531 शकाव्दे विसुहितः (Bishuhita) कृष्णवरम् (Krisna Baram) एतस्य च सारिण्यः। (एततसर्वं सूर्यसिद्धान्तानुगमेव) ग्रहाणा सायनशोधनाय बीजोपयोगः यथा—सूर्यसिद्धान्तोक्तगणनातः आविष्कृताः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यसिद्धान्तदिशा कल्पस्यैकस्य 4,32,00,00,000 वर्षेषु वा उपग्रहाणाम् 'एप्साइड्स' इत्यस्य च गतयस्तावत्—

	Apsides	Nodes
सूर्यस्य	387	×
चन्द्रमसः	4882030000	232338000
मर्कर्याः	368	488
वीनसस्य	535	903
मार्सस्य	204	214
ज्यूपिटरस्य	900	174
सैटर्नस्य	39	662

अद्य यावत् एकस्य हिन्दूवर्षस्यावधिः 365ds 15do 31' 31'' 24'' वयं स्वीकुर्मः यथा सूर्यसिद्धान्तनामके ग्रन्थे वर्तते । अन्येषां ग्रहादीनां गतिसन्दर्भे प्राचीनगणनाया आधारः अयमेव अस्ति। अत्राऽयं विचारणीयो वर्तते यद् कश्चित् भारतीयज्योतिर्विद् यदा ग्रहाणां स्थितेः विनिश्चयार्थं काञ्चित् नवीनां पद्धतिमाविष्करोति तदा तस्य कृते तस्यां पद्धतौ निर्दिष्टवर्षस्य कालावधेः ज्ञानमावश्यकम् ।

हिन्दूवर्षस्यावधेः ज्ञानस्यास्मिन् क्रमे वक्ष्यमाणस्य वस्तुद्वयस्य ज्ञानमावश्यकमस्ति ।

१—वर्षारम्भक्षणस्य ।

२—तस्य कालचक्रस्यारम्भतः तत् क्षणपर्यन्तस्य मध्यावधेः ।

प्रथमस्तु प्रेक्षणद्वारा मन्यते । समयस्य तत्क्षणं ज्ञात्वा यदा सूर्यस्य निर्धारितनक्षत्रस्य मध्यसायनः, भारतीयस्य (हिन्दू) क्षितिजस्य (Sphere) नक्षत्रनिरूपितसायनेन तुल्यमस्तीति ज्यौतिषस्यानेकेषु पुस्तकेषु सर्वैः सप्तविंशतिनक्षत्रैः सह लिखिताः उपलभ्यन्ते परन्तु अद्यावधि यानि पुस्तकानि मया अवलोकितानि तानि सर्वाणि तां पद्धतिमवगन्तुमसमर्थानि सन्ति यामाश्रित्य प्रेक्षणविधिः सञ्चाल्यते । अथवा तन्नक्षत्रं चित्रा अस्ति येन नक्षत्रविशेषेण प्रायः प्रेक्षणः सम्भवति। यच्च अस्यां स्थितौ प्रायेण स्वीक्रियते यस्य च सायनः ब्रह्मदत्तमतानुसारं अन्येषां कतिपयज्योतिर्विदां च मतानुसारं भारतीयक्षितिजे 65 3° 0' अस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाराहमतानुसारं कलियुगस्य 360 तमवर्षस्य प्रारम्भः महाविषुवतः (Vernal equireox) क्षणे अभवत् तदानीं सूर्यः स्ववास्तविक गत्यानुसारं मेषराशौ स्थितः आसीत् ।

योरोपीये भारतीये च क्षितिजे तत्क्षण सम्बन्धे (499 ईशवीये वर्षे) समानरूपेण सहमतिः अस्ति (आसीद्वा) ।

Spica इत्यस्य 1750 ईशवीये वर्षे सायनः इत्थमासीत्

= 65 20' 21' 18

अस्मात् 1251 वर्षाणि पृथक् कृते 50'' प्रति ao अनुसारम्

= 0 17 24 35

499 ईशवीये वर्षे Spica इत्यस्य सायन : = 6 2 56 43

ब्रह्मगुप्तमतानुसारं सायन x = 6 3 0 0

अनयोरन्तरम् प्रायेण = 3 17

यद्यपि सर्वाधिकोपयुक्ततुलनयाऽस्माभिरिदं ज्ञायते यद् वर्षावधेः कृते, विभिन्नग्रन्थेषु या कालगणना कृता वर्तते सा तिथिमाध्यमेन, गणनया वा । इदं स्वीकरणीयमस्ति यद् ब्रह्मगुप्तादिभिः निर्धारितः चित्रायाः सायनः अपि 50 क्षणैरधिकमस्ति ।

सूर्यः यदा मेषराशौ स्थितो भवति तदा भारतीयसारिणीषु निर्दिष्ट-माध्यमिकगत्यनुसारं तस्य सूर्यस्य सायनः प्रायेण = 0^5 2° 7' 21 भवति ।

इदानीं यदि मया गणनायास्त्रुटिं परिलक्ष्य चित्राया सायनः = 6^5 2°7 24 स्वीक्रियते तदा सूर्यनक्षत्रयोर्मध्ये सायनानामन्तरं, पूर्वमेष-स्थितमाध्यमिकगत्यनुसारं 6 अङ्कानां भविष्यति ।

सूर्यस्य नक्षत्रस्य च सायनान्तरं (दूरं वा) (माध्यमिकगत्यनुसारं वर्षारम्भ समये) यदि उक्त प्रकारेण 6 अङ्केषु भवति तर्हि तेषां स्थितिं ज्ञात्वा तत् क्षणविशेषं तदुत्तरवर्षस्य कालावधिं च निम्नप्रकारेणज्ञातुं शक्यते ।

12 अप्रैल 1799 दिनाङ्के रात्रौ 9. 45. 44 वादनात्परं सूर्यस्य मुख्यसायनः योरोपीयक्षितिजे (Spherr)

लङ्कायामध्ये भविष्यति (S11) = 0s 20' 52' 28'' 5

तस्य केन्द्रसमीकरणम् + 0 1 52 45

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यस्य वास्तविकसायनः	=0 22 45 13 5
Spica या तात्कालिकः सायनः	=6 21 2 32 5
सूर्यनक्षत्रयोर्मध्यस्य सायनान्तरम्	=5 28 17 19
द्वयोरन्तरेण	=6 0 0 0
अवशिष्टसायनः	=0 1 42 41
समयज्ञानार्थं पूर्वावस्थामानीतम्	=I day 44 do 46 44

इदानीं कलियुगारम्भतः उपर्युक्तव्यतीतक्षणं यावत् समयः भविष्यति–

(S 11)	=1789767 दिनम् 54 do 24'20''
ऋणकरणेन =	1 44 46 44
लब्धम्	=1789766 9 37 36

अथवा तत्क्षणं (यत् प्राप्तम्) यस्मिन् कलियुगारम्भे माध्यमिकगत्यनुसारं सूर्यः नक्षत्राणि च परस्परं 6 अङ्काना परिमाणे भविष्यन्ति एवं 4900 अङ्केन भाजिते प्राप्ता संख्या कलियुगस्य विगतवर्षाणि सूचयिष्यति। इत्थं वयं प्राप्स्यामः—

$$\frac{1789766 \quad 9 \; 37 \; 36}{4900} = 365 \text{ day } 15 \text{ do } 30' \; 14° \; 25''$$

अयं 1799 ईशवीयहिन्दूवर्षस्य लम्बमानः (अवधिर्वा) वर्तते। अनयारीत्या सूर्यस्य चित्राया दूरी वस्तुतः 6 अङ्केषु वर्तते यदा सः स्वीयमध्यगत्यनुसारं मेषोपरि गच्छति।

योरोपीयज्योतिर्विदां मतानुसारं सूर्यः कस्यापि निर्दिष्टनक्षत्रस्य भ्रमणं पुनः (तयागत्यैव) 365 दि० 6 घंटे 9' 11'' 36 पूरयति यत्तन्नक्षत्रसम्बन्धी वर्षमानमस्ति। यद्यपि तन्नक्षत्राधारितवर्षस्य समाप्तौ सूर्यः Spica इत्यस्य सापेक्षः पुनः तस्यामेव स्वीयदशायां गच्छति अत एवायं द्रष्टव्यः यद् योरोपीयनक्षत्रवर्षापेक्षया भारतीयवर्षः, किंचिद् लम्बायमानः अधिको वा कथमस्ति ? अस्य कारणज्ञानाय इदमवधेयम् यदुपर्युक्तनिर्दिष्टकाले यस्मिन् सूर्यनक्षत्रयोर्मध्ये ६ अङ्कानांमन्तरं भवति तस्मिन्नेव काले कलियुगस्य गतदिनसंख्या पूर्वोक्तवत् =1789766 9 37 36 भवति

परन्तु 4900 नक्षत्रवर्षाणि केवलम्	=1789756 16 58 0 कुर्वन्ति
द्वयोरन्तरम्	= 9 52 39 36

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रेदमवधेयम् यदिदानीं यावत् कलियुगस्य व्यतीतानां दिनानां संख्या 4900 नक्षत्रवर्षाणां संख्यया प्राय: 10 दिनान्यधिकानि सन्ति। इदमन्तरं व्यतीतेषु वर्षेषु विभक्ते सति (अनुक्तमपि) हिन्दूवर्षाणि योरोपीग्रनक्षत्रवर्षापेक्षया दीर्घतरा भविष्यन्ति ।

अत्रापि कस्यापि प्रदत्तसमयार्थं हिन्दूवर्षस्यमानम् अधोलिखितसूत्रेण यथावत् प्राप्तुं शक्यते ।

मन्यते d = 9 days 52 do 39′ 36″

S = 365 15 32 59 नक्षत्रवर्षम्

H = हिन्दू (भारतीय) वर्षस्यावधि:

N = कलियुगस्य व्यतीतवर्षसंख्यां प्रकटयन्ति ।

तर्हि (सूत्रम्) $S+\frac{d}{n}=h$

एवम् $\frac{d}{h-s}=n$

अनेन $S+\frac{d}{n}=h$ इति सूत्रेण विभिन्नसमयेषु हिन्दूवर्षावधिं प्रदर्शयन् निरीक्षणमाध्यमेन निम्नाङ्किता सारिणी परिगणिता अस्ति ।

प्रथमा वैशाखमासे	3601	ईशवीये	499	365 days	15do	32′	51″	39‴
	3701	”	599	—	15	32	35	38
	3801	”	699	—	15	32	20	28
	3901	”	799	—	15	32	6	4
	4001	”	899	—	15	31	32	24
	4101	”	999	—	15	31	39	23
	4201	”	1099	—	15	31	26	59
	4301	”	1199	—	15	31	15	11
	4401	”	1299	—	15	31	3	54
	4501	”	1399	—	15	30	53	7
	4601	”	1499	—	15	30	42	49
	4701	”	1599	—	15	30	32	57
	4801	”	1699	—	15	30	23	29
	4901	”	1799	—	15	30	14	25

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इमामाश्रित्य भारतीयवर्षमानस्याधारभूतानां सिद्धान्तानां सम्यक् व्याख्यां कर्तुं शक्यते। यद्यपि तत्र (अयनांशद्वारा वर्षमानस्य गणनाया) अन्या विधिः अस्ति यां विधिमिदानीं वक्ष्यामि।

पूर्वमेवास्माभिरवलोकितम् यद् वाराहमतानुसारं कलियुगस्य 3601 तमः वर्षः, महाविषुवस्य (हरिपदस्य वा) क्षणेनैव 499 तमेशवीयवर्षतः प्रारब्धो वभूव। तेनैव ज्योतिर्विदा एकस्मिन् वर्षे 54" इत्यस्यायनांशमपि निर्धारितम्। अतः भारतीयान् योरोपीयान् वा क्षितिजानवलोक्य वाराहमतानुसारंमयनांशनिर्धारिते सति अयं 1799 तमेशवीयवर्षस्य लम्वमानः अस्ति।

अस्यां प्रक्रियायां हिन्दूवर्षस्य यो अवधिः (लम्वमानो वा) ज्ञायते तत् चित्राया स्थितिमाश्रित्य कृतेन ज्ञानेन किचिन्न्यूनाधिक्यमस्ति। द्वेऽपि पद्धतीऽमे सप्ताष्टशतवर्षपूर्वस्यास्य वर्षमानमवधिं वा समर्थयतः यो हि कतिपयहिन्दूपुस्तकेषु कृतगणनया तासां प्रमाणे चायं सिद्ध्यति यद् वाराहः कश्चिदासीद्यो ऐतेषां प्रेक्षणानां निर्माणमकरोत्।

वर्षस्य इमामवधिं, चित्रायाः स्थितिद्वारा अयनांशनिर्धारणद्वारा वा (उपर्युक्तः अनुच्छेदः द्रष्टव्यः) निर्धारणानन्तरं हिन्दूज्योतिर्विद्भ्यः (यदि सः सूर्यसिद्धान्तपद्धतेरनुगमनोत्सुकः अस्ति) यत् करणीयं भवति तदयं यत् 10,80,000 वर्षाणां चक्रस्यैकस्य दिनसंख्या ज्ञानम्। वर्षस्यावधि चक्रेण सह गुणनेन एतत् क्रियते। यथा मन्यते 1799 ईशवीयवर्षस्यमानं चित्राया स्थितिगणनया = 365 days 15 do 30' 14" 25''' भवति। इमम् 10,80,000 इत्यनेन गुणनेन वयं प्राप्स्यामः 394479072। इयं तत्कालचक्रदिनानां निकटतमा संख्या अस्ति।

सूर्यसिद्धान्तमतेन कल्पारम्भः रविवासरतः भवति यो हि सप्ताहस्य प्रथमदिनं मन्यते एवं वर्तमानस्य कलियुगस्यारम्भः शुक्रवासरतः भवति। अतएव कल्पविचारार्थं उपर्युक्तकालचक्रे दिनानां निर्धारिता संख्या इत्थं निर्धारितव्या यथा चक्रस्य प्रथमं दिनम्, यस्मिन् वयं स्मः, शुक्रवासर एव भवेत्। कलियुगस्यारम्भकाले 1811 कल्पाः व्यतीताः। सम्मेलनक्षणं ज्ञात्वा अयनांशानां च गतिक्रमं ज्ञात्वा तदनन्तरं अनायासेन तं क्षणं ज्ञातुं शक्यते यदा हिन्दूवर्षस्य भारतीयवर्षस्य वा प्रारम्भः सम्भावित आसीत्। एतदर्थं भारतीयक्षितिजे मेषस्य प्रथमविन्दुतः अयनांशविन्दोः मापः (दूरी) सर्वदा सम्पूर्णनिर्धारणेन तुल्यं भवितुमर्हति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा—कलियुगस्य 4900 वर्षाणां समाप्तौ 54 इति वार्षिकायनांश-निर्धारेण 19^0 30' भविष्यति यः उपर्युक्तसिद्धान्तानुसारं हिन्दूवर्षारम्भ-क्षणानां वास्तविकगत्यनुसारेण योरोपीयक्षितिजस्य सूर्यस्य सायनं भवितु-मर्हति ।

सूर्यस्य वास्तविकसायनः (12 एप्रिल 1799 दिवसे सायं 4 51 40 वादने पेरिस मध्ये योरोपीयक्षितिजे)

भविष्यति (SS 39)	=	05	22^0	45'	13"	5
निर्धारणऋणकरणेन	=	0	19	30	0	
प्राप्तं भविष्यति (शेषः)	=		3	15	13	5
यद् वास्तविकगतीनां समयस्य ऋणकरणेन भविष्यति	=	3 ds	19do	21		02"
कलियुगस्य गतसमयऋणकरणेन(SS)	=	1789767ds	54do	24	20	
ऋणं कृतम्	=		3	19	21	02
तदा भारतीयवर्षस्यारम्भकालः प्राप्तः	=	1789764	35	3	18	
सूर्यस्य केन्द्रे संलग्नः समयः (हिन्दूसमीकरणसंरक्षणेन)	=		2	10	12	40
मुख्यगत्यनुसारं मेषे गते सूर्ये	=	1789766	45	15	58	

4900 वर्षैः, या चक्रस्यैकस्य विगतः वर्षाणां संख्याः सन्ति, विभक्ते सति वयं प्राप्स्यामः

$$\frac{1789766 \text{ days } 45 \text{ do } 15'58'}{4900} = 365 \text{ days } 15\text{do } 30'\ 40''36'''$$

तेषु सप्तसंख्यया भक्तेन 5 युक्तेन प्रतिचक्रं सप्ताहस्य पूर्णा संख्या भवेत् शेषञ्चैकं भवेत् येन वर्तमानयुगस्य प्रारम्भदिवसः शुक्रवासरः संभवति ।

10,80,000 वर्षस्य चक्रे चन्द्रमसः ग्रहगतिसंख्या एवं तस्य कालस्य मुख्यसौरदिवससंख्या च परस्परं इत्थं समायोजितव्यम् येन प्रेक्षणद्वारा सूर्यचन्द्रमसोः सापेक्षस्थितिरपि स्वीकार्या भवेत् । ग्रहाणां सापेक्षस्थितेः पूर्णतया ज्ञानं यावत् अयं दिनानां न्यूनाधिक्यतया चन्द्रमसः गत्या उभाभ्यां वा प्रभावितो भवति । सप्ताहदिवसक्रमकल्पारम्भदिवसात् भिन्नं दिनानां-मिदं समायोजनं सप्ताहेषु पूर्णं कर्त्तव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

10,80,000 वर्षाणां चक्रे स्वीकृतम् यद् चन्द्रमसः ग्रहगतयः उक्तदिन-संख्ययानुरूपं 1,44,38321 अस्ति। किन्तु संख्येयम् 1799 ईशवीये वर्षे सूर्यचन्द्रमसोः सापेक्षां स्थितिं न प्रदर्शितवती। भारतीयज्यौतिर्विदां मतेन सत्यं प्रायः तेनाधिकं वा 3' 20'' 5 भवितु मर्हति। किन्तु अस्मादधिकं शुद्धेः स्वीकारात्पाक् मया गणनया इदं ज्ञायते यद् ग्रहद्वयस्य गतीः अस्मिन् संयोज्य चक्रस्य दिवससंख्या 6.3 सप्ताहमेकं वा अधिकं कर्तव्यम् येन समायोजिता ग्रहगतिसंख्या 14438323 इत्यनया तुल्यं भवेत्, दिनानां सम्बन्धे च 394479135 भवेत्, सूर्यचन्द्रमसोः सापेक्षस्थितिरपि अन्य-सापेक्षं भवेत्। अनेन योरोपीयसारिणीतः 6 इत्यस्य निकटतमेन सत्येन भारतीयापद्धतिः शुद्धतरा भवितुमर्हति।

अनेन 10,80,000 वर्षाणां कालचक्रे मुख्यसौरदिवससंख्या परिणामतः इत्थं समायोजिता भवति यथा वर्षस्यैकस्यावधिं लभामहे $\frac{394479135}{10,80,000} =$

365 doys 15 do 30' 27'' एवम् यदा हिन्दूक्षितिजे सूर्यः मेषे गच्छति (1799 ईशवीये) तदा मुख्यगत्यनुसारेण कलियुगस्यारम्भसमयः =

$\frac{394479135 \times 4900}{10,80,004} = 1789766$ days 26 do 45 भवति।

उपर्युक्ताः शुद्धयः वर्षमानं किञ्चिदधिकं कुर्वन्ति। वयं अस्यारम्भ-समयादीन् चित्राया स्थितिकालात्त्र्ऋणं कुर्मः किन्तु सूर्याचन्द्रमसोः सापेक्ष-स्थितिं पूर्णतया शुद्धरूपेणावगन्तु तेषां सन्धिकालस्यगणनार्थं ग्रहणाद्यर्थं च भारतीयज्यौतिषविज्ञाने कोप्यभिप्रायो नास्ति।

ग्रहाणां मुख्यसायनप्रेक्षणद्वारा वर्षारम्भकालनिर्धारिते सति तेषां मुख्यवार्षिकगतयस्तदा पृथक् क्रियन्ते (यथा उपर्युक्तेष्वनुच्छेदेषूक्ताः)।

10,80,000 वर्षाणां चक्रेषु ग्रहगतयः इत्थं प्राप्यन्ते—

सूर्यस्य	=	10,80,000
चन्द्रमसः	=	1,44,38,323
मर्क्यूरीः	=	44,84,258
वीनसस्य	=	17,55,589
मार्सस्य	=	5,74,209

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जूपिटरस्य	=	91,053
सैटर्नस्य	=	36,646
दिनानि	=	39,44,79,135

एवं एकस्मिन् कल्पे 4,32,00,00,000 वर्षेषु वा उपग्रहाणां मन्दोच्छादिनां च गतयः अधोलिखिताः भविष्यन्ति—

उपग्रहाः (Apsides)				प्रतिक्रममन्दोच्छाः (Modes)		
सूर्यः	=	11985	सीधा	.....	=	232308827
चन्द्रः	=	488114797	वही	.....	=	340671
मर्करी	=	8014	प्रतिगमित	.....	=	299081
वीनसः	=	33076	वही	.....	=	286659
मार्सः	=	28977	सीधा	...	=	315916
ज्यूपिटरः	=	6751	प्रतिगमित	.....	=	297301
सैटर्नः	=	24642	सीधा			

चक्रे सूर्यस्य ग्रहगतिः 10,80,000, तात्कालिकचन्द्रमसः मुख्यगते—

रुद्धृता 1,44,38,323 चन्द्रगतेः संख्या, चेत्यनयोरन्तरम्=1,33,58, 323 इति 30 इत्यनेन गुणिते सति =40,07,49,690 तिथीनां चान्द्र-दिवसानां च संख्या भवति । एवम् 40,07,49,690—39,44,79,135

=62,70,555 चक्रे चान्द्राधिदिवसाः ।

निश्चितग्रहाणां नक्षत्रदिवससंख्या वा व्यक्तग्रहगतिः भविष्यति ।

यथा = 394479135 + 1080000 = 395559135

चन्द्रमसः कालिकीगतिः तत्समयो वा यस्मिन् स मेषराशेरेकविन्दुतः गत्वा पुनस्तत्रैवागच्छति ।

$=\frac{394479135}{14438323}=$ 27 days 19 do 18' 1'' 17 इत्यादयः

तस्य चान्द्रगतिः—

$=\frac{394479135}{13358323}=$ 29 do 31 days 50' 7'' 02'''

अथवा योरोपीयविधिना 29 do 12 hs 44' 2'' 49''' इत्यादयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यच्चान्द्रगणनाकृते De-La-Lande इत्यस्य सारिण्यः 19 तमखण्डस्य अन्यरुप इव न सन्ति ।

चक्रैकस्य दिवससंख्यायां प्रत्येकं ग्रहगतिं भक्त्वा ग्रहकालिकगतिषु तस्मिन्नेव क्रमे रक्षितुं शक्यते स्म ।

इदानीं पद्धतिरियं पूर्णा जाता । सूर्यस्य चन्द्रमसः अन्येषां ग्रहाणां च सायनादयः उपर्युक्तग्रहगतिभिः ज्ञातुं शक्यते । ताश्च पूर्वमेव व्याख्याताः । वास्तविकसायनादयः तेनैव समीकरणेन स्पष्टी क्रियन्ते ।

भारतीयग्रन्थेषु ग्रहकक्षासन्दर्भे ये समीकरणाः उपलभ्यन्ते, ते योरोपीयजनेभ्यःभिन्नप्रकारेण सन्ति । तेषु केचित् स्वगणनाप्रकारैः, केचित् भारतीयप्रेक्षणाल्पत्रुटिभिः, केचित् च स्वप्राचीनताभिः ।

प्रायेण सर्वे भारतीयज्योतिर्विदः, कतिपयवर्षाणि पूर्वं, यदा तान् प्राचीनकालिकग्रन्थाः उपलब्धाः जाता, तेषूल्लिखितान् समीकरणान् यथावत् गृहीत्वा तैनेव सन्तुष्टा अभवन् । ते समीकरणाः वर्षशतानि पूर्वं वाराहेण लिखिताः एवं (वाराहेण) स्वपूर्वकालिकज्योतिर्विद्भिः निर्मितग्रन्थैः गृहीताः आसन् । ते समीकरणाः भारतीयज्यौतिर्विद्भिरपि सामान्यतया प्रयोगेषु गृहीता सन्ति ।

वाराहेण ग्रहणस्य वक्रता 24° अंशोपरि स्वीकृता, भारतीयज्यौतिर्विदः तत्कालादेव तस्य मात्रां स्वीकुर्वन्ति किन्तु ग्रहणस्य वक्रता 24° अंशोपरि अस्तीति प्रथमवक्ता वाराह एव नासीत् अपितु तस्मात् 500-600 वर्षाणि पूर्वं ब्रह्मदत्तेनापि इत्थमेवोक्तमासीत् एवं ततोऽपि पूर्वं इत्थमुक्तं भविष्यति । हिन्दूज्यौतिर्विद्, येन पूर्वं ग्रहणानां वक्रता दृष्टा एवं 24° अंशोपरि निर्धारिता इति उपर्युक्त सिद्धान्तेन सह यद्यपि मम सहमतिर्नास्ति तथापि सः (ज्योतिर्विद्) पूर्वसमये, यदा प्रथमं वक्रता जाता जीवित आसीत् किम् ?

इदं सर्वविदितमस्ति यदपेक्षितोपकरणसाहाय्येन प्रेक्षणसम्बन्धी त्रुटीरुपेक्ष्य भारतीयज्योतिर्विदः विवादास्पदपरिणाममस्वीकर्तुं सर्वत्र नियममिमं अनुसरन्ति, येनासामान्यत्रुटेः सम्भावनैव न भवति । एतादृशस्थले निकटतमां संख्यां गृह्णान्ति तेन यदि प्राक्तन ज्योतिर्विद् ग्रहणवक्रतां 23° 30° अंशादधिकं गृह्णाति तदा इमे तां वक्रतां 24° अंशं वदन्ति । तेषामुद्देश्यपूर्त्तये इदं पर्याप्तमस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव कस्यापि भारतीयज्योतिर्विद्यायाः प्राचीनताया अन्वेषणे ग्रहकक्षासमीकरणपरिमाणम् तेषां ग्रहणवक्रतादिपरिमाणञ्च त्यक्तव्यम् यतः तानि न केवलमुद्देश्यार्थमशुद्धानि सन्ति अपि तु भ्रान्त्युत्पादकान्यपि। यथा मया पूर्वानुच्छेदे उक्तम् यानि प्राक्तनज्योतिर्विदां ग्रन्थेभ्यः गृहीतानि सन्ति एवं प्राक्तनज्योतिर्विदां कार्येषु लघुतमांशमपि योगं न कुर्वन्ति, तानि स्थानात्स्थानान्तरं उल्लिख्यन्ते।

भारतीयज्योतिर्विदः अपेक्षितोपकरणानामभावेऽपि अदृश्यानां ग्रहाणां गतिं स्थितिञ्च कथयन्ति। इत्थं तेऽपि त्यक्तव्याः।

इत्थम् भारतीयपद्धतीनां पूर्णं सुसङ्गतं च दृष्टिकोणं समुपस्थाप्य तासां निर्माणम् तेषा ऐन्द्रजालिकं व्यामोहं च कथयित्वा इदानीमहं सूर्य-सिद्धान्तस्य प्राचीनताविषये वक्ष्यामि।

भारतीयज्योतिर्विज्ञानस्य प्राचीनताया अन्वेषणस्य सर्वशुद्धं सुनिश्चितं च मार्गमिदमस्ति यद् तैः भारतीयज्योतिविद्भिः ग्रहगतीनां स्थितिनां च या गणनाकृता तासां तुलना योरोपीयविद्वद्भिः प्रवर्तिताभिःसारिणीभिः सह कुर्यात्।

एतदर्थमयं द्रष्टव्यः यद् प्रत्येकः ज्योतिर्वैज्ञानिकः स्वकीयं सिद्धान्तं, काल्पनिकं वास्तविकं वा, समुपस्थापयति न वा, तत्कालिकग्रहाणां वास्त-विकीं स्थिर्ति कथयति न वा, अथवा तस्य पद्धतिः यथा निर्दिशति तथा करोति न वा। यदि इत्थं नास्ति तर्हि तस्य श्रम एव व्यर्थः भवेत्। अतः सूर्यस्य चन्द्रमसः अन्येषां ग्रहाणां च गतिं स्थितिं च निरूप्य भारतीयवास्त-विकपद्धतिषु गणनया प्राप्तस्य कस्यचित् क्षणस्य, शुद्धरूपेणाकलितयोरोपीय-सारिणीस्थितिग्रहस्थितिगतिभिः सह, तुलनां कृत्वा वयं तान् विन्दून् तदा लब्धुं शक्नुमः यदा तेषां स्थितिः यथापूर्वं भवेत्।

सूर्यसिद्धान्तानुसारं चन्द्रमसः गतिः 100 वर्षेषु = 365 ds 15 do 31' 31'' 24''' प्रतिवर्षानुसारम् डी. ला. लाण्डे इत्यस्य मतेन

$$= \frac{488203 \times 100}{4320000} = 11 \text{ Yer } 3^{do}\ 18^{\circ}\ 12'\ 30''$$ भविष्यति

अस्मिन्नेव दिक्काले भारतीय आकाशः (Space) इत्यस्मिन् भविष्यति = 11 yer 3° 17° 39'' 19''' 1

द्वयोरन्तरम् = 42'' 10''' 9

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यसिद्धान्तस्यलेखकेन यदा सूर्यसिद्धान्तमलिखत् तदा चन्द्रमसः स्थितिं गतिं च वास्तविकरूपेण लिखितं भविष्यति इति स्वीकृते सति इदं ज्ञातव्यं यद् 100 भारतीयवर्षेषु व्यतीतेषु उपर्युक्तदिक्कालगणनायां 42′ 10″ 9 इत्यस्य वृद्धिर्भविष्यति, अनन्तरं 200 वर्षेषु व्यतीतेषु द्विगुणितावृद्धिर्भविष्यति, इत्थमग्रिमवर्षेषु सत्यामगणनात्मकस्थितौ क्रमशः वृद्धिः भविष्यत्येव। अतः सूर्यसिद्धान्तस्य प्राचीनताया ज्ञानस्यास्मिन् क्रमे अस्माभिरिदमन्तरमवश्यं ज्ञातव्यम् येन उपर्युक्तस्य (42′ 10″ 9) अन्तरस्य भागम् दत्त्वा वयं व्यतीतस्य तस्य दिक्कालस्य ज्ञानं करिष्यामः यदा सूर्यसिद्धान्तः लिखितः अभूत्।

इत्थम् सूर्यसिद्धान्तानुसारं कलियुगस्य 4900 वर्षेषु व्यतीतेषु चन्द्रमसः सायनः भविष्यति $= \dfrac{1955384900 \times 488203}{4320000}$

$= 221034661$ Rev. 11″ 29° 33′ 30″

भारतीय आकाशे

डि. ला. लाण्डे इत्यस्य सारिण्याम् (530) 11 25 18 1, 08

अन्तरम् $= 4\ 15\ 28,\ 2$

100 इत्यनेन गुणितेन प्रतिशताब्धन्तरेण भागकरणेन, भविष्यति

$= \dfrac{4\ 15\ 28\ 2 \times 100}{42.\ 10.\ 9} = 986$ वर्षाणि।

अनया प्रक्रियया एतानि वर्षाणि पूर्वं सूर्यसिद्धान्तः लिखितः अभूत्।

चन्द्रमसः 100 वर्षेषु आरोहणगतिः सूर्यसिद्धान्तानुसारम्

$= \dfrac{232238 \times 100}{4320000} = 5$ Rev. 4ˢ 15° 19′ 0″

हिन्दू आकाशे डी. ला. लाण्डे इत्यस्य सारिण्यनुसारम्

भविष्यति $=$ 4 15 51 48, 7

अन्तरम् (पूर्वस्य न्यूनं भविष्यति) $= 32,\ 48,\ 7$

चन्द्रमसः पूर्वसायनः कलियुगस्य 4900 वर्षेषु व्यतीतेषु भविष्यति

$= \dfrac{1955884900 \times 232238}{4320000} = 105146017$ Rev.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(चक्रम्) 11ˢ 0° 31′ 0

डी. ला. लाण्डे इत्यस्य सारिण्यनुसारं भारतीय आकाशे भविष्यति

(S 30) = 11 3 41 31 3

अन्तरम् (पूर्वस्य न्यूनं भविष्यति) = 3 10 31 3

$$\text{इदानीम्} = \frac{3^\circ\ 10'\ 31'',\ 3 \times 100}{32\ \ 48\ \ 7} = 955 \text{ वर्षाणि ।}$$

अनयारीत्या 955 वर्षाणि पूर्वं सूर्यसिद्धान्तः लिखितोऽभूत् ।

परन्तु अत्र पूर्वप्रक्रियातः 31 वर्षाणामन्तरमस्ति ।

भारतीयशताब्द्यां सूर्यसिद्धान्तानुसारं सूर्यस्य गतिः भविष्यति

$$= \frac{387 \times 100}{4320000000} = \quad 0^s\ 0^\circ\ 0'\ 11'\ 6'$$

डी० ला लाण्डे इत्यस्य सारिण्यनुसारम्

भारतीयाकाशे इदं भविष्यति = 0ˢ 0° 5 47 6

द्वयोरन्तम् = 5 36 0

सूर्यसिद्धान्तानुसारं कलियुगस्य 4900 वर्षेषु व्यतीतेषु सूर्यस्य सायनः

$$\text{भविष्यति} = \frac{1955884900 \times 387}{4320000000} = 175 \text{ (चक्रम्) } 2^s\ 17^\circ\ 17\ 16''\ 4$$

भारतीयाकाशे डी० ला लाण्डे इत्यस्य सारिण्यनुसारम्

(∫∫30) = 2 18 35 49 8

ऋणकरणेन न्यूनं भविष्यति = 1 18 33 4

$$\text{इत्थम्} \ \frac{1^\circ\ 18'\ 33''\ 4 \times 100}{3\ \ \ 36} = 1105 \text{ वर्षाणि ।}$$

अनया प्रक्रियया सूर्यसिद्धान्तस्य लेखनावधिः 1105 वर्षाणि ।

सूर्यसिद्धान्तस्य लेखकेन बुधग्रहस्य स्थितेः यदाकलनं कृतं तत्त्रुटिपूर्णमस्ति । सम्भवतः सूर्यस्यनिकटस्थितस्याप्यस्य आगमने 1454 वर्षाणि व्यतीतानि भवन्ति । प्राक्काले योरोपीयसारिण्यः सूर्यसिद्धान्तश्चेत्येतौ एकामेवस्थितिं' प्रदर्शितवन्तौ किन्तु पश्चात् कतिपय-असमानताया कारणेन योरोपीयखगोलवैज्ञानिका इमां गतिं नावलोकितवन्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य ग्रहस्यसूर्यसिद्धान्तानुसारं 100 वर्षेषु गतिः ।

$$=\frac{4484265 \times 100}{10,80,000} = 415 \text{ (चक्रम्) } 2\ 15^\circ\ 30'\ 0''$$

डी. ला. लाण्डे इत्यस्य सारिण्यनुसारं भारतीयाकाशे

अस्य स्थितिः $= 2^5\ 16^0\ 1'\ 34'',\ 3$

अन्तरम् $=\ 31'\ 34''\ 3$

कलियुगस्य 4900 वर्षेषु व्यतीतेषु बुधस्य सायनः

$$\text{सूर्यसिद्धान्तानुसारम्} = \frac{4484265 \times 4900}{10,80,000} =$$

$$20345 \text{ (चक्रम्) } 3^5\ 9^\circ\ 30'\ 0''$$

डी. ला. लाण्डे इत्यस्य सारिण्यनुसारं भारतीयाकाशे

$= 3^5\ 1^\circ\ 50'\ 13'',\ 5$

अन्तरेण अधिकं भविष्यति $=\ 7\ 39\ 46\ 5$

इदं विवादास्पदमस्ति एवं प्रेक्षणे कृते सति मान्योऽस्ति ।

सूर्यस्य मुख्यगतिः भारतीयशताब्दीवर्षे भविष्यति

$$\text{सूर्यसिद्धान्तानुसारम्} = \frac{1755594 \times 100}{10,80,000} = 162 \text{ चक्रम् } 6^5\ 19^0\ 48'\ 0''$$

अर्थात् भारतीयाकाशे डी. ला लाण्डे इत्यस्य सारिण्यनुसारं

भविष्यति $= 6\ 18\ 59\ 23\ 5'$

अन्तरेण भविष्यति $=\ 48\ 36\ 5$

कलियुगस्य 4900 वर्षेषु व्यतीतेषु मुख्यसायनः सूर्यसिद्धान्तानुसारम्

$$= \frac{1755594 \times 4900}{1080000} = 7965 \text{ चक्रम् } 2^5\ 10^0\ 12'\ 0''$$

डी. ला. लाण्डे इत्यस्य सारिण्यनुसारम् भारतीयाकाशे

$= 2^5\ 3^0\ 13'\ 45'',\ 5$

द्वयोरन्तरेण भविष्यति $=\ 6\ 58\ 14,\ 5$

$$\text{इत्थम्} = \frac{6^0\ 58'\ 14'',\ 5 \times 10}{48\ 36,\ 5} = 860 \text{ वर्षाणि}$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यसिद्धान्तस्यानया क्रियया ।

मङ्गलस्य मुख्यगतिः भारतीयशताब्दीषु सूर्यसिद्धान्तानुसारम्

$$=\frac{574208 \times 100}{10,80,000} = 53 \text{ चक्रम् } 2^{5}\ 0^{0}\ 16'\ 0''$$

डी. ला. लाण्डे इत्यस्य सारिण्यनुसारम् भारतीयाकाशे भविष्यति–

$$= 2^{5}\ 0^{0}\ 31'\ 55''$$

अन्तरेण भविष्यति $= 15', 55''$

4900 वर्षेषु व्यतीतेषु मुख्यसायनः सूर्यसिद्धान्तानुसारम्

$$=\frac{574208 \times 4900}{1080000} = 2605 \text{ (चक्रम्) } 2^{5}\ 13^{0}\ 4'\ 0''$$

डी. ला. लाण्डे इत्यस्य भारतीयाकाशसम्बन्धीसारिण्यनुसारम्

$$= 2^{5}\ 13^{0}\ 58'\ 11'', 5$$

द्वयोरन्तरम् $= 54'\ 11'', 5$

$$\text{इत्थम्} = \frac{54'\ 11'', 5 \times 100}{15'\ 55''} = 340 \text{ वर्षाणि}$$

अस्मात् पूर्वं सूर्यसिद्धान्तानुसारम् ।

सूर्यचन्द्रगुरूशनिग्रहाणां मुख्यगतयः याः खगोलविद्भिः प्राप्ताः सन्ति, तत्तद्ग्रहाणां पारस्परिकाकर्षणेन नैकरूपाः सन्ति अत एव अग्रेगमनात् प्राक् अत्र M. De La Grangr, De Lo plas इत्यादिभिर्ज्योतिर्विद्भिरुक्तं सूत्रकथनमावश्यकं भविष्यति, येन आसामसमानतानां गणना भवेत् ।

सूर्यस्य कृते

स्वीक्रियते यद् N एतादृशी संख्या अस्ति या 1750 ईशवीयवर्षतः पूर्वेषां वर्षाणि ज्ञापयति, एवं $N^{2} \times 00018408''$ उक्तासमानताभिः तुल्यं भविष्यति या डि. ला. लाण्डे इत्यस्य सारिण्यां योजनाय तस्या परिणामेऽस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रमसः कृते

स्वीक्रियते यद् N एतादृशी संख्या अस्ति या 1700 ईशवीयपूर्व-वर्षाणि व्यक्तीकरोति तत् N^{2^x} 00III355—N^8 000000044 तामस-मानतां प्रदर्शयिष्यति यां विषयेऽस्मिन् संयुज्यते ।

गुरोः कृते

स्वीक्रियते यद् N एतादृशी संख्या अस्ति या 1750 ईशवीयवर्षतः प्राक्तनवर्षाणि प्रगटीकरोति । J इति गुरोः मुख्यसायनः S इति शनेः मुख्य-सायनः मन्यते चेत् + (20'49"–5–NO",042733) Sira (S–2 J+ 5°34'8"—N 58", 88) असमानतां व्यक्तं करिष्यति ।

शनेः कृते

स्वीक्रियते यद् J एवं S पूर्ववत् स्तः र्तहि,—(48' 44– N O", I) Sira (5 S–2 J+5° 34' 8"—N 58",88) असमानतां प्रकटिष्यति ।

वयं सूर्यस्य गतिस्थितिभ्यां सूर्यसिद्धान्तस्य कालम् अधोलिखित-रीत्या 759 वर्षाणीति लभामहे ।

4900 – 759 = 4141 कलियुगस्य वर्षाणि

चन्द्रमसः मुख्यसायनः 4141 वर्षाणि कलियुगस्य कृते

सूर्यसिद्धान्तानुसारम्, $= \frac{14438334 + 4141}{1080000} = 55360$ (चक्रम्)

$3^5\ 23^0\ 41'\ 52''\ 48''$

4900 वर्षेषु व्यतीतेषु डी. ला. लाण्डे इत्यस्य सारिण्यनुसारं भारतीयाकाशे $3^5\ 2^0\ 2'\ 40''$ 48 = 759 भारतीयवर्षाणि आकाशीय-स्थितिश्च

सम्मेलनेन च $= 11^5\ 8^0\ 27'\ 45''\ 16'''$

कलियुगस्य 4141 वर्षेषु व्यतीतेषु सायनः

$= 3^5,\ 23^0,\ 34'\ 55''\ 32'''$

660 वर्षाणां कृते प्रतिसूत्रानुसारं चन्द्रमसः गतीनामसमानतानां योगकरणेन = 752 24, 7

३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धमुख्यसायनः = 3 23 42 47 56, 7

710 वर्षाणां कृते सूर्यस्य मुख्यगतेरसमानताऋणकरणेन=54, 38, 7

चन्द्रमसः मुख्यसायनः भारतीयाकाशे भविष्यतिः

= 3 23 41 53 17, 9

सूर्यसिद्धान्तेन सहमतौ क्षणार्धम् = 29, 9

अथवा

योरोपीयाकाशे अधोलिखितः प्रकारः प्राप्तुं शक्यते ।

कलियुगस्य 4900 वर्षेषु व्यतीतेषु चन्द्रमसः मुख्यसायनः—

डी. ला. लाण्डे. इत्यस्य सारिण्या योरोपीयाकाशे

(S 11) = 3^s 22° 55′ 9″ 18‴

योरोपीयाकाशे 759 भारतीयवर्षाणां गत्युद्धृतेन

= 11^s 20° 49′ 56″ 25‴ 77

कलियुगस्य 4141 वर्षेषु व्यतीतेषु मुख्यसायनः—

= 4^s 2° 5′ 12″ 52‴ 2

660 वर्षाणां कृते सूत्रानुसारं असमानताया योगकरणेन

= 7′ 52″ 24‴ 7

योरोपीयाकाशे 4141 वर्षेषु व्यतीतेषु शुद्धमुख्यसायनः

= 4^s 2° 13′ 5″ 16‴, 9

इदानीमुपर्युक्तानुसारं भारतीयाकाशे ऋणक्रमे अस्माभिः तत्कालीन-सूर्यस्य मुख्यसायनः प्राप्तव्यः । कलियुगस्य 4900 वर्षेषु व्यतीतेषु सूर्यस्य मुख्यसायनः ।

डी. लाण्डे इत्यस्य सारिण्यनुसारं योरोपीयाकाशे =

(S 11) 0^s 20° 52′ 28″ 30‴

759 भारतीयवर्षाणां गतिं रक्षणेन =	0 12 22 11 9, 7
4141 वर्षेषु व्यतीतेषु सूर्यस्य मुख्यसायनः =	0 8 30 17 20, 2
710 वर्षाणां कृते सूत्रानुसारमसमानतां रक्षणेन =	54 38 8
योरोपीयाकाशे शुद्धमुख्यसायनः =	0 8 31 11 59, 0

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किन्त्वस्मिन्नेव क्षणे भारतीयाकाशे सूर्यस्य मुख्यसायन

आसीत् =0 0 0 0 0 0

इत्थमुभयोरकाशयोरन्तरम् =0 8 31 11 55 0

इदानीं चन्द्रमसः मुख्यसायनात् (शुद्ध संरक्षणेन)

=4 2 13 5 16 9

आकाशीयमन्तरम् =0 8 31 51 59, 0

भारतीयाकाशे चन्द्रमसः मुख्यसायनः

अवशिष्टः यः पूर्वमप्यासीत् =3 23 41 53 17 9

गुरोः स्थित्या गत्या च सूर्यसिद्धान्तार्थमस्माभिः 875 वर्षाणि लभ्यन्ते = 4900 − 875 = 4025 कलियुगवर्षाणि

कलियुगस्य 4025 वर्षेषु व्यतीतेषु गुरोः मुख्यसायनः सूर्यसिद्धान्तानुसारम्

$$= \frac{91055 \times 4025}{1080000} = 339\ (\text{चक्रम्})\ 4^{s}\ 5^{\circ}\ 27'\ 30''\ 00'''$$

कलियुगस्य 4900 वर्षेषु गुरोः मुख्यसायनः—

डी. लाण्डे इत्यस्य सारिण्यनुसारं भारतीयाकाशार्थम्

(S 12) = $1^{s}\ 9^{\circ}\ 5'\ 33''\ 36'''$

875 भारतीयाकाशीयवर्षाणां गतिरक्षणेन =9 3 56 12 37

कलियुगस्य 4025 वर्षेषु व्यतीतेषु

मुख्यसायनः =4 5 9 20 59

गुरोः गतिषु डी. लाण्डे. इत्यस्य सारिण्यनुसारम्

मुख्यसायनयोगेन = 19 22 36

सूर्यगत्यसमानतां रक्षणेन 826 वर्षाणां कृते = 1 14 0

भारतीयाकाशीयबुधस्य मुख्यसायनः =4 5 27 29 35

अर्धक्षणादपि न्यूने क्षणे सूर्यसिद्धान्तस्यापि तदेव भविष्यति ।

शन्यर्थं 805 वर्षाणि रक्षामो वयम् ।

4900 − 805 = 4095 वर्षाणि कलियुगस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कलियुगस्य 4095 वर्षेषु व्यतीतेषु शनेः मुख्यसायनः सूर्यसिद्धान्तानुसारम्

$$= \frac{36642 \times 4095}{1080000} = 138 \text{ चक्रम् } 11\ 6\ 19\ 48\ 00$$

कलियुगस्य 4900 वर्षेषु गतेषु शनेः मुख्यसायनः

डी. लाण्डे. इत्यस्य भारतीयाकाशीयसारिण्यनुसारम्

$(S\ 12) = 3^{s}\ 3^{\circ}\ 24'\ 27''\ 36'''$

भारतीयाकाशस्य 805 वर्षाणां गतिसंरक्षणेन	=	3	26	30	21	23
शनेः मुख्यसायनः	=	11	6	56	6	13

प्रत्येकस्मिन् गतौ डी० ला लाण्डे इत्यस्य सारिण्यनुसारम—

समानताकृते सति	=			35	9	0
अवशिष्टो भविष्यति	=	11	6	20	57	13
सूत्रानुसारम् सूर्यस्य गतेरसमानतायाम्	=			1	1	57

कलियुगस्य 4095 वर्षेषु व्यतीतेषु शनेः शुद्धसायनः

= 11 6 19 55 16

सप्तक्षणेषु सूर्यसिद्धान्तस्य सहमतिः भविष्यति ।

सूर्यसिद्धान्तस्य कृते अस्माभिः मङ्गलतः 641 वर्षाणि लभ्यन्ते ।

इत्थम् कलियुगस्य 4900 वर्षेषु व्यतीतेषु सूर्यसिद्धान्तानुसारं

$$\text{मङ्गलस्य सायनः} = \frac{1955884900 \times 805}{432000000}$$

$= 92 \text{ (चक्रम्) } 4^{s}\ 10^{\circ}\ 2'\ 35''\ 54'''$

डी० ला लाण्डे इत्यस्य सारिण्यनुसारं

भारतीयाकाशे (§ 12)	=	4	11	30	57	30
द्वयोरन्तम्	=		1	28	21	6
सूर्यसिद्धान्तानुसारं प्रतिशताब्दी मुख्यगतिः	=	0	0	0	6	7
डी० ला लाण्डे इत्यस्य भारतीयाकाशस्य सारिण्याम्	=	0	0	13	53	3
द्वयोरन्तम्	=	0	0	13	46	56

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्थम् $\frac{1\ 28\ 21\ 36 \times 100}{13\ 46\ 56} = 641$ वर्षाणि

वर्षस्य लम्बमानेन = 365 days 15 do 31' 31'' 24''
इत्यनेन सूर्यसिद्धान्तस्यावध्यर्थं 736 वर्षाणि वयं लभामहे ।

इत्थम् सूत्रम् $\frac{d}{h-s} = n$ (§ 41) वयं लभामहे

d = 9 ds 52do 39' 16''

एवम् h = 365 ds 15do 31' 32'' 24'''

एवम् S = 365 ds 15do 22' 59''

अनेन प्रकारेण $\frac{d}{h-s} = n = \frac{9\ 52\ 39\ 16}{8\ 32\ 24} = 4164$ कलियुगवर्षाणि

अत एव 4900 − 4164 = 736 वर्षाणि पूर्वं सूर्यसिद्धान्तावधिः ।

उपर्युक्ता इमाः सर्वाः गणनाः एकत्रीकरणेन निम्नलिखितानुसारं प्राप्स्यामः ।

चन्द्रमसः	Apogee	(§ 58)	605	वर्षाणि
	mode	(§ 59)	580	,,
सूर्यस्य	Apogee	(§ 60)	1105	,,
शुक्रस्य	.....	(§ 62)	860	,,
मङ्गलस्य	.....	(§ 63)	340	;,
चन्द्रमसः	.....	(§ 65)	759	,,
गुरोः	.....	(§ 66)	875	,,
शनेः	.....	(§ 67)	805	,,
मङ्गलस्य	Aphel	(§ 68)	641	,,
वर्षस्यावधिः		(§ 69)	736	,,
		योगः =	7306	

अस्मिन्नङ्के 10 संख्यया भागेन परिणामः 730·6 अथवा 731 वर्षाणि प्रायेण सूर्यसिद्धान्तस्यावधिः भविष्यति या निर्धारितवर्षावधेः 5 वर्षाणि भिन्नं भविष्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वविधगणनाभ्यः पृथक् भूत्वा एभ्यः विभिन्नभारतीयपुस्तकेभ्यः वयं जानीमः यद् सूर्यसिद्धान्तः कदा लिखित आसीत् कश्चास्य लेखक आसीत् ।

"भास्वती" इत्यस्य टीकायामिदमुक्तं यद् सूर्यसिद्धान्तस्य लेखकः वाराह आसीत् । 'भास्वती' केनचिद् सदानन्देन, 1021 शके लिखिम् यो हि भारतीयगणनया वाराहस्य शिष्य आसीत् । तस्यैव (वाराहस्यैव) सान्निध्ये निर्देशने च तेन स्वयमेवोक्तकार्यं कृतम्, तस्मिन् काले तस्मात् किंचित् पूर्वकाले वा वाराहः जीवित आसीदित्यनेन सम्भाव्यते । अनया सम्भावनया उपर्युक्तेनैकमतत्वं व्यक्तं भवति । 'भास्वती' 1799 ईशवीये वर्षे, वर्तमान-कालात् 700 वर्षाणि पूर्वम्, लिखितमासीत् इति सम्भाव्यते ।

वाराहलिखितेन जातकार्णवनाम्ना ममैकेन पुस्तकेनापीदं प्रमाणितं भवति यद् सूर्यसिद्धान्तस्य लेखकः वाराह एवासीद्यस्य कालः गणनया 739 वर्षाणि पूर्वं प्रमाणितं भवति ।

सूर्यसिद्धान्तरूपेणानेन ग्रन्थेनापीदं ज्ञायते यद् सूर्यः, चन्द्रमा, अन्ये-ग्रहाश्च कलियुगारम्भे मेषादेः प्रथमविन्दौ, लङ्कायां मध्याह्ने एकस्यां सम-रेखायां भवन्ति, द्वयोः सिद्धान्तानुसारं वार्षिकमुख्यगतयश्चेत्थं सन्ति ।

	जातकार्णवस्य					सूर्यसिद्धान्तस्य				
सूर्यः	0s	0°	0'	0''	0'''	0_s	0°	0'	0''	0'''
चन्द्रमा	4	12	46	40	$47\frac{672082}{3603272}$	4	12	46	40	47
बुधः	1	24	45	18	$1\frac{3654421}{6987521}$	1	24	45	18	0
शुक्रः	7	15	11	52	$48\frac{6734016}{264069563}$	7	15	11	52	48
मङ्गलः	6	11	24	9	$36\frac{18948406}{78822029}$	6	11	24	9	36
गुरुः	1	0	21	6	$0\frac{13591181880}{34506008237}$	1	0	21	6	0
शनिः	0	12	12	50	$20\frac{168593340}{298008203}$	0	12	12	50	24

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रमसः Apogee इत्यस्य मुख्यवार्षिकी गतिः

जातकार्णवानुसारम् =	0s	10°	41′	0″	54‴	62363508 / 77796647
सूर्यसिद्धान्तानुसारम् =	1	10	41	0	54	

चन्द्रमसः Node इत्यस्य वार्षिकीगतिः

जातकार्णवानुसारम् =	0s	19°	21′	11″	24‴	2583306 / 539680091
सूर्यसिद्धान्तानुसारम् =	0	19	21	11	24	

वर्षमानम्

	days	do	i	ii	iii	iv	
जातकार्णवानुसारम् =	365	15	31	31	24	25	540 / 2407
सूर्यसिद्धान्तानुसारम् =	365	15	31	31	24	—	

अधुना एकस्यान्येन सह, रक्षितानां गत्यादिनां परिमाणतुलनया इदं स्पष्टं भविष्यति यद् एक एव व्यक्तिविशेषः अनयोर्द्वयोः पुस्तकयोः लेखकः भवितुमर्हति। एतदर्थं यद्यपि द्वयोः परिमाणः सर्वथा अभिन्नः नास्ति तथापीदं भवितुमर्हतिः यद् द्वौ व्यक्ती पृथक् पृथक् अनयोः लेखकौ स्याताम्। वस्तुतः जातकार्णवस्य सूर्यसिद्धान्तस्य च परस्परमत्यल्पेनान्तरेणेदं वक्तुं शक्यते यदेकस्याः पद्धतेरनुयायिना एकेनैव व्यक्तिविशेषणेमौ ग्रन्थौ लिखितौ स्तः। एतदर्थं यदा वयं जातकार्णवे वर्णितासु मुख्यगत्यादिषु 10,80,000 इत्यनेन (अयं सः कालावधिः यस्मिन् सूर्यसिद्धान्तानुसारम् सूर्यः चन्द्रमा अन्येग्रहाश्च मुख्यमिलनविन्दुं बारमेकं परिक्रम्य एकस्यां समरेखायां स्थिताः भवन्ति) गुणितं कुर्मः तदा (कतिपयाल्पवस्तूनि त्यक्त्वा पूर्णाङ्कसंख्याग्रहणेन) वयं सूर्यसिद्धान्ते वर्णितां कालावधिमेव प्राप्स्यामः (§ 22)। अनन्तरं विषयेस्मिन् यदि कश्चित्सन्दर्भः यथोचितं संल्लभेत तर्हि तेन सूर्यसिद्धान्तस्य लेखकस्यविषये वक्तुं शक्यते। वाराहकाले लिखितखगोलीयग्रन्थानुसारं तु ते एतदर्थं प्रर्याप्ता भविष्यन्ति। ब्रह्मसिद्धान्तः, विष्णुसिद्धान्तः, सिद्धान्तमञ्जरी तथा अन्येषु बहुषु ग्रन्थेषु सा पद्धतिः (यां सूर्यसिद्धान्ते कल्पमित्युक्तम्) 'वाराहस्य कल्प' इति नाम्ना प्रसिद्धा अस्ति।

अतएव सा खगोलीयज्ञानपद्धतिः, यस्यां वाराहस्य नाम तस्य पद्धतेर्वा नामोल्लेखः वर्तते पश्चात् कृता अस्ति इति निश्चप्रचम्। स्थितिरियं पुराणादिविभिन्नग्रन्थद्वारा, अस्याः प्राचीनतायाः सन्दर्भे कृतान् सर्वान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमाणानसत्करोति। अस्य अस्तित्वमतीवप्राचीनमिति ब्राह्मणजनजातिकथनं काल्पितं प्रतिभाति।

उपरि यदुक्तम् तेनेदं सम्भवमस्ति यद् सर्वप्रथमं यदा अयं लिखित-आसीत्तदा वाराहस्य नाम आगतं भविष्यति। तस्य लेखकः सुजात आसीत्। तस्य मृत्योरनन्तरं पौरोहित्यवादिभिर्जनैः मेया माया वा इत्यनया सह हास्यापदविधिना इमं संयोज्य सत्ययुगेन सह अस्य नामोल्लेख कृतः। अत अनेन छद्मकृत्येन अयं अत्यन्तं प्राचीनं मन्यते। किन्तु कुकृत्यमिदं ब्रह्मणः तथाकथितपुत्रैः न कृतमपितु अस्य पुष्टचर्थं तत्पश्चात् विभिन्नप्रकारैः गणनाभिः सह एतदृशा अन्ये सिद्धान्ता निर्मिता एवं ते सिद्धान्ता देवमुख-निर्गतत्वात् ब्रह्मसिद्धान्त-विष्णुसिद्धान्त-शिवसिद्धान्तनाम्ना (ये सामान्यतया तन्त्रा कथिताः)उपस्थापिताः। अन्ये च पूर्वजैः (तथाकथितोच्चात्मभिः) प्राप्ताः यथा सोमसिद्धान्तः। तथा कतिपयाः सिद्धान्ताः अन्यैः ऋषिभिः मुनिभिश्च प्राप्ता ये अस्य प्राचीनतायाः साक्षिणः सन्ति। यथा—वशिष्ठ-सिद्धान्तः, पारासरसिद्धान्तः, रौद्रसिद्धान्तः, गार्ग्यसिद्धान्तः, भार्गवसिद्धान्तादयश्च। एवं प्रायः अष्टादशप्रकारा इमे कल्पितसिद्धान्ताः सूर्यसिद्धान्तेन सह योजिताः। इमान् अष्टादशसंख्याकान्, पूर्वप्रतिष्ठाक्रमे एव इदानीं खगोल-विद्यायाः अष्टादशशास्त्राणि इति कथयन्ति। यद्यपीमे सर्वे ये मया सूचिता उपर्युक्ता त्रयः चत्वारो वा मूलतः ग्रन्थाः न सन्ति अपितु परस्परानुकृतयः सन्ति अथवा यत्किञ्चित् शैलीगतभिन्नतासह पौरोहित्यसम्बन्धी प्रश्नाना-मुत्तररूपेण रचिताः सन्ति किन्तु एषु ग्रहगतयः स्थितयश्च अन्यानि वस्तूनि-मूलरूपेणेव सन्ति।

यद्यपि इमे सर्वे ग्रन्थाः इदानीं भारतस्यास्मिन् भागे तु दुर्लभाः अप्राप्ता वा सन्ति तथाप्यस्मात्काठिन्यात् अधिकाधिकमस्मान् रक्षन्नहं एतेषु कतिपयान्, यथा सोमसिद्धान्तः ब्रह्मसिद्धान्तः विष्णुसिद्धान्तः, वशिष्ठ-सिद्धान्तः, ग्रहजमूलं च (GRAHOJAMUL) इत्येतान्, शिवलिखितोक्तान् समक्षमुपस्थाप्य अस्य प्राचीनतां अवगन्तुं सामान्यां धारणामाप्तवानस्मि।

इमे सूर्यसिद्धान्तवशिष्टसिद्धान्तग्रहजमूलाश्च सूर्यसिद्धान्तस्य वाराह-कृतां पद्धतिमनुसरन्ति। ब्रह्मसिद्धान्तस्तु 'भास्वती' इत्यस्मात् गृहीत इव प्रतिभाति।

इमे सोमसिद्धान्त-वशिष्ठसिद्धान्त-ग्रहजमूलाश्च वाराहस्य सूर्यसिद्धा-न्तस्यैव पद्धतेः प्रयोगं कुर्वन्ति। ब्रह्मसिद्धान्तस्तु "भास्वती" इत्यतः गृहीतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिभाति। ब्रह्मणः कल्पसमये सूर्यस्य चन्द्रमसः अन्येषां ग्रहाणां च स्थिति-विषये कृतगणनानुसारम् "भास्वती" इत्यस्य तिथेः शकसम्वत् १०२१ तमवर्षस्य स्थाने तत्कालावधेः (युगस्य) घोषणार्थं गणनया इदं प्रतिभाति यद् ब्रह्मसिद्धान्तस्तु "भास्वती" इत्यतः गृहीतः अस्ति।

विष्णुसिद्धान्तः ब्रह्मसिद्धान्तात्सर्वथा भिन्नं नास्ति। केवलं तत्काला-वधेः यद् वाराहकल्पारम्भकालस्य विनिश्चयार्थं गणनया निर्दिष्टं वर्तते। इत्थम् इमे सर्वे ग्रन्थाः प्रमाणतः पश्चात् कालिकाः सन्ति। पाराशरसिद्धान्तः, यथा पूर्वमुक्तम्, तां पद्धतिमनुसृत्य यया वशिष्ठसिद्धान्तः सूर्यसिद्धान्ताद् गृहीतोस्ति, ब्रह्मसिद्धान्ताद् गृहीतः अस्ति।

वस्तुतः पाराशरस्य सर्वेषु कार्येषु सन्दिग्धताया इदं कारणमस्ति यद् पश्चात्कालस्य सर्वासां तिथीनां वंचनं तत्र निहितंमस्ति। मम प्राश्र्वे 'कृषि पाराशर' इत्यस्यैका प्रतिः विद्यते यत्र विस्तृतं वंचनं अस्ति। अस्यां लघ्वनुपयुक्ते कृतौ कृषिसम्बन्धविषयापेक्षया अनेके असम्बद्धाः असंतुलिता अधिकतरा विषयाः सन्ति यथा--

स्वर्गाणां ग्रहाणां च स्थितिज्ञानेन विना भाग्योदयार्थं ग्रहस्थिति-परीक्षणेन विना हलप्रवहणम्, वीजवपनं अन्यानिकार्याणि च कर्तुं न शक्यते किन्वेषु एतादृशाः कतिपयज्योतिर्वैज्ञानिकसिद्धान्ताः संगृहीताः सन्ति ये कार्यप्रकृतिष्वेव निहिताः सन्ति। इत्थं नियन्त्रकग्रहाणां राज्ञां वा गणनार्थं लेखकः लिखति, शकवर्षं ३ गुणितं कृत्वा परिणामे २ संयोज्य ७ भागावशेषः एव वर्षस्य नियन्त्रकग्रहं राजानं वा प्रदर्शयिष्यति यस्मिन् यदि ३ संयो-जितं भवेत् (निर्धारितं ७ संख्याकं रक्षयन्) तर्हि त्वं प्रधानमन्त्री (वर्षस्य) प्राप्स्यसि[१]। इदं 'शक' नामैव स्वयं पराशरेण वंचनया प्रदत्तमस्ति येनेदं मन्यते यद् कतिपयशताब्दीनां पूर्वं 'शालिवाहनस्य' शकनामकस्य वा धारा वर्तमाना आसीत्।

मम मते 'भास्वती' मूलतः Siam इत्यस्य माध्यधिकस्य कृते संग्रहीता रचना अस्ति या भारतस्यास्मिन्नेव भागे उपलब्धा भवति। इयं सूत्रद्वारा संक्रान्तिगणनार्थं शकसंवत् इत्यस्य 1190 तमे वर्षे अथवा

---

१. नियन्त्रकाः ग्रहाः (Goarning Plenets) सन्ति—सूर्यः, चन्द्रः, मङ्गलः, बुधः, गुरुः, शुक्रः, शनैश्चरः (1. Sun, 2. Moon, 3. Mars, 4. Murcury, 5. jupitar, 6. Venus, 7. Saturn) अस्मिन् क्रमे।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्याः तिथेः 167 वर्षानन्तरं मन्यते। सूत्रमिदं ब्रह्मसिद्धान्ते वर्तते। संक्रान्तिगणनायै वैशाखस्य तं समयं (यदा सूर्यः स्व वास्तविकगत्या मेषादौ गच्छति) निर्दिशति यः भास्वती इत्यतः एकक्षणानन्तरमस्ति ।

इत्थमिदं ज्ञातुं शक्यते यद् इमानि सर्वाणि सूत्राणि यदा लिखितानि भविष्यन्ति तदा सूर्यसिद्धान्तस्य सम्मत्यनुसारमेव यो तात्कालिकं मानक-कार्यमासीत् । ब्रह्मसिद्धान्तस्तु भास्वती इत्यतः गृहीतो भविष्यति । भारत-स्यास्मिन्भागे 43 वर्षानन्तरम् प्रायः 1233 तमे शकसम्वत्वत्सरे अयं प्रचलितो भविष्यति ।

यदीमाः सर्वाः कल्पनाः सत्या सन्ति एवमासामुपयोगः, एषामष्टादश सिद्धान्तानां असत्यकर्माणि ज्ञापनार्थं, कर्तुं शक्येत यस्य सम्भावना विद्यते, तर्हि इमानि सर्वाणि कार्याणि, ब्राह्मणानां कतिपयस्वार्थसाधनार्थं तेषां तात्कालिकी दृष्टचनुसारं, एकस्यैवकालस्य मन्तव्यम् ।

भास्वती—ब्रह्मसिद्धान्तः विष्णुसिद्धान्तः अन्येषां च सिद्धान्तानुसारं सूर्यस्यः चन्द्रमसः अन्यग्रहाणां प्रमुखवार्षिकगतयः निम्नलिखितानुसारं सन्ति ।

भारतीय (हिन्दू) आकाशे

सूर्यस्य	.....	0s	0°	0'	0''	
चन्द्रमसः	.....	4	12	46	40	
बुधस्य	.....	1	24	46	57	$\frac{9}{23}$
शुक्रस्य	.....	7	15	11	10	$\frac{130}{161}$
मङ्गलस्य	.....	6	11	24	20	
गुरोः	.....	1	0	20	54	
शनेः	.....	0	12	12	51	$\frac{3}{7}$
चन्द्रमसः Apogee	.....	1	10	41	5	$\frac{5}{46}$
,, Node	.....	0	19	21	32	$\frac{13}{31}$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपर्युक्तानुसारं वर्षमानम् ..... 365 ds 15 do 31' 30"

इत्थं सूर्यस्य, चन्द्रमसः, अन्यग्रहाणां च स्थितयः तस्मिन्नेव दिक्काले De La Lande इत्यस्य सारिण्यां निम्नलिखिताः सन्ति ।

योरोपीयमण्डले

सूर्यस्य	.....	0s	0°	0'	58",	648
चन्द्रमसः	.....	4	12	47	38,	9765
बुधस्य	.....	1	24	46	35,	51
शुक्रस्य	.....	7	15	12	22,	2297
मङ्गलस्य	.....	6	11	25	17,	8082
ज्यूपिटरस्य	.....	1	0	21	47,	1505
शनेः	.....	0	12	14	8,	0193
चन्द्रमसः Apogee	.....	1	10	41	34,	25
,, Node	.....	0	19	20	52,	41

भारतीयमण्डले

सूर्यस्य	.....	0s	0°	0'	0"	
चन्द्रमसः	.....	4	12	46	40,	3285
बुधस्य	.....	1	24	45	36,	8620
शुक्रस्य	.....	7	15	11	23,	5617
मङ्गलस्य	.....	6	11	24	19,	1602
ज्यूटिटरस्य	.....	1	0	20	48,	5025
शनेः	.....	0	12	13	9,	3713
चन्द्रमसः Apogee	.....	1	10	40	35,	6020
,, Node	.....	0	19	21	51,	0580

उक्तानुच्छेदेनास्य तुलनया अस्य प्राचीनताया विषये धारणेयं दृढा भवति यद् ब्रह्मसिद्धान्त-विष्णुसिद्धान्तस्येव, वाराहकल्योपरि दृष्टिदानेन च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं स्पष्टं भवति यद् तस्य ज्योतिर्विदः कालात् पूर्वं तेषामस्य च कालः न सम्भव इति ।

विश्वप्रसिद्धस्य खगोलविज्ञानस्य सूर्यसिद्धानामकग्रन्थस्य सम्पादनमस्भामिः ऐतिहासिकगणितीयदृष्टया स्वबुद्धया कृतम् । अनेन संस्कृतजगतः विदुषां यावाँल्लाभो भवेत्तेनास्मान् परमसन्तोषः भविष्यति । ग्रन्थेऽस्मिन् कुत्रचित्त्रुटिपरिलक्षिते सति शोधार्थिनः यथासमयं सत्परामर्शदानार्थं निवेद्यन्ते ।

सूर्यसिद्धान्तस्य सुप्रसिद्धायां सुधावर्षिणीटीकायाम् 19 तमशताब्देरवसानकालस्य 20 तमशताब्देरारम्भकालस्य च मध्ये समुपलब्धानां खगोलविज्ञानस्य समस्तानां टीकानामुत्तमं ज्ञानं सगृहीतमस्ति । अस्य ग्रन्थस्य प्रकाशनं "एशियाटिक सोसाइटी कलकत्ता" इत्यनेन शताधिकवर्षाणि पूर्वं कृतमासीत् । सम्प्रति 50 वर्षेभ्यः पुस्तकमिदंमनुपलब्धमासीत् येन ज्यौतिषजगतः छात्राः अध्यापकाश्चासन्तुष्टाः आसन् ।

सम्प्रति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, ज्यौतिषविषयकछात्राणां कल्याणकामनयाऽस्य ग्रन्थस्यसम्पादनं प्रकाशनं च विधाय परमश्रेयोऽवाप्तवान् ।

ग्रन्थस्यास्य सम्पादनप्रकाशनकार्येषुसर्वान् सहयोगिनः प्रति कृतज्ञतां ज्ञापयामि ।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ।।

श्रीमतामाश्रवः
डा० कृष्णचन्द्रद्विवेदी
आचार्योऽध्यक्षश्च ज्योतिषविभागस्य
सङ्कायाध्यक्षः
वेदवेदाङ्गसङ्कायस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषय-सूची

विषयाः	श्लोकसंख्या	पृष्ठसंख्या
१. मध्यमाधिकारे		
मङ्गलाचरणम्	१	१
मयासुरतपोवर्णनम्	२-४	२
मयं प्रति सूर्योपदेशः	५-९	३-४
कालस्य द्विविधत्वम्	१०	५
कलनात्मककालपरिभाषा	११-१२	५-६
चान्द्रसौरादिमानम्	१३-१४	६
युगकल्पादिमानम्	१५-२१	७-१०
कल्पगतकालमानम्	२२-२३	११
सृष्टिकालः	२४	११
ग्रहाणां प्राग्गतित्वम्	२५-२६	१२
तत्र न्यूनाधिकत्वम्	२७	१२
युगे ग्रहभगणाः	२८-२९	१३
उच्चपातभगणाः	३०-३३	१४
नक्षत्रभगणमानम्	३४	१५
चान्द्रमासाधिमासज्ञानम्	३५	१५
युगे सावनदिनसंख्या	३६	१५
चान्द्रदिनादिसंख्या	३७-३९	१६
उच्चादीनां कल्पभगणाः	४०-४४	१७
सृष्ट्यादितो गतकालसंख्या	४५-४७	१८
अहर्गणानयनम्	४८-५१	१९
मासबर्षपतिज्ञानम्	५२	२०
मध्यमग्रहाद्यानयनम्	५३-५४	२१
सम्बत्सरानयनम्	५५	२२
लाघवेनग्रहानयनम्	५६	२३
कृतयुगान्ते ग्रहध्रुवकाः	५७-५८	२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	श्लोकसंख्या	पृष्ठसंख्या
भूपरिधिमानम्	५९	२४
स्फुटपरिधिदेशान्तरसंस्कारः	६०-६१	२५
रेखादेशाः	६२	२७
देशान्तरज्ञानम्	६३-६५	२८
बारप्रवृत्तिकालः	६६	२९
मध्यमग्रहानयनम्	६७	२९
ग्रहाणां परमशरकलाः	६८-७०	२९-३०
२. स्पष्टाधिकारे		
मध्यस्फुटखेटभेदहेतुः	१-२	३१
गतिवैलक्षण्येहेत्वन्तरम्	३-४	३१-३२
फलस्यधनर्णत्वम्	५	३२
पातापकर्षणम्	६-११	३२-३३
गतीनामष्टविधत्वम्	१२-१३	३४-३५
दृग्गणितैक्यमेवस्फुटत्वमितिकथनम्	१४	३५
चतुर्विंशज्ज्यासाधनम्	१५-१६	३६
चतुर्विंशतिज्यापिण्डानाह	१७-२२	३८-३९
सिद्धा उत्क्रमज्याः आह	२३-२७	४०
क्रान्तिसाधनम्	२८	४१
केन्द्रभुजकोटिज्याज्ञानम्	२९-३०	४१-४२
इष्टचापज्यासाधनम्	३१-३२	४२
ज्यातश्चापानयनम्	३३	४४
मन्दपरिधिभागाः	३४-३५	४४
शीघ्रपरिधिभागाः	३६-३७	४६
स्फुटपरिधिसाधनम्	३८	४७
मन्दफलसाधनम्	३९	४७
शीघ्रफलानयनम्	४०-४२	४८
फलसंस्कारविधिः	४३-४४	५०
फलस्य धनर्णत्वम्	४५	५२
भुजान्तरसंस्कारः	४६	५३
मन्दस्पष्टगतिसाधनम्	४७-४९	५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	श्लोकसंख्या	पृष्ठसंख्या
स्फुटगतिसाधनम्	५०-५१	५६
टीकायां विशेषः		५७-६१
वक्रगतित्वकारणम्	५२	६२
वक्रकेन्द्रांशाः	५३-५४	६२
वक्रतात्यागस्थाने हेतुः	५५	६५
स्फुटशरानयनमाह	५६-५८	६५
टीकायां विशेषः		६६-६९
ग्रहाणां सावनदिनानि	५९	६९
चरसाधनम्	६०-६१	७०
दिनरात्रिमानम्	६२-६३	७१
पञ्चाङ्गसाधनम्	६४-६९	७२-७४
३. त्रिप्रश्नाधिकारे		
दिक् साधनम्	१-६	७५-७७
कर्णगोलीयाग्रासाधनम्	७	७७
छायाकर्णसाधनम्	८	७८
अयनांशानयनम्	९-१०	७८
अयनांशानां प्रतीतिं धनर्णत्वं च	११½	७९
पलभाज्ञानम्	१२½	८०
टीकायां अक्षक्षेत्राणि		८०-८१
लम्बांशाक्षांशसाधनम्	१३½	८१
छायातः पलभाज्ञानम्	१४-१६½	८२
छायातो रविज्ञानम्	१७-१९	८२-८३
क्रान्तितश्छायासाधनम् भुजज्ञानार्थम्	२०-२१	८५
कर्णवृत्ताग्रासाधनम्	२२-२४	८५-८६
सममण्डलकर्णसाधनम्	२५-२६½	८६-८७
कर्णवृत्ताग्रासाधनम्	२७	८८
कोणशङ्कुसाधनम्	२८-३२	८८-८९
कोणवृत्तस्थेऽर्केदृग्ज्यां–ततश्छायाकर्णावाह	३३½	९६
कालतश्छायाज्ञानम्	३४-३६	९६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	श्लोकसंख्या	पृष्ठसंख्या
छायातः कालज्ञानम्	३७-३९	९७
कर्णाग्रातो रविज्ञानम्	४०½	९८
भ्राममार्गमाह	४१½	९९
राशीनां लङ्कोदयमानम्	४२-४३	१००
स्वदेशोदयमानम्	४४-४५	१०१
लग्नसाधनम्	४६-४८	१०१
दशमलग्नानयनम्	४९	१०३
लग्नादिष्टकालसाधनम्	५०-५१	१०४
४. चन्द्रग्रहणाधिकारे		
रविचन्द्रविम्बमानम्	१-३	१०६
भूभाविम्बसाधनम्	४-५	१०९
भूभाभाटीकायाम्	—	१०९-११३
ग्रहणसम्भवः	६	११३
पर्वान्तकालः	७-८	११४
छाद्यच्छादकग्रासादिसाधनम्	९-११	११४-११५
स्थितिविमर्दसाधनम्	१२-१५	११६
स्पर्शादिकालसाधनम्	१६-१७	११९
इष्टग्राससाधनम्	१८-२०	१२०
ग्रासादिष्टकालसाधनम्	२१-२३	१२३
बलनसाधनम्	२४-२५	१२४
कलानामङ्गुलात्मककरणम्	२६	१२५
५. सूर्यग्रहणाधिकारे		
लम्बननत्योरभावस्थानम्	१	१२७
देशकालवशेननतिलम्बनसम्भवः	२	१२८
उदयासंज्ञकलग्नाग्रानयनम्	३	१२८
दशमलग्ननतांशज्यानयनम्	४½	१२८
दृक्क्षेपदृग्गतिसाधनम्	५-६½	१२८
लम्वानयनम्	७-९	१२९-१३०
नतिस्पष्टशरसाधनम्	१०-१२	१३३-१३४
स्थित्यादिसाधनम्	१३-१७	१३५-१३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	श्लोकसंख्या	पृष्ठसंख्या
६. छेद्यकाधिकारे		
छेद्यकप्रयोजनमाह	१	१४१
मण्डलपरिलेखः	२-३	१४१
स्पर्शमोक्षदिशौ	४	१४१
स्पर्शमोक्षस्थानम्	५-७	१४१
शरदानविधिः	८-९	१४२
मध्यग्रहणपरिलेखः	१०-११	१४२
भूमौपरिलेखे दिशां विपर्ययः	१२	१४२
अनादेश्यग्रहणम्	१३	१४४
ग्राहकमार्गज्ञानम्	१४-१६	१४४
इष्टग्रहणपरिलेखः	१७-१९	१४५
सम्मीलनोन्मीलनपरिलेखः	२०-२२	१४६
ग्रस्तचन्द्रविम्बवर्णमाह	२३	१४६
अधिकारोपसंहारमाह	२४	१४७
७. ग्रहयुत्यधिकारे		
युतिभेदसंज्ञा	१	१४८
युतेर्गतगम्यता	२½	१४८
गतैष्यदिनसाधनम्	३-६	१४९
दृक्कर्मोपकरणमाह	७	१५०
आक्षदृक्कर्मसाधनम्	८-९	१५०
आयनदृक्कर्म	१०	१५२
दृक्कर्मप्रयोजनम्	११	१५२
ग्रहान्तरज्ञानम्	१२	१५३
कुजादिबिम्बानि	१३-१४	१५३
युतिदर्शनविधिः	१५	१५५
युतिकाले ग्रहयोर्दर्शनार्थमाह	१६-१७	१५५
युद्धादिलक्षणम्	१८-१९	१५६
जयपराजयलक्षणम्	२०-२४	१५७
८. नक्षत्रग्रहयुत्यधिकारे		
नक्षत्रध्रुवानयनम्	१	१५९
नक्षत्राणांभोगकलाः	२-५½	१५९
नक्षत्राणां शरांशाः	६-९	१६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	श्लोकसंख्या	पृष्ठसंख्या
अगस्त्यादीनां ध्रुवविक्षेपाः	१०-१२	१६१-१६२
रोहिणीशकटभेदः	१३	१६३
भग्रहयुतिसाधनविधिः	१४-१५	१६३
योगतारास्थानम्	१६-१९	१६५
प्रजापत्यादीनामवस्थानम्	२०-२१	१६६
९. उदयास्ताधिकारे		
उदयास्तयोर्विशेषः	१	१६७
उदयास्तदिग्ज्ञानम्	२-३	१६७
कालांशसाधनम्	४-५	१६९
उदयास्तगतगम्यदिनसाधनम्	६-८	१७०
कालात्मकगतिः	९-११	१७१
नक्षत्राणांकालांशाः	१२-१५	१७२
प्रकारान्तरेणोदयास्तसाधनम्	१६	१७२
नक्षत्राणामुदयास्तदिग्ज्ञानम्	१७	१७३
सदोदितनक्षत्राणि	१८	१७३
१०. चन्द्रशृङ्गोन्नत्यधिकारे		
चन्द्रस्यदृश्यादृश्यता	१	१७५
चन्द्रास्तकालः	२-४	१७५
चन्द्रोदयकालः	५	१७५
भुजकोटिसाधनम्	६-८	१७६
शुक्लाङ्गुलसाधनम्	९	१७८
चन्द्रशृङ्गोन्नतिपरिलेखः	१०-१५	१७८-१७९
११. पाताधिकारे		
पातलक्षणम्	१-२	१८३
पातफलम्	३	१८४
पातयोः संज्ञाकारणमाह	४	१८४
पातस्वरूपम्	५	१८४
पातस्य गतगम्यलक्षणम्-स्फुटक्रान्तिसाम्यसाधनम्	६-८	१८४-१८५
पातस्य स्फुटगतगम्यघटिकादि-कालज्ञानम्	९-१३	१८७-१८८
पातस्यस्थितिकालः	१४-१५	१८९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	श्लोकसंख्या	पृष्ठसंख्या
पातकालस्य फलम्	१६–१८	१८९–१९०
पाते विशेषमाह	१९	१९०
पातान्तरं भसन्धिर्गण्डान्तं चाह	२०–२२	१९१
अधिकारोपसंहारः	२३	१९१
१२. भूगोलाध्याये		
मयस्य प्रश्नाः	१–९	१९३–१९४
सूर्यांशस्योत्तराणि	१०–११	१९५
सृष्टिक्रमः	१२–१५	१९५
सूर्यस्य स्वरूपम्	१६–१९	१९६
ब्रह्मोत्पत्तिः विशेषश्च	२०–२१	१९६–१९७
पञ्चभूतोत्पत्तिः	२२–२३	१९८
ग्रहनक्षत्रोत्पत्तिः	२४–२५	१९८
चराचरोत्पत्तिः	२६–२८	१९९–२००
ब्रह्माण्डस्वरूपं तत्र ग्रहादीनां स्थितिः	२९–३१	२००
भूगोलस्थितिः	३२	२०२
सप्तपातालस्थितिः	३३	२०२
मेरुस्वरूपम्	३४	२०२
सुरासुरावस्थितिः	३५	२०२
समुद्रस्थितिः	३६	२०२
भुविप्रसिद्धनगराणि	३७–४२	२०३–२०४
ध्रुवतारास्थितिः	४३–४४	२०४–२०५
देवासुरयोः सूर्यदर्शनम्	४५	२०५
रविकरे तीक्ष्णत्वमृदुत्वहेतुः	४६	२०५
देवासुराणामहोरात्रम्	४७–५३	२०६
भुवः समत्वदर्शने हेतुः	५४	२०७
टीकायां विशेषः	—	२०८–२०९
भचक्रभ्रमणस्वरूपम्	५५	२०९
निरक्षे दिनरात्रिमानम्	५६–५८	२१०
कुत्रस्थितानां मध्याह्ने खमध्यगोरविरित्याह	५९	२१०
कुत्र परं दिनमानम् = ६० परमाल्पम् = ० शून्यसमम्	६०–६२	२१०
कुत्र परमदिनमानम् मासद्वयसमम्	६३–६४	२११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	श्लोकसंख्या	पृष्ठसंख्या
कुत्रचमासचतुष्टयसमम् दिनमानम्	६५–६७	२११
छायानिरूपणम्	६८–६९	२१५
सूर्यपर्यटनमार्गनिरूपणम्	७०-७४	२१५–२१६
ग्रहगतिषु न्यूनाधिकत्वे हेतुः	७५–७७	२१८
होरादिनमासवर्षाधिपानयनम्	७८–७९	२१८
ग्रहकक्षा ख कक्षाप्रमाणम्	८०–८१	२१९
अन्यकक्षानयनं योजनानयनं चाह	८२–८३	२२०
ग्रहकक्षाव्यासार्धमाह	८४	२२१
साधिता ग्रहकक्षा आह	८५–९०	२२१
१३. ज्यौतिषोपनिषदध्याये		
गोलरचना	१-९	२२४-२२८
यन्त्रादिकथनम्	२०-२४	२२८-२३०
ग्रन्थोपसंहारः	२५	२३०
१४. मानाध्याये		
नवमानानि	१-२	२४६
सौरमानव्यवहारः	३	२४७
षडशीतिमुखानि	४-६	२४७
संक्रान्तिनामानि	७-८	२४८
अयनर्तुवर्षलक्षणानि	९-१०	२४८
संक्रान्तिपुण्यकालः	११	२४९
चान्द्रमानप्रयोजनम्	१२-१३	२४९
पित्र्यं मानम्	१४	२४९
नाक्षत्रमानम्	१५-१६	२५०
बार्हस्पत्यमानम्	१७	२५१
सावनमानम्	१८-१९	२५१
दिव्यमानम्	२०	२५२
प्राजापत्यमानम्	२१	२५२
वीजक्रियाटीकायाम्	२२-२३	२५२
ग्रन्थोपसंहारः	२४-२७	२५५
टीकाकारपरिचयः	——	२५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुधावर्षिणीटीकया विभूषितः

सूर्यसिद्धान्तः

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्त्तये ब्रह्मणे नमः ॥ १ ॥

अमलसौरमतं विकृतं कृतं
कुकृतिभिर्विरचय्य मतान्तरम् ।
तदखिलं परिशोधयति स्वतो
निजकरैर्विमलैर्हि सुधाकरः ॥ १ ॥

यदीयभ्रूलीला कलयति समग्रं जगदिदं
सशेषं श्रीरामं भुवनजनकं मोहयति च ।
भृशं नत्वा तां श्रीजनकतनयां तत्सहचरीं
प्रियालीसम्प्रीत्यै विरचयति टीकां कृतिकृती ॥ २ ॥

इदं मङ्गलं केनचिन्मुनिवरेण मेरुपृष्ठे ज्योतिःशास्त्रजिज्ञासुमुनीनामग्रे कृतमिति नृसिंहदैवज्ञेन सौरभाष्ये तथा कमलाकरेण सौरवासनायामभिहितं तद्वाक्यञ्च ।

अत्राविच्छिन्नपारम्पर्येणेयं कथा स्मर्य्यते—

"मेरुपृष्ठे सकलेषु मुनिगणेषु श्रेष्ठः कश्चिन्मुनिस्तान् प्रत्यगमत् । ततस्ते मुनिशार्दूलमालोक्य तत आसनपाद्यार्घ्यादिना तस्य पूजां विधायेदमूचुः—स्वामिन् त्वं को भूभूधरत्रिदशदानवमानवादेग्र्हनक्षत्रचारस्यावस्थानादिकं कालज्ञानं च कथयस्वेति ।

तदुक्तम्—

मेरुपृष्ठे सुखासीनाः सकला ऋषयः पुरा ।
तदन्तरे समायातो मुनिः कश्चिद्द्विजोत्तमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुतो ह्यागमनं स्वामिन् तमूचुः श्रूयतां द्विजाः ।
सूर्यलोकात् समायातः का कथा तत्र वर्त्तते ॥
श्रीसूर्येणैव महता मयाय प्रतिबोधितम् ।
कालज्ञानं मया तस्मात्तद्विज्ञातं महर्षयः ॥
स्वामिन् नः कथयस्वेति शृणुध्वं स्वस्थमानसाः ॥ इति ॥

ततस्तेन श्रीसूर्यमयसंवादो मुनीन् प्रत्यादिष्टः । तस्यायं शिष्यशिक्षार्थे ग्रन्थ-समाप्त्यर्थं च नमस्काररूपमङ्गलाचरणश्लोकः ।"

सर्वैष्टीकाकारैरिदं मङ्गलं ब्रह्मपक्षे व्याख्यायते, तत्तु प्रसिद्धमेव । नव्यैरव्यक्त-गणितपक्षे व्याख्यायते तद्यथा—

ब्रह्मणे ब्रह्मस्वरूपाय बीजगणिताय नमः । किं विशिष्टाय अचिन्त्याव्यक्त-रूपाय । ऐः अकारादिवर्णैश्चिन्त्यं विचारयोग्यं तथाऽव्यक्तैर्यावत्तावदादिभिर्वर्णैश्च यद्रूप्यते प्रकाश्यते तदचिन्त्याव्यक्तरूपं तस्मै । निर्गुणाय निर्गता गुणा जीवा यत्र तन्निर्गुणं तस्मै । अत्र जीवागणितं नास्तीति भावः । गुणात्मने गुणानामर्थाद् गुणनभजनादीनामात्मा यत्तस्मै । समस्तजगदाधारमूर्तये । गणनया सर्वेषां स्थितिमानप्रतिपादनात् समस्तजगत आधारमूर्त्तिर्यत्तस्मै । एवं विशिष्टाय बीज-गणिताय सकलकलाकलनसमर्थाय नमः ।

प्राचीनसंमतेन मुनिवरकृतमङ्गलेन नेदं साक्षात्सूर्यप्रतिपादितमिति स्फुटमिति ॥ १ ॥

अथ स च मुनिवरस्तान् प्रत्याह—

अल्पावशिष्टे तु कृते मयो नाम महासुरः ।
रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम् ॥ २ ॥

वेदाङ्गमग्र्यमखिलं ज्योतिषां गतिकारणम् ।
आराधयन् विवस्वन्तं तपस्तेपे सुदुश्चरम् ॥ ३ ॥

तोषितस्तपसा तेन प्रीतस्तस्मै वरार्थिने ।
ग्रहाणां चरितं प्रादात् मयाय सविता स्वयम् ॥ ४ ॥

कृते कृतयुगे, अल्पावशिष्टे स्वल्पोर्वरिते । अत्र नव्यमतेन कटपयवर्गभवैरि-हेत्यादिना (अ=० । ल=३ । प=१ । ; अल्पावशिष्टे [त्रिशदधिकशतवर्षा-वशिष्टे । मयस्थानं च 'भूमिकक्षाद्वादशांशे लङ्कायाः प्राक् शालमले देशे मयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाम महासुरस्तपस्तेपे' इति नृसिंहदैवज्ञा ऊचुः । रहस्यं गोप्यं दुर्जनेभ्यस्तदुक्तं साकल्यसंहितायाम्—

"न देयं यस्य कस्यापि रहस्यं शास्त्रमुत्तमम् ।
एतद्देयं सुशिष्याय मुने वत्सरवासिने ॥"

परमं पुण्यं पाठमात्रेण पुण्योत्पादकम् । तथा च वसिष्ठसिद्धान्ते–

य इदं शृणुयाद्भक्त्या पठेद्वा सुसमाहितः ।
ग्रहलोकमवाप्नोति सर्वनिर्मुक्तकिल्विषः ॥

अग्र्यं वेदाङ्गमध्ये श्रेष्ठम् । तथा च वसिष्ठसंहितायाम्—

वेदस्य चक्षुः किल शास्त्रमेतत् प्रधानताऽङ्गेषु ततोऽस्य जाता ।
अङ्गैर्युतोऽन्यैः परिपूर्णमूर्त्तिश्चक्षुर्विहीनः पुरुषो न किञ्चित् ॥

विवस्वन्तं सूर्यम् । किंभूतं ज्योतिषां गतिकारणम् । तपः किंभूतं दुश्चरमन्यैः कर्त्तुमशक्यम् । वेदाङ्गमिति विशेषणेन ब्राह्मणैरेवाध्येतव्यम् । तथा च वसिष्ठः ।

अध्येतव्यं ब्राह्मणैरेव तस्माज्ज्योतिःशास्त्रं पुण्यमेतद्रहस्यमिति । कस्मादेतच्छास्त्रस्य वेदाङ्गत्वमित्यत्र वसिष्ठः—

क्रतुक्रियार्थं श्रुतयः प्रवृत्ताः
कालाश्रयास्ते क्रतवो निरुक्ताः ।
शास्त्रादमुष्मात् किल कालबोधो
वेदाङ्गताऽमुष्य ततः प्रसिद्धा ॥ इति ॥

तादृशेन दुश्चरतपसा तुष्टः सविता विवस्वान् स्वयमागत्य तस्मै वरार्थिने मयाय ग्रहाणां चरितरूपं वरं प्रादादिति । शेषं स्पष्टम् ॥ २—४ ॥

सूर्य उवाच—

विदितस्ते मयाभावस्तोषितस्तपसा ह्यहम् ।
दद्यां कालाश्रयं ज्ञानं ग्रहाणां चरितं महत् ॥ ५ ॥

हे मय ! ते भावस्तवाभिप्रायो विदितो मयेति शेषः । वा मया तेऽभावो विदितः । अहं हि ते तपसा तोषितः । अतः कालाश्रयं कालाधीनं ज्ञानं ग्रहाणां महच्चरितं चार्थाज्ज्योतिःशास्त्रज्ञानं दद्यां दास्यामीति ॥ ५ ॥

सूर्यसान्निध्यवशेन तत्तीक्ष्णतेजसा प्राणिनां मरणं दूरत एवोपदेशकरणेन रवेः स्थैर्यत्वमावश्यकं स्थैर्यत्वे च भचक्रभ्रमणानुपपत्तिरत एवाह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न मे तेजःसहः कश्चिदाख्यातुं नास्ति मे क्षणः ।
मदंशः पुरुषोऽयं ते निःशेषं कथयिष्यति ॥ ६ ॥

कश्चिदपि जनो मत्सान्निध्यमुपाश्रितो मे तेजःसहो न । यदि तपसा मत्सान्निध्यमुपाश्रितः कश्चित्तेजःसहो भवेदपि तर्हि भगणभ्रमणानुपपत्त्या ज्योतिःशास्त्रज्ञानमाख्यातुं मे क्षणः समयो नास्ति । अतोऽङ्गुल्या निर्देशेनायं मदंशः पुरुषो यवनाचार्यस्ते निःशेषं ज्ञानं कथयिष्यति ।

अत्र बहुषु प्राचीनपुस्तकेषु पूर्वार्धानन्तरं 'रोमके नगरे ब्रह्मशापान्म्लेच्छावतारधृक्' इत्यधिकः पाठः । सूर्यारुणसंवादे ब्रह्मशापात् सूर्यस्य म्लेच्छावतारः प्रसिद्धस्तदर्थं मत्कृता पञ्चसिद्धान्तिका टीकावलोकनीया । नव्यानां मतेऽयमेव सूर्यांशः पुरुषो मिश्र (एजिप्त) देशनिवासी हीरोसंज्ञकः, येन प्रथमं क्षेत्रयुक्तितस्त्रिभुजक्षेत्रफलं 'सर्वदोयु'तिदलं चतुःस्थितं बाहुभिर्विरहितं च तद्व्यधात् । 'मूलमस्फुटफलं चतुर्भुजे स्पष्टमेवमुदितं त्रिबाहुके ॥' इत्यनेन विधिनाऽऽनीतम् ॥ ६ ॥

इत्युक्त्वान्तर्दधे देवः समादिश्यांशमात्मनः ।
स पुमान् मयमाहेदं प्रणतं प्राञ्जलिस्थितम् ॥ ७ ॥

इति पूर्वोदितमुक्त्वा स सूर्यमण्डलस्थो दिव्यपुरुषो देवो निजस्याङ्गमयस्थितमंशपुरुषं समादिश्य 'मयं प्रति ज्योतिःशास्त्रज्ञानं निःशेषं वक्तव्यमित्युपदिश्य अन्तर्दधे, मयनेत्रागोचरतां जातः ।' स पुमांश्च प्रणतं प्राञ्जलिना मिलितहस्तयुगेन स्वाग्रे विनीतं स्थितं मयं प्रतीदं वक्ष्यमाणमाह कथयति स्म ॥ ७ ॥

शृणुष्वैकमनाः पूर्वं यदुक्तं ज्ञानमुत्तमम् ।
युगे युगे महर्षीणां स्वयमेव विवस्वता ॥ ८ ॥

हे मय ! एकमना (एकस्मिन्नेव कर्मणि मनो यस्यासौ) सन् तदुत्तमं ज्ञानं शृणु । अन्यविषयेभ्यो मनः समाहृत्य मदुक्ते वाक्ये मनो दत्त्वा श्रुतिद्वाराऽऽत्ममनःसंयोगेन प्रत्यक्षं कुर्विति । तत् किं ज्ञानं यद्विवस्वता सूर्येण पूर्वं युगे युगे महर्षीणां स्वयमेवोक्तं कथितम् । ब्रह्मादिसिद्धान्तात् पूर्वमेवायं कथित इति भावः ॥ ८ ॥

ननु पौलिशरोमकादिप्रणीतभावनादिभिन्नत्वादिदं सूर्यप्रणीतशास्त्राद् भिन्नं कथं मया मयेन श्रोतव्यमित्यत आह—

शास्त्रमाद्यं तदेवेदं यत् पूर्वं प्राह भास्करः ।
युगानां परिवर्त्तेन कालभेदोऽत्र केवलः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं तदेवाऽऽद्यं शास्त्रं यच्च पूर्वं भास्करः सूर्यः प्राह प्रागकथयत्; किन्तु युगानां परिवर्तनात्र केवलः कालभेदो यातेष्यकालभेदः। अर्थात् सूर्येणान्यस्मिन् समये पूर्वं कथितं मया तु तदेवेदानीं कथ्यत इति। नहि कालभेदेन ग्रहगणनाया-मत्रान्तरं वाच्यम्, अन्तरितशास्त्रस्य श्रवणे प्रीत्यभावात् कथनानौचित्याच्च। अत एव सौरवासनायां कमलाकरः—

"परमत्र कालभेदमात्रं तत् तद्युगस्थमिदमेतद्युगस्थमिति नात्र भगणकृतो भेदार्थः। यद्येवं वर्त्तमानकल्पेऽस्मिन् ये भगणास्ते तदन्तर्गता एकरूपा एव। तद्विभागा एव युगानीति तत्तत्संबन्धेन भिन्नभिन्नभगणकल्पनं नोचितं न्याय-विदाम्। ननु विशेषोक्त्यभावात् कथं युगे युगे तत्कथनमिति चेत्, मदुक्तमिदं वास्तवमग्रेऽल्पबुद्धयो मनुष्या अन्यथा स्वकल्पितं सौरपाठं कथयिष्यन्तीति स्वोक्तस्य रक्षणार्थमेव युगे युगे कथनमावश्यकमित्याशयः।" अत्र रङ्गनाथा-दिकृतं व्याख्यानं सर्वमसङ्गतमिति धीमद्भिर्भृशं विचिन्त्यमिति ॥ ९ ॥

इदानीं कालभेदः कथं भवतीति प्रतिपाद्यते—

लोका*नामन्तकृत् कालः कालोऽन्यः कलनात्मकः।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्त्तश्चामूर्त्त उच्यते ॥ १० ॥

लोकानां प्राणिनामन्तकृत् नाशकर्त्ता एकः कालो यमराजानुयायी प्रसिद्धः कालदण्डाद्यमो दण्डमिति मार्कण्डेयपुराणान्तर्गतदुर्गासप्तशतिकावचनात्। अन्यः कलनात्मको गणनात्मकः कालो ज्योतिषसिद्धान्ते किलेह प्रसिद्धः। स च स्थूल-सूक्ष्मत्वात् मूर्त्तोऽमूर्त्तश्चोच्यते कथ्यते। स्थूलः कालो मूर्त्तः सूक्ष्मश्चामूर्त्त इति क्रमेण कथ्यते। अस्य शास्त्रस्य कालाधीनत्वात् प्रथमं कालपरिभाषैव समुचितेति मनसि संप्रधार्यादौ कालपरिभाषैवोक्ता सूर्यांशदेवेन ॥ १० ॥

इदानीं स्थूलसूक्ष्मकालमानं बोधयति—

प्राणादिः कथितो मूर्त्तस्त्रुट्याद्योऽमूर्त्तसंज्ञकः।
षड्भिः†प्राणैर्विनाडी स्यात् तत्षष्ट्या नाडिका स्मृता ॥११॥

स्वस्थपुरुषस्य श्वासोच्छ्वासान्तर्वर्त्ती कालः प्राणः, स च दशगुरुवर्णोच्चारण-कालेन समो भवति 'गुर्वक्षरैः खेन्दुमितैरसुरिति' भास्करोक्तेः। प्राण आदिर्यस्य

---

* बहुषु पुस्तकेषु भूतानामिति पाठः।

† प्राणादिः कथितो मूर्त्तस्त्रुट्याद्योऽमूर्त्तसंज्ञकः।
सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स प्राणादिर्विघटिकाघटिकादिकालो मूर्त्तः। अर्थात् स्थूलत्वादव्यवहारे स च गणयितुं शक्यते। त्रुट्याद्यस्त्रुटितत्परनिमेषकालश्च सूक्ष्मत्वादमूर्त्तः, स च व्यवहारेणैव यन्त्रादिना गणयितुं शक्यत इति भावः। "सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते" इति नारदोक्तेः। "योऽक्ष्णोर्निमेषस्य खरामभागः स तत्परस्तच्छत भाग उक्ता त्रुटि" रिति भास्करोक्तेश्च सः कालोऽतिसूक्ष्मत्वान्नैव यन्त्रादिनोपलक्ष्यतेऽतोऽमूर्त्तत्वं तस्य युक्तमिति।

अथ व्यवहारोपयोगित्वात् कालपरिभाषा कथ्यते षड्भिः प्राणैरित्यादि। षड्भिरसुभिरेका विनाडी विघटिका भवति। तासां विघटिकानां षष्ट्या एका नाडिका घटिका स्मृता गणकैरिति। अङ्गुष्ठमूलगता कफवातपित्तद्योतिका नाडी यावता कालेनैकरूपां गतिं वहति, स कालो नाडीसंज्ञः। एवं घटीयन्त्रेण यः काल उत्पद्यते, स घटीसंज्ञो दण्डयन्त्रेणोत्पन्नश्च दण्डाख्यः। एवं यन्त्रभेदेन नामभेदो वस्तुतस्ते शब्दा एकपर्याया एव। उपसर्गेण धात्वर्थो बलादन्यत्र नीयते, इत्यादिनात्र वि—उपसर्गेण तत्षष्टिभागात्मकः कालो विघटिका भवतीति सर्वं ज्योतिर्विदामतिरोहितमेव ॥ ११ ॥

इदानीमन्याः कालपरिभाषा आह—

नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्त्तितम्।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा ॥ १२ ॥
ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते।
मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते ॥ १३ ॥
सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्।
तत्षष्टिः षड्गुणा दिव्यं वर्षमासुरमेव च ॥ १४ ॥

नाडीनां षष्ट्या नाक्षत्रमहोरात्रं भवति। एकनक्षत्रस्योदयानन्तरं यावता कालेन तस्य पुनरुदयः, स नाक्षत्राहोरात्रकालः। तेषामहोरात्राणां त्रिंशता मासो नाक्षत्रमासो भवति। तथाऽर्कोदयैः सावनो मासो भवति। अत्रैतदुक्तं भवति सूर्योदयद्वयानन्तरमर्कसावनदिनं तेषां त्रिंशता सावनमासो भवतीति। एवं नाक्षत्रमानं सावनमानं च प्रतिपादितम् ॥ १२ ॥

तद्वत् तिथिभिस्त्रिंशत्तिथिभिरैन्दवश्चान्द्रो मासो भवति। रवीन्द्वोर्युतिरमावस्यान्ते भवति, ततो यावता कालेन पुनस्तद्युतिर्भवति, स एव चान्द्रो मासः। एकस्मिन् चान्द्रे मासे त्रिंशत् तिथयस्तदा रवीन्द्वोरन्तरं च चक्रांशा अतोऽनुपातेनैकस्यां तिथौ रविचन्द्रयोर्द्वादशभागा अन्तरम्। एवं चान्द्रमानं जातम्। एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संक्रान्त्या सौरः सौरमासो भवति। एकराशिं हित्वा यावता कालेन रवी राश्यन्तरं याति, स सौरो मासस्तत्त्रिंशद्भागः सौरं दिनं भवतीति सौरमानम्। द्वादशभिर्मासैः सौरैर्वर्षं भवति तदेव दिव्यमहो देवानां दिनमुच्यते। गोलयुक्त्या नाडीक्रान्तिमण्डलसम्पातस्थो रविर्यावता कालेन पुनस्तत्सम्पातमेति, तदेव दिव्यं दिनं भवतीति। इत्थं दिव्यदिनपरिभाषा चायनांशगत्यज्ञानतः पूर्वाचार्यैरुक्ता। भास्कराचार्येणापि "रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं द्युरात्रं च देवासुराणां तदेव" इत्यनेन निरयणसौरवर्षतुल्यमेव देवासुराणामहोरात्रं भ्रान्तितः कथितमिति सुधीभिर्भृशं विचिन्त्यमिति ॥ १२ ॥

सुरासुराणां देवराक्षसानां विपर्ययादन्योन्यं मिथोऽहोरात्रं भवति। यदा देवानां दिनं तदा दैत्यानां रजनी, यदा देवानां रजनी, तदा दैत्यानां दिनमिति गोलस्थित्या देवासुराणां सौम्ययाम्यध्रुवाधःस्थितत्वाच्च गोलविदां स्फुटम्। तेषां दिव्यदिनानां षष्टिः किं विशिष्टा षड्गुणाऽर्थात् षष्ट्यधिकशतत्रयदिव्यदिनेन दिव्यमासुरं च वर्षं भवतीति द्वादशभिर्मासैर्वर्षमिति परिभाषया सिध्यतीति ॥१३॥

इदानीं युगमानमाह—

तद्द्वादशसहस्राणि चतुर्युगमुदाहृतम्।
सूर्याब्दसंख्यया द्वित्रिसागरैरयुताहतैः ॥ १५ ॥

सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्।
कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया ॥ १६ ॥

तेषां पूर्वोक्तानां दिव्यवर्षाणां द्वादशसहस्राणि स्मृतिकारैश्चतुर्युगमुदाहृतं कथितम्। चतुर्णां युगानां युगाङ्घ्रीणां कृतत्रेताद्वापरकलिसंज्ञानां समाहारश्चतुर्युगमेकं महायुगमित्यर्थः। तच्चतुर्युगं सन्ध्यासन्ध्यांशसहितं च सौरवर्षसंख्ययाऽयुताहतैर्दशसहस्रगुणितैर्द्वित्रसागरैर्द्वात्रिंशदधिकचतुःशतैः सौरवर्षैर्विज्ञेयम्। प्राचीनानां मतेन चत्वारः सागराः समुद्राः "पयोधरीभूतचतुःसमुद्राम्" इति कालिदासोक्तेस्तेन सागरशब्देन संख्याचतुष्टयं गृह्यते। चतुर्युगमानस्य चतुर्थांशो नैकयुगमानं भवतीति कृतादीनामित्याद्याह। धर्मपादव्यवस्थया कृतादीनां कृतत्रेताद्वापरकलीनामियं वक्ष्यमाणा मितिर्विज्ञेया। अत्रैतदुक्तं भवति— यथा कृते धर्मस्य चत्वारः पादाः। त्रेतायां त्रयः। द्वापरे द्वौ। कलावेकः पादः, एवं चतुर्युगे धर्मस्य दश पादास्ततोऽनुपातेन दशभिः पादैश्चतुर्युगमानं तदा कृतत्रेतादिपादैः किमिति कृतादीनां मितिरानेयेति ॥ १५—१६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं ता एव तेषां मितीराह—

युगस्य दशमो भागश्चतुस्त्रिद्व्येकसङ्गुणः ।
क्रमात् कृतयुगादीनां षष्ठांशः सन्ध्ययोः स्वकः ॥ १७ ॥

पूर्वोदितस्य युगमानस्य दशमो भागश्चतुर्धा क्रमाच्चतुर्भिस्त्रिभिर्द्वाभ्यामेकेन गुणितः कृतयुगादीनां सन्ध्यासन्ध्यांशसहितं मानं स्यादिति शेषम् । यथा—
दिव्यचतुर्युगमानस्य १२००० दशमांशः = १२००
कृतम् = चतुर्गुणितः = ४८०० । त्रेता = त्रिगुणितः = ३६०० ।
द्वापरः = द्विगुणितः = २४०० । कलिः = एकगुणितः = १२०० ।

इदं कृतादिमानं मनूक्ताद्भिन्नं कुत इति शङ्कां परिहरन्नाह षष्ठांशः सन्ध्ययोः स्वकः । युगस्य स्वकः स्वीयः षष्ठांशः सन्ध्ययोर्मानं भवतीति । यथा कृतमानम् = ४८०० । अस्य षष्ठांशः = ८०० । इदं सन्ध्ययोर्मानम् । एतदर्धम् = ४०० = कृतयुगादौ सन्ध्या । तथा तन्मितान्येव ४०० वर्षाणि कृतयुगान्ते सन्ध्या । एवं सन्ध्याभ्यां रहितं पूर्वोक्तं कृतयुगमानं शेषं ४००० शुद्धकृतयुगमानं मनुस्मृतौ मनूक्तसममेव । एवं सन्ध्याभ्यां रहितं सूर्यसिद्धान्तयुगमानं शुद्धं मनूक्तसमं युगमानं भवतीति । यथा सूर्यास्तासन्ने घटिकात्रयमिता लोमदर्शनात् सन्ध्या, तथा सूर्योदयासन्ने चान्या तन्मिता सन्ध्या । एवं युगारम्भासन्ने तथा युगावसानासन्ने च तदीया सन्ध्या । यदि ज्योतिषवेदाङ्गोक्तस्य परमदिनमानस्य ३६ घटिकाः सन्ध्या घटीभिस्त्रिमिताभिर्विभज्यन्ते, तर्हि लब्धिर्द्वादशमिताऽऽयाति । अतः परमदिनमानस्य द्वादशांशः सन्ध्या । एवं परमयुगमानस्य द्वादशांशस्तदीया सन्ध्येति प्राचीनकल्पनं युक्तियुक्तं ध्येयम् । वस्तुतस्तु क्षितिजाधःस्थस्य रवेर्दृङ्मण्डलीया अध उन्नतांशा अष्टादशांशसमा यावत्तावल्लोमदर्शनं भवतीत्यसकृतनव्यैर्वेधेन निश्चितम् । तत्रस्थस्य रवेर्यावदध उन्नतमानं तदेव सन्ध्यामानं समुचितं तत्तु निरक्षदृङ्मण्डलाकारे नाडीमण्डले गोलयुक्त्या घटिकात्रयमायाति । अन्यत्र तु पलांशक्रान्त्यंशोन्नतभागजातचापत्रिभुजेनाध उन्नतमानं चापीयत्रिकोणमित्याऽऽनीय तत्तुल्यमेव वास्तवं सन्ध्यामानं सुधीभिर्बोध्यमित्यलं प्रसङ्गागतविचारेण ॥ १७ ॥

इदानीं मनुमानं तत्सन्धिमानं चाह—

युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते ।
कृताब्दसंख्या तस्यान्ते सन्धिः प्रोक्तो जलप्लवः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युगानां महायुगानां सैका सप्ततिरिह मन्वन्तरमुच्यते। सैकसप्ततिमहायुगैरन्यो मनुर्भवतीत्यर्थः। तस्य मनोरन्तेऽवसाने कृताब्दसंख्या पूर्वोदितसन्ध्यासन्ध्यांशसहितकृतयुगमानसंख्या या, स एव सन्धिर्भवति। तत्सन्धिकालपर्यन्तं जलप्लवः प्रोक्तः। तावत्कालपर्यन्तं जलेन पूर्णा सकला मही भवतीति। अयं सन्धिः पूर्वोक्तयुगमानद्वादशांशवन्न मनुमानद्वादशांशसमोऽत एवाह सन्धिः प्रोक्तो जलप्लवः। अयं सन्धिः पूर्वापरमनुकालाश्रितो न; किन्तु एकस्य मनोरभावात् पृथिव्या जलपूर्णत्वात् कृताब्दसंख्यासमे कालेऽन्यो मनुराविर्भवष्यतो गतमनुविरामवर्त्तमानमनुजन्मान्तर्वर्त्ती काल इति प्राचीनवाक्यप्रमाणमेव हेतुर्नान्यत् कारणं वक्तुं शक्यते ॥ १८ ॥

अथ कल्पप्रमाणं सन्धौ विशेषं चाह—

ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश।
कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशः स्मृतः ॥ १९ ॥

ते पूर्वोदितमाना मनवः सन्धिभिः सहिता कल्पे चतुर्दश भवन्ति, कल्पे चतुर्दश मनवश्चतुर्दश सन्धयश्च भवन्तीत्यर्थः। अथ कल्पादौ प्रधानमन्वादौ कृतप्रमाणः कृतयुगाब्दपरिमाणः पञ्चदश सन्धिश्च प्राचीनैः स्मृतः। एवमेकस्मिन् कल्पे चतुर्दश मनवः पञ्चदश सन्धयश्च भवन्तीत्यर्थत एव सिध्यति। एवं चतुर्दशमनुषु महायुगमानम् = ७१ मयु × १४ = ९९४ मयु कृतयुगे महायुगमानम् $= \frac{\text{४ मयु}}{\text{१०}}$। इद पञ्चदशगुणं कल्पे सर्वसन्धिमानम्

$\frac{\text{४} \times \text{१५ महायु}}{\text{१०}}$ = ६ मयु। मनुसन्धिमहायुगानां योगे चैकस्मिन् कल्पे महायुगानि सहस्रमितानि तान्येवाग्रिमश्लोकेनाचार्यः कथयति—

इत्थं युगसहस्रेण भूतसंहारकारकः।
कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती ॥ २० ॥

इत्थं पूर्वोक्तगणनाप्रकारेण भूतसंहारकारकः प्राणिविनाशकर्त्ता कल्पो विद्यते। तदेव ब्राह्मं ब्रह्मणोऽहो दिनं प्रोक्तं तस्य ब्रह्मणस्तावती दिनतुल्या शर्वरी रात्रिश्च भवति। एवं ब्रह्मणोऽहोरात्रे कल्पद्वयं भवतीत्यर्थादवगम्यते ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ ब्रह्मण आयुः प्रमाणं वर्तमानस्यातीतवयोमानं चाह—

परमायुः शतं तस्य तयाऽहोरात्रसंख्यया ।
आयुषोऽर्धमितं तस्य शेषकल्पोऽयमादिमः ॥ २१ ॥

तस्य ब्रह्मणस्तथा पूर्वोदितयाऽहोरात्रसंख्यया शतं शतवर्षाणि परमायुः । यथा मनुष्याणां परमायुः पञ्चदिनसहितं विंशत्यधिकशतवर्षमितमाद्यैर्निरुक्तमपि मनुजा न तावत्कालपर्यन्तं जीवन्ति । एवमत्रापि तावत्कालपर्यन्तं ब्रह्मणो जीवनं न भवेच्चेत् तर्हि तदायुर्लेखो व्यर्थ इत्याशङ्कानिराकरणाय रङ्गनाथेन स्वगूढार्थप्रकाशकटिप्पणे "परमन्यत् हे मय, त्वं शृणु तस्य ब्रह्मणस्तयाऽहोरात्र-संख्यया शतं शतवर्षाणि आयुः । अथवा हे परमभक्त मय ! तस्य तथाऽहोरात्र-संख्यया शतमायुः" इति व्याख्यातम् । तस्य वर्त्तमानब्रह्मण आयुषोऽर्धमितं गतम् । शेषे उत्तरार्धायुर्दाये यः कल्पोऽसौ शेषकल्पोऽयमादिमः प्रथम एव वर्त्तमानदिने बोध्य इति शेषः । विष्णुपुराणे च—

निजेनैव तु मानेन चायुर्वर्षशतं स्मृतम् ।
तत् पराख्यं तदर्धं तु परार्धमभिधीयते" ॥ इति

एवमस्मिन्ननाद्यनन्ते काले कियन्तो ब्रह्मणो गता इति वक्तुमशक्या अत एव भास्कराचार्यः—"यतोऽनादिमानेष कालस्ततोऽहं न वेद्म्यत्र पद्मोद्भवा ये गतास्तान्" इति । अत्र सूर्यसिद्धान्ते वर्त्तमानब्रह्मण आयुषोऽर्धं गतमिति प्रति-पादितं; परन्तु सिद्धान्तवटेश्वरे तु "कजन्मनोऽष्टौ सदलाः समा ययुः" इत्यनेना-युषः सार्धवर्षाष्टकं गतमिति विलिखितम् । एवमागमद्वैविध्ये भास्करः—

"तथा वर्त्तमानस्य कस्यायुषोऽर्धे-
गतं सार्धवर्षाष्टकं केचिदूचुः ।
भवत्वागमः कोऽपि नास्योपयोगो
ग्रहा वर्त्तमानद्युयातात् प्रसाध्याः" ॥ इत्याह ।

यद्यपि ग्रहगणिते ब्रह्मणो गतवर्षैर्दिनैर्वा ग्रहचाराभावाद् न प्रयोजनं ग्रहचारस्यैकस्मिन्नेव कल्पे ब्राह्मे दिन एव पूर्णत्वात् तथापि धर्मादिकृत्या-नुष्ठाने सङ्कल्पप्रयोगादौ ब्रह्मण आयुर्गतमानमावश्यकमतो भास्करप्रकथनं न युक्तम् । अत्र सर्वैर्वैदिकैः सूर्यसिद्धान्तमतमेवाङ्गीकृत्य सङ्कल्पे "ब्रह्मणो द्वितीय-परार्धे" इति प्रयोगः क्रियत इति स्फुटं सर्वं विदाम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वर्त्तमाने ब्रह्मणो दिनेऽस्मिन् कल्पे कियन्तो गता इत्याह—

कल्पादस्माच्च मनवः षड्व्यतीताः ससन्धयः ।
वैवस्वतस्य च मनोर्युगानां त्रिघनो गतः ॥ २२ ॥
अष्टाविंशाद्युगादस्माद्यातमेतत् कृतं युगम् ।
अतः कालं प्रसंख्याय संख्यामेकत्र पिण्डयेत् ॥ २३ ॥

कल्पात् कल्पारम्भात् षड्मनवो व्यतीताः । सप्तमस्य वर्तमानस्य वैवस्वतस्य च मनोर्युगानां महायुगानां त्रिघनः सप्तविंशतिर्गतः अस्माद्वर्त्तमानादष्टाविंशाद्युगात् महायुगादेतत् कृतं युगं च यातम् । अतः पूर्वोदितेभ्यो मन्वादिमानेभ्यः सर्वां संख्यां प्रसंख्याय गणयित्वा गणक एकत्रैकस्मिन् स्थाने पिण्डयेत् मिश्रीकुर्यादिति ।

गतानां षण्णां मनूनां नामानि भास्करेणोक्तानि । तद्यथा—

"स्वायम्भुवो मनुरभूत् प्रथमस्ततोऽमी
स्वारोचिषोत्तमजरैवततामसाख्याः ।
षष्ठस्तु चाक्षुष इति प्रथितः पृथिव्यां
वैवस्वतस्तदनु संप्रति सप्तमोऽयम् ॥

अन्येषामवशिष्टानां सप्तानां नामानि भागवतादिपुराणेषु प्रसिद्धानि ॥२२-२३॥

अथ कल्पादितः सृष्टिप्रारम्भकालमाह—

ग्रहर्क्षदेवदैत्यादि सृजतोऽस्य चराचरम् ।
कृताद्रिवेदा दिव्याब्दाः शतघ्ना वेधसो गताः ॥ २४ ॥

अस्य वर्त्तमानस्य वेधसो ब्रह्मणो ग्रहर्क्षदेवदैत्यादि रचयतः शतघ्नाः कृताद्रिवेदाः शतगुणा वेदसप्तवेदाः = ४७४०० दिव्याब्दा गताः । ब्रह्मदिनादितः शतघ्नवेदसप्तवेददिव्याब्देषु गतेषु ब्रह्मा सृष्टिं रचयित्वाऽऽकाशे नियोजितवान् । ब्रह्मगुप्तादयो ब्रह्मदिनादावेव ग्रहादिसृष्टिं कथयन्ति । तन्निराकरणार्थं सौरमतमण्डनार्थं च तत्त्वविवेके कमलाकरेण व्यर्थमेव प्रपञ्चितं न हि नामभेदेन वस्तुभेदः । कल्पसम्बन्धिभगणादीनां सृष्टिसम्बन्धिभगणादीनां चाभेदात् । यदि वस्तुतो धर्मकृत्याद्यनुष्ठाने सौरमतस्येव प्राधान्यं तर्हि कमलाकरोक्तमवश्यमेव सर्वजनमान्यमित्यलं पल्लवितेन ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं ग्रहाणां पूर्वा गतिः कथं ज्ञायत इत्यत्र हेतुमाह—

पश्चाद् व्रजन्तोऽतिजवान्नक्षत्रैः सततं ग्रहाः ।
जीयमानास्तु लम्बन्ते तुल्यमेव स्वमार्गगाः ॥ २५ ॥

प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः ।
परिणाहवशाद्भिन्ना तद्वशाद्भानि भुञ्जते ॥ २६ ॥

शीघ्रगस्तान्यथाल्पेन कालेन महताऽल्पगः ।
तेषां तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः ॥ २७ ॥

नक्षत्रैः सह सततं प्रवहवायुनाऽतिवेगात् पश्चाद् गच्छन्तो ग्रहा जीयमानाः पराजिता इव लम्बन्ते । किं विशिष्टा ग्रहाः ? तुल्यमेव समानयोजनात्मकवेगेन स्वमार्गगाः स्वस्वकक्षासु गता इत्यर्थः । अत्रैतदुक्तं भवति । कल्प्यते किमपि भं ग्रहश्च रात्रौ युगपदुदितौ । ततः प्रवहवशेन द्वयोरप्यतिवेगेन पश्चाद् व्रजतोर्द्वितीयदिने प्रथमं नक्षत्रोदयस्तत्पश्चाद्ग्रहोदयो दृश्यते । अतो नक्षत्रेण पराजित इव ग्रहः प्राचि लम्बितो जातः । नक्षत्रस्य गतिश्च नास्त्यतः ग्रहाणां प्राग्गतित्वं ग्रहाश्च योजनैः समानेनेव वेगेन गच्छन्ति । भास्करेणाप्युक्तम्—

"समा गतिश्च योजनैर्नभःसदां सदा भवेत् ।
कलादिकल्पनावशान्मृदुद्रुता च सा स्मृता" ॥ इति ॥

नव्यानां मतेन सूक्ष्मयन्त्रवेधविधिना ग्रहाणां योजनैः समान्तगतिर्नोपलक्ष्यते । अतः पूर्वोक्तप्रकारेण तेषां ग्रहाणां प्राग्गतित्वं सिद्धम् । भगणैर्वक्ष्यमाणैः प्रत्यहं ग्रहाणां कलात्मिका गतिः साध्या । कल्पकुदिनैर्भगणकला लभ्यन्ते, तदैकेन सावनेन किमित्यनुपातेन कलात्मिका गतिः साध्येत्यर्थः । सा च गतिः परिणाहवशाद् ग्रहाणां कक्षाभेदादिभन्ना भिन्ना भवति, ग्रहाश्च तद्वशाद् भानि राशीन् भुञ्जते । शीघ्रगो ग्रहस्तानि भानि अल्पेन कालेन अल्पगो ग्रहश्च महता कालेन भुङ्क्ते । तेषां ग्रहाणां परिवर्त्तेन भ्रमणेन पौष्णान्ते रेवत्यन्ते भगणः स्मृतः कथितः । अश्विन्यादे रेवत्यन्तमेको भगणः कथ्यते, तद्भुक्तकालश्चैकभगणभोगकाल इत्यर्थः । अत्र भूमध्याभिप्रायेण ग्रहाणां कक्षाः प्रतिपादिताः सर्वासु कक्षासु चक्रलिप्ता अङ्किताः सन्ति । प्राचीनानां मतेन योजनात्मिका गतिः समैवेति पूर्वमेवोक्तम् । अतो लघुकक्षायां गतियोजनचापे महत्यः कला बृहत्कक्षायां च तावत्येव चापे लघ्व्यः कला इति क्षेत्रमिति युक्त्या स्फुटम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः शीघ्रगतिर्ग्रहश्चक्रकला वा भानि अल्पेन कालेन मन्दगतिश्च महता कालेन भुङ्क्ते इत्यनुपातेन गणितविदां स्फुटमेव । अत एव भास्करोऽप्याह—

"कक्षाः सर्वा अपि दिविषदां चक्रलिप्ताङ्कितास्ता
वृत्ते लघ्व्यो लघुनि महति स्युर्महत्यश्च लिप्ताः" । इत्यादि ॥

नवीनानां मतेन ग्रहाः सूर्यं परितो दीर्घवृत्तले भ्रमन्ति । तत्र मध्यमगतितः कथं स्पष्टीकरणमित्येतदर्थं मदीयदीर्घवृत्तलक्षणं विलोक्यम् । अत्र पश्चाद्व्रजन्तोऽतिजवादित्यादिना मध्यमा ग्रहसंस्था प्रतिपादिताऽस्त्यन्यथा स्पष्टग्रहसंस्थायां वक्रिणि ग्रहे 'जीयमानास्तु लम्बन्ते' इत्यादि नोपपद्यत इति सुधीभिर्भृशं विचिन्त्यम् ॥ २५—२७ ॥

पूर्वोदितः को नाम भगण इत्याशङ्कां परिहरन्नाह—

विकलानां कला षष्टया तत्षष्टया भाग उच्यते ।
तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते ॥ २८ ॥

विकलानां षष्टया एका कला । तासां कलानां षष्टया एको भागोंऽशः । भागानां त्रिंशता राशिः । ते द्वादश राशय एव एको भगणो भवेदिति स्फुटोऽर्थः । अनया परिभाषया विकलाप्रमाणं न सिध्यत्यतो भगणाद्विपरीतविधिना भास्करोक्ता परिभाषा समीचीना । सा च यथा—

"क्षेत्रे समाद्येन समा विभागाः स्युश्चक्रराश्यंशकलाविलिप्ताः" इति ॥ २८ ॥

इदानीं भगणान् विवक्षुस्तावत् सूर्यबुधशुक्राणां लाघवेन भौमगुरुशनिशीघ्रोच्चानां च भगणानाह ।

युगे सूर्यज्ञशुक्राणां खचतुष्करदार्णवाः ।
कुजार्किगुरुशीघ्राणां भगणाः पूर्वयायिनाम् ॥ २९ ॥

युगे एकस्मिन् महायुगे पूर्वाभिमुखं गच्छतां सूर्यबुधशुक्राणां तथा भौमशनिबृहस्पतिशीघ्रोच्चानां शून्यचतुष्टयद्वात्रिंशद्वेदा ४३२०००० भगणाः । युगे चैतेषां भगणानां पाठपठनादेकस्मिन् युगे तेषां भगणानां निरवयवत्वमुपलक्षितमाचार्येण । भगणोपपत्तिश्च यन्त्रवर्णने कथयिष्यते । खमाकाशं शून्यम् । रदा दन्ता द्वात्रिंशत् । अर्णवाः समुद्राश्चत्वारः (१५ श्लोकटीका विलोक्या) ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथान्येषां भगणानाह—

इन्दो रसाग्नित्रित्रीषुसप्तभूधरमार्गणाः ।
दस्रत्र्यष्टरसाङ्काक्षिलोचनानि कुजस्य तु ॥ ३० ॥
बुधशीघ्रस्य शून्यर्तुखाद्रित्र्यङ्कनगेन्दवः ।
बृहस्पतेः खदस्राक्षिवेदषड्वह्नयस्तथा ॥ ३१ ॥
सितशीघ्रस्य षट्सप्तत्रियमाश्विखभूधराः ।
शनेर्भुजङ्गषट्पञ्चरसवेदनिशाकराः ॥ ३२ ॥
चन्द्रोच्चस्याग्निशून्याश्विवसुसर्पार्णवा युगे ।
वामं पातस्य वस्वग्नियमा श्विशिखिदस्रकाः ॥ ३३ ॥

एकयुगे चन्द्रस्य भगणाः = ५७७५३३३६ ।

भौमस्य च भगणाः = २२९६८३२ ।

बुधशीघ्रोच्चस्य भगणाः = १७९३७०६० ।

बृहस्पतेर्भगणाः = ३६४२२० ।

सितशीघ्रोच्चस्य भगणाः = ७०२२३७६ ।

शनेर्भगणाः = १४६५६८ ।

चन्द्रोच्चस्य भगणाः = ४८८२०३ ।

पातस्य चन्द्रपातस्य वामं विलोमा भगणाः = २३२२३८ ।

रसा मधुराद्याः षट् । उदर-वन-समुद्रगता अग्नयस्त्रयः । इषवो बाणाः कामस्य पञ्च । "कामः पञ्चशरः स्मृतः" इत्यमरकोषोक्तेः । भूधराः पर्वताः कुलाचलाः सप्त । मार्गणा बाणाः पञ्च पूर्वमेवोदिताः ।

दस्रशब्दो यमलवाची तेनातो द्वयं गृह्यते । अङ्का नवातोऽङ्कशब्देन नव । अक्षिणी द्वे । लोचने च द्वे । नगा न गच्छन्तीति नगाः पर्वताः, सप्त पूर्वमेवोदिताः सप्तकुलाचलत्वात् । इन्दुश्चन्द्र एक एव । वेदाश्चत्वारः वह्नयोऽग्नयस्त्रयः पूर्वोदिताः । अश्विनी यमलौ द्वौ । भुजङ्गाः सर्पा अनन्तादयोऽष्टावेव । निशाकरश्चन्द्र एक एव । अर्णवाः समुद्राश्चत्वारः (१५ श्लोकटीका विलोक्या) शिखिनोऽग्नयः । शिखाऽस्यास्तीति शिखी, तद्बहुवचने शिखिनोऽग्नयस्त्रयः । क्रान्तिविमण्डलसम्पातः पात इति प्रसिद्धा परिभाषा ॥ ३०—३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं भभ्रमान् ग्रहसावनदिनानयनं चाह—

भानामष्टाक्षिवस्वद्रित्रिद्विद्व्यष्टशरेन्दवः ।
भोदया भगणैः स्वैः स्वैरूनाः स्वस्वोदया युगे ॥ ३४ ॥

भानां भगणाः प्रवहवशेन गत्यभावाश्च भ्रमा = १५८२२३७८२८ एते। ते च भोदया भानामुदया भानां सावनदिनानि "भवासरस्तु भभ्रम" इति भास्करोदितेः। स्वैः स्वैर्भगणैरूना भोदया महायुगे स्वस्वोदयाः स्वस्वसावनदिवसा भवन्ति।

अत्रोपपत्तिः। "भभ्रमास्तु भगणैर्विवर्जिता यस्य तस्य कुदिनानि तानि वा" इति भास्करवासनातः स्फुटा ॥ ३४ ॥

इदानीं चान्द्रमासाधिमासानयनमाह—

भवन्ति शशिनो मासाः सूर्येन्दुभगणान्तरम् ।
रविमासोनितास्ते तु शेषाः स्युरधिमासकाः ॥ ३५ ॥

युगे सूर्यचन्द्रभगणान्तरतुल्याः शशिनश्चन्द्रस्य मासा भवन्ति। ते रविमासैरूनिताः शेषा अधिमासाः स्युरित्यर्थः।

अत्रोपपत्तिः। "रवीन्द्वोर्युतिः संयुतिर्यावदन्या विधोर्मासः" इति भास्करादिपरिभाषया रवीन्द्वोरन्तरमेकभगणतुल्यं तदैकश्चान्द्रमासस्तदा युगीयभगणान्तरे कियन्तश्चान्द्रमासा इत्यनुपातेन लब्धा भगणान्तरसमाश्चान्द्रमासा एवं चान्द्रमासा रविमासतो यावताऽधिकास्तेऽधिमासा इति अहर्गणादिसाधने गुणने लाघवार्थं पूर्वाचार्यैः पठितमिति सर्वं निरवद्यम् ॥ ३५ ॥

इदानीमवमानयनं कुदिनपरिभाषां चाह—

सावनाहानि चान्द्रेभ्यो द्युभ्यः प्रोह्य तिथिक्षयाः ।
उदयादुदयं भानोर्भूमिसावनवासरः ॥३६॥

चान्द्रेभ्यो द्युभ्यो दिवसेभ्यः सावनदिनानि प्रोह्य हित्वा शेषं तिथिक्षया अवमानि भवन्ति। भानोः सूर्यस्योदयादुदयपर्य्यन्तं यावत्कालः स एव भूमिसावनवासरः कुदिनं भवति। तिथिक्षयाश्चाहर्गणादिसाधने गणितकर्मणि लाघवार्थं पूर्वैः पठिताः कुदिनपरिभाषा च परम्परातः प्रसिद्धा "इनोदयद्वयान्तरं तदर्कसावनं दिनं तदेव मेदिनीदिनम्" इति भास्करेणाप्युदितम्। अत्र क्रान्तिवृत्तीयार्कमध्यगतिसमां नाडीमण्डले गतिं स्वीकृत्य तथा गत्या नाडीमण्डले यः कल्पितार्को गच्छति स एवानेन शब्देन गृह्यते, तस्यैव सावनदिनेषु सततं तुल्यकालत्वात्। अत एव क्रान्तिवृत्तीयमध्यमार्कसावनदिनानयनार्थं भास्करेणो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दयान्तरं कर्मकृतमिति स्फुटं गणितगोलविदामिति सवैं "समं भसूर्याबुदितौ" इन्यादिवासनायां भास्करमतं भृशं विचिन्त्यमिति ॥ ३६ ॥

इदानीं पूर्वोदितानयनेन युगसावनचान्द्रदिनादिसंख्यामुपयोगित्वात् पठति—

वसुद्व्यष्टाद्रिरूपाङ्कसप्ताद्रितिथयो युगे ।
चान्द्राः खाष्टखखव्योमखाग्निखर्त्तुनिशाकराः ॥ ३७ ॥
षड्वह्नित्रिहुताशाङ्कतिथयश्चाधिमासकाः ।
तिथिक्षया यमार्थाश्विद्व्यष्टव्योमशराश्विनः ॥ ३८ ॥
खचतुष्कसमुद्राष्टकुपञ्च रविमासकाः ।
भवन्ति भोदया भानुभगणैरूनिताः क्वहाः ॥ ३९ ॥

एकस्मिन् महायुगे भूमिसावनदिवसाः = १५७७९१७८२८ ।
चान्द्रदिवसाः = १६०३०००० ८० ।
अधिमासाः = १५९३३३६ ।
अवमानि = २५०८२२५२ ।
रविमासाः = ५१८४०००० ।

यद्यपि भोदया भगणैः स्वैः स्वैरूनाः स्वस्वोदया युगे इति ३४ श्लोकेन सामान्यतः सर्वेषां ग्रहाणां सावनदिनानयनमुक्तं तथाऽप्यत्र स्फुटार्थं भोदयाः पूर्वोदिताः पूर्वोदितै रविभगणैरूनिताः क्वहा भूमिसावनवासरा भवन्तीति पुनरप्युक्तम् ।

अत्रोपपत्तिः पूर्वोदितपरिभाषाभिः स्फुटा । सा च यथा—

भूसादि = भभ्र-रभ = १५८२२३७८२८—४३२०००० = १६०७९ १७८२८।

चादि = ३० चामा = ३७ (चभ—रभ)
= ३० (५७७५३३३६—४४२००००) = ३० × ५३४३३३३६ =
१६०३००००८० ॥

अधिमा = (चामा—रवि = (चामा —१२ रभ)
= (५३४३३३३६—५७८४००००) = १५९३३३६ ॥

तिक्ष = (चादि—कुदि)
= १६०३००००८०—१५७७९१७८२८) = २५०८२२५२ ॥

रविमासाः = १२ × रभ—१२ × ४३२०००० = ५१८४०००० ॥

अत्र सूर्यसिद्धान्ते सर्वत्रोदयशब्देन यमकोटिपुरोदयो ग्राह्य इति गोलस्थितितः स्फुटं गोलविदामिति ॥ ३७—३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं कल्पेऽधिमासादीन् सूर्यादीनां च भगणानयनमाह—

अधिमासोनरात्र्यर्क्षचान्द्रसावनवासराः ।
एते सहस्रगुणिताः कल्पे स्युर्भगणादयः ॥ ४० ॥

सूर्यमन्दोच्चादिभगणाः कल्पे निरवयवा भवन्ति येषां पाठश्चाग्रे पठिष्यते तत्सजातीयास्तात्कालिकाश्चेत् पूर्वोदिता युगसम्बन्धिनोऽधिमासक्षयरात्रिभोदय-चान्द्रसावनवासरादयस्तथा रव्यादीनां भगणादयोऽपेक्षितास्तर्हि एते सर्वे सहस्र-गुणिताः कल्पे स्युर्युगसहस्रस्यैककल्पत्वादिति सर्वं स्फुटम् ॥ ४० ॥

इदानीं कल्पे ये भगणा निरग्रा भवन्ति तानाह—

प्राग्गतेः सूर्यमन्दस्य कल्पे सप्ताष्टवह्नयः ।
कौजस्य वेदखयमा बौधस्याष्टर्त्तुवह्नयः ॥ ४१ ॥

खखरन्ध्राणि जैवस्य शौक्रस्यार्थगुणेषवः ।
गोऽग्नयः शनिमन्दस्य पातानामथ वामतः ॥ ४२ ॥

मनुदस्रास्तु कौजस्य बौधस्याष्टाष्टसागराः ।
कृताद्रिचन्द्रा जैवस्य त्रिखाङ्काश्च भृगोस्तथा ॥ ४३ ॥

शनिपातस्य भगणाः कल्पे यमरसर्त्तवः ।
भगणाः पूर्वमेवात्र प्रोक्ताश्चन्द्रोच्चपातयोः ॥ ४४ ॥

प्राग्गतेः पूर्वाभिमुखगतिक्रमात् कल्पे सूर्यमन्दस्य सूर्यमन्दोच्चस्य भगणाः = ३८७ । कौजस्य कुजसम्बन्धिमन्दोच्चस्य कल्पे भगणाः = २०४ बुधसम्बन्धिनः = ३६८ । एवं—

गुरुमन्दोच्चस्य = ९०० । शुक्रमन्दोच्चस्य = ५३५ । शनिमन्दोच्चस्य = ३९ भगणाः सन्ति । अथ भौमादीनां पातानां वामतः पश्चिमगत्या कल्पे वक्ष्यमाणा भगणाः यथा भौमस्य भगणाः = २१४ । बुधपातभगणाः = ४८८ । गुरुपातभगणाः = १७४ । भृगुपातभगणाः = ९०३ । शनिपातभगणाः = ६६२ । अत्र चन्द्रोच्च-पातयोः पूर्वमेव चन्द्रभगणपाठावसर एव ग्रहणोपयोगित्वाद्भगणाः प्रोक्ता अतोऽत्र ते न पठिता इति युक्तमुक्तम् ॥

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणिनामृणादयो नव रन्ध्राणि 'नव गोप्यानि यत्नतः' इति नीतिशास्त्रे ह्युक्तत्वात् । अतो रन्ध्रशब्देन नव । पञ्चज्ञानेन्द्रियग्राह्या अर्थाः पञ्च । सत्त्वं रजस्तम इति गुणास्त्रयः । गावोनन्दित्यादयो नव । क्रान्तिमण्डलस्य ग्रहविमण्डलस्य च सम्पातः पातः कथ्यते स च वेधेन चलो विलोमगतिश्च लक्ष्यतेऽतो वामगत्या तेषां भगणा पठिताः । वेधप्रकारस्तु यन्त्राध्याये कथयिष्यत इति पूर्वमेवोदितम् । मनवः कल्पे चतुर्दशेति पूर्वमेवोक्तं तेन मनुशब्देन चतुर्दश । दस्रशब्दो यमलवाचक इति पूर्वमेव निरूपितम् । कृतं सुकृतं साधनचतुष्टयम् । अन्ये संख्यावाचकाः शब्दाः पूर्वमेव व्याख्याताः ॥ ४१—४४ ॥

इदानीं कृतयुगान्ते सृष्ट्यादेर्गताब्दमानमाह—

षण्मनूनां तु सम्पीड्य कालं तत्सन्धिभिः सह ।
कल्पादिसन्धिना सार्धं वैवस्वतमनोस्तथा ॥ ४५ ॥

युगानां त्रिघनं यातं तथा कृतयुगं त्विदम् ।
प्रोह्यसृष्टेस्ततः कालं पूर्वोक्तं दिव्यसंख्यया ॥ ४६ ॥

सूर्याब्दसंख्यया ज्ञेयाः कृतस्यान्ते गता अमी ।
खचतुष्क-यमाद्र्यग्नि-शर-रन्ध्र-निशाकराः ॥ ४७ ॥

गतानां षण्मनूनां कालं तत्सन्धिभिः सह कल्पादिसन्धिना सार्धं तथा वैवस्वतमनोर्यातं गतं युगानां त्रिघनं सप्तविंशतिसंख्याकमिदं कृतयुगमानं च सर्वं सम्पीड्यैकीकृत्य ततो दिव्यसंख्यया पूर्वोक्तं सृष्टेः कालं सजातीयं कृत्वा प्रोह्य हित्वा कृतस्य कृतयुगस्यान्ते सूर्याब्दसंख्यया खचतुष्कयमाद्र्यग्निशररन्ध्रनिशाकरा अमी अब्दा गता ज्ञेयाः । यथा मानेन—

६ म = ७१ मयु × ६ = ४२६ × ४३२००००	= १८४०३२०००० ।
७ सन्धयः = ७ × १७२८०००	= १२०९६००० ।
०७ मयु = २७ × ४३२००००	= ११६६४०००० ।
कृतयुगमानम्	= १०२८००० ।
योगः	= १९७०७८४००० ।
सृष्टिकालः = ४७४०० × ३६०	= १७०६४००० ।
कृतयुगान्ते सौराब्दाः गताः	= १९५३७२०००० ।

एते च मूललिखितसमा एवातो मूललिखितं समीचीनमिति ॥ ४५—४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीमिष्टदिनेऽहर्गणानयनमाह—

अत ऊर्ध्वममी युक्ता गतकालाब्दसंख्यया ।
मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः ॥ ४८ ॥

पृथक्स्थास्तेऽधिमासघ्नाः सूर्यमासविभाजिताः ।
लब्धाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः ॥ ४९ ॥

द्विष्ठास्तिथिक्षयाभ्यस्ताश्चान्द्रवासरभाजिताः ।
लब्धोनरात्रिरहिता लङ्कायामार्धरात्रिकः ॥ ५० ॥

सावनो द्युगणः सूर्याद्दिनमासाब्दपास्ततः ।
सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः ॥ ५१ ॥

अतोऽस्मात् कृतयुगान्तादूर्ध्वममी पूर्वोदिताः कृतान्ते गता अब्दा गतकालाब्दसंख्यया गतकालसौराब्दसंख्यया युता मासीकृता अर्थाद्द्वादशगुणाः कार्याः । ते मधुशुक्लादिभिश्चैत्रशुक्लदिभिर्गतैर्मासैर्युक्ताः पृथक्स्थाश्च कर्त्तव्याः । ते पूर्वपठितैर्युगाधिमासैर्गुणिता युगसौरमासैर्विभाजिताश्च कार्याः लब्धाधिमासैस्ते पूर्वस्थापिताः सौरा मासा युक्तास्ते चान्द्रमासा भवन्ति । ते दिनीकृत्य दिनान्विताः कर्त्तव्याः । चान्द्राः मासास्त्रिंशद्गुणिता गतचान्द्रदिनैर्युक्ताः कार्या इत्यर्थः । ते चान्द्रदिवसा स्द्विष्ठास्तिथिक्षयैः पूर्वपठितैरवमदिनैरभ्यस्ता गुणिताः पूर्वोदितयुगचान्द्रवासरैर्भाजिता लब्धाभिरूनरात्रिभिः क्षयतिथिभिरूनिताः पूर्वस्थाश्चान्द्रा दिवसा लङ्कायामर्धरात्रिकः सावनो द्युगणोऽहर्गणो भवेत्; ततस्तस्मादहर्गणात् सूर्याद्रविवाराद्वक्ष्यमाणप्रकारेण दिनमासाब्दपा ज्ञेयाः । अहर्गणः सप्तभिर्विहृत्य क्षयितः शिष्टः कार्यस्तदा सूर्याद्यो सूर्यादिगणनया वासरेश्वरो दिनपतिर्ज्ञेयः ॥

अत्रोपपत्तिः । गताब्दा द्वादशगुणा वर्षादौ गताः सौरमासा जाताः । ते गतचान्द्रमासतुल्यैर्गतसौरमासैर्युक्ताः क्रियन्ते तर्हि दर्शाग्रतः सङ्क्रान्त्यवधयः सौराः मासा जाताः । ततोऽनुपातेन लब्धाधिमासैः सशेषैः सहितास्ते गतसौरमासास्तत्र्त्याः सावयवाश्चान्द्रा मासा भवन्ति । तत्र चेद्दर्शसंक्रान्त्यन्तरमानं ज्यौतिषपरिभाषयाऽधिशेषसमं शोध्यते तदा दर्शान्ते चान्द्रा मासा भवन्ति । अतः केवलेन निरवयवाधिमासमानेन युक्तास्ते सौरा मासा दर्शान्ते चान्द्रा मासा भवन्ति । ततस्ते त्रिंशद्गुणा गततिथियुतास्तिथ्यन्ते चान्द्रा दिवसा भवन्ति । ततोऽनुपातागतैः सशेषैस्तिथिक्षयैरूनाश्चान्द्रा दिवसास्तिथ्यन्ते सावना दिवसाः स्युः । अथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिभाषया तिथ्यन्तसूर्योदयान्तर्वर्त्तिना क्षयशेषेण युक्तारितथ्यन्तकालिकाः सावन-दिवसाः सूर्योदये सावनाहर्गणो भवतीति केवलैः क्षयदिनैर्युक्ताश्चान्द्राहाः सूर्योदये सावनाहर्गणो भवति—इति मूलावतं समीचीनम्। सृष्ट्यादौ रविवार आसीदतः सप्तशेषितेऽहर्गणे सूर्याद्यो वारेश्वरो भवति। इह स्थूलतिथ्यानयने यस्या तिथौ यो वारः स चेदहर्गणेन न तदा सेको निरेको वाऽहर्गणः कार्य इत्यादयो भास्कर-विशेषा विचिन्त्याः किं लेखप्रयासेन। मयदैत्यस्य पूज्यो लङ्काधीश्वरो रावण आसीत्। तस्मै मयेन स्वकन्या मन्दोदरी च पूज्यत्वाद्दत्ता। अतो मयेन लङ्कामेव प्रधाननगरीमङ्गीकृत्य तत्र निशाचराणां निवासादर्धरात्रिकाल एव, तेषां व्यव-हारारम्भात् तदेव दिनादिमवगत्याऽर्धरात्रिक एवाहर्गणः साधितः। ततः सूर्य-सिद्धान्ते लङ्कायाः प्रधानत्वादन्ये सिद्धान्तकारा आर्यभटादयोऽपि लङ्कायामेव औदयिकानर्धरात्रिकान् वा ग्रहान् साधितवन्त इति। अहर्गणे स्पष्टरविवशेन चान्द्रा मासा गृहीता अतस्तत्समा यदा मध्या अपि चान्द्रा मासास्तदाऽहर्गणः शुद्धो भवति। स्पष्टमध्यचान्द्रमासानामन्तरमेकमतः स्फुटतो मध्यमाधिके सकैर्गत मासैरल्पे च निरेकैरहर्गणः साध्यः। एवमुदये स्पष्टमध्यमतिथ्योरन्तरं च रूप-समम्। अहर्गणे मध्यमास्तिथयोऽपेक्षिताः पञ्चाङ्गेन स्फुटास्तिथयो गृहीताः अतः स्फुटतो मध्यमतिथिमानेऽधिके सेको न्यूने च निरेकोऽहर्गणः क्रियते। अनुपातस्य नियतैकविषयत्वात् स्फुटचान्द्रमासैः स्फुटतिथिभिश्च मध्यमसावना-हर्गणो नैव कर्तुं योग्य इति सर्वं गणितविदां स्फुटमेव। एतेनाहर्गणानयने सिद्धान्तशिरोमणौ भास्करोक्ता विशेषाश्चोपपन्ना भवन्ति। सौरभाष्ये नृसिंहदैव-ज्ञेनापीदमेव पूर्वोक्तं स्पष्टमुदितमिति ॥ ४८—५१ ॥

अथाहर्गणेन कथं मासवर्षाधिपानयनं कर्त्तव्यमित्याशङ्कां परिहरन्नाह—

मासाब्ददिनसंख्याप्तं द्वित्रिघ्नं रूपसंयुतम्।
सप्तोद्धृतावशेषौ तु विज्ञेयौ मासवर्षपौ ॥ ५२ ॥

अहर्गणमानमेकत्र मासदिनसंख्यया त्रिंशताऽन्यत्र वर्षदिनसंख्यया षष्ट्यधिक-शतत्रयेण भाज्यमाप्तं फलं ग्राह्यं शेषमानमुभयत्र त्याज्यम्। प्रथम फलं द्वाभ्यां गुणं द्वितीयं च त्रिभिर्गुणनीयम्। उभे गुणनफले रूपेणैकेन युते कार्ये। द्वौ योगौ सप्तभिर्भक्तावशेषौ विज्ञेयौ तौ तु रव्यादिगणनया क्रमेण मासवर्षपौ भवतः।

अत्रोपपत्तिः। माससंख्यया त्रिंशता वर्षसंख्यया षष्ट्यधिकशतत्रयेण च यद्येको मासो वर्षं च लभ्यते तदाऽहर्गणेन किं प्रथमस्थाने लब्धा गताः सावनमासा द्वितीय-स्थाने च लब्धानि गतानि सावनवर्षाणि। एकस्मिन् सावनमासे त्रिंशद्दिनात्मके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्ततष्टे द्वयमवशिष्यते । एकसावनवर्षे षष्ट्यधिकशतत्रयदिनात्मके सप्ततष्टे त्रयमवशिष्यतेऽतो गतमाससंख्यया द्विगुणा गतवर्षसंख्या च त्रिगुणिता क्रमेण गतमासपा गतवर्षपाश्च भवन्ति । वर्त्तमानाधिपत्यर्थं स्थानद्वये रूपयोजनं कृतमाचार्येण । ततः सप्ततष्टे मासवर्षपा भवन्ति । सृष्ट्यादौ मासवर्षपो रविरेवाऽतोऽत्रापि रव्यादितो गणना कार्य्या ।

अथ साधिताहर्गणाद्भगणादिग्रहानयनमाह—

यथा स्वभगणाभ्यस्तो दिनराशिः कुवासरैः ।
विभाजितो मध्यगत्या भगणादिर्ग्रहो भवेत् ।। ५३ ।।

यथा कल्पयुगादिसम्बन्धिभिर्ग्रहभगणैर्दिनराशिरहर्गहणोऽभ्यस्तो गुणितस्तथा क्रमेण कल्पयुगादिसम्बन्धिभिः कुदिनैरर्कसावनदिनैर्विभाजितस्तदा मध्यगत्या भगणादिर्ग्रहो भवेत् ।

अत्रोपपत्तिः । कल्पयुगादिकुदिनैर्यदि कल्पयुगादिग्रहभगणा लभ्यन्ते तदाऽहर्गणेन किं लब्धो भगणादिर्मध्यमो ग्रहो भवतीति सुगमा । एवमनुपातेन नाडीमण्डलीयकल्पितरविमध्यसावनात्मकाहर्गणेन सिद्धो ग्रहो नाडीमण्डलीयकल्पितमध्यमार्कवशेन यदा लङ्कायामर्धरात्रिर्भवति तत्काले जातः। क्रान्तिवृत्तीयमध्यार्कजन्यार्धरात्रे तु उदयान्तरकर्मणा भवतीति स्फुटं गणितगोलविदाम् । अत एव भास्करः –

"अहर्गणो मध्यमसावनेन कृतश्चलत्वात् स्फुटसावनस्य ।
तदुत्थखेटा उदयान्तराख्यकर्मोद्भवेनोनयुताः फलेन ।।
लङ्कोदये स्युर्न कृतं तथाऽऽद्यैर्यतोऽन्तरं तच्चलमल्पकं च ।"इति ।।५३।।

एवं पूर्वोदितानयनेन सर्वे ग्रहाः साध्या इत्याह—

एवं स्वशीघ्रमन्दोच्चा ये प्रोक्ताः पूर्वयायिनः ।
विलोमगतयः पातास्तद्वच्चक्राद्विशोधिताः ।। ५४ ।।

एवं पूर्वप्रकारेण 'यथा स्वभगणाभ्यस्त' इत्यादिना ये पूर्वगतयः स्वशीघ्रमन्दोच्चा ग्रहाणां शीघ्रमन्दोच्चाः प्रोक्तास्ते सर्वे साध्याः । तद्वद्विलोमगतयः पश्चिमगतयः पाताश्च ये राश्यादयो भवन्ति ते चक्राद् द्वादशराशिभ्यो विशोधितास्तदा मेषादितो भवन्तीत्यर्थः ।

अत्रोपपत्तिः । पूर्वोक्तानुपातेन विलोमतः पाता आगच्छन्ति ते चक्राद्विशोधिताः प्रागतिसजातीया मेषादिक्रमतो भवन्तीति गोलस्थितः स्फुटम् । शेषोपपत्तिः प्रसिद्धा ।। ५४ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं गुरुवर्षानियनमाह—

द्वादशघ्ना गुरोर्याता भगणा वर्त्तमानकैः ।
राशिभिः सहिताः शुद्धाः षष्ट्या स्युर्विजयादयः ।।५५।।

पूर्वंप्रोक्तानुपातेन यो भगणादिर्गुरुः सिद्धस्तत्र ये याता भगणास्ते द्वादशगुणिता वर्त्तमानकै राशिभिः सहिताः षष्ट्या शुद्धा अवशेषिताः । ते षष्टितष्ठाः कार्या इति । एवं विजयादिगणनया गुरोरब्दा भवन्ति । संहिताकारैः शुभाशुभफलज्ञानार्थं षष्टिर्गुरुवर्षाणि कथितानि । शकादौ प्रभवनामाऽब्द आसीत् । ततः क्रमेण तन्नामानि ।

प्रभवः १ ।	विभवः २ ।	शुक्लः ३ ।	प्रमोदः ४ ।
प्रजापतिः ५ ।	अङ्गिराः ६ ।	श्रीमुखः ७ ।	भावः ८ ।
युवा ९ ।	धाता १० ।	ईश्वरः ११ ।	बहुधान्यः १२ ।
प्रमाथी १३ ।	विक्रमः १४ ।	वृषः १५ ।	चित्रभानुः १६ ।
सुभानुः १७ ।	तारणः १८ ।	पार्थिवः १९ ।	व्ययः २० ।
सर्वजित् २१ ।	सर्वधारी २२ ।	विरोधी २३ ।	विकृतः १४ ।
खरः २५ ।	नन्दनः २६ ।	विजयः २७ ।	जयः २८ ।
मन्मथः २९ ।	दुर्मुखः ३० ।	हेमलम्बः ३१ ।	विलम्बः ३२ ।
विकारी ३३ ।	शार्वरी ३४ ।	प्लवः ३५ ।	शुभकृत् ३६ ।
शोभकृत् ३७ ।	क्रोधी ३८ ।	विश्वावसुः ३९ ।	पराभवः ४० ।
प्लवङ्गः ४१ ।	कीलकः ४२ ।	सौम्यः ४३ ।	साधारणः ४४ ।
विरोधकृत् ४५ ।	परिधावी ४६ ।	प्रमादी ४७ ।	आनन्दः ४८ ।
राक्षसः ४९ ।	नलः ५० ।	पिङ्गलः ५१ ।	कालयुक्तः ५२ ।
सिद्धार्थी ५३ ।	रौद्रः ५४ ।	दुर्मतिः ५५ ।	दुन्दुभिः ५६ ।
रुधिरोद्गारी ५७ ।	रक्ताक्षः ५८ ।	क्रोधनः ५९ ।	क्षयः ६० ।

यद्यपि मुहूर्त्तकल्पद्रुमादौ स्पष्टगुहराशिसञ्चारवशतोऽपि गुरुवर्षाणि याश्विनानि तद्वशेन चान्द्रवर्षेऽधिवत्सरश्चाधिमासवत् बाधितस्तथाऽपि प्राचीनैः सर्वैर्वराहमिहिरादिभिर्मध्यमगुरुराशिसञ्चारवशेन वर्षाण्यानीतानि । तथा च भास्करः—

"बृहस्पतेर्मध्यमराशिभोगात् संवत्सरं सांहितिका वदन्ति"—इति । एवं कस्यचित् पद्यं च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"कल्पादितो मध्यमजीवभुक्ता ये राशयः षष्टिहृतावशेषाः।
संवत्सरास्ते विजयाश्विनाद्या इतीज्यमानं किल संहितोक्तम्" ॥

गुरुवर्षानयनार्थं बृहत्संहिता विलोक्या।

अत्रोपपत्तिः। "मध्यगत्या भभोगेन गुरोर्गौरववत्सराः" इति लघुवशिष्ठसिद्धान्तोक्तेरुपरिप्रतिपादितभास्करादिवचनाच्च मध्यमगुरुराशिभोगकाल एकः संवत्सर इति सृष्ट्यादेर्गुरोः सम्पूर्णराशिभोगज्ञानार्थं गता भगणा द्वादशगुणा वर्त्तमानराशिसंख्यासहिताः कृतास्ते च षष्टितष्टाः शिष्टं विजयादिकः संवत्सरो वर्त्तमानो भवति संवत्सराणां षष्टिमितत्वात्। सृष्ट्यादौ विजयसद्भावाद्विजयादितो गणना समुचितेति ॥ ५५ ॥

इदानीं लाघवेन ग्रहानयनार्थमाह—

विस्तरेणैतदुदितं संक्षेपाद्व्यावहारिकम्।
मध्यमानयनं कार्यं ग्रहाणामिष्टतो युगात् ॥ ५६ ॥

एतत् सृष्ट्यादितो ग्रहानयनं मया विस्तरेण बृहदहर्गणेन गौरवेनोदितं संक्षेपाल्लाघवेनेष्टतोऽभीष्टाद्युगादेव व्यवहारयोग्यं ग्रहाणां मध्यमानयनं कार्यं गणकेनेति शेषः। अभीष्टयुगादेवलघ्वहर्गणं प्रसाध्य तदुत्पन्नाः खेटा अभीष्टयुगादिसमुद्भूतखेटैर्ध्रुवसंज्ञैर्युता अभीष्टदिने मध्यमा ग्रहा भवन्तीत्यर्थः। इदमेव करणग्रन्थानामेकस्मिन् सौरवर्षे भास्करादिलघ्वहर्गणस्य च मूलमिति ॥५६॥

अथैतत्प्रकारोदाहरणरूपे त्रेतायुगादितो मध्यमानयने त्रेतायुगादौ वा कृतयुगस्यान्ते संक्षेपाद्ग्रहध्रुवकानाह—

अस्मिन् कृतयुगस्यान्ते सर्वे मध्यगता ग्रहाः।
विनेन्दुपातमन्दोच्चान् मेषादौ तुल्यतामिताः ॥ ५७ ॥

मकरादौ शशाङ्कोच्चं तत्पातस्तु तुलादिगः।
निरंशत्वं गताश्चान्ये नोक्तास्ते मन्दचारिणः ॥ ५८ ॥

अस्मिन् सत्ययुगान्तेऽर्थात् त्रेतादौ चन्द्रपातमन्दोच्चान् विना (बहुषु पुस्तकेषु विना तु पातमन्दोच्चानीति साधुपाठः। तदा ग्रहाणां पातमन्दोच्चान् विना इति व्याख्या कर्त्तव्या) सर्वे मध्यगता मध्यमा ग्रहा मेषादौ तुल्यतां समत्वमिताः प्राप्ताः। सर्वे रव्यादयः सप्त मध्यमग्रहा मेषादावासन् ततस्तेषां ध्रुवकाः शून्येन समा इत्यर्थः। शशाङ्कोच्चं मकरादावर्थात् तस्य ध्रुवो नवराशिमित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तस्य चन्द्रस्य पातो राहुश्च तुलादिगस्तस्य ध्रुवः षड्राशिसम इत्यर्थः। अन्ये ग्रहाणां पादमन्दोच्चाश्च निरंशत्वं गताः। क्रान्तिवृत्तस्य ये द्वादशांशा भागा अर्थाद्राशयस्तेषां यो धर्मस्तदंशत्वं निर्गतमंशत्वमिति निरंशत्वमर्थादंशाभावता न प्राप्ता अर्थाद्राश्यादौ न गता आसन्। ततः पाठे राशिभागकलाविकलानामुल्लेखाद्गौरवान्मया नोक्तास्तेषां ध्रुवा न पठिता इत्यर्थः।

तद्ध्रुवपाठाभावात् त्रेताद्यहर्गणेन कथं सृष्ट्यादेर्ग्रहाः भविष्यन्तीत्येतदर्थमाह ते मन्दचारिणः। ते पातमन्दोच्चा मन्दचारिणो मन्दगतयः सन्ति वर्षसहस्रैरपि तेषां गतिर्नोपलभ्यतेऽतस्तेषां कल्पभगणाश्चाल्पाः। कृतयुगान्ते गताब्दाश्च खचतुष्कयमाद्रयग्नीत्यादयः पठितास्ततः कल्पसौरवर्षैस्तेषां भगणा लभ्यन्ते तदा कृतान्तगताब्दैः किमित्यनुपातेन तेषां मानानि प्रसाध्य विज्ञेयानि तानि च बहुवर्षसहस्रपर्यन्तं स्थिराणि स्वाभीष्टकाले विज्ञेयानि। त्रेतायुगाद्यहर्गणेन बहुवर्षसहस्रपर्यन्तं तेषामानयनं व्यर्थमेवेत्यर्थः। कृतयुगान्ते रङ्गनाथेन स्वगूढार्थप्रकाशे रविमन्दोच्चादिकानां सावयवा ध्रुवाः पठिताः। ते च यथा—

सूर्यमन्दोच्चस्य	=०। ७।२८।१२		
भौममन्दोच्चस्य	=[illegible]। ३।१४।२४	भौमपातस्य	=९।११।२०।१२
बुधमन्दोच्चस्य	=५। ४। ४।४८	बुधपातस्य	=८।११।१६।४८
गुरुमन्दोच्चस्य	=०। ९। ०। ०	गुरुपातस्य	=८। ८।५६।२४
शुक्रमन्दोच्चस्य	=११।१३।२१।०	शुक्रपातस्य	=४।१७।२५।४८
शनिमन्दोच्चस्य	=४।२०।१३।१२	शनिपातस्य	=४।२०।१३।१२

अस्मादग्रे 'कल्पस्यात्र सहस्रांशो युगम्"इत्यादयो दशश्लोकाः केनचित् सूर्यमतानभिज्ञेन प्रक्षिप्तास्ते च सूर्यमतविद्भिर्हेया—इति ॥ ५७—५८ ॥

इदानीं देशान्तरसाधने ग्रहणादिषूपयोगित्वाद्भूव्यासं तत्परिध्यानयनं चाह—

योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु ।
तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत् ॥ ५९ ॥

अष्टौ शतानि योजनानि द्विगुणानि भूकर्णो भूव्यासः। प्राचीनैः कर्णशब्देन व्यासो गृह्यते। भास्करादिभिः कर्ण शब्देन ग्रहकक्षाव्यासार्धं कथ्यते। "निगदितावऽनिमध्यत उच्छ्रितिः, श्रुतिरियं किल योजनसंख्यया" इत्युक्तत्वात्। तस्य भूव्यासस्य वर्गाद्दशगुणात् पदं वर्गमूलं भूपरिधिर्भवेत्। नव्यास्तु "तद्वर्गतोऽदशगुणात् भूव्यासस्य वर्गाददशेति। न दशेत्यदश किञ्चिन्न्युना दश तैर्गुणात् पदं भूपरिधिः। यथा प्रसिद्धत्वात् योजनपरिमाणमाचार्येणेह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोक्तं तथा व्यासवर्गस्य दशन्यूनो गुणकः प्रसिद्धः स्थिरश्च $\left(\frac{२२}{७}\right)^२$ वा $\left(\frac{३९२७}{१२५०}\right)^२$ अथ वा $\left(\frac{३५५}{११३}\right)^२$ अयमाचार्येण नोक्तः। दशग्रहणे तु स्पष्टाधिकारोक्तचक्रकलापरिधौ त्रिज्या (३ ४ ३ ८) तुल्यं व्यासार्धं कथमुक्तं तत्राचार्येणेति वदतो व्याघातः। पाठे लाघवाद्व्यासवर्गस्यैव गुणकोऽदश किञ्चिन्न्यूना दशेत्याचार्येण सूचितो 'निरंशत्वं गताश्चान्ये नोक्तास्ते मन्दचारिण' इत्युक्तिवत्''इति व्याक्षते। दशगुणक एव समीचीन इति कमलाकरेण सौरवासनायां सिद्धान्ततत्त्वविवेके च सर्वं युक्तिशून्यं प्रलपितमिति स्फुटं ज्यागणितविदाम्। रङ्गनाथेन स्वगूढार्थप्रकाशके दशगुणकः स्थूल उक्तः। एवं सौरभाष्येऽपि नृसिंहेन "भूव्यासः किञ्चिदधिकत्रिभिर्गुणितः परिधिर्भवति।" तत्र मुनिभिः किञ्चिदधिकत्रयाणां वर्गो दशमितः कृतस्ततो वर्गेण वर्गं गुणयेद्भजेदित्यनेन व्यासवर्गो दशभिर्गुणितः स तु परिधिवर्गो जातस्तस्य मूलं परिधिरित्यत उक्तं "व्यासवर्गाद्दशगुणान्मूलं भूपरिधिः" इति सर्वं दशग्रहणाद्दोषावहमेव व्याख्यातमतो यन्नव्यानां व्याख्यानमेव समीचीनमिति भृशं विचिन्त्यम्।

अत्रोपपत्त्यर्थं मच्छोधिता भास्करलीलावती वा मदीयं चलनकलनं च विलोक्यमिति ॥ ५९ ॥

इदानीं स्फुटपरिधिं तेन देशान्तरफलं चाह—

लम्बज्याघ्नस्त्रिजीवाप्तः स्फुटो भूपरिधिः स्वकः।
तेन देशान्तराभ्यस्ता ग्रहभुक्तिर्विभाजिता ॥ ६० ॥
कलादि तत् फलं प्राच्यां ग्रहेभ्यः परिशोधयेत्।
रेखाप्रतीचीसंस्थाने प्रक्षिपेत् स्युः स्वदेशजा ॥ ६१ ॥

पूर्वागतो भूपरिधिर्लम्बज्यया गुणितस्त्रिज्यया भाज्यः फलं स्वीयः स्फुटो भूपरिधिर्भवति। मेरुकेन्द्रात् स्वपृष्ठस्थानोपरि गतं पृथिवीपृष्ठे लम्बांशचापमानेन यल्लघुवृत्तं स एव स्वीयः स्फुटभूपरिधिरित्यर्थः। "स्वदेशमेर्वन्तरयोजनैर्यल्लम्बांशजैर्मेरुगिरेः समन्तात्। वृत्तं स्फुटो भूपरिधिः" इति भास्करोक्तिरनेनैव सौरसूत्रेण सिध्यति। कलात्मिका ग्रहगतिर्देशान्तरयोजनेनाभ्यस्ता तेन पूर्वागतेन स्वस्फुटभूपरिधिना विभाजिता। तत्कलादिफलं प्राच्यां रेखातः प्राग्देशे ग्रहेभ्यः परिशोधयेत् रेखातः प्रतीचीसंस्थाने पश्चिमदेशे च ग्रहेषु पूर्वागतं फलं प्रक्षिपेद्याजयेत् तदा पूर्वसाधिता लङ्कानिशीथोत्पन्ना ग्रहाः स्वदेशजाः स्वनिरक्षे निशीथजाः स्युः। स्वदेशोपरि गतं याम्योत्तरवृत्तं यत्र लङ्कापूर्वापरवृत्ते लग्नं स एव स्वनिरक्षदेशः। स्वस्फुटभूपरिधिर्लङ्कायाम्योत्तरवृत्ते यत्र लग्नस्तस्मात् स्वपृष्ठ-

२९००९
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थानपर्यन्तं तस्मिन् स्फुटपरिधौ यद्योजनात्मकं चापमानं तदेव योजनात्मकं देशान्तरम् । तस्माल्लग्नस्थानाच्च स्वदेशे प्राक् प्राग्देशान्तरं पश्चिमे च पश्चिमं देशान्तरमिति ।

अत्रोपपत्तिः—ध्रुवयष्ट्युपरि स्वपृष्ठस्थानाद्यो लम्बस्तदेव स्पष्टभूपरिधिव्यासार्द्धम् । तत्र भूकेन्द्रात् स्वपृष्ठस्थानोपरिगता रेखा भूव्यासार्धं कर्णः । पूर्वसाधितो लम्बः स्फुटभूपरिधिव्यासार्द्धं कोटिः । भूकेन्द्रकोटिमूलान्तरं भुजः । कोटिसंमुखो भूकेन्द्रलग्नः कोणो लम्बांशाः । "यन्त्रवेधविधिना ध्रुवोन्नतिर्या नतिश्च भवतोऽक्षलम्बकौ" इति भास्करोक्तिश्च । ततः सरलत्रिकोणमित्या यदि त्रिज्यया भूव्यासार्द्धं तदा लम्बज्यया किं लब्धं लम्बः स्फुटभूपरिधिव्यासार्द्धम् = $\frac{\frac{1}{2}\text{ भूव्या} \times \text{ज्यालं}}{\text{त्रि}}$ । ततो भूव्यासार्द्धेन भूपरिधिस्तदाऽधुनाऽऽनीतेन व्यासार्द्धेन किं लब्धं लम्बः स्फुटभूपरिधिः = $\frac{\text{भूपरि} \times \text{ज्यालं}}{\text{त्रि}}$ अत उपपन्नं स्फुटपरिध्यानयनम् । अत्र रङ्गनाथेनस्वगूढार्थप्रकाशके—"लम्बांशाक्षांशौ तु वक्ष्यमाणस्वरूपौ । तथा च लम्बांशह्रासानुरोधेन परिधेरपि ह्रास इति परमलम्बांशैर्नवतिमितैरुक्तो भूपरिधिस्तदा स्वदेशीयलम्बांशैः क इत्यनुपात उपपन्नोऽपि वृत्ताश्रितांशेभ्योऽनुपातानामसम्भवेन सर्वैरुपेक्षितत्वाच्च ज्यानुपातस्य सर्वैरङ्गीकृतत्वात् प्रमाणस्थाने प्रमाणांशज्या परमा त्रिज्या इच्छास्थाने इच्छांशानां ज्या लम्बज्येति युक्तमुक्तमुपपन्नं स्पष्टपरिध्यानयनम् ।" इति सर्वं मत्प्रतिपादितजात्यत्र्यस्रमज्ञात्वैव प्राचीनाङ्गीकारात् तदुक्तं ज्यागणितविद्भिर्न मान्यमिति विद्भिर्विचिन्त्यमिति । देशान्तरकालज्ञानार्थं ततः स्फुटभूपरिधिज्ञानार्थं च सौरभाष्ये नृसिंहः—"केनचिदावन्तिकेन नरेणैकं बालुकायन्त्रं तथा विरचितं यथा सम्पूर्णसावनदिनमध्ये रन्ध्रेण निःसृता बालुका स्वत एव निःशेषा भवति । तेन पुंसा उज्जयिन्यां सूर्यविम्बार्धसमकाले तद्यन्त्रं बालुकापूर्णं कृत्वा सहैव गृहीत्वोज्जयिन्याः सकाशात् पूर्वस्यां दिशि योजनानि गतानि । तस्मिस्थले ग्रामे वा यदा सूर्यबिम्बार्धं क्षितिजसंलग्नं दृष्टं तदानीं तद्यन्त्रं किञ्चिद्बालुकावशेषं दृष्टम् । ततस्तेनेदं ज्ञातम् यथा यथा द्रष्टा रेखातः प्राग्गच्छति तथा तथा प्रागेवार्कोदयं पश्यति इति । तस्मिस्थले ग्रामे वा यदा मार्त्तण्डविम्बकेन्द्रोदयो जातस्तस्मात् कालादूर्ध्वं यैरसुभिर्निःशेषं वालुकायन्त्रमासीत् तेऽसवो गणिताः । ततोऽनुपातः । यद्येतावताऽसुतुल्येन सूर्योदयान्तरेण एतानि योजनानि रेखापुरेष्टपुरमध्ये लभ्यन्ते तदाऽहोरात्रासुभिः किमिति लब्धं स्पष्टो भूपरिधिः ।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ पुमान् यदि उज्जयिनीस्पष्टभूपरिधावेव प्राचि प्रगच्छेत् तदान्तरयोजनैरुदयान्तरासुभिश्चानुपातेन केवलमुज्जयिन्याः स्फुटपरिधिमानं व्यक्तं स्यात्। अनुपाते रेखापुरेष्टपुरान्तरं यद्गृहीतं तज्ज्ञानमतीव दुर्घटमतो नृसिंहदैवज्ञकथनं वाङ्मात्रमेव न तेन देशान्तरज्ञानम्। रेखापुराद्धटिकायन्त्रं गृहीत्वा निशीथकाले ध्रुवयन्त्रेण तदक्षांशसममन्यदेशाक्षांशं विध्यता गणकेन तत्स्फुटपरिधौ गच्छता रेखादेशतद्देशान्तरज्ञानं च कुर्वता तदुदयान्तरकालेनान्तरयोजनेन च स्फुटपरिधेः साधु ज्ञानं कार्यमिति स्फुटं गणितविदाम्। सम्प्रति यत्प्रधानदेशत इष्टदेशस्य देशान्तरं कालात्मकमपेक्षितं तत्र प्रधानेष्टदेशयोर्विद्युद्यन्त्रं लोहसूत्रमयं विरचय्य प्रधानदेशमध्याह्नसमये विद्युद्यन्त्रबलेन तत्रस्थेन वेधं कुर्वता गणकेनेष्टदेशे प्राक्पश्चिमो वा नतकालो विज्ञेयः। तदेव प्राक् पश्चिमं वा कालात्मकं देशान्तरम्। ततो घटीषष्ट्या ग्रहभुक्तिकला तदा पूर्वानीतदेशान्तरघटीभिः किं लब्धं देशान्तरफलं कलादिकं ज्ञेयं किमु देशान्तरयोजन-स्फुटभूपरिधिज्ञानप्रयासेन। विद्युद्यन्त्रतः स्थानयोर्भूपरिध्यर्द्धान्तरस्थयोरपि त्रुट्यल्पकालेनैव मिथः संवादज्ञानं भवतीति पूर्वविधिना देशान्तरज्ञाने संवादकालान्तरवशेन न स्थूलतेति विद्भिः परीक्ष्यम्। "आदौ प्रागुदयोऽपरत्र विषये पश्चाद्धि रेखोदयात्" इत्यादिभास्करोक्त्या धनर्णवासना सुलभेति ॥ ६०—६१ ॥

पूर्वं यद्वशतो देशान्तरफलं ग्रहेषु धनर्णं कृतं स को नाम रेखादेश इत्याशङ्कां परिहरन्नाह—

राक्षसालयदेवौकःशैलयोर्मध्यसूत्रगाः ।
रोहीतकमवन्ती च यथा सन्निहितं सरः ॥ ६२ ॥

राक्षसानामालयो लङ्का। देवानामोको निवासस्थानरूपः शैलो मेरुः। अनयोर्मध्ये यत् सूत्रं याम्योत्तरसूत्रं लङ्काया याम्योत्तरवृत्तं भूपृष्ठगमित्यर्थः। तस्मिल्लङ्कायाम्योत्तरवृत्ते ये देशा गतास्ते रेखादेशा विज्ञेयाः। यथा रोहीतकं नगरमवन्ती उज्जयिनी सन्निहितं सरः कुरुक्षेत्रं च एते देशास्तत्सूत्रगतत्वाद्रेखादेशास्तथैव स्वस्वस्थानाक्षवशेनान्ये च तत्सूत्रस्था रेखादेशा ज्ञेया इति। भास्करेण स्वकरणकुतूहले बहूनि नगराणि पठितानि तद्वाक्यं च—

"पुरी राक्षसी देवकन्याऽथ काञ्ची-
सितः पर्वतः पर्यलीवत्सगुल्मी।
पुरी चोज्जयिन्याह्वया गर्गराटं
कुरुक्षेत्रमेरू भुवो मध्यरेखा" ॥इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद्याम्योत्तरवृत्तं प्रधानीकृत्य गणका गणितं कुर्वन्ति तद्याम्योत्तररेखैव मध्यरेखा कथ्यते। यथा वयं स्वपञ्चाङ्गे काशीयाम्योत्तरवृत्तादेव देशान्तरं कलयामोऽस्तोऽस्मन्मतेन काशीयाम्योत्तरसूत्रमेव मध्यरेखेति ॥ ६२ ॥

रेखादेशाद्द्रष्टा पूर्वदेशे वा पश्चिमे तिष्ठतीति देशान्तरज्ञानं चाह—

[1]अतीत्योन्मीलनादिन्दोः पश्चात् तद्गणितागतात्।
यदा भवेत्तदा प्राच्यां स्वस्थानं मध्यतो भवेत् ॥ ६३ ॥

अप्राप्य च भवेत् पश्चादेवं वापि निमीलनात्।
तयोरन्तरनाडीभिर्हन्याद्भूपरिधिं स्फुटम् ॥ ६४ ॥

षष्ट्या विभज्य लब्धैस्तु योजनैः प्रागथापरैः।
स्वदेशः परिधौ ज्ञेयः कुर्याद्देशान्तरं हि तैः ॥ ६५ ॥

इन्दोश्चन्द्रस्य तद्गणितागतात् तस्मिन् रेखादेशे गणितेनाऽऽगतो यस्तस्मादुन्मीलनादुन्मीलनकालादतीत्योल्लंघ्य पश्चाद्यदि दर्शनं न भवेत्तदा मध्यतो रेखादेशात् स्वस्थानं प्राच्यामस्तीति वेदितव्यम्। गणितागतकालादुन्मीलनादप्राप्यानुल्लंघ्य पूर्वमेव भवेत्तदा रेखादेशात् स्वस्थानं पश्चादिति वेदितव्यम्। दृक्सिद्धिर्गणितागतादितिपाठे, गणितागतादुन्मीलनादतीत्योल्लंध्य यदि दृक्सिद्धिर्दिशासिद्धिरर्थाद्दर्शनं भवेदिति व्याख्येयम्। एवं निमीलनात् संमीलनकालाद्वा पूर्वापरदेशज्ञानमपि पूर्ववज्ज्ञेयमिति। अत्रैतदुक्तं भवति। देशान्तराज्ञानाद्देशान्तरसंस्काररहिताभ्यां स्फुटरविचन्द्राभ्यां चन्द्रग्रहणविधिना सर्वग्रहणे संमीलनकालो विज्ञेयः स च गणितागतसंमीलनकालाधिकस्तदा द्रष्टा रेखातः प्राग्भागेऽन्यथा पश्चिमभागे स्थित इति वेदितव्यम्। यतः प्राचि प्रथमं स्वदेशे ततो रेखादेशे मध्याह्नकालोऽस्तो रेखादेशेष्टसंमीलनकालात् स्वदेशीयसंमीलनकालोऽधिकः। पश्चिमेऽस्तोऽन्यथेति गोलस्थित्यैव सर्वं स्फुटम्। एवं परीक्षोन्मीलनकालादिष्टग्रासकालात् स्पर्शकालाद्वा मोक्षकालादपि गोलयुक्त्या भवतीति प्रसिद्धम्। स्पर्शमोक्षकालपरीक्षा च दृष्ट्या दुर्घटाऽतः प्राग्भूविभागे गणितोत्थकालादनन्तरं प्रग्रहणम्" इत्यादिभास्करयुक्तित इह सौरी युक्तिरुत्तमा। इष्टग्रासकाले चेष्टग्रासपरीक्षा तदिष्टकालपरीक्षापेक्षितेति परीक्षाद्वये गौरवं विलोक्य संमीलनोन्मीलनकालावेव दृष्टिसुलभौ गृहीतावाचार्येणेति मद्विचारो बुद्धिमद्भिर्भृशं विचिन्त्यः। इत्यलं प्रसङ्गागतविचारेण। तयोर्गणितागतदृक्सिद्धकालयोरन्तरनाड्यो देशान्त-

1. प्रतीत्योर्मीलनादिन्दोर्दृक्सिद्धिर्गणितागतात्—इतिपाठान्तरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रनाड्य इति स्फुटम् । अथ ताभिर्देशान्तरनाडीभिर्गणकः स्वीयं स्फुटं भूपरिधिं हन्यात् ततः षट्या विभज्य लब्धैः प्रागपरैर्योजनैं रेखातः परिधौ स्वस्फुटपरिधौ स्वदेशो ज्ञेयः । तैः पूर्वागतैर्योजनैर्हि पूर्ववद्देशान्तरं कलादि कुर्याद्गणक, इति शेषः । 'स्वदेशपरिधिर्ज्ञेयः'—इति पाठो रङ्गनाथादिभिः प्रमादतो विलिखित-स्तेन पाठेन पूर्वापरासङ्गतिर्भवतीति विचिन्त्यम् ॥ ६३–६५ ॥

इदानीं वारप्रवृत्तिमाह—

वारप्रवृत्तिः प्राग्देशे क्षपार्धेऽभ्यधिके भवेत् ।
तद्देशान्तरनाडीभिः पश्चादूने विनिर्दिशेत् ॥ ६६ ॥

लङ्कायां यदाऽर्धरात्रिर्भवति तदा वारप्रवृत्तिरिति प्राचीनानां संप्रदायः । अतः प्राग्देशे क्षपार्धे देशान्तरनाडीभिरधिके लङ्कायां निशीथकालस्तदैव वारप्रवृत्तिश्च भवेत् । पश्चाद्देशे तु क्षपार्धे ताभिर्देशान्तरनाडीभिरूने लङ्कायां निशीथकालत्वाद् गणकस्तां वारप्रवृत्तिं निर्दिशेत् कथयेदिति सर्वं स्फुटमेव ॥६६॥

अथ तात्कालिकीकरणमाह—

इष्टनाडीगुणा भुक्तिः षष्ट्या भक्ता कलादिकम् ।
गते शोध्यं युतं गम्ये कृत्वा तात्कालिको भवेत् ॥ ६७ ॥

मध्यमा ग्रहा एकरूपवेगेन चलन्त्यतोऽर्धरात्रितः पूर्वं पश्चादिष्टनाडीसमे काले ऽत्तेऽपेक्षितास्तदा घटीषट्या तद्भुक्तिः कलात्मिका लभ्यते तदेष्टघटीभिः किमित्यनुपातेन भुक्तिरिष्टनाडीगुणा षट्या भक्ता जातं कलादिकं चालनं गते ग्रहे शोध्यं गम्ये स्वेष्टे युतं कृत्वा यो ग्रहो भवेत् स एव तात्कालिको भवेदिति । राहुसाधने तस्य विलोमगतित्वात्तद्गतिः पश्चिमाऽतः पूर्वगत्यपेक्षया सा ऋणा । ऋणगतितश्चालनमानमप्यृणमतः संशोध्यमानः क्षयः स्वत्वमेतीत्यादिना गते धनं गम्ये ऋणं भवतीति बालैरपि बुध्यत इति ॥ ६७ ॥

इदानीं चन्द्रादीनां परमविक्षेपकला आह—

भचक्रलिप्ताशीत्यंशं परमं दक्षिणोत्तरम् ।
विक्षिप्यते स्वपातेन स्वक्रान्त्यन्तादनुष्णगुः ॥ ६८ ॥

तन्नवांशं द्विगुणितं जीवस्त्रिगुणितं कुजः ।
बुधशुक्रार्कजाः पातैर्विक्षिप्यन्ते चतुर्गुणम् ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं त्रिघनरन्ध्रार्करसार्कार्का दशाहताः ।
चन्द्रादीनां क्रमादुक्ता मध्यविक्षेपलिप्तिकाः ॥ ७० ॥

इति श्रीसूर्यसिद्धान्ते मध्यमाधिकारः ॥ १ ॥

भचक्रस्य राशिद्वादशकस्य लिप्तानामशीत्यंशं कलामानं स्वपातेन क्रान्त्यन्तात् क्रान्तिवृत्तीयस्वक्रान्त्यन्तादनुष्णगुः शीतकरः परमं दक्षिणोत्तरं विक्षिप्यते। चन्द्रस्य परमं शरकलामानं कदम्बप्रोते भचक्रलिप्ताशीतिभागसममित्यर्थः। इदं शरकलामानं च स्वपाताकर्षणत उत्पद्यत इति। तच्चन्द्रशरनवांशं द्विगुणितं तत्तुल्यं स्वपातेन जीवस्त्रिगुणितेन तुल्यं कुजो भौमश्चतुर्गुणं चतुर्गुणसमं च बुध-शुक्रशनयः पातैः स्वस्वपातेन विक्षिप्यन्ते। एवं पूर्वोक्तविधिना चान्द्रादीनां मध्यविक्षेपलिप्तिका मध्यपरमशरकलाश्च त्रिघनरन्ध्रार्करसार्कार्का दशाहताः क्रमादुक्ताः सन्ति। चन्द्रस्य = २७०'। भौमस्य = ९०'। बुधस्य = १२०'। गुरोः = ६०'। शुक्रस्य = १२०'। शनेः = १२०'। परमा विक्षेपकला उक्ताः सन्तीत्यर्थः। एषामुपलब्धिर्वेधेन कथं भवतीति यन्त्राध्याये कथयिष्ये ॥ ६८—७० ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा।
सुखायामृतवर्षिण्यां गतो मध्याधिकारकः ॥ १ ॥

इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यां मध्यमाधिकारः ॥१॥

विभिन्नमतेन ग्रहाणां परमशरकलाबोधकम्

	चन्द्रस्य	कुजस्य	बुधस्य	गुरोः	शुक्रस्य	शनेः
सूर्यसिद्धान्ते	२७०'	९०'	१२०'	६०'	१२०'	१२०'
महासिद्धान्ते	२७०'	१०६'	१३८'	७४'	१३०'	१३०'
सिद्धान्तशिरोमणौ	२७०'	११०'	१'४२	७६'	१३६'	१३०'
ब्राह्मस्फुटे	२७०'	११०'	१४२'	७६'	१३६'	१३०'
सिद्धान्तदर्पणे	३०९'	१११'	१६४'	७८'	१४८'	१४९'
पाश्चात्यमते	३०८'/४२"	१११'/१"	४२०'/१०"	७८'/५२"	२०३'/३७"	१४९/३९"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ स्पष्टाधिकारः

अथ स्पष्टाधिकारो व्याख्यायते तत्र तावत् मध्यग्रहतः स्पष्टग्रहः किमु भिन्न इत्यत्र हेतुमाह—

अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः ।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः ॥ १ ॥

तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः ।
प्राक् पश्चादपकृष्यन्ते यथासन्नं स्वदिङ्मुखम् ॥ २ ॥

पूर्वोक्ताः शीघ्रमन्दोच्चपाताख्याः कालस्य मूर्त्तयः सन्ति अत एव कालेनैव ग्रहचलनं भवतीति प्रसिद्धत्वाद्ग्रहाणां गतिहेतवस्ते। तद्वशेनैव ग्रहाणां मध्ये गतिरुत्पद्यत इति। ते भगणे ह्याश्रिता दिव्यत्वाददृश्यरूपाः सन्ति। ते देवाः सन्त्यत एवादृश्यरूपा इति। तेषां शीघ्रोच्चादीनां या वातरूपा वायुरूपा रज्जवस्ताभिर्बद्धा बिम्बात्मका ग्रहास्तैः शीघ्रोच्चादिदेवैर्यथा स्वदिङ्मुखं स्वाभिमुखं ग्रहबिम्बमासन्नं निकटं भवति तथा सव्येतरपाणिभिर्दक्षिणवामहस्तैः प्राक् पश्चाच्चापकृष्यन्ते। प्राच्यपकर्षणान्मध्यग्रहादग्रतः पश्चिमेऽपकर्षणान्मध्यमग्रहात् पृष्ठे च स्फुटग्रहो मध्यमतोऽन्यत्र दृश्यो भवतीत्यर्थः। एतेन भगवद्दत्ताकर्षणशक्तितो ग्रहा भ्रमन्तीति नव्यमतमुपपद्यत इति ॥ १—२ ॥

ग्रहाणां गतावन्यहेतुं चाह—

प्रवहाख्यो मरुत् तांस्तु स्वोच्चाभिमुखमीरयेत् ।
पूर्वापरापकृष्टास्ते गतिं यान्ति पृथग्विधाम् ॥ ३ ॥

प्रवहनामा मरुद्वायुस्तान् ग्रहान् स्वोच्चाभिमुखं पश्चिमाभिमुखमीरयेत् प्रेरयेदिति। एवमुच्चदेवैः प्रवहाख्येन मरुता च पूर्वपश्चिमदिशोरपकृष्टा ग्रहाः पृथग्विधामेकरूपमध्यगतितो भिन्नां गतिं यान्ति प्राप्नुवन्ति। अतो मध्यग्रहतो भिन्नः स्फुटग्रहो भवतीत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उच्चदैवतैः प्राक्पश्चादपकर्षणे विशेषमाह—

ग्रहात् प्राग्भगणार्धस्थः प्राङ्मुखं कर्षति ग्रहम् ।
उच्चसंज्ञोऽपरार्धस्थस्तद्वत् पश्चान्मुखं ग्रहम् ॥ ४ ॥

स्वोच्चापकृष्टा भगणैः प्राङ्मुखं यान्ति यद्ग्रहाः ।
तत् तेषु धनमित्ययुक्तमृणं पश्चान्मुखेषु तु ॥ ५ ॥

उच्चसंज्ञो ग्रहात् प्राग्भगणार्धस्थस्तदा ग्रहं प्राङ्मुखं स्वाभिमुखं कर्षति । तद्वदुच्चसंज्ञो ग्रहादपरभगणार्द्धस्थो ग्रहं पश्चान्मुखं स्वाभिमुखं कर्षति । ग्रहोनमुच्चं मेषादिषट्के तदा प्राङ्मुखं तुलादिषट्के तदा च पश्चान्मुखं ग्रहं कर्षतीत्यर्थः । अथ फलितार्थं कथयति स्वोच्चापकृष्टा इति । स्वोच्चापकृष्टा ग्रहा भगणैर्यत् प्राङ्मुखं यान्ति तत् तेषु ग्रहेषु धनं फलमित्युक्तम् । एवं पश्चान्मुखेषु पश्चिममुखे कर्षितेषु ग्रहेषु कर्षितमिति फलं तु पुनः ऋणमित्युक्तमाहुरिति । मेषादिषट्के ग्रहोच्चान्तरे धनं तुलादिषट्के ऋणमित्यर्थतः सिद्धमिति ।

अत्रोपपत्तिरग्रे मन्दशीघ्रफलानयने स्फुटा भविष्यतीति ॥ ४—५ ॥

एवं पातोऽपि ग्रहबिम्बं दक्षिणोत्तरं विक्षिपतीत्याह—

दक्षिणोत्तरतोऽप्येवं पातो राहुः स्वरंहसा ।
विक्षिपत्येष विक्षेपं चन्द्रादीनामपक्रमात् ॥ ६ ॥

उत्तराभिमुखं पातो विक्षिपत्यपरार्धगः ।
ग्रहं प्राग्भगणार्धस्थो याम्यायामपकर्षति ॥ ७ ॥

एवं पात एव एष राहुः स्वरंहसा स्ववेगेन चन्द्रादीनां बिम्बमपक्रमात् स्थानीयक्रान्त्यन्ताद्विक्षेपं शरतुल्यं दक्षिणोत्तरतो विक्षिपति प्रक्षेपयति । कथं विक्षिपतीत्याहोत्तराभिमुखमिति । ग्रहादपरभगणार्धगः पातो ग्रहमुत्तराभिमुखं विक्षिपति प्राग्भगणार्धस्थश्च ग्रहं याम्यायामपकर्षति । सपातमन्दस्पष्टमेषादिगे उत्तरः शरतुलादिगे च दक्षिण इति ।

अत्रोपपत्तिश्च ग्रहाणां शरसाधने स्फुटा भविष्यतीति ॥ ६—७ ॥

अथ बुधशुक्रयोर्विशेषमाह—

बुधभार्गवयोः शीघ्रात् तद्वत् पातो यदा स्थितः ।
तच्छीघ्राकर्षणात् तौ तु विक्षिप्येते यथोक्तवत् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र शीघ्रात् शीघ्रोच्चात् तथा पातश्चेति शब्दद्वयं जात्यभिप्रायेणैकवचनम्। बुधशुक्रयोः शीघ्रोच्चाद्यदा तद्वत् पूर्वार्धपरार्धभगणस्थितः पातस्तदा तयोः शीघ्रोच्चाकर्षणात् तौ बुधशुक्रौ यथोक्तवद्दक्षिणोत्तरयोर्विक्षिप्येते। बुधशुक्रयोः शीघ्रोच्चस्थाने यावान् बाणस्तावान् यत्रतत्रस्थयोर्बुधशुक्रयोरित्यर्थः। अत्रोपपत्तिस्तथा नव्यानां ग्रहभ्रमणे विशेषश्चेति सर्वं शरसाधने कथयिष्यत इति ॥ ८ ॥

इदानीं रविचन्द्रयोरन्येषां च मन्दफलं मिथः कथं न सममित्याशङ्कां परिहरन्नाह—

महत्त्वान्मण्डलस्यार्कः स्वल्पमेवापकृष्यते।
मण्डलाल्पतया चन्द्रस्ततो बह्वपकृष्यते ॥ ९ ॥
भौमादयोऽल्पमूर्त्तित्वाच्छीघ्रमन्दोच्चसंज्ञकैः।
दैवतैरपकृष्यन्ते सुदूरमतिवेगिताः ॥१०॥
अतो धनर्णं सुमहत्तेषां गतिवशाद्भवेत्।
आकृष्यमाणास्तैरेवं व्योम्नि यान्त्यनिलाहताः ॥११॥

उच्चदेवेनार्कमण्डलस्य महत्त्वादर्कः स्वल्पमेवापकृष्यते यद्वशेन स्वल्पमेव मन्दफलमुपलभ्यते। चन्द्रश्च मण्डलाल्पतया हेतुभूतया ततो रवेर्बहु अधिकं यथा स्यात् तथा तदुच्चेनापकृष्यते। चन्द्रस्याल्पमण्डलत्वादुच्चाकर्षणेनाधिकं मन्दफलमुपलभ्यते। एवं भौमादयः पञ्च खेटाः स्वशीघ्रोच्चमन्दोच्चसंज्ञकैर्दैवतैरल्पमूर्त्तित्वात् सुदूरमत्यधिकमपकृष्यन्ते। अत एव तेऽतिवेगिता अतिजवा अतिफला भवन्तीत्यर्थः। अतोऽतिमन्दशीघ्रफलकारणादेवातिगतिवशात् तेषां भौमादीनां मध्ये सुमहदत्यन्तं धनर्णं भवेत्। एवं तैरुच्चपातैर्दैवतैराकृष्यमाणा ग्रहा अनिलेन प्रवहेनाहताश्च व्योम्नि आकाशे यान्ति भ्रमन्तीत्यर्थः। एतेन सर्वेषूच्चेषु समानाऽऽकर्षणशक्तिस्तथाऽधिकपिण्डेष्वधिकाऽल्पपिण्डेषु ग्रहेषु चाल्पाऽऽकर्षणशक्तिः सिध्यति। यतस्तदैवाऽधिकपिण्डग्रहाकर्षणशक्तिरहितोच्चाकर्षणशक्तिरल्पपिण्डग्रहाकर्षणशक्तिरहितोच्चाकर्षणशक्तितोऽल्पा भवति। ततो महति पिण्डे परमं फलमल्पमल्पे पिण्डे चाधिकमुपलभ्यते। अत्रोच्चग्रहान्तरसूत्रवर्गन्यूनाधिकवशेनाकर्षणशक्तिरधिका न्यूना च क्रमाद् भवतीति नियमः सूर्यानुक्तोऽपि बुद्धिमतोह्यः। यथा यथा पिण्डपरिमाणं वर्धते, तथा तथाऽऽकर्षणशक्तिरपि वर्धिता भवति, तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वयोः पिण्डयोरन्तरसूत्रवर्गश्च यथा यथा वर्धते तथा तथा मिथ आकर्षणशक्तिरपचीयते इति यूरपदेशीयन्यूटनगणकसिद्धान्तस्येदं सौरोक्तमेव मूलमिति सुजनैर्भृशं विचिन्त्यम्। द्वयोः पिण्डयोर्मिथ आकर्षणेनैकस्य लघुपिण्डस्य महत्पिण्डस्य परितो भ्रमणं च भाभ्रमक्षेत्रेषु भवतीत्येतदर्थं मदीयो द्युचरचारो विलोक्यः। तत्राकर्षणशक्तेरधिकत्वादुत्केन्द्रताधिक्यं भवति, यद्वशेन परमफलमानमप्यधिकमुपलभ्यत इत्यलं प्रसङ्गागतविचारेणेति ॥ ९–११ ॥

पूर्वोक्ताकर्षणतो ग्रहकक्षायां स्थानविशेषेषु भूवासी यथा यान्तं ग्रहं पश्यति, तत्राष्टधा गतिभेदानाह—

वक्रातिवक्रा विकला मन्दा मन्दतरा समा।
तथा शीघ्रतरा शीघ्रा ग्रहाणामष्टधा गतिः ॥ १२ ॥

अत्र विकलास्थाने 'कुटिला' वा पाठः। कुटिलापाठे वक्रोक्तत्वात् पुनरुक्तिदोषः। अतो मन्मते विकलैव पाठः साधुरिति। अत्र सौरभाष्ये नृसिंहः। तत्र वक्रारम्भमार्गारम्भयोर्या गतिः, सा कुटिला विकला इति वा पाठः। तथा वक्रगतौ सत्यां या क्षीयमाणा वक्रा सैव वक्रेति। या च वर्धमाना वक्रा सातिवक्रेति। मध्यगतेरल्पा क्षीयमाणा ऋज्वी सा मन्दतरेत्युच्यते। या तु मध्यगतेरल्पा ऋज्वी वर्धमाना सा मन्देत्युच्यते। या तु मध्यगतेरधिका वर्धमाना ऋज्वी, सातिशीघ्रेत्युच्यते। मध्यगतिसमा या गतिः सा समेत्युच्यते"। आसां स्थानानि सिद्धान्तशेखरे श्रीपतिनोक्तानि—

मीनाजादेरतिशयचला गोघटादेश्च शीघ्रा
शीघ्रे केन्द्रे मिथुनमकरादौ तु नैसर्गिकी स्यात्।
कर्काद्यर्धे भवति धनुषश्चान्त्यखण्डेऽतिमन्दा
चापाद्यर्धे कुहिरशकलेऽन्त्ये च मन्दा प्रदिष्टा ॥ इति।

वक्रातिवक्रकुटिलगतीनां स्थानं धीवृद्धिदे लल्लेनाप्युक्तम्—

मध्यस्फुटान्तरदलेन चलात् ममेता-
न्मध्ये स्फुटात् समधिके सति चान्यथोनात्।
स्पष्टं त्यजेत् कृतषडष्टसु तत्र भेषु
वक्रातिवक्रकुटिला गतयो भवन्ति ॥ इति ॥

प्रायो राशिचतुष्टये शीघ्रकेन्द्रे वक्रारम्भस्तत्रत्या गतिर्वक्रा, राश्यष्टके केन्द्रे च प्रायो वक्रत्यागस्तत्र या गतिः, सा कुटिलेति लल्लेनोच्यते। वस्तुतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोलयुक्त्या वक्रारम्भे वक्रत्यागे च गतिः पूर्णा भवत्यतो विकलापदेन विगता कला संख्या यस्याः सा विकलाऽर्थात् शून्यसमेति व्युत्पत्त्या शून्यमेव गृह्यते। सौरवासनायां तथैव कमलाकरेणाप्युक्तम्। तद्यथा "वक्रारम्भे मार्गारम्भे स्पष्टा गतिः शून्यमिता विकलाख्या" इति। रङ्गनाथेन स्वगूढार्थप्रकाशेऽतिवक्रास्थाने 'अनुवक्रा' इति पाठो व्याख्यातः। पारिभाषिकशब्दानां पाठभेदेऽपि ग्रहगणिते न काचिद्धानिरिति स्फुटं ज्योतिर्विदामिति ॥ १२ ॥

इदानीं गतिभेदे विशेषमाह—

तत्रातिशीघ्रा शीघ्राख्या मन्दा मन्दतरा समा।
ऋज्वीति पञ्चधा ज्ञेया या वक्रा सातिवक्रगा ॥ १३ ॥

तत्र पूर्वोदितभेदेषु याऽतिशीघ्रा सैव शीघ्राख्या तथा मन्दा च मन्दतरा समा मन्दतरया तुल्यैव। या मन्दा सैव मन्दतरेत्यर्थः। एवं या वक्रा सेवातिवक्रगतिरिति। अन्या ऋज्वी मार्गगतिः। एवं शीघ्रा, मन्दा, वक्रा, ऋज्वी कुटिला वा, विकलेति च ग्रहाणां पञ्चधा गतिरिति। वस्तुतो मार्गवक्रभेदेन ग्रहाणां गतिद्वयमेवेति स्फुटमिति।

रङ्गनाथमतेन मन्दतरा समेति पदद्वयम्। तथा तस्य शीघ्रा, शीघ्रतरा, मन्दा, मन्दतरा समेति पञ्चधा गतिः। ऋज्वी सानुवक्रगा वक्रानुवक्रकुटिलेति गतित्रयं वक्रेतिव्याख्यानं मन्मते न युक्तम्। नहि तद्व्युत्पत्तितः सानुवक्रगाशब्देन तद्गतित्रयमायातीति सुधीभिर्भृशं चिन्त्यम् ॥ १३ ॥

इदानीं ग्रहस्पष्टीकरणं प्रतिजानीते। तत्रादौ स्फुटीकरणप्रशंसामाह—

तत्तद्गतिवशान्नित्यं यथा दृक्तुल्यतां ग्रहाः।
प्रयान्ति तत् प्रवक्ष्यामि स्फुटीकरणमादरात् ॥ १४ ॥

पूर्वोदितास्तास्ता गतय इति तत्तद्गतयः। तासां तत्तद्गतीनां वशाद्यथा येन प्रकारेण ग्रहाः प्रसिद्धा नित्यं प्रत्यहं दृक्तुल्यतामस्माद्दशातीन्द्रियाणां दृष्ट्युपलब्धैर्ग्रहैस्तुल्यतामर्थाद्विद्धग्रहसमतां प्रयान्ति, तत् स्फुटीकरणमादरादतिश्रद्धया वक्ष्यामि कथयिष्याम्यहं सूर्यांशपुरुष इति शेषः। एतेन स्फुटीकरणस्य प्रशंसा जाता। यात्राविवाहादौ शुभाशुभफलज्ञानार्थं स्फुटा ग्रहा अपेक्षितास्तेषां ज्ञानं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्फुटीकरणविधिनैवातः स्फुटीकरणमावश्यकं येन च दृग्गणितैक्यं भवति। अत एव भास्करः—

यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम्।
स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृद्या ॥ इति।

दृग्भ्यां द्वाभ्यां वेधगणिताभ्यां या तुल्यतैकता, तां दृक्तुल्यतां ग्रहाः प्रयान्तीति व्याख्यानं कार्यम्। अत्र वृद्धाः "यथा दृक्तुल्यतां" इत्यत्र यथाऽदृक्तुल्यतामिति पदच्छेदं कृत्वा "अदृक्—अदृष्टम्। अदृशा—अदृष्टेन फलजनकेन गणितेन तुल्यता या, तां ग्रहाः प्रयान्ति" इति व्याचक्षते। तेषां मते सूर्यकथितं स्वतः प्रमाणमदृष्टफलसिद्ध्यर्थं वेदवन्मान्यमिति। अत एव सिद्धान्ततत्त्वविवेके कमलाकरः—

वेद एव रवितन्त्रमथास्य वासनाकथनमल्पधियां हि।
दोष एव न गुणो रविणोक्तं तेन युक्तियुतमेव सदोह्यम् ॥१४॥ इति।

इदानीं स्फुटीकरणे ज्यायाः प्राधान्यात् तावज्ज्यानयनमेवाह—

राशिलिप्ताष्टमो भागः प्रथमं ज्यार्धमुच्यते।
तत् तद्विभक्तलब्धोनमिश्रितं तद् द्वितीयकम् ॥ १५ ॥
आद्येनैवं क्रमात् पिण्डान् भक्त्वा लब्धोनसंयुताः।
खण्डकाः स्युश्चतुर्विंशज्ज्यार्धपिण्डाः क्रमादमी ॥ १६ ॥

राशिलिप्तानामष्टादशशतकलानामष्टमो भागस्तत्त्वाश्विनः २२५ प्रथमं ज्यार्धं ज्याखण्डमुच्यते। तत् तद्विभक्तलब्धोनमिश्रितं तज्ज्यार्धं तेन विभक्तं यल्लब्धं तेनोनं शेषेण तदेव ज्यार्धं मिश्रितं कार्यमित्यर्थः। एवं कृते यत् तद् द्वितीयकं द्वितीयं ज्यापिण्डाख्यं भवति लब्धोनं प्रथमं ज्याखण्डं च द्वितीयं ज्याखण्डं भवति। ततो द्वितीयं ज्यापिण्डमाद्येन ज्याखण्डेन विभज्य लब्धेनोनं द्वितीयं ज्याखण्डं तृतीयं ज्याखण्डं भवति, तेन मिश्रितो युक्तो द्वितीयो ज्यापिण्डस्तृतीयज्यापिण्डः। एवं क्रमादाद्येन ज्याखण्डेन पिण्डान् ज्यापिण्डान् भक्त्वा लब्धेनोनो गतखण्डक एष्यखण्डस्तेन मिश्रितो गतज्यापिण्ड एष्यज्यापिण्डो भवति। एवं सर्वे खण्डकाः क्रमादमी वक्ष्यमाणाश्चतुर्विंशज्ज्यार्धपिण्डाश्च भवन्तीत्यर्थः।

अत्रोपपत्तिः। अत्र चक्रकलापरिधौ गजाग्निवेदाग्नि ३४३८ त्रिज्यायां चैकस्मिन् वृत्तपादे चतुर्विंशतिर्ज्यापिण्डाः साधिताः। तत्र वृत्तस्य षण्णवत्यंशो दण्डवत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिदृश्यते—इति शाकल्योक्तेर्वृत्तषण्णवत्यंश एव तदंशस्य जीवा। अत्र सर्वत्र जीवाशब्देन ज्यार्धमेव बोध्यम्। 'अर्धज्येव ज्याविधाना च वेद्या'—इति भास्करोक्तेः। अतः प्रथमज्यापिण्डो वा प्रथमं ज्यार्धम् $= \frac{२१६००}{९६} = \frac{१८००}{८}$ अतो 'राशिलिप्ताष्टमो भागः प्रथमं ज्यार्धमुच्यते'—इत्युपपद्यते।

अथ चतुर्विंशतिज्यापिण्डेषु कस्यचिन्मानम् = ज्याइ। तदा गतज्या = ज्या (इ—प्र)। एष्यज्या = ज्या (इ+प्र)। अत्र प्र = २२५। ततो गतखण्डम् = गख = ज्याइ—ज्या (इ—प्र)।

एष्यखण्डम् = ए ख = ज्या(इ+प्र) - ज्याइ, ततस्त्रिकोणमित्या गख - एष = २ ज्याइ - [ज्या (इ+प्र)+ज्या (इ—प्र)] = अन्तरम् = अं = २ ज्याइ

$= \frac{\text{२ ज्याइ} \times \text{कोज्याप्र}}{\text{त्रि}} = \frac{\text{२ ज्याइ} \times \text{उज्याप्र}}{\text{त्रि}}$ अत्र स्वल्पान्तरात् "तत्त्वदस्रा नगांशोना एवमत्राद्यशिञ्जिनी"—इत्यादिभास्करोक्तेन द्विगुणा प्रथमोत्क्रमज्या यदि स्वल्पान्तरात् पञ्चदश गृह्येत तदा गखं—एखं = अं $= \frac{\text{२ उज्याप्र} \times \text{ज्याइ}}{\text{त्रि}}$

$= \frac{\text{१५ ज्याइ}}{\text{३४३८}} = \frac{\text{ज्याइ}}{\text{२२९}}$ स्वल्पान्तरात्। अत्र पठितानां ज्यापिण्डानां निरवयवत्वात् केवलं निरग्रा लब्धिरपेक्षिताऽत आचार्येण हरस्य प्रथमस्थाने नवस्थाने पञ्च गृहीताः। तथाकृते निरग्रलब्धौ नान्तरमत उपपद्यतेऽवशिष्टमिति। अथात्रार्धाल्पे त्याज्यमर्धाधिके रूपं ग्राह्यमिति विधिना हारद्वयेन निरग्रा लब्धिरानीयते चेत् तदा लब्धिद्वयं समानमेव यथा यदि—

परमज्या त्रिज्या ३४३८ गृह्यते तदोभयत्र १५ लब्धिरायाति। यदि भास्करस्य सूक्ष्मविधिना प्रथमोत्क्रमज्या $\frac{\text{त्रि}}{\text{४६७}}$ गृह्यते तदा वास्तवो हरः २३३½ इति सिध्यत्यनेनापि त्रिज्या परमज्या भक्ता लब्धिरर्धाधिके रूपं ग्राह्यमिति नियमेन $\frac{३४३८}{२३३\frac{१}{२}} = \frac{६८७६}{४६७} = १४\frac{३३८}{४६७} = १५$ स्वल्पान्तरतः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लब्धावर्धाधिके सर्वत्र रूपग्रहणेन कुत्रचिज्ज्यापिण्डेषु रूपसममन्तरं पतति तेन ।

एकविंशाच्च विंशाच्च षष्ठात् पञ्चदशादपि ।
सप्तमाद् द्वादशात् सप्तदशान्नार्धोत्तरं मतम् ॥

इति ब्रह्मसिद्धान्तोक्तेस्तत्रार्धोत्तरं रूपमिति न ग्राह्यम् ।

अत्रासन्नजीवाद्वयतो लाघवेनान्यज्यानयनार्थं मदीयः प्रकारः—

पूर्वविधिना गतज्या = ज्या (इ—प्र)

एष्यज्या = ज्या (इ + प्र)

अतः गतज्या + एष्यज्या = ज्या(इ—प्र) + ज्या(इ + प्र)

$$= \frac{२ \text{ ज्याइ} \times \text{कोज्याप्र}}{\text{त्रि}} \quad [\text{ त्रिकोणमितितः }]$$

$$= \frac{२ \text{ ज्याइ}}{\text{त्रि}} \left(\text{त्रि} - \frac{\text{त्रि}}{४६७} \right) = २ \text{ ज्याइ} \left(१ - \frac{१}{४६७} \right)$$

भास्करान्त्यज्योत्पत्तितः । अनेन—

जीवा स्वसप्तारियुगांशहीना द्विघ्नी च पूर्वज्यकया विहीना ।
स्यादग्रजीवा बृहतीति सर्वा आसन्नजीवाद्वयतो भवन्ति ॥ इति ।

मदीयं सूत्रमुपपद्यते । यथा "क्रमोत्क्रमज्याकृतियोगमूलाद्" वा "त्रिज्योत्क्रमज्यानिहतेर्दलस्य मूलम्" इत्यादिना च प्रथमज्या सिध्येत्तदा वृत्तपादे ३, ६, १२, २४, ४८, ९६ इत्यादि संख्यकानि ज्यार्धानि कर्त्तुं शक्यन्ते यतस्तथा संख्याकल्पने त्रिज्यार्धं राशिज्याऽनेन राशिज्या १, २, ४, ८, १६, ३२ संख्यका ज्या भवति ततो मुहुरर्धांशज्याविधानतः प्रथमज्यामानं सिध्यति । वृत्तपादे यथा यथा ज्यासंख्या महती तथा तथा सूक्ष्मज्यागणितोपयोगिनी सिध्यति । ज्यासंख्यात्याधिक्ये च ज्यानां पाठे ग्रन्थविस्तरभयम् । अत आचार्यैर्व्यवहारयोग्या पाठे च लाघवाच्चतुर्विंशतिर्ज्यासंख्या गृहीतेति ॥ १५–१६ ॥

अथ पूर्वप्रकारसिद्धान् ज्यापिण्डानुत्क्रमज्यानयनं चाह—

तत्त्वाऽश्विनोऽङ्काब्धिकृता रूपभूमिधरर्त्तवः ।
खाङ्काष्टौ पञ्चशून्येशा बाणरूपगुणेन्दवः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शून्यलोचनपञ्चैकाश्छिद्ररूपमुनीन्दवः ।
वियच्चन्द्रातिधृतयो गुणरन्ध्राम्बराश्विनः ॥ १८ ॥
मुनिषड्यमनेत्राणि चन्द्राग्निकृतदस्रकाः ।
पञ्चाष्टविषयाक्षीणि कुञ्जराश्विनगाश्विनः ॥ १९ ॥
रन्ध्रपञ्चाष्टकयमा वस्वद्रचङ्कयमास्तथा ।
कृताष्टशून्यज्वलना नगाद्रिशशिवह्नयः ॥ २० ॥
षट्पञ्चलोचनगुणाश्चन्द्रनेत्राग्निवह्नयः ।
यमाद्रिवह्निज्वलना रन्ध्रशून्यार्णवाग्नयः ॥ २१ ॥
रूपाग्निसागरगुणा वस्वग्निकृतवह्नयः ।
प्रोज्झ्योत्क्रमेण व्यासार्धादुत्क्रमज्यार्धपिण्डकाः ॥ २२ ॥

न्यायशास्त्रे तत्त्वानि पञ्चविंशतिः। अब्धयः समुद्राश्चत्वारः प्रसिद्धाः। रूप्यते प्रकाश्यते येन तद्रूपमेकमेव। भूमिधराः पर्वताः सप्त कुलाचलाः। ऋतवः षट्। ईशा रुद्रा एकादश। छिद्राणि रन्ध्राणि नव पूर्वप्रतिपादितानि। मुनयः सप्तर्षयः प्रसिद्धाः। वियत् खं शून्यम्। धृतिमतिक्रान्ता या संख्या साऽतिधृतिरेकोनविंशतिः। धृतयो धारणाश्चाष्टादश। गुणाः सत्त्वं रजस्तम इति त्रयः प्रसिद्धाः। अम्बरं खं शून्यम्। विषयाः पञ्चज्ञानेन्द्रियग्राह्याः। कुञ्जरा अष्टौ दिग्गजाः। नगाः पर्वताः सप्त। वसवोऽष्टौ प्रसिद्धा मन्वादिस्मृतौ। ज्वलना अग्नयस्त्रयः प्रसिद्धाः। अन्याः संख्याः प्रसिद्धाः।

पठितज्यापिण्डाश्च क्रमेण

२२५। ४४९। ६७१। ८९०। ११०५। १३१५। १५२०। १७१९। १९१०। २०९३। २२६७। २४३१। २५८५। २७२८। २८५९। २९७८। ३०८४। ३१७७। ३२५६। ३३२१। ३३७२। ३४०९। ३४३१। ३४३८।

अन्तराणि च २२४। २२२। २१९। २१५। २१०। २०५। १९९। १९१। १८३। १७४। १६४। १५४। १४३। १३१। ११९। १०६। ९३। ७९। ६५। ५१। ३७। २२। ७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र षोडशी ज्या २९७८ इयं भास्करोक्ताद्रूपाधिका यथात्र तथैव रूपाधिका धीवृद्धिदे लल्लेनापि पठिता। सूक्ष्मज्याविधिना भास्करोक्तैव शुद्धा ज्ञेया। अत्र रूपाधिकग्रहणेन पञ्चदशषोडशखण्डे च रूपान्तरिते जाते।

व्यासार्धात् त्रिज्यात उत्क्रमेण ज्यापिण्डान् प्रोज्झ्य उत्क्रमज्यार्धपिण्डका ज्ञेयाः। यथा त्रयोविंशज्यापिण्डं त्रिज्यातः प्रोज्झ्य शेषं ७। इयं प्रथमोत्क्रमज्या। एवमन्योत्क्रमज्याश्च साध्याः ॥ १७–२२ ॥

इदानीं पूर्वप्रकारेण सिद्धा उत्क्रमज्या आह—

मुनयो रन्ध्रयमला रसषट्का मुनीश्वराः।
द्व्यष्टैका रूपषड्दस्राः सागरार्थहुताशनाः ॥ २३ ॥
खर्त्तु वेदा नवाद्र्यर्था दिङ्नागास्त्र्यर्थकुञ्जराः।
नगाम्बरवियच्चन्द्रा रूपभूधरशङ्कराः ॥ २४ ॥

शरार्णवहुताशैका भुजङ्गाक्षिशरेन्दवः।
नवरूपमहीध्रैका गजैकाङ्कनिशाकराः ॥ २५ ॥
गुणाश्विरूपनेत्राणि पावकाग्निगुणाश्विनः।
वस्वर्णवार्थयमलास्तुरङ्गर्त्तु नगाश्विनः ॥ २६ ॥
नवाष्टनवनेत्राणि पावकैकयमाग्नयः।
गजाग्निसागरगुणा उत्क्रमज्यार्धपिण्डकाः ॥ २७ ॥

मुनयः सप्त। रन्ध्राणि नव। ईश्वरा रुद्रा एकादश। अर्थाः ज्ञानेन्द्रियग्राह्याः पञ्च। नागा दिग्गजा अष्टौ। शङ्करा रुद्रा एकादश। भुजङ्गा सर्पा अष्टौ प्रसिद्धा वासुक्यादयः। महीध्राः पर्वताः सप्त कुलाचलाः। पावका अग्नयस्त्रयः। तुरङ्गा अश्वाः सप्त रविरथे प्रसिद्धाः। अन्ये शब्दाः प्रसिद्धाः। एते उत्क्रमज्यार्धपिण्डाः सन्ति। ते च यथा—

७। २९। ६६। ११७। १८२। २६१। ३५४। ४६०। ५७९। ७१०। ८५३। १००७। ११७१। १३४५। १५२८। १७१९। १९१८। २१२३। २३३३। २५४८। २७६७। २९८९। ३२१३। ३४३८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्राष्टमोत्क्रमज्यापिण्डे भास्करोक्तादेकसंख्या न्यूना, तथान्तराणि २२। ३७। ५१। ६५। ७९। ९३। १०६। ११९। १३१। १४३। १५४। १६४। १७४। १८३। १९१। १९९। २०५। २१०। २१५। २१९। २२२। २२४। २२५।

अत्र सप्तमाष्टमान्तरे भास्करोक्तादि्भन्ने।

अत्रोपपत्तिः। कोटिज्योना त्रिज्या भुजोत्क्रमज्या। तत्र प्रथमज्यायाः कोटिज्या त्रयोविंशज्या ३४३१। तदूना त्रिज्या ७ प्रथमोत्क्रमज्या। एवं पूर्वोक्तप्रकारेण प्रसाध्येह सर्वोत्क्रमज्याः पठिताः॥ २३–२७॥

इदानीं बहुत्रोपयोगित्वात् परमक्रान्तिज्यामानं क्रान्तिसाधनं चाह—

परमापक्रमज्या तु सप्तरन्ध्रगुणेन्दवः।
तद्गुणा ज्या त्रिजीवाप्ता तच्चापं क्रान्तिरुच्यते॥ २८॥

सप्तरन्ध्रगुणेन्दवः १३९७ परमक्रान्तिज्या भवति ज्या स्वीयग्रहदोर्ज्या तया परमक्रान्तिज्यया गुणा त्रिजीवयाऽऽप्ताऽभीष्टक्रान्तिज्या भवति। तच्चापं ग्रहस्य क्रान्तिरुच्यते।

अत्रोपपत्तिः। अत्राचार्यमते चतुर्विंशत्यंशाः परमक्रान्त्यंशाः। ततो लिप्तास्तत्त्वयमैर्भक्ता इति वक्ष्यमाणप्रकारेण चतुर्विंशत्यंशज्या सप्तरन्ध्रगुणेन्दव इत्युपपद्यते। ततश्चापजात्यत्रिभुजेन त्रिज्यया परमक्रान्तिज्या तदा ग्रहदोर्ज्यया किमिति लब्धा ग्रहक्रान्तिज्या तच्चापं ग्रहक्रान्तिः। अत्र नाडीक्रान्तिमण्डलसम्पाततः क्रान्तिरुत्पद्यतेऽतः सायनग्रहदोर्ज्यया क्रान्तिज्या साध्या। अत एव भास्करः "युक्तायनांशादपमः प्रसाध्यः" इति। पूर्वमनुपातेन या क्रान्तिज्या साधिता, तदनुपातोपपत्तिः कमलाकरेण सिद्धान्ततत्त्वविवेकत्रिप्रश्नाधिकारे विशेषरूपेण प्रतिपादिता। सम्प्रति चापीयत्रिकोणमितितोऽतिस्पष्टा सा तदर्थं मदीयं ग्रहणकरणं विलोक्यम्॥ २८॥

अथ फलसाधनार्थं केन्द्रादिसाधनमाह—

ग्रहं संशोध्य मन्दोच्चात् तथा शीघ्राद्विशोध्य च।
शेषं केन्द्रपदं तस्माद्भुजज्या कोटिरेव च॥ २९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राश्यादिमन्दोच्चाद्राश्यादिग्रहं संशोध्य तथा शीघ्राच्छीघ्रोच्चाच्च ग्रहं विशोध्य शेषं यत् केन्द्रं तस्य पदं प्रसिद्धं ज्ञेयम् । एकस्मिन् चक्रे चत्वारि पदानि भवन्ति । अतस्त्रिभैरेकैकं पदं भवति । पदानां क्रमेण अयुग्मं युग्ममयुग्मं युग्ममिति संज्ञा । एवं पूर्वशास्त्रे प्रसिद्धं केन्द्रस्य पदं ज्ञेयमित्यर्थः । तस्मात् पदाज्ज्यार्धैर्वक्ष्यमाणविधिना भुजज्या साध्या कोटिः कोटिज्या चैव साध्येत्यर्थः । नामैकदेशेन नामग्रहणं भवतीति नियमादत्र कोटिशब्देन कोटिज्या ग्राह्येति ॥ २९ ॥

पदवशेन कथं भुजकोटिज्ये साध्ये एतदर्थमाह—

गताद्भुजज्या विषमे गम्यात् कोटिः पदे भवेत् ।
युग्मे तु गम्याद्बाहुज्या कोटिज्या तु गताद्भवेत् ॥ ३० ॥

विषमेऽयुग्मे पदे यावान् केन्द्रस्य भागो गतस्तस्माद्गताद्भुजज्या साध्या । गतो भागो भुजो भवति तस्य वक्ष्यमाणविधिना ज्या साध्येत्यर्थः । एवं विषमे पदे यावान् गम्य एष्यो भागस्तस्मात् कोटिर्भवेत् । एष्यभागस्य ज्या कोटिज्या भवेदित्यर्थः । युग्मे समे पदे तु गम्यादेष्यभागाद्बाहुज्या भुजज्या गताद्भागात् तु कोटिज्या भवेत् ।

अत्रोपपत्तिस्तु "मृदूच्चेन हीनो ग्रहो मन्दकेन्द्रम्" इत्यादिभास्करोक्तेन विधिना प्रसिद्धैव, किमु लेखप्रयासेन ? ॥ ३० ॥

इदानीं भुजकोटिलिप्तानां ज्यासाधनमाह—

लिप्तास्तत्त्वयमैर्भक्ता लब्धं ज्यापिण्डकं गतम् ।
गतगम्यान्तराभ्यस्तं विभजेत् तत्त्वलोचनैः ॥ ३१ ॥
तदवाप्तफलं योज्यं ज्यापिण्डे गतसंज्ञके ।
स्यात् क्रमज्याविधिरयमुत्क्रमज्यास्वपि स्मृतः ॥ ३२ ॥

यासां लिप्तानां कलानां ज्यासाधनमिष्टम्, तास्तत्त्वाश्विभिः पञ्चविंशत्यधिकशतद्वयेन भक्ता लब्धाङ्कसमं गतं ज्यापिण्डं ज्ञेयम् । शेषं गतज्यापिण्डयोरन्तरेण गुणितं तत्त्वलोचनैः शरद्विद्विभिर्विभजेद्यदवाप्तेन भजनेन फलं तद्गतसंज्ञके ज्यापिण्डे योज्यम् । अयं क्रमज्याविधिः स्यात् । अनेन विधिना क्रमज्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवतीत्यर्थः। एवमुत्क्रमज्यार्धैरयं विधिरुत्क्रमज्यासूत्क्रमज्यासाधनेऽपि स्मृतः कथित इति।

अत्रोपपत्तिः। तत्त्वलोचनकलाभिरत्रैकैका ज्या साधिता। अतः कलास्तत्त्वाश्विभिर्भक्ता लब्धं गतं ज्यापिण्डम्। शेषेण गतैष्यज्यान्तरेणानुपातो यदि शरद्विद्विभिर्गतैष्यज्यान्तरं लभ्यते, तदा शेषेण किमिति लब्धं गतज्यापिण्डे योज्यमभीष्टज्या भवतीति। अत्र धनुरूपेण शरद्विद्विमितेन कर्णेन गतैष्यज्यान्तरेण भुजेन सरलरेखात्मकेनोत्क्रमज्यान्तरेण सरलरेखात्मककोटिसंज्ञेन यत् त्रिभुजमेवं शेषचापमितेन धनूरूपेण कर्णेन गतज्येष्ट-ज्यान्तररूपसरलरेखात्मकभुजेन गतेष्टोत्क्रमज्यान्तररूपसरलरेखात्मककोट्या च यत् त्रिभुजमेतद्द्वयं न मिथः सजातीयम्। आचार्यश्चापरूपौ कर्णौ सरलरेखाकारौ स्वीकृत्य शेषफलमानीतम्, तच्च यथा यथा वृत्तपादे ज्यासंख्याधिक्यं तथा तथाऽऽसन्नज्ययोश्चापान्तराल्पत्वात् सूक्ष्ममिति ज्यागणितविदां स्फुटम्। एवमुत्क्रमज्यासाधनेऽपि शेषफलं स्थूलं ज्ञेयमिति। अथेष्टचापे प्रथमचापताऽल्पे सौरविधानेन तत्त्वलोचनमितचापेन प्रथमोत्क्रमज्या लभ्यते, तदा शेषचापेन किमित्यनुपातेन लब्धेष्टोत्क्रमज्या भवति। परन्त्वियं महास्थूला भवति। यतः प्रथमचापं 'प्र' इष्टचापं च 'इ' कल्प्यते तदा ज्यासाधनविधिना—

$$\text{ज्याइ} = \frac{\text{इ} \times \text{ज्याप्र}}{\text{प्र}},\ \text{ततः कोज्या}^2\,\text{इ} = \text{त्रि}^2 - \frac{\text{इ}^2 \times \text{ज्या}^2\text{प्र}}{\text{प्र}^2}$$ अस्यासन्नमूलेन $\text{कोज्याइ} = \text{त्रि} - \frac{\text{इ}^2 \times \text{ज्या}^2\text{प्र}}{2\,\text{त्रि} \times \text{प्र}^2}$। इयं त्रिज्यातः शुद्धा जाता इष्टोत्क्रमज्या $= \frac{\text{इ}^2 \times \text{ज्या}^2\text{प्र}}{2\,\text{त्रि} \times \text{प्र}^2}$ अत्र यदि इ = प्र तदा प्रथमचापोत्क्रमज्या $= \frac{\text{ज्या}^2\ \text{प्र}}{2\ \text{त्रि}}$

अस्या उत्थापनेन जातेष्टोत्क्रमज्या $= \frac{\text{इ}^2 \times \text{उज्याप्र}}{\text{प्र}^2}$ अतः प्रथमचापवर्गेण प्रथमोत्क्रमज्या तदेष्टचापवर्गेण किमित्यनुपातेन तत्रेष्टोत्क्रमज्या सूक्ष्मा भवति, सौरविधिना च महास्थूला भवतीति गोलविद्भिर्भृशं विचिन्त्यम्। सौरोदितवत् भास्करादिभिरप्यत्र स्थूलोत्क्रमज्या साधिता = इति "यातैष्ययोः खण्डकयोर्विशेषः" इत्यादिभास्करप्रकारे मदीयो विशेषो विचिन्त्य इत्यलं प्रसङ्गागतेन विचारेणेति ॥ ३१—३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाभीष्टज्यातो धनुःसाधनमाह—

ज्यां प्रोज्झ्य शेषं तत्त्वाश्विहतं तद्विवरोद्धृतम् ।
संख्यातत्त्वाश्विसंवर्गे संयोज्य धनुरुच्यते ॥ ३३ ॥

अभीष्टज्यातः पाठपठितां ज्यां प्रोज्झ्य हित्वा शेषं शरद्विद्विहतं तयोर्ज्या-साधने गतगम्यज्ययोर्विवरेणान्तरेणोद्धृतं फलं यत्संख्यका जीवा विशुद्धाः तस्याः संख्यायास्तत्त्वाश्विनां पञ्चविंशत्यधिकशतद्वयस्य च यः संवर्गो घातस्तस्मिन् संयोज्य योजयित्वा धनुरुच्यते गणकैरिति शेषः ।

अत्रोपपत्तिर्ज्यासाधनवैपरीत्येनातिसुगमा । अत्रापि प्रथमोत्क्रमज्यातोऽल्पाया इष्टोत्क्रमज्यायाश्चापं प्रथमोत्क्रमज्यया प्रथमचापवर्गस्तदेष्टोत्क्रमज्यया किं लब्धस्येष्टचापवर्गस्य मूलसमं पूर्वप्रतिपादितविशेषेण बोध्यमिति ॥ ३३ ॥

अथ ग्रहाणां मन्दपरिध्यंशानाह—

रवेर्मन्दपरिध्यंशा मनवः शीतगो रदाः ।
युग्मान्ते विषमान्ते च नखलिप्तोनितास्तयोः ॥ ३४ ॥
युग्मान्तेऽर्थाद्रयः खाग्निसुराः सूर्या नवार्णवाः ।
ओजे द्व्यगा वसुयमा रदा रुद्रा गजाब्धयः ॥ ३५ ॥

युग्मान्ते युग्मपदान्ते नीचोच्चस्थाने सूर्यस्य मन्दपरिध्यंशा मनवश्चतुर्दश। शीताः शीतला गावः किरणा यस्यासौ शीतगुश्चन्द्रस्तस्य युग्मान्ते रदा द्वात्रिंशद्-भागा मन्दपरिध्यंशाः। विषमान्ते विषमपदान्ते केन्द्रे राशित्रये वा राशिनवके तयो रविचन्द्रयोर्युग्मपदान्तोद्भवा मन्दपरिधिभागा नखलिप्तोनितास्तदा मन्द-परिधिभागा भवन्ति। एवं भौमादीनां युग्मपदान्ते क्रमेण मन्दपरिधिभागाः— अर्थाद्रयः पञ्चसप्ततिः ७५। खाग्नयः त्रिंशत् ३०। सुरास्त्रयस्त्रिंशत् ३३। सूर्या द्वादश १२। नवार्णवा एकोनपञ्चाशत् ४९। ओजे विषमपदान्ते च द्व्यगा द्वासप्ततिः ७२। वसुयमा अष्टाविंशतिः २८। रदा द्वात्रिंशत् ३२। रुद्रा एका-दश ११। गजाब्धयोऽष्टचत्वारिंशत् ४८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः। त्रिज्याव्यासार्धे भांशाः ३६० परिधयस्तदा मन्दान्त्यफलज्याव्यासार्धं किमिति लब्धा ग्रहाणां मन्दपरिध्यंशाः। अत्र मन्दप्रतिवृत्ते नीचोच्चादिस्थितिवशेन मन्दान्त्यफलज्यः भिन्नाभिन्नाऽऽचार्येणोपलब्धा तद्वशेन मन्दपरिधयश्च भिन्नाः, अतो युग्मौजान्तयोर्मन्दपरिधयोऽनुपातेन इष्टमन्दपरिध्यानयनार्थं पठिता इति। सिद्धान्ततत्त्वविवेके कमलाकरस्तु मन्दफलानयनेऽपि कर्णानुपातः समुचितः सूर्यसिद्धान्ते कर्णानुपातेन मन्दपरिधय एव स्फुटीकृता, अतः स्फुटमन्दपरिधितो यन्मन्दभुजफलं तत् कर्णानुपातजनितमन्दफलज्यासममित्याह। यदि स्थिर एकरूपो मन्दपरिधिः = या, तदा मन्दभुजफलम् $= \frac{\text{ज्याके या,}}{३६०}$

तत कर्णानुपातेनेष्टा मन्दफलज्या $= \frac{\text{ज्याके}}{३६०} \times \frac{\text{त्रि} \times \text{या}}{\text{मक}}$ अत्र यदि स्फुटो मन्दपरिधिः $= \frac{\text{त्रि} \times \text{या}}{\text{मक}}$ तदेष्टा मन्दफलज्या स्फुटपरिधिजनितभुजफलसमा =

$\frac{\text{ज्याके} \times \text{स्फुप}}{३६०}$। अत्रैकरूपपरिधिज्ञानार्थं विषमान्तमन्दपरिधिना समीकरणं कार्यम्। तद्यथा विषमान्ते मन्दकर्णः $= \sqrt{\text{त्रि}^2 + \text{ज्या}^2\text{अ}}$, ज्याअ = परममन्दफलज्या $= \frac{\text{त्रि} \times \text{या}}{३६०}$। अतो मन्दकर्णः $= \sqrt{\text{त्रि}^2 + \frac{\text{त्रि}^2 \times \text{या}^2}{(३६०)^2}}$ ततो विषमान्ते स्फुटो मन्दपरिधिः $= \frac{\text{त्रि} \times \text{या}}{\sqrt{\text{त्रि}^2 + \frac{\text{त्रि}^2 \times \text{या}^2}{३६०२}}}$। वर्गकरणेन

$$\left.\text{ओप}^2 = \frac{\text{त्रि}^2 \times \text{या}^2}{\text{त्रि}^2 + \frac{\text{त्रि}^2 \times \text{या}^2}{\text{भा}^2}}\right\} \text{ अत्र } ३६०^2 = \text{भा}^2 ।$$

समच्छेदादिना $\text{ओप}^2 \,(\text{त्रि}^2\text{भा}^2 + \text{त्रि}^2\text{या}^2) = \text{त्रि}^2.\ \text{भा}^2.\ \text{या}^2$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$\therefore$ ओप² त्रि² भा² = या² (त्रि².भा² — ओप². त्रि²) ततो या² = $\frac{\text{ओप}^2\text{भा}^2}{\text{भा}^2\text{-ओप}^2}$

इति समीकरणेन कमलाकरेण स्थिरमन्दपरिधिभागाश्च स्वसिद्धान्ते पठिताः। ततो नीचोच्चकर्णभेदेन युग्मान्ते द्विविधान् स्फुटमन्दपरिधिभागानानीय तयोर्योगार्धसमाः स्थूला अपि युग्मान्तीया मन्दपरिधिभागाः सौरा उक्तास्ते च सूर्यसिद्धान्तपठित-युग्मान्तपरिधितो भिन्ना आयान्ति। तत्र "परम्परातोऽन्धपुरुषपरम्परया मूर्खैः सूर्यसिद्धान्तशुद्धपाठो नाशितः"इति कमलाकरोक्तिः। सा च मन्मते न समीचीना, शीघ्रफले स्फुटपरिधितोऽपि पुनः शीघ्रकर्णस्य साधनत्वात्। कमलाकरोऽपि पूर्वोक्तस्वोपपत्तौ शीघ्रफले व्यभिचारं दृष्ट्वा 'तद्वासनाविद्भगवान् स एव नारायणो मण्डलगो न चान्यः' इत्याह। अतो नीचोच्चवशेन परमं फलं चलमुपलभ्य सूर्येण स्फुटाः परिधयोऽभीष्टस्थाने युग्मौजान्तपरिध्यन्तरतः साधिता इति मदीयकथनं युक्तियुक्तं बुद्धिमता विचारणीयमिति ॥ ३४—३५॥

इदानीं भौमादीनां शीघ्रपरिधिभागानाह—

कुजादीनामतः शैघ्रचा युग्मान्तेऽर्थाग्निदस्रकाः।
गुणाग्निचन्द्राः खनगा द्विरसाक्षीणि गोऽग्नयः ॥३६॥

ओजान्ते द्वित्रियमला द्विविश्वे यमपर्वताः।
खर्त्तुदस्रा वियद्वेदाः शीघ्रकर्मणि कीर्त्तिताः ॥३७॥

अतो मन्दपरिधिकथनानन्तरं भौमादीनां युग्मपदान्ते एते शैघ्र्या शीघ्र-परिधिभागाः। कुजस्य २३५। बुधस्य १३३। बृहस्पतेः ७०। शुक्रस्य २६२। शनेः ३९। एवं भौमादीनां शीघ्रकर्मणि शीघ्रफलसाधने ओजान्ते एते शीघ्र-परिधिभागाः कीर्त्तिताः कथिताः। कुजस्य २३२। बुधस्य १३२। बृहस्पतेः ७२। शुक्रस्य २६०। शनेः ४०।

अत्रोपपत्तिः। मन्दपरिधिवत्। अत्र गूढार्थप्रकाशे रङ्गनाथः "अत्र कीर्त्तिता इत्यनेन युग्मान्ते फलाभावादेव परिधयः कथं सम्भवन्ति। अतो विषम-पदान्ते परमफलस्य सत्त्वात् तत्र एव युक्ताः परिधयः शनिमन्दशीघ्रपरिध्योः क्रमेणाधिकन्यूनत्वं च संज्ञाव्याघातादयुक्तमित्यादि नाशङ्कनीयमागमप्रामाण्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुतिर्यत्र प्रमाणं स्याद्युक्तिः का तत्र नारद इति ब्रह्मसिद्धान्तोक्तेश्चेति" इत्यत्र एश्रिवृत्तीयविषमपदान्ते परमफलमानं भ्रान्तित उक्तं रङ्गनाथेन।

अत्र सौरभाष्ये नृसिंहोऽपि "एवमतीन्द्रियदृग्भिर्मुनिभिर्विषमपदान्ते युग्मपदान्ते भिन्ना भिन्ना लक्षितास्ते पाठपठिता इति स्पष्टमेव" इति मदुक्तमेव कथयति—इति ॥ ३६—३७ ॥

अथ प्रतिवृत्तेऽभीष्टस्थाने ग्रहे स्फुटपरिध्यानयनमाह—

ओजयुग्मान्तरगुणा भुजज्या त्रिज्ययोद्धृता।
युग्मवृत्ते धनर्णं स्यादोजादूनाधिके स्फुटम् ॥३८॥

भुजज्या स्फुटमन्दपरिधिसाधने मन्दकेन्द्रभुजज्या स्फुटशीघ्रपरिध्यानयने च शीघ्रकेन्द्रभुजज्या ओजान्तयुग्मान्तस्वस्वपरिध्योरन्तरेण गुणा त्रिज्यया भक्ता फलं विषमान्तपरिधेर्युग्मवृत्ते युग्मान्तपरिधावूनाधिके क्रमेण युग्मान्तपरिधावेव धनर्णं कार्यमेवमभीष्टे स्थाने स्फुटं स्फुटपरिधिमानं स्यात्। ओजान्तपरिधेरूने युग्मान्तपरिधौ धनं कार्यमन्यथा ऋणमित्यर्थः।

अत्रोपपत्तिः। त्रिज्यातुल्यया केन्द्रदोर्ज्यया यदि विषमयुग्मान्तरपरिध्योरन्तरमुपलभ्यते, तदाऽभीष्टकेन्द्रज्यया किं फलमोजान्ताद्युग्मान्तपरिधेश्चयापचयवशाद्धनर्णं कृतम्। अत्र नवत्यंशैः परमकेन्द्रभुजैः परिध्यन्तरं तदेष्टकेन्द्रभुजांशैः किमित्यनुपातेन न साधुफलं तथैकरूपवेगेनैव परिध्यन्तरं भवतीत्यत्र सौरोपलब्धिरेव वासना नान्यत् कारणं वक्तुं शक्यते। उभयोर्युग्मान्तयोश्च समानं फलं न कर्णभेदतः किमप्यन्तरमित्यपीह विचित्रं विचिन्त्यं बुद्धिमद्भिरिति ॥३८॥

इदानीं मन्दफलानयनमाह—

तद्गुणे भुजकोटिज्ये भगणांशविभाजिते।
तद्भुजज्याफलधनुर्मान्दं लिप्तादिकं फलम् ॥३९॥

भुजकोटिज्ये केन्द्रभुजकोटिज्ये तेन पूर्वानीतेन स्फुटपरिधिना गुणे भगणांशैश्चक्रभागैः षष्ट्यधिकशतत्रयेण विभाजिते फले क्रमेण भुजकोटिफले भवत इत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्याहार्यम् । एवं भुजज्याफलं मन्दकेन्द्रभुजज्याफलमर्थात् मन्दभुजफलं यत् तद्धनुः कार्यं 'ज्यां प्रोज्झ्य' इत्यादिना तल्लिप्तादिकं मान्दं फलं मन्दफलं स्यादिति ।

अत्रोपपत्तिः । नीचोच्चवृत्त ये केन्द्रभुजकोटिज्ये, ते तत्फले भवत इति सिद्धान्तशिरोमण्यादौ प्रसिद्धम् । प्राचीनानां क्षेत्रभङ्गितो मन्दकर्णानुपातेनैव वस्तुतो मन्दफलं सिध्यति । क्षेत्रभङ्गी च 'ये केन्द्रदोःकोटिफले कृते ते' इति भास्करोक्तेन प्रसिद्धा । फलवासनाया वैचित्र्याद्भास्करः स्वमतं विहाय मतान्तराणि "स्वल्पान्तरत्वान्मृदुकर्मणीह कर्णः कृतो नेति वदन्ति केचित्" इत्यादि विलिलेख । मन्दकर्णानुपातोद्भवं वास्तवं मन्दफलमेव सौरोक्तस्फुटमन्दपरिधितो मन्दभुजफलेन सिध्यतीति कमलाकरमतं युग्मौजान्तपरिधिपाठस्थाने प्रदर्शितम् । वस्तुतो ग्रहाणां कक्षा दीर्घवर्त्तुलाकृतिरित्यज्ञानात् प्राचीनानां मन्दफलसाधने भ्रमो जातः । यद्यप्यत्र भास्करेण स्वमतं न प्रतिपादितम्, तथापि चन्द्रग्रहणे स्फुटरविचन्द्रकर्णसाधने 'मन्दश्रुतिर्द्राक्श्रुतिवत् प्रसाध्या' इत्यादिना ब्रह्मगुप्तस्यैव मतं स्वीकृतमिति स्फुटम् । दीर्घवृत्ताकृतिकक्षातः फलसाधनार्थं मत्कृतं दीर्घवृत्तलक्षणं द्रष्टव्यम् । तत्र फलसाधनार्थमेका श्रेढी ह्युत्पद्यते तत्र, मन्दफलस्याल्पत्वाद्यदि प्रथमं पदमेव गृह्यते, तदा मन्दभुजफलचापसममेव मन्दफलमिति प्राचीनोक्तमुपपद्यते । ब्रह्मगुप्तमतार्थं मन्मुद्रितः सटीको ब्राह्मस्फुटसिद्धान्तो विलोक्यः किमत्र लेखप्रपञ्चेनेति ॥ ३९ ॥

इदानीं शीघ्रफलसाधनमाह—

शैघ्र्यं कोटिफलं केन्द्रे मकरादौ धनं स्मृतम् ।
संशोध्यं तु त्रिजीवायां कर्क्यादौ कोटिजं फलम् ॥४०॥

तद्बाहुफलवर्गैक्यान्मूलं कर्णश्चलाभिधः ।
त्रिज्याभ्यस्तं भुजफलं चलकर्णविभाजितम् ॥४१॥

लब्धस्य चापं लिप्तादिफलं शैघ्र्यमिदं स्मृतम् ।
एतदाद्ये कुजादीनां चतुर्थे चैव कर्मणि ॥४२ ॥

मकरादौ केन्द्रे तद्गुणे भुजकोटिज्ये इत्यादिविधिना पूर्वमागतं शैघ्र्यं शीघ्रफलसम्बन्धि कोटिफलं त्रिज्यायां धनं स्मृतम् । कर्क्यादौ केन्द्रे तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेव शैघ्रयं कोटिजं फलं त्रिजीवायां संशोध्यम् । एवं कृते स्पष्टा कोटिर्भवतीति वेदितव्यम् । उच्चादग्रे पृष्ठे च त्रिभान्तरे ग्रहे मकरादि केन्द्रम् । नीचादग्रे पृष्ठे च त्रिभान्तरे ग्रहे कर्क्यादि केन्द्रं भवतीति क्षेत्रभङ्गी पर्यालोचनया सिध्यति । तस्याः स्फुटकोटेः शीघ्रभुजफलस्य च वर्गयोरैक्याद्योगाद्यन्मूलं स चलाभिधः शीघ्रसंज्ञः कर्णो भवति । शीघ्रभुजफलं त्रिज्यया गुण्यं शीघ्रकर्णेन विभाजितं लब्धस्य 'ज्यां प्रोज्झ्य' इत्यादि विधिना यच्चापमिदमेव लिप्तादि शैघ्रयं फलं भवति । एतच्छीघ्रफलं कुजादीनां मध्ये आद्ये प्रथमे तथा चतुर्थे कर्मणि च देयं भवति । कुजादयः कर्मचतुष्टयेन स्पष्टाः भवन्ति, तत्र प्रथमे चतुर्थे च कर्मणि वक्ष्यमाणविधिना शीघ्रफलस्यास्य संस्कारो भवतीत्यर्थः ।

अत्रोपपत्तिः । नीचोच्चवृत्तभङ्ग्या । कक्षामण्डले मध्यग्रहस्थानं केन्द्रं प्रकल्प्यान्त्यफलज्यामितकर्कटेन नीचोच्चाख्यं वृत्तं विलिख्य भूविन्दोर्मध्यग्रहस्थानोपरिगामिनी रेखा कार्या साऽत्रोच्चरेखा । तस्य नीचोच्चवृत्तस्योच्चरेखया सह यौ योगौ तयोरुपरितन उच्चसंज्ञः । अधस्तनो नीचसंज्ञः । तद्रेखातोऽन्या तिर्यग्रेखा नीचोच्चवृत्तमध्ये मत्स्येन कार्या । तदपि नीचोच्चवृत्तमुच्चप्रदेशाद्भांशैरङ्क्यम् । तत्रोच्चाच्छीघ्रकेन्द्रमनुलोमं देयम् । तत्र शीघ्रकेन्द्रादग्रे पारमार्थिको ग्रहः । अत्रापि ग्रहोच्चरेखयोस्तिर्यगन्तरं शीघ्रभुजफलम् । ग्रहतिर्यग्रेखयोन्तरं कोटिफलम् । ग्रहभूम्योरन्तरं शीघ्रकर्णः । अथ तदानयनम् । मकरादिकेन्द्रे त्रिज्योर्ध्वतः कोटिफलं दृश्यते । कर्क्यादौ तु तदधः । अतस्तदैक्यान्तरं स्फुटा कोटिः । शीघ्रभुजफलं तु तत्र भुजः तयोर्वर्गयोगपदं कर्ण इत्युपपन्नम् । अथ शीघ्रफलानयनवासना त्रैराशिकेन । कर्णकोटिसूत्रयोर्यदि कर्णाग्रे शीघ्रभुजफलतुल्यमन्तरं तदा त्रिज्याग्रे किमिति । अतस्त्रिज्याभ्यस्तं शीघ्रभुजफलं चलकर्णेन हृतम् । तच्चापकरणेन वृत्तगतत्वं शीघ्रफलस्योपपन्नम् ।

४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र क्षेत्रदर्शनम्



अथ ग्रहाणां स्फुटार्थं कर्मसंख्यामाह—

मान्दं कर्मैकमर्केन्दोर्भौमादीनामथोच्यते ।
शैघ्र्यं मान्दं पुनर्मान्दं शैघ्र्यं चत्वार्यनुक्रमात् ॥ ४३ ॥

मध्ये शीघ्रफलस्यार्धं मान्दमर्धफलं तथा ।
मध्यग्रहे मन्दफलं सकलं शैघ्र्यमेव च ॥ ४४ ॥

अर्कचन्द्रयोरेकं मान्दमेव कर्म । रविचन्द्रयोः स्फुटत्वं सकृन्मन्दफलेनैवेत्यर्थः । अथ भौमादीनां स्फुटत्वमुच्यते । प्रथमं शैघ्र्यं ततो मान्दं ततः पुनर्मान्दं ततः पुनः शैघ्र्यमिति चत्वारि एकानन्तरमपरमनुक्रमाद्देयानि । कथं देयानीत्याह । प्रथमं मध्यग्रहानीतं शीघ्रफलं यत् तस्यार्धं दलं वक्ष्यमाणविधिना धनमृणं वा मध्यग्रहे देयम् । ततोऽर्धशीघ्रफलसंस्कृतमध्यग्रहान्मन्दफलं साध्यम् । तस्यार्धं शीघ्रफलार्धसंस्कृत-मध्ये संस्कार्यम् । पुनः फलद्वयार्धसंस्कृतमध्यग्रहात् मन्दफलं साध्यम् तत् सकलं पूर्वागतमध्यग्रहे देयम् । अस्मान्मन्दफलसंस्कृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्यग्रहात् शैघ्र्यं शीघ्रफलं साध्यम् । तदपि सकलं सम्पूर्णं मन्दफलसंस्कृतमध्यमग्रहे संस्कार्यम् । एवं कर्मचतुष्टयेन भौमादयः स्फुटा भवन्तीत्यर्थः ।

अत्रोपलब्धिरेव वासना बुद्धिमता ज्ञेया । गूढप्रकाशे रङ्गनाथाः "मन्दफलं स्फुटसाधितं वास्तवम् । स्फुटस्तु मन्दफलसापेक्ष इत्यन्योऽन्याश्रयात् सूक्ष्ममन्दफलसाधनमशक्यमपि भगवता तदासन्नसाधनार्थमर्धस्फुटादेव मन्दफलं साधितं मध्यग्रहसाधितमन्दफलापेक्षया सूक्ष्मम् । अर्धस्फुटस्तु फलद्वयार्धसंस्कृतो मध्यग्रहः अत्रापि मन्दफलास्यार्धं शीघ्रफलार्धसंस्कृतात् किञ्चित्सूक्ष्मत्वार्थं साधितमित्युपपन्नं मध्ये शीघ्रफलस्येत्यादि" इत्याहुस्तन्न समीचीनम् । मन्दफलसाधनेभास्करादिभिर्या क्षेत्रभङ्गी विलिखिता तव स्पष्टग्रहस्य प्रयोजनाभावात् मन्दफलस्य स्पष्टग्रहासापेक्षत्वात् । एवमसकृत्फलसाधनोपपत्त्यर्थं भास्करेण—

मध्यगत्या स्वकक्षाख्यवृत्ते व्रजे-
न्मन्दनीचोच्चवृत्तस्य मध्यं यतः ।
तद्धृतौ शीघ्रनीचोच्चमध्यं तथा
शीघ्रनीचोच्चवृत्ते स्फुटः खेचरः ॥

शीघ्रनीचोच्चवृत्तस्य मध्यस्थितिं
ज्ञातुमादौ कृतं कर्म मान्दं ततः ।
खेटबोधाय शैघ्र्यं मिथः संश्रिते ।
मान्दशैघ्र्ये हि तेनासकृत् साधिते ॥

इत्यत्र मान्दशैघ्र्ये फले मिथः संश्रिते-इति यदुक्तं तत्प्रमाणार्थं वासनायां च "नीचोच्चवृत्तभङ्गिपर्यालोचनयैवं परिणमतीति स्पष्टार्थम्" इति च यदुदितं तत्सर्वं प्रतारणपरं वाक्यं तत्प्रतिपादितनीचोच्चवृत्तभङ्ग्यां मन्दशीघ्रफलयोरन्योऽन्याश्रयाभावादिति सदसद्विवेकिभिर्विचिन्त्यमिति किं लेखप्रयासेन ।

अत्र सौरवासनायां कमलाकरः—

"अत्र का युक्तिरिति चेत्—

वेद एव रवितन्त्रमथास्य वासनाकथनमल्पधियां हि ।
दोष एव न गुणो रविणोक्तं तेन युक्तियुतमेव सदोह्यम् ॥

ब्रह्मसिद्धान्ते श्रीशाकल्योऽपि—

"अतीन्द्रियार्थविज्ञानं प्रमाणं श्रुतिरेव हि ।
श्रुतिर्यत्र प्रमाणं स्याद्युक्तिः का तत्र नारद ॥
जिज्ञासोर्युक्तिरिष्टाऽस्ति यदि श्रुत्यनुसारिणीति ।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वेदवाक्यवत् सूर्यप्रकारमाह। सौरभाष्ये नृसिंहेनापि—"अत्र प्रत्य-क्षोपलब्धिरेव वासना" इत्यभिहितम्। तत्र अजादिकेन्द्रे सर्वेषामित्यारभ्य मुक्तावृणधनमित्यन्तं ग्रन्थं लिखित्वा ततोऽनन्तरं मध्ये शीघ्रफलस्यार्धमित्यादि विलिखितमस्तीति ॥ ४३-४४ ॥

अथ पूर्वागतं फलद्वयं कदा धनं कदा च ऋणमित्याह—

अजादिकेन्द्रे सर्वेषां शैघ्र्ये मान्दे च कर्मणि ।
धनं ग्रहाणां लिप्तादि तुलादावृणमेव च ॥ ४५ ॥

सर्वेषां ग्रहाणां मान्दे वा शैघ्र्ये कर्मणि मेषादिकेन्द्रे लिप्तादि फलं धनं तुलादौ केन्द्रे च ऋणं ज्ञेयम्। एवं फलयोर्धनर्णत्वं विज्ञाय पूर्वोक्तकर्मणा स्फुटा ग्रहाः साध्या इति।

अत्रोपपत्त्यर्थं प्रसिद्धाऽपि प्रतिवृत्तभङ्गिर्बालावबोधार्थं प्रदर्श्यते। समायां भूमौ बिन्दुं कृत्वा तां भूमिं प्रकल्प्य ततस्त्रिज्यामितेन कर्कटकेन कक्षाख्यमण्डलं विलिखेत्। तद्भगणाङ्कितं कृत्वा मेषादेरारभ्य ग्रहमुच्चञ्च दत्त्वा चिन्हे कार्ये। ततो भूबिन्दूच्चचिह्नयोरुपरि दीर्घा रेखा कार्या, सोच्चरेखोच्यते। अत्र तदुत्थ-मत्स्येन कक्षामण्डले केन्द्रगताऽन्या तिर्यग्रेखा च कार्या। भूबिन्दोरुपर्यन्त्यफलज्या-मुच्चोन्मुखीं दत्त्वा तदग्रे त्रिज्यामित कर्कटकेन प्रतिवृत्तं च कार्यम्। उच्चरेखया सह यत्रात्र सम्पातस्तत्र प्रतिवृत्तेऽप्युच्चं ज्ञेयम्। तस्मादुच्चभोगं विलोमं दत्त्वा तत्र प्रतिवृत्ते मेषादिर्ज्ञेयः। ततो ग्रहमनुलोमं दत्त्वा तत्र चिन्हं कार्यम्। अथ प्रतिवृत्तमध्येऽप्यन्या तिर्यग्रेखा कार्या। तिर्यग्रेखयोरन्तरमन्त्यफलज्यातुल्यमेव सर्वत्र भवति। ग्रहोच्चरेखयोर्ज्यारुपमन्तरं दोर्ज्या ग्रहप्रतिवृत्ततिर्यग्रेखयोरन्तरं कोटिज्या। ग्रहकक्षामणुलमध्यगतिर्यग्रेखयोरूर्ध्वाधरमन्तरं च स्फुटा कोटिः। प्रतिवृत्तस्थग्रहाद्भूबिन्दुगामि सूत्रं कर्णः। कर्णसुत्रस्य कक्षावृत्तस्य च यत्र सम्पात-स्तत्र स्फुटो ग्रहः। कक्षावृत्ते स्फुटमध्ययोरन्तरं फलम्। तच्च मध्यग्रहात् स्फुटेऽग्रस्थे धनं मेषादिकेन्द्रे पूर्वाकर्षणेनोत्पद्यते। एवं मध्यग्रहात् स्फुटे पृष्ठस्थे तत्फलमृणं तुलादिकेन्द्रे पश्चादाकर्षणेन भवतीति क्षेत्रप्रदर्शनेन स्फुटम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिवृत्तभङ्गिक्षेत्रप्रदर्शनम्



अथ ग्रहाणां भुजान्तरसंस्कारमाह—

अर्कबाहुफलाभ्यस्ता ग्रहभुक्तिर्विभाजिता ।
भचक्रकलिकाभिस्तु लिप्ताः कार्या ग्रहेऽर्कवत् ॥ ४६ ॥

सूर्यादिग्रहाणां भुक्तिः सूर्यस्य बाहुफलेन मन्दफलेन कलात्मकेनाभ्यस्ता गुणिता भचक्रकलिकाभिः षट्शताधिकैकविंशतिसहस्रैर्भक्ता लब्धा लिप्ता ग्रहेऽर्कवत् कार्याः । यदि रविमन्दफलं धनं तदा रवावन्येषु ग्रहेषु च ता लिप्ता धनं कार्या, अन्यथा ऋणमिति ।

अत्रोपपत्तिः । मध्यमरव्यर्धरात्रिके समयेऽहर्गणेन ग्रहाः साधिता अपेक्षितास्तु स्पष्टरव्यर्धरात्रिके । मध्यस्फुटरव्योरन्तरं रविमन्दफलकलास्ता यैरसुभिरुद्गच्छन्ति निरक्षे ते यदि राशिकलाभिरष्टादशशतमिताभिर्निरक्षोदयासवस्तदा रविमन्दफलकलाभिः किमिति लब्धा भास्वत्फलोत्था असवः । तत्र सौरे गगनभूधरषट्कचन्द्रा इत्याद्युदयासूनां त्रयाणां योगत्र्यंशसमं मध्यममानेन सर्वराश्युदयासुमानमष्टादशशतासवः कल्पिताः । ततः पूर्वानुपातेन भास्वत्फलोत्था असवो मन्दफलकलातुल्या जाताः । ततोऽहोरात्रासुभिः षट्शताधिकैकविंशतिसहस्रमितैर्ग्रहगतिर्लभ्यते तदा मन्दफलकलातुल्यासुभिः किमिति लब्धाः कला मन्दफलस्य धनर्णवशात् धनं वा ऋणं कार्याः । भास्करेणाप्युक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्यमार्कोदयात् प्राक् स्फुटार्कोदयः
स्याद्दृणे तत्फले स्वे यतोऽनन्तरम् ।
तेन भास्वत्फलोत्थासुजातं क्षयं
स्वं फलं युक्तियुक्तं निरुक्तं ग्रहे ॥ इति ॥

एवमनेन कर्मणा स्पष्टार्धरात्रिका ग्रहा जाता इति । अयं भास्वत्फलोत्थासुसमकालो रवेः सावनकालः स्वल्पान्तरात् कल्प्यस्तदा प्रमाणकालोऽपि सावनाहोरात्रासुमितः षट्शताधिकैक विंशतिसहस्रमितो ग्राह्यः । ततो "भगवता लोकानुकम्पया स्वल्पान्तरेण नाक्षत्रदिने ग्रहगतिभोगमङ्गीकृत्य चक्रकलापरिवर्त्तात्मकनाक्षत्राहोरात्रेण गतिकलास्तदा सूर्यमन्दफलकलाभ्रमणेन का" इत्यनुपातेन गूढार्थप्रकाशे रङ्गनाथेन महास्थूलत्वं प्रदर्शितम् । मन्दफलकलानामल्पत्वाद्भास्वत्फलोत्थासुष्वेव स्वल्पान्तरतः सावनकालकल्पनं युक्तमिति मदुक्तं भृशं विचारार्हम् ॥ ४६ ॥

अथ ग्रहाणां मन्दस्पष्टगतिं विवक्षुश्चन्द्रमन्दोच्चस्याधिकगतित्वाच्चन्द्रगत्यर्थं विशेषमन्येषां मन्दस्पष्टगतिसाधनं चाह—

स्वमन्दभुक्तिसंशुद्धा मध्यभुक्तिर्निशापतेः ।
दोर्ज्यान्तरादिकं कृत्वा भुक्तावृणधनं भवेत् ॥ ४७ ॥
ग्रहभुक्तेः फलं कार्यं ग्रहवन्मन्दकर्मणि ।
दोर्ज्यान्तरगुणा भुक्तिस्तत्त्वनेत्रोद्धृता पुनः ॥ ४८ ॥
स्वमन्दपरिधिक्षुण्णा भगणांशोद्धृता कलाः ।
कर्क्यादौ तु धनं तत्र मकरादावृणं[1] स्मृतम् ॥ ४९ ॥

---

१. अथ धनर्णवासना—उच्चात् तृतीयपदस्थे ग्रहे सौरमतेन कर्क्यादिकेन्द्रम्, तत्र धनफलस्योपचीयमानत्वात् श्वस्तनाधिकधनफलादद्यतनाल्पधनफलविशोधनेन शेषं धनम् । उच्चात् चतुर्थपदे ग्रहे केन्द्रं राशित्रयाल्पं (मकरादिषट्कगतत्वात्) मकरादिसञ्ज्ञं तत्र धनफलस्योपचयात् श्वस्तनाल्पधनफलादद्यतनाधिकधनफलविशोधेनेन शेषं ऋणम् । उच्चात् प्रथमपदे ग्रहे ग्रहादुच्चावध्यन्तरं 'राशिनवकाधिकत्वान्मकरादिसंज्ञं केन्द्रम् तत्र ग्रहर्णफलस्योपचयात् श्वस्तनाधिकर्णफलाद्यतनाल्पर्णफलविशोधनेन शेषं ऋणमेव । उच्चात् द्वितीयपदे ग्रहे केन्द्रस्य राशिनवकाल्पत्वाद्राशिषट्काधिकत्त्वाच्च कर्कादिसंज्ञा तत्रर्णफलस्यापचयात् श्वस्तनाल्पर्ण फलादद्यतनाधिकर्णफलविशोधनेन शेषं गतिफलं धनमेवेत्युपपन्नं सर्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निशापतेश्चन्द्रस्य मध्यगतिः स्वमन्दभुक्तिसंशुद्धा चन्द्र मन्दोच्चगत्या रहिता कार्या। शेषसमां केन्द्रगतिं गृहीत्वा वक्ष्यमाणेन विधिना दोर्ज्यान्तरादिकं कृत्वा चन्द्रगतिफलं साध्यं तद् भुक्तौ चन्द्रमध्यगतौ वक्ष्यमाणेनैव विधिना ऋणं धनं च कार्यम् । एवं चन्द्रगतिः स्फुटा भवति । कथं गतिफलं साध्यं तदर्थमाह-- ग्रहभुक्तेरिति । मन्दकर्मणि मन्दफलसाधने ग्रहवद् ग्रहभुक्तेर्ग्रहगतेः फलं कार्यम् । मन्दकर्मणि यथा ग्रहस्य मन्दफलं कृतं तद्वद्ग्रहगतेश्च फलं कार्यमित्यर्थः । अथ ग्रहमन्दफलवद् ग्रहगतिफलं साध्यते । भुक्तिश्चन्द्रस्य पूर्वसाधिता मन्दकेन्द्रगतिरन्येषां गतिरेव दोर्ज्यान्तरगुणा मन्दकेन्द्रभुजज्याकरणे यद्गतगम्यज्यान्तरं तद्दोर्ज्यान्तरं तेन गुणा तत्त्वनेत्रैः शरद्विदस्रैरुद्धृता भक्ता । लब्धिः पुनः स्वमन्दपरिधिना क्षुण्णा गुणा भगणांशैश्चक्रांशैः षष्ट्यधिकशतत्रयेण भक्ता । लब्धाः कलाः कर्क्यादौ केन्द्रे तत्र तस्यां मध्यगतौ धनं मकरादौ तु ऋणं स्मृतं कथितमाचार्यैरिति शेषः । एवं ग्रहाणां मन्दस्पष्टा गतिर्भवति ।

अत्रोपपत्तिः । अद्यतनश्वस्तनमन्दस्पष्टग्रहयोरन्तरं मन्दस्पष्टगतिरतोऽद्यतनश्वस्तनमन्दफलयोरन्तरं मन्दस्पष्टगतिफलं भवितुमर्हति । अथाद्यतनश्वस्तनमन्दकेन्द्रयोरन्तरं मन्दकेन्द्रगतिः । तथाऽनुपातो यदि तत्त्वाश्विभिः कलाभिर्मन्दकेन्द्रदोर्ज्यायां क्रियमाणायां यद्भोग्यखण्डं तल्लभ्यते तदा केन्द्रगत्या किमिति ।

लब्धमद्यतनश्वस्तनश्केन्द्रज्ययोरन्तरम् $= \frac{\text{केग} \times \text{भोखं}}{२२५}$ ततो यदि भगणांशैरिदं ज्यान्तरं तदा मन्दपरिधिभागैः किमिति । लब्धमद्यतनश्वस्तनमन्दभुजफलयोरन्तरं

$$= \frac{\text{केग} \times \text{भोखं}}{२२५} \times \frac{\text{मप}}{३६०}$$ = मन्दफलज्यान्तरसमम् । तन्मन्दफलज्ययोरल्पत्वात्—मन्दफलयोरन्तरमेवाद्यैः स्वीकृतमत उपपन्नं गतिफलानयनम् । एवनद्यतनश्वस्तनग्रहफलयोरन्तरं तद्गतेः फलं कर्क्यादिकेन्द्रे ग्रहणफलस्यापचीयमानत्वात् तुलादौ धनफलस्योपचीयमानत्वाद्धनम् । मकरादौ तु धनफलस्यापचीयमानत्वा न्मेषादावृणफलस्योपचीयमानत्वादृणमिति धनर्णोपपत्तिर्भास्करोक्तैवात्र समीचीना बोध्या।

भास्कराचार्येण तात्कालिकभोग्यखण्डं गृहीत्वा तात्कालिकं गतिफलं साधितम् । तत्प्रकारश्च—

'कोटीफलघ्नी मृदुकेन्द्रभुक्तिस्त्रिज्योद्धृता कर्किमृगादिकेन्द्रे ।
तया युतो ना ग्रहमध्यभुक्तिस्तात्कालिकी मन्दपरिस्फुटा स्यात् ॥'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र मन्दफलज्यानयन विधानेन--

$$\text{ज्याम} = \frac{\text{ज्याके}\times\text{ज्याअं}}{\text{त्रि}} \left\} \begin{array}{l} \text{ज्याम} = \text{मन्दफलज्या। ज्याके} = \text{मन्दकेन्द्रज्या।} \\ \text{ज्याअं} = \text{परममन्दफलज्या। त्रि} = \text{त्रिज्या ज्ञेया।} \end{array} \right.$$

ततस्तत्कालगत्यानयनेन (चलनकलनं द्रष्टव्यम्)

$$\frac{\text{कोज्याम}\times\text{मग}}{\text{त्रि}} = \frac{\text{ज्याअं}}{\text{त्रि}} \times \frac{\text{कोज्याके}\times\text{केग}}{\text{त्रि}}$$

$$\therefore \text{मग} = \frac{\text{ज्याअं}\times\text{कोज्याके}\times\text{केग}}{\text{त्रि}\times\text{कोज्याम}} = \frac{\text{कोफ}\times\text{केग}}{\text{कोज्याम}}$$ अतो भास्करोक्तं मन्द-गतिफलं त्रिज्यागुणं मन्दफलकोटिज्याभक्तं वास्तवं तात्कालिकमन्दगतिफलं वेद्यमतो मत्प्रकारः—

भास्करोक्तं गतिफलं त्रिज्यया गुणितं हृतम् ।
मन्दोयफलकोटिज्यामानेन भवति स्फुटम् ॥

इति बुद्धिमद्भिर्निपुणं विभाव्यमिति ॥ ४८-४९ ॥

अथ शीघ्रगतिफलमाह—

मन्दस्फुटीकृतां भुक्तिं प्रोज्झ्य शीघ्रोच्चभुक्तितः ।
तच्छेषं विवरेणाथ हन्यात् त्रिज्यान्त्यकर्णयोः ॥ ५० ॥
चलकर्णहृतं भुक्तौ कर्णे त्रिज्याधिके धनम् ।
ऋणमूनेऽधिके प्रोज्झ्य शेषं वक्रगतिर्भवेत् ॥ ५१ ॥

शीघ्रोच्चगतितः पूर्वं मन्दस्फुटीकृतां भुक्तिं मन्दस्पष्टगतिं प्रोज्झ्य हित्वा शेषं शीघ्रकेन्द्रगत्याख्यं साध्यम् । तच्छेषं त्रिज्यान्त्यकर्णयोस्त्रिज्याया अन्त्ये स्फुटक्रियायां चतुर्थे कर्मणि साधितस्य शीघ्रकर्णस्य च यो विवरोऽन्तरं तेन हन्याद्गुणयेद्गणक इति शेषः । गुणितफलं शीघ्रकर्णेन हृतं फलं कर्णे शीघ्रकर्णे त्रिज्याधिके सति भुक्तौ मन्दस्पष्टगतौ धनं तथा त्रिज्यात ऊने ऋणं कार्यं तदा स्फुटगतिर्भवेत् । ऋणात्मके फलेऽधिके तत्र मन्दस्फुटगतिमेव प्रोज्झ्य हित्वा शेषं वक्रगतिर्विपरीता गतिर्भवेदिति । गूढार्थप्रकाशे रङ्गनाथेनात्र सर्वत्र त्रिज्याशब्देन शीघ्रफलकोटिज्या गृहीता । एवं सौरभाष्ये नृसिंहेनापि त्रिज्याशब्देन शीघ्रफल-कोटिज्या गृहीता । त्रिषु राशिषु शीघ्रफलस्य विशोधनेन या ज्या सा त्रिज्येति व्युत्पत्त्या त्रिज्याशब्देनात्र फलकोटिज्या भवितुमर्हति । एवमत्र भास्करप्रकार-रूपोऽयं प्रकारः । भास्करप्रकारश्च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'फलांशखाङ्कान्तरशिञ्जिनीघ्नी द्राक्केन्द्रभुक्तिः श्रुतिहृद्विशोध्या ।
स्वशीघ्रभुक्तेः स्फुटखेटभुक्तिः शेषं च वक्रा विपरीतशुद्धौ ॥' इति ।

अनेन प्रकारेण स्फुटकेन्द्रगतिः $= \frac{\text{कोज्याफ} \times \text{शीकेग}}{\text{शीक}}$ । अस्या मध्यशीघ्र-केन्द्रगतेश्चान्तरं शीघ्रगतिफलं $= \text{शीकेग} - \frac{\text{कोज्याफ} \times \text{शीकेग}}{\text{शीक}} = \frac{\text{शीकेग} (\text{शीक} - \text{कोज्याफ})}{\text{शीक}}$ अत उपपद्यते । शीक—कोज्याफ अस्य धनत्वे शीघ्रगतिफलं धनमृणत्वे तु ऋणमिति स्पष्टमेव । बहुऋणात् विपरीतशोधनेन वक्रगतिर्भवतीति प्रसिद्धम् ।

अत्र भास्कराचार्येण स्वप्रकारतस्तात्कालिकस्फुटकेन्द्रगतिसाधनं कृतं यत् तदुपपत्तिस्तत्क्षेत्रयुक्त्या न समीचीनाऽद्यतनश्वस्तनकर्णयोर्भेदात् । अतोऽत्र मयोपपत्तिरुच्यते । द्रष्टव्यं ४५ श्लोकसम्बन्धि क्षेत्रम् । तत्र कक्षावृत्तस्थमध्य-ग्रहाच्छीघ्रकर्णोपरि कृतो लम्बः शीघ्रफलज्या भुजः । कक्षाप्रतिवृत्तस्थमध्य-ग्रहयोरूर्ध्वाधरमन्तरं शीघ्रान्त्यफलज्या कर्णः । शीघ्रकर्णसूत्रे कोटिः । एवं त्रिज्याकर्णः स्पष्टग्रहादुच्चरेखोपरिकृतो लम्बः स्फुटकेन्द्रज्या भुजः । उच्चरेखायां स्फुटकेन्द्रकोटिज्या कोटिः ।

क्षेत्रयोः साजात्यात्

$\text{ज्यास्फुके} = \frac{\text{त्रि} \times \text{ज्याशीफ}}{\text{ज्या अं}}$ अत्र अं = परमशीघ्रफलम् । तत्कालगत्या-नयनेन (द्रष्टव्यं चलनकलनम्)

$$\frac{\text{कोज्यास्फुके} \times \text{स्फुकेग}}{\text{त्रि}} = \frac{\text{त्रि}}{\text{ज्याअं}} \times \frac{\text{कोज्याशीफ} \times \text{शीफग}}{\text{त्रि}}$$

$$= \frac{\text{त्रि}}{\text{ज्याअं}} \times \frac{\text{कोज्याशीफ} \; (\text{मकेग} \backsim \text{स्फुकेग})}{\text{त्रि}}$$

छेदगमादिना

$$\frac{\text{ज्याअं कोज्या स्फुके}}{\text{त्रि}} \times \text{स्फुकेग}$$

$$= \text{मू} \times \text{स्फुकेग} = \text{कोज्याशीफ} \times \text{मकेग} \backsim \text{कोज्याशीफ} \times \text{स्फुकेग}$$

$$\text{अतः स्फुकेग} \; (\text{कोज्याशीफ} \pm \text{मू}) = \text{कोज्याशीफ} \times \text{मकेग}$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः स्फुकेग $= \frac{\text{कोज्याशीफ}\times\text{मकेग}}{\text{कोज्याशीफ}\pm\text{मू.}} = \frac{\text{कोज्याशीफ}\times\text{मकेग}}{\text{शीक}}$ अत्र मू = लघुजात्यस्य कोटिः शीघ्रफलान्त्यफलज्यावर्गान्तरमूलसमा। एतेन भास्करप्रकार उपपद्यते।

अथ क्षेत्रप्रकारेणापि भास्करप्रकारोपपत्तिः प्रदर्श्यते। तत्र प्रतिवृत्तीयमध्यग्रहस्थानात् प्रतिवृत्ते स्पर्शरेखा कार्या तत्रैवेकेरूपवेगेन स्वल्पा शीघ्रकेन्द्रगतिर्देया तत्र द्वितीयं ग्रहस्थानम्। तदुपरि भूकेन्द्रगता रेखा कार्या सा कक्षावृत्तस्थस्पष्टग्रहस्थानतः कक्षावृत्तकृतां स्पर्शरेखां यत्र छिनत्ति तस्मात् स्पष्टग्रहस्थानावधि स्पर्शरेखायामेकरूपेण स्फुटा केन्द्रगतिरिति स्थितिः। प्रतिवृत्ते म = मध्य ग्रहस्थानम्। मम' = प्रतिवृत्तस्पर्शरेखायां लघ्वी केन्द्रगतिः। इ = भूकेन्द्रम्। स्प = कक्षावृत्ते स्फुटग्रहस्थानम्। स्प = स्थानात् कृता कक्षावृत्ते स्पर्शरेखा इम' रेखायां = स्प'-विन्दौ लग्ना तदा स्पस्प' = एकरूपवेगेन स्फुटकेन्द्रगतिः। इम = शीघ्रकर्णः। तस्मिन् म'-स्थानात् कृतो माल लम्बो भुजः। इल = कोटिः। इम' = कर्णः। एवं इस्प = कोटिः। स्पस्प = भुजः। इस्प' = कर्णः। क्षेत्रद्वयं च मिथः सजातीयम्। इं = प्रतिवृत्तकेन्द्रम्। उ = उच्चस्थानम्। ∠ उइंम = शीघ्रकेन्द्रम्। ∠ उइम = स्पष्टकेन्द्रम्। ∠ इंमइ = शीघ्रफलम्। ∠ इमम' = शीघ्रफलकोटिः। ततस्त्रिकोणमित्या माल $= \frac{\text{कोज्याशीफ मम'}}{\text{त्रि}}$।

मल $= \frac{\text{ज्याशीफ}\times\text{मम'}}{\text{त्रि}}$ इल = शीक -- मल। ततोऽनुपातेन स्पस्प' $= \frac{\text{म'ल}\times\text{त्रि}}{\text{शीक}-\text{मल}}$

$$= \frac{\dfrac{\text{कोज्याशीफ}\times\text{मम'}\times\text{त्रि}}{\text{त्रि}}}{\text{शीक} - \text{मल}} = \frac{\text{कोज्याशीफ}\times\text{मम'}}{\text{शीक}-\text{मल}}$$

मम' केन्द्रगतौ यद्यागता स्फुटकेन्द्रगतिस्तदा स्वशीघ्रकेन्द्रगतौ किमिति। लब्धा स्फुटा केन्द्रगतिः $= \frac{\text{कोज्याशीफ}\times\text{केग}}{\text{शीक}-\text{मल}}$

$$= \frac{\text{कोज्याशीफ}\times\text{केग}}{\text{शीक} - \dfrac{\text{ज्याशीफ}\times\text{मम'}}{\text{त्रि}}}$$ अत्र यदि मम = ० तदा मस्थानीयतत्कालगतिवशेन

तात्कालिकी स्फुष्टकेन्द्रगतिः $= \frac{\text{कोज्याशीफ}\times\text{केग}}{\text{शीक}}$। एवं नीचोच्चवृत्तभङ्ग्याऽपि भास्करप्रकार उपपद्यत इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र क्षेत्रदर्शनम्



अत्र सौरवासनायां कमलाकरः--"मन्दस्पष्टग्रहोनं शीघ्रोच्चं शीघ्रकेन्द्रमिति यन्मन्दस्पष्टगत्यूनशीघ्रोच्चगतिः शीघ्रकेन्द्रगतिरस्ति। शीघ्रोच्चनीचतुल्ये ग्रहे ग्रहशीघ्रफलं शून्यम्। शीघ्रकेन्द्रमपि शून्यं षड्राशितुल्यं वा। तत्र श्वस्तन शीघ्रकेन्द्रं तु अद्यतनकेन्द्रकेन्द्रगतियोगतुल्यम्। केन्द्रोत्थफलयोरन्तरं गतिफलम्। तत्तु शीघ्रकेन्द्रगत्युत्थफलतुल्यम्। परमं चोच्चस्थाने। यतस्ततः फलान्तरापचयात् कक्षावृत्तप्रतिवृत्तसम्पाते फलान्तराभावो नियतः। गतिफलपरमत्वे त्रिज्याकर्णान्तरमपि परममन्त्यफलज्यातुल्यम्। तदभावे तदभाव इति स्थितौ केन्द्रगत्युत्थं फलमेव। केन्द्रगतिरन्त्यफलज्यागुणा त्रिज्याभक्ता तद्दोः-फलं स्यात्। परिधिभांशगुणहरयोस्तद्व्यासार्धत्वेन फलतुल्यत्वदर्शनात्। पुनरनुपातः। कर्णाग्रे इदं तदा त्रिज्याग्रे किमिति। त्रिज्ययोर्नाशे केन्द्रगतिरन्त्यफलज्यागुणा कर्णभक्ता सिद्धा। इदं गतेः शीघ्रफलं परमम्। पुनरनुपातः। अन्त्यफलज्यातुल्येन शीघ्रकर्णत्रिज्यान्तरेणेदं तदेष्टात्रिज्याकर्णान्तरेण किमिति। अन्त्यफलज्ययोर्नाशे शीघ्रकेन्द्रगतिस्त्रिज्यान्तरगुणा शीघ्रकर्णभक्ता लब्धं गतिशीघ्रफलं स्यात्। तत् त्रिज्यातः कर्णस्याधिकत्वे धनं न्यूनत्वे ऋणं स्वमन्दस्पष्टगतौ कार्यं स्पष्टा गतिः स्यात्। चेन्न शुध्यति तदा विपरीतशोधनादृणगतिर्वक्रगतिः स्यात्। शीघ्रोच्चस्थाने शीघ्रफलाभावः। ततः शीघ्रकेन्द्रमार्गेण कक्षावृत्तप्रतिवृत्तैक्यावधि शीघ्रफलान्तरं धनम्। ततो नीचं यावदृणम्। ततः पुनस्तद्वृत्तैक्यं यावदृणम्। तत उच्चं यावद्धनमिति। आद्यन्तयोर्धनं द्वितीयतृतीययोस्तदृणमिति। त्रिज्यातः कर्णेऽधिकोने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धनर्णत्वमुक्तं सङ्गच्छते। भास्कराचार्यैस्तु कक्षामध्यगतिर्यग्रेखाप्रतिवृत्तसम्पाते शीघ्रगतिफलभाव उक्तः सोऽसन् वासनाविरोधात्। स यथा—अद्यतनश्वस्तनशीघ्रफलयोरन्तरमद्यतनजं मन्दस्पष्टगतेः शीघ्रफलम्। कथमन्यथा तत्फलसंस्कृतयोः स्पष्टयोरन्तरं स्पष्टा गतिः स्यात्। तेन तत्सम्पातस्थे बिम्बे तत्रस्थफलं तु परमम्। अग्रिमदिनजं तु तदल्पमिति तदन्तरं गतिफलमायाति कथं तदभावः उक्तः सङ्गच्छते। अथ तत्सम्पाततः पूर्वं परत एकदिनान्तरेण यत्र फलसाम्यं स्यात् तत्पूर्वस्थले गतिफलाभाव उचितः। स तु तदासन्ने कक्षावृत्तप्रतिवृत्तैक्यदेशे भगवता सम्यगुक्तः। अतो मरीचौ सार्वभौमेऽप्युक्तं तदसत्। तत्पित्रा तु गूढार्थप्रकाशे सौरगतिफलव्याख्यायां त्रिज्याशब्देन फलकोटिज्या तत्कर्णान्तरं तु परमान्त्यफलज्येति सौरगतिफलं भास्करानुसारं व्याख्यातं तदप्यसत्" इत्याह तत्तु तात्कालिकगत्यज्ञानत एव। यदि सौरं गतिफलं न तात्कालिकवेगत इति कल्प्यते तदा कमलाकरव्याख्यानं साधु भवितुमर्हति। अथ दिनान्तरस्पष्टखगान्तरं कदा मन्दस्पष्टगतितुल्यमर्थाद्विलक्षणवेगेनैकदिनान्तरेण कदा गतिफलाभाव इत्यत्र विचारः क्रियते।



(द्रष्टव्यं क्षेत्रम्) अत्र भूअ = कक्षामध्यगतिर्यग्रेखा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

∠अभूस्प - ∠अभूस्पं = मन्दस्पष्टकेन्द्रगत्यर्धकलाः ।

स्प = अद्यतनस्फुटग्रहः । स्पं = श्वस्तनस्फुटग्रहः ।

मवि = अद्यतनमध्यग्रहः प्रतिवृत्ते ।

मग्र = अद्यतनमध्यग्रहः कक्षावृत्ते ।

मंवि = श्वस्तनमध्यग्रहः प्रतिवृत्ते ।

मंग्र = श्वस्तनमध्यग्रहः कक्षावृत्ते ।

$\angle$ उंभूस्प = अद्यतनस्पष्टकेन्द्रम् = $९० - \frac{\text{शीकेग}}{२}$ ।

$\angle$ उंभूस्पं = श्वस्तनस्पष्टकेन्द्रम् = $९० + \frac{\text{शीकेग}}{२}$ ।

अथ यद्यन्तफलज्या = ज्याअं । तदा पूर्वप्रतिपादितप्रकारेण प्रथमशीघ्रफलज्या = $\frac{\text{ज्याप्रस्पके ज्याअं}}{\text{त्रि}} = \frac{\text{ज्याअं}}{\text{त्रि}}$ ज्या $\left(९० - \frac{\text{शीकेग}}{२}\right)$

$= \frac{\text{ज्याअं}}{\text{त्रि}}$ कोज्या $\frac{\text{शीकेग}}{२}$ एवं द्वितीयशीघ्रफलज्या

$= \frac{\text{ज्याअं}}{\text{त्रि}}$ ज्या $\left(९० + \frac{\text{शीकेग}}{२}\right) = \frac{\text{ज्याअं}}{\text{त्रि}}$ कोज्या $\frac{\text{शीकेग}}{२}$

शीघ्रफलस्य नवत्यल्पत्वात् शीघ्रफलज्ययोः साम्याच्चात्र सिद्धे अद्यतन श्वस्तनशीघ्रफले समाने । तदा कक्षावृत्ते स्प मग्र चापम् = स्पं मं ग्रचापम् । तयोर्मध्ये स्पं मग्र चापस्य विशोधनेन स्प स्पं चापम् = मग्र मंग्र चापम् । अतस्तदा दिनान्तरे स्फुटकेन्द्रगतिर्मध्यशीघ्रकेन्द्रगतिसमा ।

अथ कक्षावृत्ते योअ चापमन्त्यफलज्याऽर्धचापसमम् । तेन मध्यकेन्द्रगत्यर्धज्या द्विगुणा यदि शीघ्रान्त्यफलज्यातुल्या भवेत्तदा दिनान्तरस्पष्टखगान्तरसमा ग्रहगतिर्वृतद्वययोगगे ग्रहे मन्दस्पष्टगतिसमा भविष्यतीति गोलगणितविद्भिर्निपुणं विलोक्यमिति ।

अथा खार्कमिते व्यासार्धे भौमादीनां स्वल्पान्तरतः स्थिरा शीघ्रफलन्त्यलफज्या । भौ = $\frac{२३५}{३}$ = ७८ । बु = $\frac{१३२}{३}$ = ४४ ।

बृ $\frac{७०}{३}$ = २३ । शु = $\frac{२६२}{३}$ = ८७ । श $\frac{३९}{३}$ = १३ । आसामर्धानां स्वल्पान्तराच्चापानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भौ = १९°। बु = ११°। बृ = ६°। २१°। श = ३°। ग्रहाणां मध्यमशीघ्रकेन्द्रगत्यर्धमेकांशतो न्यूनम्। केवलं बुधस्य सार्धैकांशासन्नम्। अतो वृत्तद्वययोगापेक्षया कक्षावृत्तमध्यगततिर्यग्रेखाप्रतिवृत्तसम्पातासन्नएव ग्रहाणां दिनान्तरस्पष्टखगान्तररूपा गतिरपि मध्यगतिसमा भवतीति निश्चितम्। अतः 'स तु तदासन्ने कक्षावृत्तप्रतिवृत्तैक्यदेशे भगवता सम्यगुक्तम्' इत्यादि कमलाकर कथनं युक्तिशून्यमेव। एवं "मध्यैव गतिः स्पष्टा वृत्तद्वययोगगे द्युचरे" इति लल्लोक्तं चासङ्गतमित्यलं पल्लवितेन ॥ ५०-५१ ॥

इदानीं ग्रहाणां वक्रत्वे हेतुमाह।

दूरस्थितः स्वशीघ्रोच्चाद्ग्रहः शिथिलरश्मिभिः।
सव्येतराकृष्टतनुर्भवेद् वक्रगतिस्तदा ॥ ५२ ॥

स्वशीघ्रोच्चाद्यदा ग्रहो दूरस्थितस्त्रिभाधिकान्तरितो नीचोन्मुखस्तदा शीघ्रोच्चदैवतैः शिथिलरश्मिभिः स ग्रहः सव्येतराकृष्टतनुर्भवति। सव्येतरो वामभागः। तस्मिन् वामभागे आकृष्टा तनुर्यस्य सः। तदा वक्रो भवेदित्याकर्षणवशाद्गतिषु भेदो भवतीति स्पष्टाधिकारारम्भ एव "अदृश्यरूपाः कालस्य मूर्त्तय इत्यादिनाऽऽचार्यैरुक्तमिति स्फुटम् ॥ ५२ ॥

इदानीं वक्रारम्भे वक्रत्यागे च ग्रहाणां शीघ्रकेन्द्रांशानाह।

कृतर्त्तुचन्द्रैर्वेदेन्द्रैः शून्यत्र्येकैर्गुणाष्टिभिः।
शररुद्रैश्चतुर्थेषु केन्द्रांशैर्भूसुतादयः ॥ ५३ ॥
भवन्ति वक्रिणस्तैस्तु स्वैः स्वैश्चक्राद्विशोधितैः।
अवशिष्टांशतुल्यैः स्वैः केन्द्रैरुज्झन्ति वक्रताम् ॥ ५४ ॥

चतुर्थेषु 'शैघ्रच' मान्दं पुनर्मान्दं शैघ्रच' चत्वार्यनुक्रमात्' इति पूर्वोक्ते चतुर्थकर्मणि उत्पन्ना ये केन्द्रांशास्तैः (अत्र ग्रहाणामभिप्रायेण बहुवचनप्रयोगः।) कृतर्त्तुचन्द्रैः। वेदेन्द्रैः। शून्यत्र्येकैः गुणाष्टिभिः। शररुद्रैः। भूसुतादयो भौमादयो वक्रिणो भवन्ति। तैः स्वैः स्वैः पठितैः केन्द्रैश्चक्राद्विशोधितैरवशिष्टांशसमैः स्वैः केन्द्रैस्ते भूमिसुतादयो ग्रहा वक्रतामुज्झन्ति त्यजन्तीत्यर्थः।

भौमादीनां वक्रकेन्द्रांशाः १६४।१४४।१३०।१६३।११५।
मार्गकेन्द्रांशाः १९६।२१६।२३०।१९७।२४५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः। अत्र ग्रहाणां मन्दस्पष्टगतिः स्वल्पान्तरान्मध्यगतिसमा = म कल्प्यते, शीघ्रान्त्य फलज्या = अं। त्रिज्या = त्रि।

उच्चगतिः = उ ग। द्वितीये पदे वक्रारम्भत्वात् केन्द्रकोटिज्या = या। के ग = केन्द्रगतिः। ग्रहमध्यमगति = म ग।

शीघ्रकर्णः = शीक = $\sqrt{\text{त्रि}^2 + \text{अं}^2 - 2\ \text{अं} \times \text{या}}$ ततो वक्रारम्भे शीघ्रगतिफलस्य मध्यमगतिसमानत्वात्। मन्दस्फुटीकृतामित्यादि पूर्वोदितप्रकारेण। शीफ = मग = $\frac{\text{केग}\ (\text{त्रि} - \text{शीक})}{\text{शीक}}$। छेदमसमशोधनादिना केग × त्रि = मग × शीक + के ग × शीक = उ ग × शीक।

वर्गेण, $\text{केग}^2 \times \text{त्रि}^2 = \text{उग} \times {}^2\ \text{शीक}^2$

$= \text{उग}^2 \times \text{त्रि}^2 + \text{उग}^2 \times \text{अं}^2 - 2\ \text{अं}\ \text{उग}^2 \times \text{या}$

$2\ \text{अं} \times \text{उग}^2 \times \text{या} = \text{त्रि}^2\ (\text{उग}^2 - \text{केग}^2) + \text{उग}^2 \times \text{अं}^2$

$= \text{उग}^2\ (\text{त्रि} + \text{अं}^2) - \text{त्रि}^2 \times \text{केग}^2$

$\therefore\ \text{या} = \frac{\text{उग}^2\ (\text{त्रि}^2 + \text{अं}^2) - \text{त्रि}^2 \times \text{केग}^2}{2\ \text{अं} \times \text{उग}^2}$ अस्य चापं द्वितीयपदस्थत्वान्नवतियुतं वक्रारम्भे केन्द्रांशमानं भवति। यथा स्वल्पान्तरतो यदि खार्कमितव्यासार्धे भौमस्य शीघ्रान्त्यफलज्या = अं = ७८। मग = ३१। उग = ५९। केग = २८। तदा, त्रि² = १४४००

अं² = ६०८४

त्रि² + अं² = २०४८४

उग² = ३४८१

२०४८४
१६३८७२
८१९३६
६१४५२

उ ग²(त्रि² + अं²) = ७१३०४८०४

उ ग² (त्रि² + अं²) – त्रि² × केग² = ६००१५२०४

त्रि² = १४४००
केग² = ७८४

५७६
११५२
१००८

त्रि² × केग² – ११२७९६००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$$\text{उग}^2 = ३४८१$$

$$२\,\text{अं.} = १५६$$

२०८८६
१७४०५
३४८१

$$२\,\text{अं}\,\text{उग}^2 = ५४३०३६$$

$$\text{अतः}\ \frac{\text{उग}^2\,(\text{त्रि}+\text{अं}^2) - \text{त्रि}^2\ \text{केग}^2}{२\text{अं} \times \text{उग}^2} = \frac{६००१५२०४}{५४३०३६} = १११$$

स्वल्पान्तरतः। एतच्चापं ६८ नवतियुतम् १५८ एते वक्रारम्भे केन्द्रांशा आयान्ति ते च पाठपठितेभ्यो महान्तरिताः। यदि तु 'फलांशखाङ्कान्तरशिञ्जीनीघ्नी' इत्यादिभास्करप्रकारवैपरीत्येनानीयन्ते ते च १६४° समा आयन्ति। अतो मन्दस्फुटीकृतां भुक्तिमित्यत्र "त्रिज्याशब्देन शीघ्रफलकोटिज्या ग्राह्या" इति नृसिहरङ्गनाथयोर्व्याख्या समीचीना सौरसंमता कमलाकरेण व्यर्थमेव दुराग्रहतः खण्डिता।

स्फुटकेन्द्रगतिसाधनतो वैपरीत्येन कथं वक्रकेन्द्रांशा आनीयन्ते एतदर्थं मदीयग्रहलाघवटीकायाः ११३ पृष्ठं सम्यग् विलोक्यम्। अन्त्यफलज्याभेदेन सौरब्राह्मोक्त केन्द्रांशेषु किञ्चिदन्तरमस्तीति तद्विदामतिरोहितम्। ब्राह्मकेन्द्रांशा भास्करेण सिद्धान्तशिरोमणौ पठिताः। तद्यथा—

दाक्केन्द्रभागैस्त्रिनृपैः १६३ शरेन्द्रै—१४५।
स्तत्त्वेन्दुभिः १२५ पञ्चनृपै—१६५ स्त्रिरुद्रैः ११३।
स्याद्वक्रता भूमिसुतादिकाना—
मवक्रता तद्रहितैश्च भांशैः'॥
मार्गभागाः १९७।२१५।२३५।१९५।२४७।
ब्राह्मस्फुटे ब्रह्मगुप्तोऽपि
अन्त्याष्टिभिरिषुमनुभिः शरसूर्यैरिषुरसेन्दुभिस्त्रिभवैः।
शीघ्रान्त्यकेन्द्रभागैर्भौमादीनां भवति वक्रम्'॥ इति।

अत्रैव भास्करादिभिरुदयास्तकेन्द्रांशाश्च पठिताः। तदुपपत्त्यर्थं मदीयग्रहलाघवटीकायाः ११५–११६ पृष्ठे विलोक्ये किमत्र लेखप्रयासेन॥ ५३-५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ मार्गारम्भकेन्द्रांशेषु हेतुमाह—

महत्त्वाच्छीघ्रचपरिधेः सप्तमे भृगुभूसुतौ ।
अष्टमे जीवशशिजौ नवमे तु शनैश्चरः ॥ ५५ ॥

पूर्वपठितमार्गारम्भकेन्द्रांशेभ्य इति सिध्यति यत् केन्द्रस्य सप्तमे राशौ शुक्रकुजौ वक्रत्वं त्यजतः । बृहस्पतिबुधौ अष्टमे राशौ वक्रत्वं त्यजतः । शनैश्चरस्तु नवमे राशौ वक्रत्वं त्यजति । कस्मात् शीघ्रपरिधेर्महत्त्वात् । यथा यथा शीघ्रपरिधिमानमधिकं तथा तथोच्चदैवतैरल्पं वामहस्तेनाकृष्यतेऽतः शीघ्रमेव तथा तथा वक्रत्यागः । यथा शुक्रस्य सर्वेभ्योऽधिकः परिधिरतोऽल्पैः केन्द्रांशैर्वक्रत्यागस्ततोऽधिककेन्द्रांशैस्ततः परिधेरल्पत्वाद्भौमस्य वक्रत्यागः ।

एवं शीघ्रपरिधेरल्पक्रमेण वक्रत्यागकेन्द्रांशा उत्तरोत्तरमधिकाः सन्ति । परिध्यल्पक्रमेण सौरे पाठः पठितः । शुक्रस्य परिधेरधिकत्वात् प्रथमं ततोऽल्पपरिधित्वाद्भौमस्य पाठः समुचितः, परन्तु ततोऽल्पपरिधित्वात् प्रथमं बुधस्य पाठो न कृतोऽतः 'अष्टमे शशिजेज्यौ च' इति केचन पाठं वदन्ति । मन्मते पाठक्रमादर्थक्रमो बलीयानिति नियमेन 'जीवशशिजौ' पाठे न काचिद्धानिरिति ॥ ५५ ॥

इदानीं स्पष्टक्रान्तिसाधनार्थं चन्द्रादीनां विक्षेपानयनं ततः स्फुटक्रान्तिसाधनं चाह—

कुजार्किगुरुपातानां ग्रहवच्छीघ्रजं फलम् ।
वामं तृतीयकं मान्दं बुधभार्गवयोः फलम् ॥ ५६ ॥

स्वपातोनाद् ग्रहाज्जीवा शीघ्राद् भृगुजसौम्ययोः ।
विक्षेपघ्न्यन्त्यकर्णाप्ता विक्षेपस्त्रिज्यया विधोः ॥ ५७ ॥

विक्षेपापक्रमैकत्वे क्रान्तिर्विक्षेपसंयुता ।
दिग्भेदे वियुता स्पष्टा भास्करस्य यथाऽऽगता ॥ ५८ ॥

भौमशनिबृहस्पतिपातानामहर्गणादागतानां मध्ये शीघ्रजं फलं चतुर्थकर्मणि उत्पन्नं शीघ्रफलं ग्रहवद्देयम् । ग्रहे धनं तदा तत्पातेऽपि धनं ग्रहे ऋणं तदा तत्पातेऽपि ऋणं कार्यमित्यर्थः । एवं शरसाधनोपयोगी तत्पातो भवति । बुधशुक्रयोस्तृतीयकं मान्दं फलं तृतीयकर्मण्यागतं मन्दफलं तयोः पातयोर्वामं विपरीतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देयम् । मन्दफलं धनं तदा पाते ऋणमृणं तदा पाते धनमित्यर्थः। एवं विक्षेपसाधनोपयोगिनौ तयोः पातौ भवतः। चन्द्रस्यानुक्तत्वाद्गणितागत एव पातो ग्राह्यः। स्वपातोनात् पूर्वविधिना संस्कृतपातेनोनाद् ग्रहात् स्पष्टग्रहाज्जीवा साध्या। एवं भौमशनिबृहस्पतीनां शरसाधनार्थं जीवा। शुक्रबुधयोस्तु पूर्वविधिना संस्कृतपातेनोनात् शीघ्राच्छीघ्रोच्चाज्जीवा साध्येति। सा जीवा मध्यमाधिकारे पठितेन विक्षेपेण परमशरेण निघ्नी अन्त्यकर्णेन अन्त्यकर्मणि चतुर्थकर्मण्युत्पन्नेन शीघ्रकर्णेन आप्ता लब्धो विक्षेपः शरकला भवति। चन्द्रस्य शीघ्रकर्णाभावात् तत्स्थाने त्रिज्या ग्राह्या तया त्रिज्यया भाज्या तदा तच्छरकला। तत "उत्तराभिमुखं पातो विक्षिपत्यपरार्धगः" इत्यादिविधिना शरदिग् ज्ञेया। अथ विक्षेपापक्रमयोरेकत्वे एकदिक्त्वे ग्रहक्रान्तिर्विक्षेपसंयुता कार्या दिग्भेदे च वियुता तदा संस्कारदिक्का ग्रहाणां स्पष्टा क्रान्तिर्भवति। भास्करस्य सूर्यस्य "तद्गुणा ज्या त्रिजीवाप्ता तच्चापं क्रान्तिरुच्यते" इति विधिना यथाऽऽगता तथैव बोध्या तच्छराभावादित्यर्थः।

अत्रोपपत्तिः। ग्रहगोले क्रान्तिमण्डलविमण्डलसम्पातः पातस्तत्स्थे ग्रहे शराभावः। तद्वृत्तयोरन्तरस्यैव शरत्वेनोक्तेः। सम्पातात् तद्वृत्तयोस्त्रिभेऽन्तरे परमशरमितमन्तरम्। तत्र पातो मेषाद्विलोमं मन्दस्पष्टश्चानुलोमं भ्रमति अतस्तदन्तरं तयोर्योगाद्भवति परमत्र पातश्चक्राद्विशोधितः कृतोऽतः पातोनो मन्दस्पष्ट एवात्र सपातमन्दस्पष्टः पातस्थानान्मन्दस्पष्टपर्यन्तमन्तरं तदेव शरसाधनार्थं विक्षेपकेन्द्रमुच्यते। अथ मन्दस्पष्टो विपरीतशीघ्रफलसंस्कृतस्फुटग्रहतुल्यः। स च पातोनो विक्षेपकेन्द्रम्। तत्राचार्येण पाते यथागतं शीघ्रफलमेव संस्कृत्य संस्कृतपातः स्पष्टग्रहादूनितः स च पातमन्दस्पष्टयोगसम उत्पद्यते। बुधशुक्रयोर्ये पातभगणा मध्यमाधिकारे पठितास्ते तयोः शीघ्रकेन्द्रभगणैरधिकास्तदा वास्तवाः पातभगणाः सन्ति, तत्र लाघवार्थमल्पाः पठिताः सन्ति इति प्राचीनानामुक्तिः। तथा च भास्कराचार्यः—

ये चात्र पातभगणाः पठिता ज्ञभृग्वो-
स्ते शीघ्रकेन्द्रभगणैरधिका यतः स्युः।
स्वल्पाः सुखार्थमुदिताश्चलकेन्द्रयुक्तौ
पातौ तयोः पठितचक्रभवौ विधेयौ॥
चलाद्विशोध्यः किल केन्द्रसिद्ध्यै
केन्द्रे सपाते द्युचरस्तु योज्यः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतश्चलात् पातयुनाज्ज्ञभृग्वोः
सुधीभिराद्यः शरसिद्धिरुक्ता ॥ इति ।

अत्र चक्राद्विशोधितः पातोऽतोऽत्र विपातग्रहो भास्करोदितसपातद्युचरसम इति प्रसिद्धम् । अतः सौरपातः = सौपा । यदि कल्प्येत तदा भास्करपातः = भापा = १२ – सौपा । अत्र बुधशुक्रशीघ्रकेन्द्रं मध्यं योजितं जातो वास्तवः पातः = १२ – सौपा + मशीके । अथ मध्यशीघ्रकेन्द्रं च मध्यग्रहोनमुच्चम् । मध्यग्रहस्तु विपरीतमन्दफलसंस्कृतमन्दस्पष्टतुल्यः । अतो यदि मन्दफलं धनं कल्प्यते तदा मध्यग्रह = मन्दस्प – मंफ ततो मध्यकेन्द्रम् = शीउ – मन्दस्प + मंफ । ततो बुधशुक्रयोर्वास्तवः पातः = १२ – सौपा + मशीके = १२ – सौपा + शीउ – मन्दस्प + मंफ अत्र मन्दस्पष्टग्रहयोजनेन विक्षेपकेन्द्रम् ।

= १२ – सौपा + शीउ – मन्दस्प + मन्दफ + मन्दस्प ।

= १२ + शीउ – (सौपा – मंफ) भगणानां प्रयोजनाभावाज्ज्ययोस्तुल्यत्वाच्च द्वादशराशीनपहाय जातं विक्षेपकेन्द्रम् = शीउ – (सौपा – मंफ) एतेन बुधशुक्रयोर्विक्षेपकेन्द्रमुपपद्यते । तथा वासनायां भास्करः "किञ्च मन्दस्फुटोनं शीघ्रोच्चं प्रतिमण्डले केन्द्रम् । तत् पाते क्षेप्तुं युज्यते । एवंकृते सति विक्षेपकेन्द्रं मन्दफलेनान्तरितं स्यात् । ग्रहच्छायाधिकारे सितज्ञपातौ स्फुटौ स्तश्चलकेन्द्रयुक्तावित्यत्र मन्दस्फुटोनं शीघ्रोच्चं शीघ्रकेन्द्रं पाते क्षिप्तम् । अतस्तत्र मन्दफलान्तरमङ्गीकृतमित्यर्थः । इतरकेन्द्रस्यानुपपत्तेः । अतो मन्दफलं पातेऽव्यस्तं देयम् । "यतोऽनुपातसिद्धं चलकेन्द्रं मध्यग्रहोनशीघ्रोच्चतुल्यं भवति" इति । अत्र स्वपातवशातः "पातेऽव्यस्तं देयम्" इत्युक्तं भास्करेण । सौरपाते तु व्यस्तं देयमिति सिध्यति पातस्य चक्राद्विशोधनादिति ।

नव्यास्तु सर्वे ग्रहाः सूर्यपरितो भ्रमन्ति । तत्र प्राचीनोक्तबुधशुक्रशीघ्रोच्चकक्षे एव वस्तुतो बुधशुक्रकक्षे इति वदन्ति । अतो वस्तुतो विक्षेपकेन्द्रं शीघ्रोच्चपातयोरन्तरतस्तयोः सिध्यति—इति । एवं सर्वेषां ग्रहाणां विक्षेपकेन्द्रं पातमन्दस्पष्टग्रहान्तरतः सिध्यति । वस्तुतो वेधादिना सूर्यकेन्द्राद्ग्रहाणां बिम्बान्तरसूत्रज्ञानेन ग्रहाः सूर्यपरितो भ्रमन्तीति सिध्यति । वेधप्रकारन्तु यन्त्राधिकारे वक्ष्ये । एवं ग्रहगोले पातमन्दस्पष्टान्तरं स्वल्पान्तराद्विमण्डले भवति प्राचीनानां गणितेन क्रान्तिमण्डले ग्रहस्थानस्यैव ज्ञानात् । कमलाकरेण सिद्धान्ततत्त्वविवेके ग्रहाः स्फुटा विमण्डले गणितेनाऽऽयान्ति—इति भ्रमादुक्तमिति ग्रहविदां स्फुटम् । अथ ग्रहगोले सम्पाताद्विमण्डले ग्रहावधि विक्षेपकेन्द्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्णः। ग्रहकदम्बप्रोते शरो भुजः। शरमूलात्सम्पातावधि क्रान्तिवृत्ते कोटिः। इति चापजात्ये क्रान्तिविमण्डल सम्पातोत्पन्नकोणः परमशरः पाठ-पठितः।

अतोऽनुपातेन ग्रहगोले शरज्याचापयोः स्वल्पान्तरात् साम्ये शरः $\frac{\text{पश} \times \text{ज्याविके}}{\text{त्रि}}$ ।

ततः शीघ्रकर्णाग्रेयं तदा त्रिज्याग्रे कियानिति। भगोले जातः कदम्बप्रोते स्पष्ट

$$\text{शरः} = \frac{\text{पश} \times \text{ज्याविके} \times \text{त्रि}}{\text{त्रि} \times \text{शीक}} = \frac{\text{पश} \times \text{ज्याविके}}{\text{शीक}}$$ अत उपपन्नं शरानयनम्।

चन्द्रशरार्थं कर्णस्थाने त्रिज्या ग्राह्या। अत्र स्थानीयविम्बीयशीघ्रकर्णयोरभेदं मत्वा प्राचीनैः शरानयनं कृतमिति ध्येयम्। बिम्बीयशीघ्रकर्णाद्यानयने "शीघ्रकर्णेन भक्तास्त्रिभज्यागुणाः।" इत्यादिप्रकारे मदीयो विशेषो विचिन्त्यः किमत्र ग्रन्थगौरवेण। एवं भगोले ग्रहाणां कदम्बप्रोते शरो जातः स्थानीय-क्रान्तिश्च ध्रुवप्रोतेऽतो ध्रुवप्रोतीयशरेश संस्कृता स्थानीयक्रान्तिः स्फुटा क्रान्तिर्भवितुमर्हति।



अत्र संस्प = नाडीवृत्ते ग्र ग्रहस्य स्पष्टविषुवांशाः। सं स्था क्रान्तिवृत्ते ग्रहस्य स्थानीय भुजांशाः = स्था। अयन प्रोतवृत्ते कध्रु = परम-क्रान्त्यंशाः = प। कग्र = कदम्बप्रोते ग्रहशर कोटिः। ग्रध्रु = विम्बीय ध्रुवप्रोते स्पष्ट क्रान्ति कोटिः। कग्रध्रु चापत्रिभुजे <ग्रकध्रु = स्थानग्रहकोटिः = ग्रको। ततः ग्रध्रुकत्रिभुजे चापीयत्रिकोणमित्या त्रिज्याव्यासार्धे यदि स्पग्र = स्पक्रां। तदा

$$\frac{\text{त्रि} \times {}^{2}\text{ज्यास्पक्रा} - \text{कोज्याप} \times \text{ज्याश} \times \text{त्रि}}{\text{ज्याप} \times \text{कोज्याश}} = \text{ज्याग्रभु}$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$$\text{ज्यास्प क्रा} = \frac{\frac{\text{ज्याभु} \times \text{ज्याप} \times \text{कोज्याश}}{\text{त्रि}} + \text{कोज्याप} \times \text{ज्याश}}{\text{त्रि}}$$

$$= \frac{\text{ज्यास्थाक्रा} \times \text{कोज्याश} + \text{कोज्याप} \times \text{ज्याश}}{\text{त्रि}}$$

यदि स्थानीया क्रान्तिर्दक्षिणा तथा शरश्च दक्षिणस्तदा तन्मानमृणं ज्ञैर्यमिति अनेन—

ग्रहस्यास्फुटक्रान्तिजीवेषुकोटि-
ज्यकाध्नी त्रिभज्योद्धृताऽथो शरज्या ।
त्रिभद्युज्यकाध्नी त्रिभज्याविभक्ता
तयोः संस्कृतेः स्यात् स्फुटक्रान्तिजीवा ॥

इति संशोधकोक्तमुपपद्यते । अयमेव प्रकारश्चापजात्येन कमलाकरोक्तानयनेनाप्युपपद्यते ।

अत्र स्वल्पान्तरात् कदम्बप्रोतीयशरमेव ध्रुवप्रोतीयं शरमङ्गीकृत्य स्फुटा क्रान्तिः साधिता । त्रिज्यावर्गादयनवलनज्याकृतिमित्यादिस्पष्टशरानयने भास्करेण स्वसिद्धान्तशिरोमणाविह तद्वासनायां शरविषये सर्वमुक्तमपि तत्प्रकारेण स्थानीयविम्बीयाहोरात्रान्तर्गतं ध्रुवप्रोतीयचापं क्रान्तिसंस्कारयोग्यं तदानीतस्फुटशरसमं नायातीति चापक्षेत्रकुशलैर्निपुणं विभावनीयम् । कमलाकरखण्डनं चात्र तत्त्वविवेके साधु विचिन्त्यमिति । क्रान्तिशरयोर्दिगैक्ये युतिर्दिग्भेदेऽन्तरमिति संस्कारे वासना सर्वत्र प्रसिद्धेति ॥ ५६-५८ ॥

इदानीं ग्रहाणां स्फुटसावनदिनमाह—

ग्रहोदयप्राणहता खखाष्टैकोद्धृता गतिः ।
चक्रासवो लब्धयुता स्वाहोरात्रासवः स्मृताः ॥ ५९ ॥

अत्र ग्रहशब्देन सायनो ग्रहो ग्राह्यो 'युक्तायनांशादपमः प्रसाध्यः' इत्यादि भास्कराद्युक्तेः । सायनग्रहो यस्मिन् राशौ भवेत्तदुदयासुभिर्ग्रहगतिर्हता खखाष्टैकमिताभी राशिकलाभिरुद्धृता । लब्धैरसुभिर्युताश्चक्रासवः स्वाहोरात्रासवः स्वस्फुटसावनेदिनाक्षत्रासवः स्मृता आद्यैरिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः। यदा किमपि नक्षत्रं ग्रहश्च किल समकालमुदितः। तस्मात् कालादनन्तरं नाक्षत्रीणां घटीनां षष्टया तन्नक्षत्रं पुनरुदेति। ततोऽनन्तरं ग्रह उदेति। स च कियता कालेन। तदर्थमनुपातः। ग्रहः किल क्रान्तिवृत्ते स्फुटगत्या पूर्वतो गतः। यद्यष्टादशशतानि राशिकलाः स्वोदयासुभिरुद्गच्छन्ति तदा स्फुटगतिकलाः कियद्भिरिति। एवं लब्धासुभिर्भोदयानन्तरं ग्रहोदयः। एवमत्र ग्रहसावनान्तर्गता गतिरपेक्षिता साधिता तु रविसावनान्तर्गता। अतो द्वयोः सावनयोः स्वल्पान्तरादेकामेव गतिमङ्गीकृत्यात्र सावनासवः साधिताः। रविसावनान्तर्गतग्रहगतितस्तु लब्धासवो रविसावनान्तर्गतासुषु योज्यास्तदा ग्रहाहोरात्रासवो भवन्तीति गोलविदां स्फुटम्। अत्रोदयानां स्थूलत्वादनुपातासवः स्थूला भवन्तीति सर्वं चापक्षेत्रविदां स्फुटम्। अत्र सौरवासनायां कमलाकरः — 'कृतायनांशग्रहस्य राश्यादिकस्य ये उदयप्राणास्तैर्गुणिता स्वस्वसावनान्तर्गता ग्रहगतिः खखाष्टैकोद्धृता कार्या लब्धं चक्रासु २१६०० युक्तं स्वस्वसावनाहोरात्रासव इति' सौरसाधितगतितो भिन्नां ग्रहगतिं गृहीतवानतो न तद्व्याख्यानं समुचितमिति बुधैर्विचिन्त्यमिति। अत्रैव तदग्रे कमलाकरः "अत्र गूढार्थप्रकाशकारास्तु सौरे स्वाहोरात्रानयनश्लोकोक्त्या ग्रहाणामुदयान्तरकर्मास्तीत्यपि सूचितं भगवता इत्याहुस्तद्भ्रान्तिखण्डनं तत्त्वविवेके सम्यगुक्तं तथापि किञ्चिदिहोच्यते" इत्यादि सर्वं दुराग्रहतो विलिलेख। वस्तुतो गोलयुक्त्योदयान्तरं कर्मावश्यकं ग्रहे देयमिति सिध्यति तदर्थं भास्करोक्तोदयान्तरकर्मणि मदीयो विशेषश्चिन्त्य इति ॥ ५९ ॥

इदानीं क्रान्तिज्यां द्युज्यां ततश्चरं चाह—

क्रान्तेः क्रमोत्क्रमज्ये द्वे कृत्वा तत्रोत्क्रमज्यया।
हीना त्रिज्या दिनव्यासदलं तद्दक्षिणोत्तरम् ॥ ६० ॥

क्रान्तिज्या विषुवद्भाघ्नी क्षितिज्या द्वादशोद्धृता।
त्रिज्यागुणाहोरात्रार्धकर्णाप्ता चरजासवः ॥ ६१ ॥

क्रान्तेर्ग्रहक्रान्तेः क्रमज्योत्क्रमज्ये द्वे अपि पूर्वपठितक्रमोत्क्रमज्यार्धैः कृत्वा पृथक् स्थाप्ये। तत्र त्रिज्योत्क्रमज्यया क्रान्त्युत्क्रमज्यया हीना दिनव्यासदलमहोरात्रवृत्तव्यासार्धं तत्तु दक्षिणोत्तरम्। दक्षिणगोले उत्तरगोले च भवति द्वयोर्गोलयोः क्रान्तेर्भावादिति। अथ स्थापिता क्रान्तेर्भावादिति। अथ स्थापिता क्रान्तिज्या च विषुवद्भाघ्नी प्रसिद्धया पलभया गुणा द्वादशोद्धृता क्षितिज्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुज्या स्यात् । सा त्रिज्यागुणाऽहोरात्रकर्णेन द्युज्ययाऽऽप्ता चरजा चरासुसम्बन्धेन तज्जा चरज्या स्यादित्यर्थः। असव इत्यस्याग्रे सम्बन्धः—इति ।

अत्रोपपत्तिः। क्रान्तिज्या भुजोऽहोरात्रव्यासार्धं द्युज्या कोटिः। त्रिज्या कर्णं इति जात्यक्षेत्रं प्रसिद्धम् । तत्र भुजोत्क्रमज्याहीना त्रिज्या कोटिज्या स्यादिति त्रिकोणमित्याऽहोरात्रव्यासार्धानयनमतिसुगमम् । अथ क्षितिजाहोरात्रवृत्तसम्पाते ध्रुवप्रोतकरणेन क्षितिजे प्राक्स्वस्तिकात्तत्सम्पातावधि अग्रांशाः कर्णः। ध्रुवप्रोतं नाडीमण्डले यत्र लग्नं तस्मात्तत्सम्पातावधि ध्रुवप्रोते क्रान्त्यंशाः कोटिः। नाडीमण्डले प्राक्स्वस्तिकाद्ध्रुवप्रोतसम्पातावधि चरांशा भुजः। भुजकर्णयोरुत्पन्नः कोणो लम्बांशाः तत्रास्त्रिसक्तावयवगणितेन ।

$$\text{त्रि} \times \text{ज्याच} = \text{स्पक्रां} \times \text{कोस्पलं} = \text{स्पक्रां} \times \text{स्पअग्रां}$$

$$= \frac{\text{त्रि} \times \text{ज्याक्रा}}{\text{द्यु}} \times \frac{\text{ज्याअ} \times \text{त्रि}}{\text{कोज्याअ}}$$ । कोटिज्याअ, अस्य द्वादशांशेन

गुणहरावपवर्त्य $\text{त्रि} \times \text{ज्याच} = \frac{\text{त्रि} \times \text{ज्याक्रां}}{\text{द्यु}} \times \frac{\text{वि} \times \text{त्रि}}{१२}$

$$\therefore \text{ज्याच} = \frac{\text{त्रि}}{\text{द्यु}} \times \frac{\text{ज्याक्रा} \times \text{वि}}{१२} = \frac{\text{त्रि}}{\text{द्यु}} \times \text{क्षतिज्या} ।$$

अत्र $\frac{\text{वि} \times \text{ज्याक्रा}}{१२}$ इयमक्षक्षेत्रतः कुज्या भवतीति गोले प्रसिद्धम् ।

"उन्मण्डलक्ष्मावलयान्तराले द्युरात्रवृत्ते चरखण्डकालः। तज्ज्यात्र कुज्या" इति भास्करोक्तेश्चेति सर्वमुपपन्नम् ॥ ६०-६१ ॥

इदानीं दिनरात्रिमानमाह—

तत्कार्मुकमुदक्क्रान्तौ धनशनी पृथक्स्थिते ।
स्वाहोरात्रचतुर्भागे दिनरात्रिदले स्मृते ॥ ६२ ॥
याम्यक्रान्तौ विपर्यस्ते द्विगुणे तु दिनक्षपे ।
विक्षेपयुक्तोनितया क्रान्त्या भानामपि स्वके ॥ ६३ ॥

तस्याश्चरज्यायाः कार्मुकं चापं असवश्चरासवो भवन्ति तद्घटी चरघटीति प्रसिद्धम्। पृथक् स्थिते स्वाहोरात्रचतुर्भागे स्वाहोरात्रचतुर्थांशे द्वे पञ्चदशघटीमाने उदक्क्रान्तावत्तुरगोले क्रमेण चरघटीभिः सहितरहिते कर्त्तव्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदा ते दिनरात्रिदले स्मृते । पञ्चदशघटिकाश्चरघटीसहिताः स्वदिनार्धमेवं पञ्चदशघटिकाश्चरघटीरहिताः स्वरात्र्यर्धं भवतीत्यर्थः। याम्यक्रान्तौ दक्षिणगोले ते दिनरात्रिदले विपर्यस्ते भवतः। यत्र चरघटी रहितास्तद्दिनार्धं यत्र युक्तास्तद्रात्र्यर्धमित्यर्थः । ते दिनरात्रिदले द्विगुणे तु दिनक्षपे दिनरात्रिमाने भवतः। एवं विक्षेपेण शरेण दिक्साम्ये युक्त्या दिग्भेदे ऊनितया क्रान्त्याऽर्थात् स्फुटक्रान्त्या भानां नक्षत्राणामपि स्वके तदीये दिनरात्रिमाने साध्ये इति ।

अत्रोपपत्तिः। गोलदर्शनेनैव स्फुटा। यतो याम्योत्तरवृत्तादुन्मण्डलावधिकालः स्वाहोरात्रवृत्ते पञ्चदशघटिकाः। उत्तर गोले क्षितिजस्योन्मण्डलाधः स्थितत्वाच्चर कालेनाधिकाः स्वदिनार्धमित्यादि स्फुटम्। भास्करेणापि तथैवोक्तं "चरघटी सहिता रहिताः क्रमात्तिथिमिता घटिकाः खलु गोलयो" रिति ॥ ६२–६३ ॥

इदानीं धर्मकृत्यादावुपयोगित्वान्नक्षत्रादिसाधनमाह—

भभोगोऽष्टशतीलिप्ताः खाश्विशैलास्तथा तिथेः।
ग्रहलिप्ताभभोगाप्ता भानि भुक्त्या दिनादिकम् ॥ ६४ ॥

रवीन्दुयोगलिप्ताभ्यो योगा भभोगभाजिताः।
गता गम्याश्च षष्टिघ्न्यो भुक्तियोगाप्तनाडिकाः ॥ ६५ ॥

अर्कोनचन्द्रलिप्ताभ्यस्तिथयो भोगभाजिताः।
गता गम्याश्च षष्टिघ्न्यो नाड्यो भुक्त्यन्तरोद्धृताः ॥ ६६॥

ध्रुवाणि शकुनिर्नागं तृतीयं तु चतुष्पदम्।
किंस्तुघ्नं तु चतुर्दश्याः कृष्णायाश्चापरार्धतः ॥ ६७ ॥

बवादीनि ततः सप्त चराख्यकरणानि च।
मासेऽष्टकृत्व एकैकं करणानां प्रवर्त्तते ॥ ६८ ॥

तिथ्यर्ध्यभोगं सर्वेषां करणानां प्रकल्पयेत्।

अष्टशतमिताः कला नक्षत्रभोगः। विंशत्यधिक सप्तशतमिता रवीन्द्वन्तरकलास्तिथिभागः। यस्य ग्रहस्य नक्षत्रज्ञानमभीष्टं तस्य ग्रहस्य कलाः कार्यास्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भभोगेन पूर्वोदितेन भक्ता लब्धयो गतभानि। शेषा गतकलास्ता भभोगात् पतिता एष्यकलाः। गतैष्यकलाभिर्भुक्त्या गतैष्यदिनादिकं साध्यम्। ग्रहगतिकलाभिरेकं दिनं तदा गतैष्यकलाभिः किमिति। लब्धं गतमेष्यं वा दिनादिकमित्यर्थः। एवं रविचन्द्रयोगकलाभ्यो भभोगेनैवाष्टशतमितेन भाजिता लब्धा विष्कम्भादयो गतयोगा भवन्ति। शेषं गतकलास्ता भभोगाच्छोध्या गम्याः कलाः। ततो गतैष्यनाडीज्ञानायानुपातः। यदि रविचन्द्रगतियोगेन षष्टिघटिकास्तदा गतैष्यकलाभिः किमिति। गता गम्याश्च षष्टिगुणा गतियोगहृता आप्ता गतगम्या नाडिका भवन्ति। रविरहितचन्द्रस्य लिप्ताः कार्यास्ता भोगभाजितास्थितिभोगेन विंशत्यधिकसप्तशतमितेन भाजिता लब्धा गतास्तिथयः। अत्रापि शेषं गताः कलास्ता तिथिभोगाच्छुद्धा गम्यकलाः। ततो गतैष्यघटीज्ञानायानुपातः यदि रविचन्द्रभुक्त्यन्तरेण षष्टिघटिकास्तदागतैष्यकलाभिः किमिति। लब्धा गता गम्याश्च घटिकाः। अथ कृष्णचतुर्दश्याअपरार्धतस्तिथ्यर्धभोगतः क्रमेण शकुनिः। नागम्। तृतीयन्तु चतुष्पदम्। चतुर्थं किंस्तुघ्नमिति चत्वारि करणानि ध्रुवाणि स्थिराणि स्युः। प्रतिमासं कृष्णपक्षीय चतुर्दश्युत्तरार्धे शकुनिः। अमापूर्वार्धे नागम्। अमोत्तरार्धे चतुष्पदम्। शुक्लपक्ष-प्रतिपत्-पूर्वार्धे किंस्तुघ्नं तिष्ठतीत्यर्थः। भास्कराचार्येण ब्राह्ममूलानुसारेण शकुनिचतुष्पदनागकिंस्तुघ्नानीति द्वितीयतृतीययोः क्रमभेद उक्तः। सम्प्रति प्रायः सर्वैः पञ्चांगकारैः स्वस्वपञ्चांगेषु सौरक्रमं विहाय ब्राह्मक्रमानुसारेणैव स्थिरकरणानि लिख्यन्ते। परन्त्वत्र किमपि मूलं नोपलभ्यते। एवं सर्वत्र फलग्रन्थेषु प्रायो जातस्य करणफलार्थं च स्थिरकरणानां क्रमो ब्राह्मक्रमानुसारी एवेति बुद्धिमद्भिर्भृशं विचिन्त्यम्। अत्र विश्वनाथादिभिरपि स्वस्वसूर्यसिद्धान्तटीकासु सौरक्रमेणैव स्थिरकरणानि व्याख्यातानि।

विश्वनाथेन सूर्यसिद्धान्तटीकायां सौरक्रमेण स्थिरकरणानि विलिख्य स्वग्रहलाघवटीकायां च ब्राह्मक्रमेण तानि लिखितानीति महद्वैचित्र्यम्। प्रायः सर्वेषां मते ब्राह्मक्रम एव युक्तः। अतः प्रथमं शकुनिः। तृतीयन्तु नागं चतुष्पदं द्वितीयमित्यध्याहार्यम्। एवं व्याख्याने सर्वसम्मतः स्थिरकरणक्रमो भवतीति किं बहुना बुद्धिमत्सु। ततः सप्त बवादीनि। बवम्। वालवम्। कौलवम्। तैतिलम्। गरम्। वाणिज्यम्। विष्टिः। (भद्रा) इति सप्त चराख्यकरणानि चलकरणानि। एवं मासेऽवशिष्टतिथ्यर्द्धेषु षट्पञ्चाशत्प्रमितेषु तिथ्यर्धभोगानि सप्तचरकरणानि अष्टवारं भ्रमन्त्यतश्चरकरणानामेकैकमेकमेकं करणं मासेऽष्टकृत्वोऽष्टवारं प्रवर्त्ततेऽतः सर्वेषां करणानां तिथ्यर्द्धभोगं कल्पयेद्गणक इति फलितार्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः। सिद्धान्तशिरोमण्यादिषु प्रसिद्धा किमत्र ग्रन्थगौरवेण। विष्कम्भादिसप्तविंशतियोगेषु कुत्र सिद्धिः, इत्यस्य निर्णयो न भवति तदर्थं फलोपजीव्यैर्यत्नो विधेयः। एवं व्रतोपवासादौ पञ्चाङ्गनिर्णयः कार्यं इति। अत्र क्रान्तिवृत्तस्य समान् सप्तविंशतिभागान् भसंज्ञकान् कृत्वा भानि साधितानि तानि च स्थूलभानि भास्करेण कथितानि "स्थूलं कृतं भानयनं यदेतत्" इत्यादिना तत्खण्डनं कमलाकरकृतं तत्त्वविवेके द्रष्टव्यम् ॥ ६५-६८ ॥

अधुनाऽधिकारोपसंहारमाह—

एषा स्फुटगतिः प्रोक्ता सूर्यादीनां खचारिणाम् ॥ ६९ ॥

इति सूर्यसिद्धान्ते स्पष्टाधिकारः ॥ २ ॥

सूर्यादीनां ग्रहाणामेषा पूर्वोदिता स्फुटगतिः प्रोक्ता मया सूर्यांशपुरुषेणेति शेषः ॥ ६९ ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा।
सुखायामृतवर्षिण्यां गतः स्पष्टाधिकारकः ॥

इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यां स्पष्टाधिकारः ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिप्रश्नाधिकारः

तत्र तावद्दिग्ज्ञानमुपयोगित्वादाह—

शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपि वा समे ।
तत्र शङ्क्वङ्गुलैरिष्टैः समं मण्डलमालिखेत् ॥१॥

तन्मध्ये स्थापयेच्छङ्कुं कल्पनाद्द्वादशाङ्गुलम् ।
तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्धयोः ॥२॥

तत्र बिन्दू विधायोभौ वृत्ते पूर्वापराभिधौ ।
तन्मध्ये तिमिना रेखा कर्त्तव्या दक्षिणोत्तरा ॥३॥

याम्योत्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा ।
दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि ॥४॥

त्रयाणां दिग्देशकालानां प्रश्नाः सोत्तरा यस्मिन्नधिकारे स त्रिप्रश्नाधिकारः। तस्मिन्नादौ शङ्कोश्छायाद्वयदर्शनेन दिग्ज्ञानोपायो यथा।

अम्बुना जलेन संशुद्धे समीकृते शिलातले पाषाणपृष्ठे। अपि वा अथवा तदभावे समे भूमिपृष्ठे वज्रलेपे वज्रस्य अनेकवस्तुमिश्रितपदार्थस्य लेपो यस्मिन्. बृहत्संहितायामनकेवस्तुमिश्रणेनैको लेपो विरचितो यल्लेपेन भूमिर्वज्रवत् कठिना जायतेऽत एव स लेपो वज्रलेपसंज्ञः कथ्यते। एवं कृते पाषाणपृष्ठे भूमिपृष्ठे वा तत्रेष्टैर्मध्याह्नच्छायाऽधिकैः शङ्क्वङ्गुलैः। यदङ्गुलेन वक्ष्यमाणो द्वादशांगुलशङ्कुरङ्कितः स शङ्क्वङ्गुलस्तः शङ्क्वङ्गुलाङ्कितरिष्टैरित्यर्थः। एकं समं कुत्रापि न नतोन्नतमर्थात् क्षितिजाख्यं मण्डलं वृत्तमालिखेद्गणक इति शेषः। तस्य मध्ये केन्द्रे कल्पनया द्वदशाङ्गुलमितं शङ्कुं स्थापयेत्। तस्य शङ्कोश्छायाग्रं वृत्ते पूर्वापरार्धयोः पूर्वार्धेऽपरार्धे च यत्र स्पृशेत् तत्र पूर्वापरसंज्ञौ बिन्दू विधाय तन्मध्ये तिमिना मत्स्येन दक्षिणोत्तरा रेखा कार्या ! ननु दिग्ज्ञानाभावात् कथं वृत्तस्य पूर्वार्धपरार्धयोर्ज्ञानम्। सत्यम्। तदुच्यते। लोकव्यवहारतः स्थूलरूपेण दिग्ज्ञानमस्ति सूक्ष्मदिग्ज्ञानार्थमयमुपायः। अतो वृत्ते स्थूलपूर्वापरार्धयोर्ज्ञानादत्र न शङ्का। इयं याम्योत्तररेखा वृत्ते यत्र बिन्दुद्वये लग्ना तत्र स्थूल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिग्ज्ञानानुसारेण क्रमेण याम्या उत्तरादिक् च ज्ञेया। ततो याम्योत्तरदिशोर्मध्ये तिमिना मत्स्येनान्या पूर्वपश्चिमा रेखा कार्या सा च पूर्वसाधितपूर्वापरायाः समानान्तरा क्षितिजकेन्द्रगा वास्तवपूर्वापरा ज्ञेयेत्यर्थः। तद्वदेव दिङ्मध्यमत्स्यैः विदिशः कोणदिशो हि संसाध्याः। वृत्ते पूर्वोत्तरदिशोर्मध्ये बिन्दुरीशानदिक् पश्चिमदक्षिणदिशोर्मध्ये बिन्दुर्नैर्ऋतिदिक्। ताभ्यां मत्स्येन वाय्वाग्निदिशौ साध्ये। एवं वाय्वाग्निदिग्भ्यामीशाननैर्ऋतिदिशौ साध्ये—इत्यर्थः।

अत्रोपपत्तिः। एकस्मिन् दिने यदि स्वल्पान्तराद्रविक्रान्तिः स्थिरा कल्प्यते तदा तदहोरात्रवृत्त इष्टानामुन्नतघटिकानामग्रे पूर्वाह्णे सममण्डलेन यावदन्तरं तावदेवापराह्णे तावनीनामिष्टघटीनामग्रे भवति। अतश्छायाप्रवेशकाले छायाऽग्रपूर्वापररेखान्तररूपो ज्यात्मको यावान् भुजस्तावानेव छायानिर्गमकाले उभयत्र छायाकर्णयोस्तुल्यत्वात् क्रान्तिस्थैर्यवशतोऽग्रसाम्यत्च्च अतो भुजाग्रोपरिगता रेखा क्षितिजकेन्द्रगतवास्तवपूर्वापररेखायाः समानान्तरा पूर्वापररेखारूपा स्यात्। अतस्तौ छायानिगमप्रवेशबिन्दू पूर्वापरबिन्दुरूपौ गोलयुक्त्या भवतः। मत्स्येन तत्तिर्यग्रेखा च याम्योत्तरा। ततो वृतगताभ्यां याम्योत्तरबिन्दुभ्यां मत्स्येन वास्तवपूर्वापररेखा क्षितिजवृत्तकेन्द्रगता सिध्यति। ततो विदिशां ज्ञानं सुगममिति। अयनद्वयासन्ने क्रान्तेश्चलनस्यात्यल्पत्वादिदं कर्म समुचितम्। अन्यस्मिन् दिने छायाप्रवेशनिर्गमकालयोरग्रयोर्वैषम्यान्न भुजयोः साम्यमतस्तद्बिन्दुगता रेखा न वास्तवपूर्वापररेखासमानान्तरा। अतो भास्करेण स्वत्रिप्रश्नाधिकारे "तत्कालापमजीवयोस्तु विवरादित्यादिना" छायाऽग्रपूर्वापरान्तररूपभुजयोरन्तरवशेन स्फुटैन्द्री दिक् साधिता। तत्र भुजयोरन्तरस्य वृत्तपरिधौ दानानौचित्यान्न स्फुटपूर्वदिशः सिद्धिः। अतश्छायाप्रवेशनिर्गमबिन्द्वन्यन्तरव्यासोपरि यद्वृत्तं तत्र स्थूलपूर्वदिगग्रात् पूर्णज्यारूपतद्भुजान्तरदानेन यो बिन्दुस्तस्योपरि स्थूलपश्चिमबिन्दुतो या रेखा वर्धिता सा पूर्वापररेखाऽनुरूपा स्यादिति स्फुटं गणकैः। अत्र मत्कृता दिङ्मीमांसा विलोक्येति दिक् ॥ १—४ ॥

अत्रैव विशेषमाह—

चतुरस्रं बहिःकुर्यात् सूत्रैर्मध्याद्विनिर्गतैः।
भुजसूत्राङ्गुलैस्तत्र दत्तैरिष्टप्रभा स्मृता ॥५॥

वृत्तस्य बहिर्मध्याद्दिङ्मध्याद्विनिर्गतैः सूत्रैरेकं चतुरस्त्रं वर्गक्षेत्रं कुर्यात्। अर्थात् क्षितिजवृत्तोपरि दिग्बिन्दुतः स्पर्शरेखाभिरेकं वर्गं कुर्यादित्यर्थः तत्र वर्गस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुजे प्राग्बिन्दुतः पश्चिमबिन्दुतो वा यथादिक्कानि गणितागतानीष्टच्छाया-पूर्वापररेखाऽन्तररूपाणि भुजाङ्गुलानि देयानि तैर्दत्तैर्भुजसूत्राङ्गुलैरिष्टप्रभा स्मृता। अत्रैतदुक्तं भवति। भुजाङ्गुलाग्रात् पूर्वापररेखासमानान्तरा रेखा कार्या। तदेष्टकाले केन्द्रस्थापितशङ्कोश्छायाग्रं कुत्राप्यस्यां रेखायामेव लगिष्यतीति।

अत्रोपपत्तिः। इष्टकालिकच्छायाग्रात् पूर्वापररेखोपरि यो लम्बः स एव भुजः। पूर्वोत्पादितरेखायाः पूर्वापररेखायाश्च तदेवान्तरम्। अतश्छायाग्रं तस्यां लगिष्यतीति भुजपरिभाषयैव स्फुटमिति ॥ ५ ॥

पुनर्विशेषमाह—

प्राक्पश्चिमाश्रिता रेखा प्रोच्यते सममण्डले।
उन्मण्डले च विषुवन्मण्डले परिकीर्त्यते ॥ ६ ॥

क्षितिजोन्मडलसममण्डलविषुवन्मण्डलसम्पातौ हि पूर्वपश्चिमबिन्दू। अतः प्राक्साधिता क्षितिजे प्राक्पश्चिमाश्रिता पूर्वापरा रेखा सममण्डलेऽपि प्रोच्यते। सैव उन्मण्डले च परिकीर्त्यते प्रकथ्यते—इति। यतस्तौ पूर्वापरबिन्दू उन्मण्डल-सममण्डलविषुवन्मण्डलधरातलेषु। अतस्तद्गता पूर्वापररेखाऽपि तेषु धरातलेष्विति रेखागणितयुक्त्या स्फुटम्। प्रायो बहुषु पुस्तकेषु 'सममण्डलम्' 'उन्मण्डलम्' 'विषुवन्मण्डलम्' इति प्रामादिकः पाठः। तेन पाठेन सर्वेषां व्याख्यानमसङ्गतमिति निपुणैर्विलोक्यम् ॥ ६ ॥

अथ पुनर्विशेषमाह—

रेखा प्राच्यपरा साध्या विषुवद्भाऽग्रगा तथा।
इष्टच्छायाविषुवतोर्मध्यमग्रा विधीयते ॥ ७ ॥

भारतवर्षीयाणां गणकानां निरक्षत उत्तरदेशेष्वेव ग्रहगणना "उदगदिशं याति यथा यथा नरः" इत्यादि भास्करोक्तेश्च। अतो नाडीमण्डलस्थे रवौ स्वदेशे मध्याह्ने या द्वादशाङ्गुलशङ्कोश्छाया पलभा सा सदोत्तरा भवति। अथ पूर्वोदितवर्गक्षेत्रस्यैकभुजे प्राग्बिन्दुत उत्तरदिशि विषुवद्भा पलभा देया तदग्राद्यथा भुजाङ्गुलाग्रात् पूर्वापररेखासमानान्तरा रेखा साध्या तत इष्टच्छायाविषुवतोरिष्टच्छायाग्रविषुवद्भाग्रयोः पूर्वापरसमानान्तररेखयोर्मध्यमन्तरं तत्र वर्गक्षेत्रभुजे यत् स्यात् साऽग्रा कर्णवृत्ताग्रा विधीयते कथ्यते गणकैरिति शेषः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः। अग्रा छायाकर्णव्यासार्धपरिगता कर्णवृत्ताग्रा व्यस्तगोला भवति पलभा च सदोत्तरा। तयोः संस्कारतश्छायाग्रपूर्वापरसूत्रमध्यं भुजः कथ्यतेऽतस्तद्वैपरीत्येन सदा सौम्यो भुजस्तदा तस्य पलभायाश्चान्तरमन्यथा योगः कर्णवृत्ताग्रा भवतीति सर्वं "दिनार्धद्युतेस्त्रिज्यकाघ्न्या" इत्यादि वासनायां भास्कराचार्येण सम्यगमिहितम् ॥ ७ ॥

इदानीं छायाकर्णाद्याह—

शङ्कुच्छायाकृतियुतेर्मूलं कर्णोऽस्य वर्गतः।
प्रोज्झ्य शङ्कुकृतिं मूलं छाया शङ्कुर्विपर्ययात् ॥ ८ ॥

शङ्कोश्छायायाश्च वर्गयोगान्मूलं छायाकर्णः स्यात्। अस्य छायाकर्णस्य वर्गतः शङ्कुवर्गं हित्वा मूलं छाया स्यात्। विपर्ययात् शङ्कुश्च स्यात्। छायाकर्णस्य वर्गतश्छायावर्गं हित्वा मूलं शङ्कुः स्यादित्यर्थः।

अत्रोपपत्तिः। शङ्कुः कोटिः। छाया भुजः। छायाकर्णः कर्णः। इति ज्यात्यत्रिभुजे भुजद्वयज्ञानात् तृतीयभुजज्ञानं रेखागणितेन "तत्कृत्योर्योगपदम्" इत्यादि भास्करपाटीगणितेन च सुगममिति ॥ ८ ॥

इदानीमयनांशानयनमाह—

त्रिंशत्कृत्यो युगे भानां चक्रं प्राक् परिलम्बते।
तद्गुणाद्भूदिनैर्भक्ताद् द्युगणाद्यदवाप्यते ॥ ९ ॥
तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः।
तत्संस्कृताद् ग्रहात् क्रान्तिच्छायाचरदलादिकम् ॥१०॥

युगे एकस्मिन् महायुगे भानां नक्षत्राणां चक्रं भवलयमित्यर्थः। यद्वा भानां सप्तविंशत्यंशानां चक्रम्। यस्य भ्रमणं दोलारूपं प्राक् पश्चात् सप्तविंशति-भागपर्यन्तं भवति तच्चक्रमित्यर्थः। त्रिंशत्कृत्यस्त्रिंशद्गुणिताः कृत्यो विंशतिः षट्शतीत्यर्थः। तत्तुल्यं तच्चक्रं प्राग् लम्बते स्वस्थानात् प्राग्भावे लम्बितं भवतीत्यर्थः। विंशतिबोधककृतिशब्दस्य बहुवचने कृतयो भवन्ति अत्र 'कृत्यः'—इत्यार्षप्रयोगो ज्ञेयो वा छन्दोभङ्गभयात् 'कृतयः' इत्यस्य स्थाने 'कृत्यः' इति कृतम्। द्युगणादहर्गणात् तैः षट्शतभगणैर्गुणात् तस्माद्-भूदिनैः कुदिनैर्भक्ताद्यदवाप्यते भगणादिफलं तत्र भगणानां प्रयोजना-भावात् हित्वा राश्यादेर्दोर्भुजः कर्तव्यः। तस्यांशास्त्रिघ्नास्ततो दशभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राप्तांशा लब्धांशा अयनाख्या विज्ञेयाः। तत्संस्कृताद् ग्रहात् क्रान्तिच्छाया-चरार्धादिकं साध्यमिति। यतः क्रान्तिवृत्तनाडीवृत्तसम्पातात् क्रान्तेः प्रवृत्तिः। क्रान्तेश्चरग्। चरोन्नतकालाभ्यामिष्टान्त्या। तत इष्टहृतेः शङ्कुः। शङ्कुतश्छायेति। अत्र सौरभाष्ये नृसिंहः। "कृतिशब्देन विंशतिसंख्या गृह्यते। यतश्छन्दः परिभाषायां कृतिश्छन्दो विंशतितमम्। त्रिंशद्गुणिता विंशतिः षट्शती जाता"। त्रिंशत्कृत्य इत्यत्र चेत् षट्शती विवक्षिता तर्हि त्रिंशत्कृतयः इति पाठः साधीयान् कल्पनीय इति। महायुगे त्रिंशत्कृतत्वस्त्रिंशत्संख्यका भगणा इत्यर्थः एवमयुतत्रयं कल्पे। अनेनैवाभिप्रायेण सिद्धान्तशिरोमणावभिहितम्। "तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे" इति। तत्कल्पितोऽयं पाठो दुष्ट इव भाति। आर्षशास्त्रविरोधादग्रिमग्रन्थविरोधाच्च। तथा च शाकल्यसंहितायाम्। क्रान्तिपातभगणा इत्येतदेकं प्राक्चलनं युगे तानि च षट्शतमिति। तथा च वसिष्ठसंहितायाम्। "अब्दाः खखर्तुभिर्भाज्यास्तद्दोस्त्रिघ्नादशोद्धृताः" इति। अत्र राश्यादिकं फलं ग्राह्यम्। यद्वा तद्भगणाः सौरोक्ता इत्यत्र सूर्यसिद्धान्तोक्ता इति न किंतु सौरतुल्यफले कस्मिंश्चित् तन्त्रे करणे वोक्ताः। तेन भास्कराचार्याणामपि त्रिंशत्कृत्य इत्यनेन षट्शतान्येवेत्याशय इति न कश्चिद्विरोधः" इति। भास्कराचार्येण सम्प्रति प्रसिद्धो योऽयं सूर्यसिद्धान्तस्तत्सम्मतात् "तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे" इति वाक्यं न लिखितमिति नृसिंहदैवज्ञोक्तं समीचीनं प्रतिभातीति मन्मतम्।

अत्रोपपत्तिः। सृष्ट्यादेः क्रान्तिवृत्तनाडीवृत्तसम्पातः सप्तविंशत्यंशान् प्राक् ततः पुनः परावर्त्य स्वस्थानमागच्छति।

एवमत्र १०८ अंशचलनेनैको भगणः महायुगे तादृशा भगणाः षट्शतानि अतोऽहर्गणेन यदनुपातफलं राश्यादि तदीयभुजांशेषु नवतिसमेषु सप्तविंशतिरयनांशाः। ततोऽनुपातो यदि नवतिसमेषु भुजभागेषु सप्तविंशत्ययनभागास्तदेष्टभुजभागेषु किमिति। लब्धा अयनभागाः $= \frac{\text{भु} \times २७}{९०} = \frac{३\ \text{भु}}{१०}$ इत्युपपन्नम्।

इदानीमयनांशानां प्रतीतिं धनर्णत्वं चाह—

स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्द्वये।
प्राक् चक्रं चलितं हीने छायाऽर्कात् करणागते॥ ११॥
अन्तरांशैरथावृत्य पश्चाच्छेषैस्तथाऽधिके।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयने सायने कर्क्यादौ मकरादौ वा विषुवद्द्वये सायने मेषादौ तुलादौ वाऽर्के तच्चक्रचलनं स्फुटं दृक्तुल्यतां गच्छेत्। अत्रैतदुक्तं भवति। सायनमानेन यदा कर्क्यादौ मकरादौ वा रविस्तदा वेधेन परमापमः स्फुट उपलभ्यते। एवं यदा सायने मेषादौ तुलादौ वाऽर्कस्तदा वेधेन क्रान्तिः शून्यमुपलभ्यत इति प्रत्यक्षतोऽयनभागानां मानमुपलभ्यते। एवं यदा वेधेन परमोत्तरा क्रान्तिर्लभ्यते तदा करणेन यावान् रविस्तस्य भत्रयस्य च यदन्तरं तेऽयनभागाः। यदा वेधेन परमा दक्षिणक्रान्तिस्तदा गणितागतरविराशिनवकयोरन्तरमयनांशाः। एवं क्रान्त्यभावतोऽपि अयनांशज्ञानम्। अथ धनर्णत्वमाह। छायाऽर्कात् वक्ष्यमाणप्रकारेण छायादर्शनेनागतार्कात् करणागते ग्रन्थस्थलिखितप्रकारागते रवावूने तयोरन्तरांशैश्चक्रं प्राक् चलितमिति ज्ञेयम्। तदा तदन्तरसमा अयनांशा धनमिति वेदितव्यम्। अथ तथैव छायाऽर्कात् करणागतेऽधिके तयोः शेषैरन्तरांशैरावृत्य परावर्त्य पश्चाच्चक्रं चलितमिति बोध्यम्। छायाकरणार्कयोरन्तरसमा अयनांशास्तदा ऋणमित्यर्थः।

अत्रोपपत्तिः। छायातः सायनः करणतो निरयणो रविरतस्तयोरन्तरांशा अयनांशा इति स्फुटम् ॥ ११½ ॥

अथाक्षक्षेत्राणां मूलरूपां पलभामाह—

एवं विषुवती छाया स्वदेशे या दिनार्धजा ॥ १२ ॥

दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा।

एवं पूर्वोक्तप्रकारेण सायनमेषादिं तुलादिं वा क्रान्त्यभावात् परीक्ष्य स्वदेशे दिनार्धजा दक्षिणोत्तररेखायां या विषुवती विषुवद्दिनसम्बन्धिनी छाया सा तस्मिन् देशे विषुवत्प्रभा विषुवद्भा पलभेति कथ्यते। समरात्रिन्दिवं कालं विषुवद्विषुवं च तदित्यमरकोषाद्यदा दिनरात्रिमाने समाने त्रिंशद्घटिकात्मके तदैव विषुवद्दिनं तदैव सायनमेशसंक्रान्तिः सायनतुलासङ्क्रान्तिश्च। यद्वा सा सङ्क्रान्तिः स्वदेशे मध्याह्नसमय एव भवेत्तदा रवेस्तात्कालिकमहोरात्रं नाडीमण्डलमतो दक्षिणोत्तरमण्डले तत्र रवेर्नतांशा अक्षांशसमातद्वशतः क्षितिजे केन्द्रस्थद्वादशाङ्गुलशङ्कुच्छाया दक्षिणोत्तररेखायां या साऽक्षक्षेत्र भुजसजातीया पलभा भवति। तत्रैव यदि पृष्ठस्थानवेधेन रवेः क्रान्त्यभावस्तदा गर्भाभिप्रायेण क्रान्तेर्भावान्न विषुवद्दिनम्। तत्र छाया चाक्षक्षेत्रभुजविजातीयत्वान्न पलभेति सुधीभिरुह्यम्। अतोऽत्र वेधेन रवेः क्रान्तिवृत्तीयलम्बनवशेन गर्भभवक्रान्तेरभावाद्गर्भजा नतांशा अक्षसमा वेद्याः। ततो लम्बज्यया कोटयाऽक्षज्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समो भुजस्तदा द्वादशाङ्गुलशङ्कुकोट्या किमिति । लब्धा वास्तवपलभा स्यात् । इह तु लम्बनविकारतः किञ्चित् स्थूला स्यात् । एवमत्र "क्रियतुलाधरसङ्क्रम पूर्वतोऽयनलवोत्थदिनैर्विषुवद्दिनम्" इत्यत्र स्फुटगत्यनुपातेन भास्करेण यद्विषुवद्दिनमानीतं तदपि स्थूलं प्रत्यहं रविगतेरन्याहक्त्वात् । अतो मेषादावयनभागोन मेषादौ च स्फुटं रविं प्रकल्प्य व्यस्तविधिना स्थानद्वये मध्यमरविमाने विधाय तदन्तरकला रविमध्यमगतिकलाहृता वास्तवायनभागभवदिनानि भवन्ति तैर्विषुवद्दिनं च वास्तवं स्यादित्यलं प्रसङ्गागतविचारेण । केचनेह "शङ्कुच्छायाकृतियुतेरित्याद्यष्टमश्लोकस्यानन्तरमेवं विषुवती" इत्याद्यमुं श्लोकं मन्यन्ते 'एवम्' इत्यनेन पूर्वापरश्लोकसम्बन्धात् । तथा 'त्रिंशत्कृत्यो युगे भानाम्' इत्याद्ययनभागानयनं क्षेपकं च मन्यन्ते । तन्न समीचीनम् । अयनभागानयनस्य नृसिंहादिभाष्ये पाठात् । भास्करवचनेन 'तद्भगणाः सौरोक्ताः' इत्यनेन तदनुसारिसौरायनभगणोल्लेखात् । एवं पदस्य च मदीयव्याख्यानेन पूर्वश्लोकेन सह सम्बन्धाच्चेति निष्पक्षपातधिया सुधीभिर्विचिन्त्यमिति ॥ १२½ ॥

इदानीं लम्बाक्षज्यासाधनमाह—

शङ्कुच्छायाहते त्रिज्ये विषुवत्कर्णभाजिते ॥ १३ ॥
लम्बाक्षज्ये तयोश्चापे लम्बाक्षौ दक्षिणौ सदा ।

त्रिज्ये शङ्कुच्छायाहते विषुवत्कर्णभाजिते तदा लम्बाक्षज्ये भवतः । त्रिज्या स्थानद्वये स्थाप्या एकत्र शङ्कुना द्वादशाङ्गुलमानेन अन्यत्र छाययाऽधुनानीतया विषुवत्प्रभयाऽर्थात् पलभया हता । उभयत्र विषुवत्कर्णेन पलभाद्वादशवर्गयोगमूलेन भक्ता । प्रथमस्थाने लम्बज्या द्वितीयस्थानेऽक्षज्या भवतीत्यर्थः । तयोश्चापे कार्ये तदा लम्बाक्षौ भवतः । तौ च सदा दक्षिणौ भवतः । भास्करादिभिर्लम्बांशा उत्तरा अक्षांशाश्च दक्षिणाः कथ्यन्ते "सदाऽक्षलम्बाविह याम्यसौम्यौ' इत्युक्तेः । अतोऽत्र केचन उत्तरश्च दक्षिणश्च दक्षिणौ, इति व्युत्पत्तिमार्षत्वात् कुर्वन्तीति ।

अत्रोपपत्तिः । तत्र प्रसिद्धाक्षक्षेत्रानुपातः । यदि विषुवत्कर्णेन शङ्कुकोटिः पलभाभुजश्च लभ्यते तदा त्रिज्यया किमिति । लब्धे लम्बाक्षज्ये । तयोश्चापे लम्बाक्षाविति स्फुटम् । सौम्यध्रुवाद्याम्योत्तरवृत्ते खस्वस्तिकं दक्षिणेऽतस्तदन्तरचापं लम्बांशा दक्षिणाः । खस्वस्तिकाद्याम्योत्तरवृत्ते नाडीमण्डलं दक्षिणेऽतस्तदन्तर्वर्त्तिचापमक्षांशाश्च दक्षिणाः । भास्करादयः खस्वस्तिकाद्याम्योत्तरवृत्ते सौम्यध्रुवपर्यन्तं लम्बांशमानमुत्तरं गणयन्तीति ॥ १३½ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं मध्याह्नच्छायाज्ञानेनाक्षांशादिज्ञानमाह—

मध्यच्छाया भुजस्तेन गुणिता त्रिभमौर्विका ॥ १४ ॥

स्वकर्णाप्ता धनुर्लिप्ता नतास्ता दक्षिणे भुजे ।

उत्तराश्चोत्तरे याम्यास्ताः सूर्यक्रान्तिलिप्तिकाः ॥ १५ ॥

दिग्भेदे मिश्रिताः साम्ये विश्लिष्टाश्चाक्षलिप्तिकाः ।

ताभ्योऽक्षज्या च तद्वर्गं प्रोज्झ्य त्रिज्याकृतेः पदम् ॥ १६ ॥

लम्बज्याऽर्कगुणाऽक्षज्या विषुवद्भाऽथ लम्बया ।

मध्याह्ने द्वादशाङ्गुलशङ्कोश्छायैव भुजो भवति छायाऽग्रपूर्वापरसूत्रमध्यत्वात् । त्रिज्या तेन भुजेन गुणिता स्वकर्णेन तच्छायाकर्णेन विभज्य याऽऽप्ता लब्धिस्तस्या धनुर्लिप्ताः कार्याः । ता भुजे दक्षिणे उत्तरा रवेर्नता नतकलाः । उत्तरे भुजे च याम्या नतकला भवन्ति । तत्र दिग्भेदे सूर्यक्रान्तिलिप्तिका मिश्रिता योज्या दिक्साम्ये च विश्लिष्टा अन्तरितास्तदाऽक्षलिप्तिका भवन्ति । ताभ्योऽक्षलिप्ताभ्यो या ज्या साऽक्षज्या च ज्ञेया । त्रिज्यावर्गात् तदक्षज्यावर्गं हित्वा पदं लम्बज्या भवति । अथाक्षज्याऽर्केण द्वादशभिर्गुणा लम्बया लम्बज्यया भक्तेति शेषः । लब्धिर्विषुवद्भा पलभा भवतीत्यर्थः ।

अत्रोपपत्तिः । छायाकर्णेन छायाभुजस्तदा त्रिज्या कर्णेन किम् । लब्धा मध्याह्ने रवेर्नतज्या भुजाद्विपरीता छायाया रवेर्विपरीतदिक्त्वात् ।

अस्याश्चापकला मध्याह्ने रवेः पृष्ठीयनतकला गोलयुक्त्या भवन्ति । तत्र लम्बनसंस्कारेण गर्भीयनतकलाः कर्त्तुं युज्यन्ते । आचार्येण लम्बनस्याल्पत्वात् पृष्ठीया एव गर्भीया नतकलाः कल्पिताः । तत्र रविक्रान्तिकलासंस्कारेणाक्षकलाज्ञानं गोलस्थितिप्रदर्शनेन स्फुटम् । ततोऽक्षज्यावर्गोनात् त्रिज्यावर्गात् पदं लम्बज्या लम्बाक्षज्याभ्यामनुपातेन पलभाज्ञानं चेत्याद्यक्षक्षेत्रतः सर्वं स्फुटम् ॥ ४-१६½ ॥

इदानीं छायातोऽर्कज्ञानमाह—

स्वाक्षार्कनतभागानां दिक्साम्येऽन्तरमन्यथा ॥ १७ ॥

दिग्भेदेऽपक्रमः शेषस्तस्य ज्या त्रिज्यया हता ।

परमापक्रमज्याप्ता चापं मेषादिगो रविः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्क्यादौ प्रोज्झ्य चक्रार्धात् तुलादौ भार्धसंयुतात् ।
मृगादौ प्रोज्झ्य भगणान्मध्याह्नेऽर्कः स्फुटो भवेत् ॥ १९ ॥

'मध्यच्छायाभुजस्तेन गुणिता त्रिभमौर्विका:' इत्यादिपूर्वोक्तेन विधिनाऽर्कस्य नतभागाः साध्याः दिक्साम्ये स्वदेशाक्षांशानामर्कनतांशानां चान्तरं कार्यं शेषं रवेरपक्रमः स्यात् । दिग्भेदे चान्यथा योगोऽपक्रमः स्यात् । तस्य ज्या त्रिज्यया हता परमक्रान्तिज्यया भक्ताऽऽप्ता या तस्याश्चापं मेषादिगो वर्षस्य प्रथमचरणगतो रविश्चेत्तदा स एव मध्याह्ने स्फुटोऽर्को भवेत् । कर्क्यादौ द्वितीय चरणे पूर्वागतं चापं चक्रार्धात् खनागेन्दुभागेभ्यः प्रोज्झ्य हित्वा तुलादौ तृतीये पादे पूर्वागताच्चापाद्भार्धेन राशिषट्केन सहितात् मृगादौ चतुर्थपादे च तच्चापं भगणाद्राशिद्वादशकात् प्रोज्झ्य यो राश्यादिको भवेत् स मध्याह्ने स्फुटोऽर्कः स्यादिति ।

अत्रोपपत्तिः । मध्याह्ने स्वाक्षार्कनतभागानां योगवियोगात् पूर्वविधिना रवेरपक्रमो भवति । ततोऽनुपातो यदि परमापमज्यया त्रिज्या दोर्ज्या तदेष्टक्रान्तिज्यया किमति । लब्धार्कदोर्ज्या तच्चापं भुजः स च प्रथमपादे स्फुटो रविः स्यात् । द्वितीयादिपदेषु भुजसाधनवैपरीत्येन क्रमेण चक्रार्धाच्छोधनेन, चक्रार्धे योजनेन, भगणात् पतितेन स्फुटो रविरिति स्फुटम् । एवमेव भास्कराचार्येणापि "तद्धनुराद्ये चरणे वर्षस्यार्कः प्रजायतेऽन्येषु । भार्धाच्च्युतः सभार्धो भगणात् पतितोऽब्दचरणानाम् ॥" इत्यादिनाऽभिहितम् । एवं छायातः सायनार्कमानं जातं तत्रायनभागान् प्रोज्झ्य निरयणो रविर्ज्ञेयः । तथा च भास्कराचार्यः ।

छायातोऽग्रातो वा भानुः सक्रान्तिपात एव स्यात् ।
पातोनः स्फुटभानुः स्फुटभानूनो भवेत् पातः ॥ इति ।

एवं भूपृष्ठवासिभिश्छायादर्शनतः पृष्ठीयनतांशा ज्ञायन्ते तत्र लम्बनसंस्कारेण गर्भीयनतांशाः साध्याः । त एव 'स्वाक्षार्कनतभागानाम्' इत्यादौ नतांशपदेनात्र नतांशा ज्ञेया--इति गोलविदां स्फुटम् ॥ १७-१९ ॥

इदानीं स्फुटार्कात् मध्यमार्कमाह—

तन्मान्दमसकृद्वामं फलं मध्यो दिवाकरः ।

तस्य स्फुटार्कस्य स्फुटक्रियया मान्दं फलं साध्यं तच्च स्फुटार्के वामं विपरीतं देयम् । दानेन यो रविरायातस्तस्मात् पुनर्मान्दं फलं साध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत् पुनस्तत्स्फुटार्क एव विपरीतं देयमेवमसकृद्यावद्विशेषस्तदा मध्यो दिवाकरो रविर्भवेदिति।

अत्रोपपत्तिः। प्रथमं स्फुटरविसमं मध्यरविं प्रकल्प्य तज्जं मन्दफलमवास्तवं जातं स्फुटरवौ तद्विलोमसंस्कारेण मध्यो रविः स्थूलस्ततः पुनर्मन्दफलं वास्तवासन्नं स्फुटरवौ तद्वामसंस्कारेण वास्तवमध्यासन्नो रविरेवमसकृत्कर्मणा मध्यो रविः स्यात्।

अथ सकृत्प्रकारेणैव स्फुटरवितो मन्दफलानयनमुच्यते। तत्र स्फुटरविकेन्द्रज्यातो यः स्फुटमन्दपरिधिः स एव मध्यमरविकेन्द्रज्यातोऽपि स्वल्पान्तराद्भवति ओजयुग्मान्तमन्दपरिध्योरल्पान्तरात् नखलिप्तातुल्यत्वाच्च। अथैवं स्फुटमन्दपरिधिं कृत्वा तद्व्यासार्धमन्त्यफलज्या साध्या।

क्षेत्रदर्शनम्



उ = मन्दोच्चम्। म = मन्दप्रतिवृत्ते मध्यो ग्रहः। मस्प' चापम् = सौरं मन्दफलम् = मंस्प चापसमम्। स्प = मन्दस्पष्टग्रहः। स्पल' = मन्दस्पष्टग्रहवशेन केन्द्रज्या। स्पन = तत्कोटिज्या। स्पना = स्पष्टकोटिः = स्पन − नना। नना =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्दान्त्यफलज्या । $\text{अस्प} = \sqrt{\text{स्पल}'^{2} + \text{स्पना}^{2}}$ । अर्थात् मन्दस्पष्टग्रहतो व्यस्त-कर्किमृगादिकेन्द्रवशतः शीघ्रकर्णवन्मन्दकर्णः साध्यः । ततः अस्पलं, स्पस्प त त्रिभुजयोः सजातीययोः स्पंत मन्दफलज्या $= \frac{\text{स्पस्प}' \times \text{स्पल}'}{\text{अस्प}}$ । स्पस्पं = नना = मन्दान्त्यफलज्या । अनेन

"व्यत्यासतः कर्किमृगादिकेन्द्रे स्फुटं खरांशुं परिकल्प्य साध्या ।
मन्दश्रुतिर्द्राक्फलवत्ततो यत् फलं रवेर्मन्दफलं भवेत्तत् ॥" इति

संशोधकोक्तमुपपद्यते । एवमत्र मन्दान्त्यफलज्याज्ञानतो मन्दस्पष्टग्रहात् तन्मन्दोच्चज्ञानाच्च सकृत्प्रकारेण मन्दफलं सिध्यतीति ॥ १९½ ॥

इदानीं मध्यनतांशज्ञानं ततो मध्याह्नच्छायाकर्णावाह—

स्वाक्षार्कापक्रमयुतिर्दिक्साम्येऽन्तरमन्यथा ॥ २० ॥

शेषं नतांशाः सूर्यस्य तद्बाहुज्या च कोटिजा ।
शङ्कुमानाङ्गुलाभ्यस्ते भुजत्रिज्ये यथाक्रमम् ॥ २१ ॥

कोटिज्यया विभज्याप्ते छायाकर्णावहर्दले ।

दिक्साम्ये स्वाक्षांशरव्यपक्रमयोर्युतिः सूर्यस्य मध्याह्ने नतांशा भवन्ति । अन्यथा दिग्भेदे तयोरन्तरेण यच्छेषं ते सूर्यस्य नतांशा भवन्ति । अथ तेषां नतांशानां वाहुज्या भुजज्या कार्या । कोटिजा कोटिज्या च कार्या । भुजत्रिज्ये । नतांशभुजज्या त्रिज्या च एते द्वे शङ्कुमानाङ्गुलैर्द्वादशभिरभ्यस्ते गुणिते फले कोटिज्यया नतांशकोटिज्यया विभज्य ये लब्धे ते यथाक्रममहर्दले मध्याह्ने छायाकर्णौ भवतः । प्रथमस्थाने या लब्धिः सा मध्याह्नच्छाया, द्वितीयस्थाने या लब्धिः सा च मध्याह्नच्छायाकर्णो भवतीत्यर्थः ।

अत्रोपपत्तिः । छायाता नतांशानयनवैपरीत्येन सुगमा । वस्तुतो गर्भीयनतांशज्याकोटिज्याभ्यामनुपातेन या छाया सा गर्भच्छाया न भवति, क्षेत्रयोर्विजातीयत्वात् । तदर्थं कमलाकरकृतसिद्धान्ततत्त्वविवेकस्य छायाधिकारो द्रष्टव्यः किमत्र ग्रन्थगौरवेण ॥ २०–२१½

अथ भुजसाधनार्थमग्रां कर्णवृत्ताग्रां चानयति—

क्रान्तिज्या दिषुवत्कर्णगुणाप्ता शङ्कुजीवया ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्काग्रा स्वेष्टकर्णघ्नी मध्यकर्णोद्धृता स्वका ।

विषुवद्भायुतार्काग्रा याम्ये स्यादुत्तरो भुजः ।। २३ ।।

विषुवत्यां विशोध्योदग्गोले स्याद्बाहुरुत्तरः ।

विपर्ययाद् भुजो याम्यो भवेत्प्राच्यपरान्तरे ।। २४ ।।

क्रान्तिज्या विषुवत्कर्णनाक्षकर्णेन गुणा। शङ्कुरेव जीवा शङ्कुजीवा तया द्वादशभिराप्ता अर्काग्रा स्यात्। सा स्वेष्टच्छायाकर्णेन गुणा रविमध्यकर्णेन त्रिजीवया भक्ता स्वका स्वीया कर्णवृत्ताग्रका स्यात्। याम्ये गोले सार्काग्रा कर्णवृत्ताग्रा विषुवद्भया पलभया युता तदोत्तरो भुजः स्यात्। उदग्गोले कर्णवृत्ताग्रा विषुवत्यां पलभायां विशोध्य शेषमित उत्तरो बाहुः स्यात्। यदि विपर्ययाद्विशुद्धिर्भवेत् कर्णवृत्ताग्रायां विषुवत्येव विशुध्येत्तदा छायाग्रात् प्राच्यपरान्तरे पूर्वापररेखान्तरे याम्यो भुजो भवेत्।

अत्रोपपत्तिरक्षक्षेत्रत्वात् त्रैराशिकेन। यदि द्वादशकोट्या पलकर्णः कर्णस्तदा क्रान्तिज्याकोट्या किमिति। लब्धाऽर्काग्रा। यतः क्रान्तिज्या भुजः। कुज्या कोटिः। अग्रा कर्णः। इत्यक्षक्षेत्रम्। त्रिज्ययेयमर्काग्रा तदा छायाकर्णेन किमिति। लब्धा कर्णवृत्ताग्रा ततः "त्रिभज्याहृतार्काग्रिका कर्णनिघ्नी" इत्यादि भास्करोक्त्या भुजानयनोपपत्तिरतिस्फुटा ।। २२–२४ ।।

इदानीं मध्याह्ने भुजमाह—

"माध्याह्निको भुजो नित्यं छाया माध्याह्निकी स्मृता ।"

मध्याह्नसमये पूर्वोक्तप्रकारेण यो भुजः सैव नित्यं माध्याह्निकी छाया कथ्यते।

अत्रोपपत्तिः। छायाग्रपूर्वापरसूत्रमध्यं भुज इति परिभाषया मध्याह्ने छायाया दक्षिणोत्तररेखोपरि स्थितत्वात् तच्छायाग्रस्य शङ्कुमूलगतायाः पूर्वापररेखायाश्चान्तरं छायातुल्यमेवातो भुजसमैव तदा छायेति ।।

इदानीं सममण्डलकर्णमाह—

लम्बाक्षजीवे विषुवच्छायाद्वादशसङ्गुणे ।। २५ ।।

क्रान्तिज्याप्ते तु तौ कर्णौ सममण्डलगे रवौ ।

सौम्याक्षोना यदा क्रान्तिः स्यादत्ता द्युदलश्रवः ।।२६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लम्बज्याक्षजीवे क्रमेण पलभाद्वादशसङ्गुणे क्रान्तिज्याप्ते तदा तौ तु रवौ सममण्डलगे छायाकर्णौ भवतः। लम्बज्या पलभागुणा क्रान्तिज्यया भक्ता। अक्षज्या च द्वादशगुणा क्रान्तिज्याभक्त्या। उभयत्र समो लब्धौ सूर्ये पूर्वापरवृत्तगते छायाकर्णौ भवतः। रवेर्दृङ्मण्डलं यदा पूर्वापरवृत्तं भवति तदा द्वादशाङ्गुल-शङ्कुच्छाया या तत्कर्णः सममण्डलकर्ण उच्यते। एवं सममण्डलकर्णस्तदैव यदा सौम्या क्रान्तिः स्वाक्षांशेभ्यो न्यूना। याम्यक्रान्तौ रवेरहोरात्रवृत्तस्य पूर्वापरवृत्तस्य च क्षितिजाधःसंयोगात् स्वाक्षाधिकायामुत्तरक्रान्तौ च खस्वस्तिकादुत्तरदिशि रव्यहोरात्रवृत्तस्य याम्योत्तरवृत्तस्य च सम्पातादहोरात्रवृत्तस्य पूर्वापरवृत्तस्य च संयोगाभावात् सममण्डलकर्णो नोपपद्यत इति गोलदर्शनेन स्फुटम्। द्युदलश्रव इत्यस्याग्रे सम्बन्धः।

अत्रोपपत्तिः। क्रान्तिज्याभुजः। कुज्योनतद्धृतिः कोटिः। समशङ्कुः कर्णः। इत्यक्षक्षेत्रम्। ततोऽनुपातो यदि अक्षज्याभुजेन त्रिज्या कर्णस्तदा क्रान्ति-ज्याभुजेन किमिति। लब्धः समशङ्कुः $= \dfrac{\text{त्रि}\times\text{ज्याक्रा}}{\text{ज्याअ}}$। ततः समशङ्कुकोटौ त्रिज्याकर्णस्तदा द्वादशकोटौ कः। लब्धः सममण्डलकर्णः

$$= \frac{\text{१२ त्रि}\times\text{ज्याअ}}{\text{त्रिज्याक्रा}} = \frac{\text{१२ ज्याअ}}{\text{ज्याक्रा}} = \frac{\text{१२ ज्याअ}\times\text{ज्यालं}}{\text{ज्याल}\times\text{ज्याक्रा}} = \frac{\text{पभा}\times\text{ज्यालं}}{\text{ज्याक्रा}}$$ अतोऽत्र

$$\frac{\text{१२ ज्याअ}}{\text{ज्याक्रा}} = \frac{\text{पभा}\times\text{ज्यालं}}{\text{ज्याक्रा}} = \text{सक}$$ । इत्युपपन्नम्। अथ रवौ सममण्डलमप्राप्तेऽपि पूर्वानुपातेन यः सममण्डलकर्णो भवति सोऽपि अन्येषामनुपातेनानयनार्थं ग्राह्यः। तथा च भास्करः—

अप्राप्तेऽपि समाख्यमण्डलमिते यः शङ्कुरुत्पद्यते।
नूनं सोऽपि परानुपातविषये नैवं क्वचिद्दुष्यति॥

अत्रैव सिद्धान्तशिरोमणौ भास्करस्यान्ये विशेषाश्च द्रष्टव्याः—

"सौम्याक्षोना यदा क्रान्तिः" इत्यस्य व्याख्यानं गूढार्थप्रकाशे रङ्गनाथेन यत् कृतं तत् सर्वमसङ्गतं सुधीभिर्विचिन्त्यम्।

प्राचीनानां मतेनैकस्मिन् दिने एकस्मिन्नेवाहारोत्रवृत्ते रवेर्भ्रमणात्।

अथ प्रकारान्तरेण सममण्डलकर्णमाह—

विषुवच्छाययाभ्यस्तः कर्णो मध्याग्रयोद्धृतः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्युदलश्रवो मध्याह्नकाले छायाकर्णः स च पलभया गुण्यो मध्याग्रया मध्याह्नकालिककर्णवृत्ताग्रया भक्तः कर्णः सममण्डलकर्णो भवेदिति ।

अत्रोपपत्तिः । कर्णबृत्ताग्रानयनवैपरीत्येन $\text{अग्रा} = \frac{\text{त्रि} \times \text{मअ}}{\text{मक}}$ । अग्रा भुजः । समशङ्कुः कोटिः तद्धृतिः कर्णः । इत्यक्षक्षेत्रेऽनुपातेन $\text{समशङ्कुः} = \frac{\text{१२} \times \text{अग्रा}}{\text{पभा}} = \frac{\text{१२} \times \text{त्रि} \times \text{मअ}}{\text{पभा} \times \text{मक}}$ । ततः समशङ्कुना त्रिज्या कर्णस्तदा द्वादशाङ्गुलशङ्कुना किमिति । लब्धच्छायाक्षेत्रे सममडण्लकर्णः $= \frac{\text{१२} \times \text{त्रि}}{\text{सश}} = \frac{\text{१२} \times \text{त्रि} \times \text{प्रभा} \times \text{मक}}{\text{१२ त्रि} \times \text{मअ}} = \frac{\text{पभा} \times \text{मक}}{\text{मअ}}$ अत उपपन्नम् ।

इदानीं कर्णवृत्ताग्रासाधनमाह—

स्वक्रान्तिज्या त्रिजीवाघ्नी लम्बज्याप्ताग्रमौर्विका ।।२७।।
स्वेष्टकर्णहता भक्ता त्रिज्ययाग्राङ्गुलादिका ।

क्रान्तिज्या त्रिज्यागुणा लम्बज्ययाऽऽप्ता तदाऽग्रमौर्विका अग्रैव मौर्विका जीवेत्यग्रामौर्विका अग्रेत्यर्थः । अत्रार्षत्वादग्रास्थानेऽग्र–इति पाठः । भारतवर्षीया उदयकालतो वेधं कुर्वन्ति । उदयादेव कालगणनां च कुर्वन्ति । अतो वेधेनाग्रं प्रथममेव या ज्योपलभ्यते साऽग्रेति व्युत्पत्तिः समीचीना । अथ साऽग्रा स्वाभीष्टच्छायाकर्णेन हता त्रिज्यया भक्ता तदाङ्गुलात्मिकाऽग्राऽर्थात् कर्णवृत्ताग्रा स्यादित्यर्थः ।

अत्रोपपत्तिः । कुज्या भुजः । क्रान्तिज्या कोटिः । अग्रा कर्णः । इत्यक्षक्षेत्रम् । अतोऽनुपातो यदि लम्बज्याकोटौ त्रिज्याकर्णस्तदा क्रान्तिज्याकोटी किमिति । जाताऽग्रा । ततस्त्रिज्ययेयमग्रा तदा छायाकर्णेन किमिति । लब्धा कर्णवृत्ताग्रेत्युपपद्यते ॥ २७ $\frac{\text{१}}{\text{२}}$ ॥

इदानीमग्राज्ञानतः कोणवृत्तस्थरवेः शङ्कोरानयनमाह—

त्रिज्यावर्गार्धतोऽग्राज्यावर्गोनाद्द्वादशाहतात् ।। २८ ।।
पुनर्द्वादशनिघ्नाच्च लभ्यते यत् फलं बुधैः ।
शङ्कुवर्गार्धसंयुक्तविषुवद्वर्गभाजितात् ।। २९ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेव करणी नाम तां पृथक् स्थापयेद्बुधः ।
अर्कघ्नी विषुवच्छायाऽग्राज्यया गुणिता तथा ॥ ३० ॥
भक्ता फलाख्यं तद्वर्गसंयुक्तकरणीपदम् ।
फलेन हीनसंयुक्तं दक्षिणोत्तरगोलयोः ॥ ३१ ॥
याम्ययोर्विदिशोः शङ्कुरेवं याम्योत्तरे रवौ ।
परिभ्रमति शङ्कोस्तु शङ्कुरुत्तरयोस्तु सः ॥ ३२ ॥

अग्राज्या अग्रा तद्वर्गोनात् त्रिज्यावर्गार्धात् । शेषाद्द्वादशगुणात्, तस्मात् पुनर्द्वादशगुणात् शङ्कुवर्गार्धसंयुक्तविषुवद्वर्गभाजितात् । द्वादशवर्गार्धसंयुक्तविषुवद्भाववर्गेण भाजिताद्यत् फलं तदेव करणी नाम भवति । बुधो गणकस्तां करणीसंज्ञां पृथगेकत्र स्थापयेत् । अथ द्वादशगुणा पलभाऽग्रया गुणा तथा तेनैव हरेण द्वादशवर्गार्धसंयुक्तपलभावर्गेण भक्ता लब्धं फलाख्यं ज्ञेयम् । तस्य फलाख्यस्य वर्गेण संयुक्ता या करणी तस्याः पदं वर्गमूलं दक्षिणोत्तरगोलयोः क्रमेण फलेन फलाख्येन हीनसयुक्तं कार्यम् । दक्षिणगोले फलेन हीनमुत्तरगोले युक्तमित्यर्थः । एवं याम्ययोरग्निनैर्ऋत्योर्विदिशोः शङ्कुः स्यात् । शङ्कोः स्वपृष्ठस्थाने स्थापिताद् द्वादशाङ्गुलशङ्कोः सकाशाद्रवौ याम्योत्तरे याम्यादुत्तरभागे परिभ्रमति सति तु पूर्वागतः स शङ्कुरुत्तरयोर्विदिशोरीशानवायुकोणयोर्भवति । मध्याह्ने यदा शङ्कुत उत्तरे रविर्भ्रमति तदा पूर्वप्रकारेण याम्योर्विदिशोरागतः स एव शङ्कुरुत्तरयोर्विदिशोर्ज्ञेय इत्यर्थः । एवं यदा सौम्या क्रान्तिरक्षांशाधिका तदा भवति । अत्र गूढप्रकाशे रङ्गनाथव्याख्यानं न समीचीनम् । यद्यपि "शङ्कुर्नरो ना कथितः स एव" इत्यादिभास्करवचनेन शङ्कुशब्देन नरोगृह्यते तथाऽपि गणिते शङ्कुशब्देन 'गणितकर्ता' इति कुत्रापि नोपलभ्यते । एव सौरभाष्ये नृसिंहस्य 'शङ्कुर्नाम शङ्कुप्रकारः' इत्यपि व्याख्यानं न समीचीनम् । एवमाचार्येणेह पञ्चचत्वारिंशज्ज्यातोऽल्पायामग्रायां कोणशङ्कोरानयनं कृतमिति स्फुटं तदानयनोपपत्तित इति । सौरभाष्ये नृसिंहस्य 'द्युरात्रवृत्तस्य क्षितिजोपरि स्थितत्वात्' इत्यादिकथनं च निर्युक्तीति ।

अत्रोपपत्तिः । कोणवृत्तस्थरवेः क्षितिजोपरि यो लम्बः स एव कोणशङ्कुः । तस्य मूलात् पूर्वापररेखोपरि यो लम्बः स भुजः । तस्मादेव शङ्कुमूलाद्याम्योत्तररेखोपरि यो लम्बः सा कोटिः । शङ्कुमूलस्य कोणदृक्सूत्रे गतत्वादिह भुजकोटी मिथः समे । अतोऽत्र भुजवर्गो द्विगुणो भूकेन्द्राच्छङ्कुमूलपर्यन्तदृग्ज्याया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्ग इति स्थितिः। अथ कल्प्यते कोणशङ्कुमानम् = या। तदाऽक्षक्षेत्रानुपातेन शङ्कुतलम् = $\frac{\text{वि} \times \text{या}}{१२}$ । अग्रा = अ। पलभा = वि।

ततो याम्योत्तरगोलयोरग्राशङ्कुतलसंस्कारेण क्रमेण

$$\text{भुजः} = \text{अ} \pm \frac{\text{वि} \times \text{या}}{१२}$$ ।

$$\text{भुजवर्गः} = \text{अ}^2 \pm \frac{२\text{अ} \times \text{वि} \times \text{या}}{१२} + \frac{\text{वि}^2 \times \text{या}^2}{१२^2}$$ ।

ततो द्विगुणो भुजवर्गो दृग्ज्यावर्गसमः। स च शङ्कुवर्गोनत्रिज्यावर्गसमः। अतः

$$\text{त्रि}^2 - \text{या}^2 = २\,\text{अ}^2 \pm \frac{४\text{अ} \times \text{वि} \times \text{या}}{१२} + \frac{२\text{वि}^2 \times \text{या}^2}{१२^2}$$ ।

छेदगमेन

$$१२^2\text{त्रि}^2 - १२^2\,\text{या}^2$$
$$= २ \times १२^2\text{अ}^2 \pm ४ \times १२\ \text{अ} \times \text{वि} \times \text{या} + २\text{वि}^2 \times \text{या}^2$$ ।

द्वाभ्यामपवर्त्तनेन

$$१२^2\ \frac{\text{त्रि}^2}{२} - \frac{१२^2}{२}\text{या}^2$$
$$= १२^2\ \text{अ}^2 \pm २ \times १२\ \text{अ} \times \text{वि} \times \text{या} + \text{वि}^2 \times \text{या}^2$$ ।

समशोधनेन

$$१२^2\left(\frac{\text{त्रि}^2}{२} - \text{अ}^2\right) = \text{या}^2\left(\text{वि}^2 + \frac{१२^2}{२}\right) \pm २ \times १२\ \text{अ} \times \text{वि} \times \text{या}$$ ।

$\text{वि}^2 + \frac{१२^2}{२}$ अनेन पक्षयोर्विभक्तेन

$$\frac{१२^2}{\text{वि}^2 + \frac{१२^2}{२}}\left(\frac{\text{त्रि}^2}{२} - \text{अ}^2\right) = \text{या}^2 \pm २\ \frac{१२\ \text{अ} \times \text{वि}}{\text{वि}^2 + \frac{१२^2}{२}}\ \text{या}$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आचार्येण व्यक्तपक्षस्य करणीसंज्ञा, अव्यक्तगुणकार्धस्य च फलसंज्ञाकृताऽर्थात्

$$\frac{१२^२}{वि^२ \pm \frac{१२^२}{२}} = करणी = क ।$$

$$\frac{१२अ \times वि}{वि^२ + \frac{१२^२}{२}} = फलम् = फ ।$$

तदा

$$क = या^२ \pm २फ\, या$$

अतः $फ^२ + क = या^२ \pm २फ \times या + फ^२$

मूलग्रहणेन

$$या \pm फ = \sqrt{फ^२ + क}$$

$$\therefore या \sqrt{फ^२ + क} + फ$$

अर्थाद्दक्षिणगोले शङ्कुः $= \sqrt{फ^२ + क} - फ$ ।

उत्तरगोले शङ्कुः $= \sqrt{फ^२ + क} + फ$ ।

अत उपपद्यते कोणशङ्कोरानयनम् । यदा सौम्या क्रान्तिरक्षाधिका तदाऽहोरात्रवृत्तसमवृत्तयोः क्षितिजोद्धर्वे योगाभावादहोरात्रवृत्तस्यैशानवायुकोणवृत्तयोरेव सम्पातइति गोलदर्शनेन स्फुटम् । तदा तु वाय्वीशानयोरेव कोणशङ्कुरत "उत्तरयोस्तु सः" इत्याचार्यकथनं सयुक्तिकमिति ।

अत्रैव यदि $अ^२ > \frac{त्रि^२}{२}$ तदा करणीसंज्ञा ऋणात्मिका; तदा $\sqrt{फ^२ - क}$ इत्यस्य मानं द्विविधम् । ततः "अव्यक्तमूलर्णगरूपतोऽल्पं व्यक्तस्य पक्षस्य पदं यदि स्यात्" इति भास्करबीजविधिनोत्तरगोले कोणशङ्कुमानं द्विविधं दक्षिणगोले तु ऋणात्मकमानमसम्भवमतस्तदा क्षितिजोद्धर्वे सौम्यगोले कोणशङ्कुचतुष्ट्यं दक्षिणे तु कोणशङ्कोरभावो भवति"—इति सर्वं गोलावलोकनतः स्फुटम् ।

पञ्चचत्वारिंशज्ज्यातोऽल्पायामग्रायां भास्करेण सिद्धान्तशिरोमणावसकृत्प्रकारेण कोणशङ्कोरानयनं कृतम् । तद्यथा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"अग्राकृतिं द्विगुणितां त्रिगुणस्य वर्गात्
त्यक्त्वा पदं तदिह कोणनरोऽक्षभाघ्नः।
अर्कोद्धृतः फलयुजाऽसकृदग्रयाऽसौ
याम्ये फलेन वियुजा तु तया प्रसाध्यः" ॥

अत्र प्रथममाग्रासमानं स्थूलं भुजं प्रकल्प्य स्थूलः कोणशङ्कुरानीतः। तस्माच्छङ्कुतलमानीय पुनरग्राशङ्कुतलयोः संस्कारेणासकृद्भुजमानतः सूक्ष्मः कोणशङ्कुरानीतः। इदमानयनं न समीचीनं बहुत्र स्थले व्यभिचरति।

प्रथमागतस्थूलशङ्कुसाधितभुजवर्गस्य द्विगुणस्य त्रिज्यावर्गाधिकत्वात्। तद्यथा—

स्थूलशङ्कुः $= \sqrt{\text{त्रि}^2 - 2\text{अ}^2}$। उत्तरगोले याम्ययोर्विदिशोः स्थूल-भुज $= \frac{\text{वि}\times}{12}\sqrt{\text{त्रि}^2 - 2\text{अ}^2} - \text{अ}$ अयं यदा पञ्चचत्वारिंशज्ज्यासमस्तदा द्विगुणो भुजवर्गस्त्रिज्यासमः। अतः पञ्चचत्वारिंशज्ज्यया साम्येन

$$\text{ज्याप} = \frac{\text{वि}}{12}\sqrt{\text{त्रि}^2 - 2\text{अ}^2} - \text{अ}$$

$$\therefore 12\text{अ} + 12\ \text{ज्याप} = \text{वि}\sqrt{\text{त्रि}^2 - 2\text{अ}^2}$$

वर्गेण $\text{वि.}\times 2\text{त्रि}^2 - 2\text{वि.}\times 2\text{अ}^2 = 144(\text{अ}^2 + 2\text{ज्या प अ}\times\text{ज्या}^2\text{प})$

द्वाभ्यामपवर्त्तनेन

$$\text{ज्या}2\text{ प}\times\text{वि}^2 - \text{अ}^2\text{वि}^2 = 72\ \text{अ}^2 + 144\ \text{अ}\times\text{ज्याप} + 72\ \text{ज्या}^2\text{प}$$

समशोधनेन $\text{अ}^2(\text{वि}^2 + 72) + 144\ \text{अ}\times\text{ज्याप} = \text{ज्याप}^2(\text{वि}^2 - 72)$

$$\text{या अ}^2 + 2\,\frac{72\ \text{ज्याप}\times\text{अ}}{\text{वि}^2 + 72} = \frac{\text{ज्या}^2\text{प}(\text{वि}^2 - 72)}{\text{वि}^2 + 72}$$

वर्गपूर्त्तिकरणेन

$$\text{अ}^2 + 2\,\frac{72\ \text{ज्याप}}{\text{वि}^2 + 72}\,\text{अ} + \frac{72^2\text{ज्या}^2\text{प}}{(\text{वि}^2 + 72)^2} = \frac{72\ ^2\text{ज्या}\ ^2\text{प}}{(\text{वि}^2 + 72)^2}$$

$$+\frac{\text{ज्या}^2\text{प}(\text{वि}^4 - 72^2)}{(\text{वि}^2 + 72)^2} = \frac{\text{ज्या}2\text{प. वि}4}{(\text{वि}^2 + 72)^2}$$

मूलग्रहणेन

$$\text{अ} + \frac{72\ \text{ज्याप}}{\text{वि}^2 + 72} = \pm\frac{\text{वि}\times 2\text{ज्याप}}{\text{वि}^2 + 72}$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतोऽत्र धनमानमग्रायाः $=$ अ $= \frac{\text{ज्याप (वि}^{2} - ७२)}{\text{वि}^{2} + ७२}$

अस्यामग्रायां स्थूलभुजः पञ्चचत्वारिंशज्ज्यासमः। अल्पायां च स्थूलशङ्कोरधिकत्वाच्छङ्कुतलस्याधिकत्वात् तत्र स्थूलाग्राविशोधनेन स्थूलभुजस्य पञ्चचत्वारिंशज्ज्यातोऽधिकत्वाद्द्वितीयकोणशङ्कुवर्गस्य ऋणात्मकत्वादग्रे क्रिया व्यभिचरति। अतोऽत्र मत्सूत्रम्।

युग्माश्वोनाक्षप्रभावर्गनिघ्नी बाणाब्ध्यंशज्या द्विकाश्वैर्विभक्ता।
अक्षाच्छायावर्गयुक्तैः फलाच्चेदग्रा न्यूना स्यात् खिलं सौम्यगोले॥

इत्युपपद्यते। एवमत्र यदा पलभावर्गः $<$ ७२ तदाऽऽनीताग्राऽल्पायामग्रायां व्यभिचारः। पूर्वप्रकारे यदा पलभावर्गः$<$७२ तदा ऋणात्मिकाऽग्रा तु उत्तराग्रातो विपरीतदिक्काऽर्थाद्दक्षिणगोलीया भवति।

अथ तदा तदानीतदक्षिणाग्रातोऽधिकायामल्पायां वाऽग्रायां स्थूलभुजः पञ्चचत्वारिंशज्ज्यातोऽधिको भवतीत्यस्य विचारः।

तत्र तावत् प्रथमभुजज्यातो द्वितीयभुजज्या यद्यधिका तथा पञ्चचत्वारिंशज्ज्यातोऽल्पा तदा प्रथमभुजज्या कोटिज्यायोगो द्वितीयभुजज्याकोटिज्यायोगतोऽल्पो भवतीति उपपाद्यते। त्रिज्याव्यासेन उकगचघवृत्तार्धं कृतम्। तत्र उक $=$ प्रथमभुजज्या। तत्कोटिज्या $=$ कघ।



द्वितीयभुजज्या $=$ उग। तत्कोटिज्या $=$ गघ। उच $=$ पञ्चचत्वारिंशज्ज्या। उघरेखोपरि क स्थानात् कृतो लम्बः, ग स्थानात् उघरेखोपरि कृताल्लम्बादल्पो भवतीत्यत्र स्फुटम्। अतः, उकघजात्यफलात् उगघजात्यफलमधिकम्। वृत्तार्धे गतत्वात् त्रिभुजद्वयं जात्यं रेखागणिततः प्रसिद्धम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतः $\frac{\text{उग} \times \text{गघ}}{\text{२}} > \frac{\text{उक} \times \text{कघ}}{\text{२}}$

चतुर्गुणेन २ उग × गघ > २उक × कघ

परन्तु $\text{उघ}^{\text{२}} = \text{उग}^{\text{२}} + \text{गघ}^{\text{२}} = \text{उक}^{\text{२}} + \text{कघ}^{\text{२}}$

मूलग्रहणेन

उग+गघ>उक+कघ ।

अतः उपन्नम् “प्रथमभुजज्याकोटिज्यायोगः” इत्यादि ।

अथ यद्यानीता दक्षिणाग्रा $= \frac{\text{ज्याप}(\text{७२} - \text{वि}^{\text{२}})}{\text{७२} + \text{वि}^{\text{२}}} = \text{अ}_{\text{१}}$

तदधिका पञ्चचत्वारिंशज्ज्यालपाग्रा $= \text{अ}_{\text{२}}$

तदा स्थूलभुजः पञ्चचत्वारिंशज्ज्यासमः

$= \text{अ}_{\text{१}} + \frac{\text{वि}}{\text{१२}}\sqrt{\text{त्रि} \times {}^{\text{२}} - \text{२अ}_{\text{१}}{}^{\text{२}}}$

द्वितीय भुजः $= \text{अ}_{\text{२}} \times \frac{\text{वि}}{\text{१२}}\sqrt{\text{त्रि२} - \text{२अ}_{\text{२}}}^{\text{२}}$

अनयोः कतरोऽधिकः—इत्येतदर्थं कल्प्यते

$$\text{अ}_{\text{१}} + \frac{\text{वि}}{\text{१२}}\sqrt{\text{त्रि}^{\text{२}} - \text{२अ}_{\text{२}}{}^{\text{२}}} \lesseqgtr \text{अ}_{\text{२}}{}^{\text{२}} + \frac{\text{वि}}{\text{१२}}\sqrt{\text{त्रि}^{\text{२}} - \text{२अ}_{\text{२}}}^{\text{२}}$$

$$\text{वा अ}_{\text{१}} - \frac{\text{अ}_{\text{१}} \times \text{वि}\sqrt{\text{२}}}{\text{१२}} + \frac{\text{अ}_{\text{१}} \times \text{वि}\sqrt{\text{२}}}{\text{१२}} + \frac{\text{वि}}{\text{१२}}\sqrt{\text{त्रि}^{\text{२}} - \text{२अ}_{\text{१}}}^{\text{२}}$$

$$\lesseqgtr \text{अ}_{\text{२}} - \frac{\text{अ}_{\text{२}} \times \text{वि}\sqrt{\text{२}}}{\text{१२}} + \frac{\text{अ}_{\text{२}} \times \text{वि}\sqrt{\text{२}}}{\text{१२}} + \frac{\text{वि}}{\text{१२}}\sqrt{\text{त्रि}^{\text{२}} - \text{२अ}_{\text{२}}}^{\text{२}}$$

$$\text{या अ}_{\text{१}} \left(\frac{\text{१२} - \text{वि}\sqrt{\text{२}}}{\text{१२}}\right) + \frac{\text{वि}}{\text{१२}}\left(\text{अ}_{\text{२}}\sqrt{\text{२}} + \sqrt{\text{त्रि}^{\text{२}} - \text{२अ}_{\text{१}}{}^{\text{२}}}\right)$$

$$\lesseqgtr \text{अ}_{\text{२}} \left(\frac{\text{१२} - \text{वि}^{\text{२}}\sqrt{\text{२}}}{\text{१२}}\right) + \frac{\text{वि}}{\text{१२}}\left(\text{अ}_{\text{२}}\sqrt{\text{२}} + \sqrt{\text{त्रि}^{\text{२}} - \text{२अ}_{\text{१}}{}^{\text{२}}}\right)$$

अत्र यदि परमो विषुवतीवर्गः = ७२ं तदा वि = $\text{६}\sqrt{\text{०}}$

गतः $\text{वि}\sqrt{\text{२}} = \text{६}\sqrt{\text{२}}\sqrt{\text{२}} = \text{१२}$ ।

अत $\frac{\text{१२} - \text{वि}\sqrt{\text{२}}}{\text{१२}}$ अयं गुणकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वदा धनः । तेन $अ_१ \left(\frac{१२ - वि\sqrt{२}}{१२}\right) < अ^२ \left(\frac{१२ - वि\sqrt{२}}{१२}\right)$

अथ यदि कस्यापि चापस्य भुजज्या $= अ_१\sqrt{२}$ ।

तदधिका भुजज्या च $अ_२\sqrt{२}$ तदा पूर्वप्रतिपादितसिद्धान्ततः

$$\frac{वि}{१२}\left(अ_१\sqrt{२} + \sqrt{त्रि^२ - २अ_१^२}\right)$$

$$< \frac{वि}{१२}\left(अ_२\sqrt{२} + \sqrt{त्रि^२ - २अ_२^२}\right)$$

यदि $अ_२\sqrt{२}$ इयं द्वितीयभुजज्या पञ्चचत्वारिंशज्ज्याल्पा ।

तदा प्रथमपक्षो द्वितीयपक्षादल्प इति सिध्द्यति ।

अथ यदि परमा पलभा $= ६\sqrt{२}$ । तथा परमक्रान्तिज्या $=$ ज्याप तदा परमाग्रावर्गमानमक्षक्षेत्रानुपातेन $=$ पअ^२ $=$

$$\frac{पक^२ \times ज्या^२प}{१२^२} = \frac{(१२^२ + ७२) + ज्या^२प}{१२^२} = \frac{(१४४ + ७२)\, ज्या^२प}{१४४}$$

$$= \frac{२१६ \times ज्या^२प}{१४४} = \frac{१८ \times ज्या^२प}{१२} = \frac{३ \times ज्या^२प}{२}$$

परमाग्रावर्गो द्विगुणो जातः परमद्वितीयभुजज्यावर्गः

$= ३\ ज्या^२\ प = ३\ (१३९७)^२ = ३ \times १९५१६०९ = ५८५४८२७$ ।

पञ्चचत्वारिंशज्ज्यावर्गः $= \frac{त्रि^२}{२} = \frac{३४३८^२}{२} = \frac{११८१९८४४}{२}$

५९०९·९ २२ । अतस्तत्र परमपलभायां परमाग्रावर्गो द्विगुणः पञ्चचत्वारिंशज्ज्यावर्गतोऽल्पः ।

अतो मत्सूत्रावतारः ।

यदि फलमधनं स्यात् तर्ह्यपाग्गोलयाते
फलत इह यदाऽग्राऽनल्पिका दुष्टमर्के ।
भवति विबुधवन्द्यो वासना वासना यः
सगुणक निगदेच्चेन्निर्जरैरेव तुल्यः ॥ २८–३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं कोणवृत्तस्थेऽर्के दृग्ज्यां ततश्छायाकर्णावाह—

तत्त्रिज्यावर्गविश्लेषान्मूलं दृग्ज्याऽभिधीयते ।

स्वशङ्कुना विभज्याप्ते दृक्त्रिज्ये द्वादशाहते ॥ ३३ ॥

छायाकर्णौ तु कोणेषु यथास्वं देशकालयोः ।

तस्य कोणशङ्कोस्त्रिज्यावर्गस्यान्तरान्मूलं दृग्ज्या कथ्यते । दृक्त्रिज्ये दृग्ज्यात्रिजीवे द्वादशाहते स्वशङ्कुना स्वकोणशङ्कुना विभज्य ये आप्ते ते देशकालयोर्यथास्वं यथासम्भवं कोणेषु छायाकर्णौ भवतः । यस्मिन् देशे यस्मिन् काले यस्मिन् कोणे कोणशङ्कोः सम्भवस्तत्र छायाकर्णौ भवतः इत्यर्थः ।

अत्रोपपत्तिः । दृग्ज्याभुजः । शङ्कुःकोटिः । त्रिज्या कर्णः । इति जात्याच्छङ्कुतो दृग्ज्यानयनं स्फुटम् । ततः शङ्कुकोट्या दृग्ज्या भुजस्त्रिज्या कर्णश्चोपलभ्यते तदा द्वादशकोट्या किमिति । लब्धमाद्यस्थाने छाया द्वितीयस्थाने च छायाकर्ण इत्युपपन्नम् । भास्करेणापि सौरवदेव "दृग्ज्यात्रिजीवे रविसङ्गुणे ते शङ्कूद्धृते भाश्रवणौ भवेताम्" इत्यादिना छायाकर्णौ साधितौ ॥ ३२–३३½ ॥

एवं दिग्नियमेन छायामुक्त्वाऽधुना कालनियमेन तामाह—

त्रिज्योदक्चरजायुक्ता याम्यायां तद्विवर्जिता ॥ ३४ ॥

अन्त्या नतोत्क्रमज्योना स्वाहोरात्रार्धसङ्गुणा ।

त्रिज्याभक्ता भवेच्छेदो लम्बज्याघ्नोऽथ भाजितः ॥ ३५ ॥

त्रिभज्यया भवेच्छङ्कुस्तद्वर्गं परिशोधयेत् ।

त्रिज्यावर्गात् पदं दृग्ज्या छायाकर्णौ तु पूर्ववत् ॥ ३६ ॥

उदक्चरजा उदक्चरज्या या तया त्रिज्या युक्ता कार्या । याम्यायां दक्षिणगोले त्रिज्या तया चरज्यया विवर्जिता कार्या । एवमन्त्या भवेत् । सा नतकालस्योत्क्रमज्ययोना स्वाहोरात्रार्धेन द्युज्यया संगुणा त्रिज्याभक्ता तदा छेद इष्टहृतिःस्यात् । अथ स छेदो लम्बज्यागुणितस्त्रिभज्यया भाजितः शङ्कुर्भवेत् । त्रिज्यावर्गात् तद्वर्गं गणकः परिशोधयेत् । शेषस्य पदं दृग्ज्या भवति । ततः पूर्ववत् "स्वशङ्कुना विभज्याप्ते" इत्यादिनाऽभीष्टे काले छायाकर्णौ भवत इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः। ग्रहस्य तात्कालिकमहोरात्रवृत्तं क्षितिजे यत्र स्थानद्वये लग्नं तद्बद्धसूत्रमुदयास्तसूत्रमुच्यते। उन्मण्डले च तदेवाहोरात्रवृत्तं यत्र स्थानद्वये लग्नं तद्बद्धसूत्रं व्याससूत्रं च कथ्यते। ग्रहबिम्बकेन्द्रादुदयास्तसूत्रोपरि यो लम्बः स छेद इष्टहृतिश्चोच्यते। सममण्डलस्थे ग्रहे तस्या इष्टहृतेस्तद्धृतिसंज्ञा याम्योत्तरवृत्तस्थे ग्रहे च हृतिसंज्ञेति ध्येयम्। इयमिष्टहृतिरहोरात्रवृत्तधरातले। सैव त्रिज्यापरिणता त्रिज्यावृत्ते भवति। उदयास्तव्याससूत्रयोरन्तरं सर्वत्राहोरात्रवृत्ते कुज्या। ग्रहविम्बकेन्द्राद्व्यासरेखापर्यन्तमिष्टहृतेः खण्डं कला। उत्तरगोले व्याससूत्रादध उदयास्तसूत्रम्। दक्षिणगोले तूपरि। अथ मध्याह्ने तु ग्रहविम्बकेन्द्राद्व्याससूत्रपर्यन्तं हृतेः खण्डं द्युज्या। अत उत्तरदक्षिणगोलयोः क्रमेण हृतिः $=$ द्यु$\pm$कुज्या। इयं त्रिज्यापरिणता जाताऽन्त्या $=$ अन्त्या $= \frac{\text{त्रि(द्यु}\pm\text{कुज्या)}}{\text{द्यु}}$

$= \text{त्रि} \pm \frac{\text{त्रि} \times \text{कुज्या}}{\text{द्यु}} = \text{त्रि} \pm$ ज्याच।

इयमन्त्या नतोत्क्रमज्यया हीना इष्टान्त्या सा द्युज्यापरिणता इष्टहृतिर्वा छेदः स्यादित्युपपन्नं छेदानयनम्। ग्रहविम्बकेन्द्रात् क्षितिजोपरि लम्ब इष्टशङ्कुः कोटिः। इष्टहृतिः कर्णः। शङ्कुमूलादुदयास्तसूत्रोपरिलम्बः शङ्कुतलं भुजः। इत्यक्षक्षेत्रम्। ततोऽनुपातो यदि त्रिज्याकर्णेन लम्बज्या कोटिस्तदा छेदेन किमिति। लब्ध इष्टशङ्कुः $= \frac{\text{ज्याल} \times \text{छे}}{\text{त्रि}}$। ततो दृग्ज्यानयनं छायाकर्णसाधनं च पूर्वोक्तप्रकारेण सुगमम्। इदं सर्वं गोलोपरि स्फुटं दृश्यते। 'नतोत्क्रमज्या शर इत्यनेन हानाऽन्त्यका' इत्यादिना भास्करोऽप्यमुमेव प्रकारमाह ॥ ३४-३६ ॥

इदानीं छायातो नतकालमाह—

अभीष्टच्छाययाऽभ्यस्ता त्रिज्या तत्कर्णभाजिता।
दृग्ज्या तद्वर्गसंशुद्धात् त्रिज्यावर्गाच्च यत् पदम् ॥ ३७ ॥
शङ्कुः स त्रिभजीवाघ्नः स्वलम्बज्याविभाजितः।
छेदः स त्रिज्ययाऽभ्यस्तः स्वाहोरात्रार्धभाजितः ॥ ३८ ॥
उन्नतज्या तया हीना स्वान्त्या शेषस्य कार्मुकम्।
उत्क्रमज्याभिरेवं स्युः प्राक्पश्चार्धनतासवः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिज्याऽभीष्टच्छायया गुणा तस्याश्छायाकर्णेन भाजिता लब्धःशङ्कुः स्यात्। स त्रिज्यया गुणितो द्युज्यया विभाजित उन्नतज्या उन्नतकालवशेन ज्याऽर्थादिष्टान्त्या भवेत्। तया स्वकीयान्त्या हीना नतोत्क्रमज्या स्यादतःशेषस्य नतोत्क्रमज्यारुपस्य उत्क्रमज्याभिरुत्क्रमज्याखण्डैः कार्मुकं चापं प्राक्पश्चात्कपाले नतासवः स्युः। एवं पूर्वप्रकारवैपरीत्येनात्र नतासवो भवन्तीत्यर्थः।

अत्रोपपत्तिः। प्रागुक्तप्रकारोपपत्तिवैपरीत्येनातिसुगमा ॥ ३७-३९॥

इदानीं कर्णवृत्ताग्रातो रविज्ञानमाह—

इष्टाग्राघ्नी तु लम्बज्या स्वकर्णाङ्गुलभाजिता।

क्रान्तिज्या सा-त्रिजीवाघ्नी परमापक्रमोद्धृता ॥ ४० ॥

तच्चापं भादिकं क्षेत्रं पदैस्तत्र भवो रविः।

लम्बज्या स्वेष्टकर्णवृत्ताग्रया गुणिता स्वच्छायाकर्णाङ्गुलेन भाजिता लब्धा क्रान्तिज्या स्यात्। सा त्रिजीवागुणा परमापक्रमेण परमापक्रमजीवया भक्ता दोर्ज्या स्यादिति। तस्या दोर्ज्यायाश्चापं कार्यं तस्मात् पदैर्भादिकं क्षेत्रं ज्ञेयं तदा तस्मिन् समये भव उत्पन्नो रविः स्यात्। वर्षाद्यपादे चापमेव रविः। द्वितीये चापोनभार्धः। तृतीये चापयुक्तभार्धः। चतुर्थे चापोनभगणः सायनो रविः स्यादित्यर्थः। पदज्ञानं भास्कराचार्येण ऋतुचिह्नैरुक्तम्। काश्मीरादिदेशेषु प्रायः ऋतुचिह्नानि न भवन्ति। अतो दिनद्वये मध्याह्ने छायाज्ञानतः पदज्ञानं कार्यम्। तच्चैवम्। मध्याह्ने शङ्कुच्छाया पलभाल्पिका द्वितीयदिनेऽपचयिनी च तदा प्रथमपादः। मध्याह्ने छाया पलभाल्पिका द्वितीयदिने चोपचयिनी तदा द्वितीयपादः। मध्याह्नच्छाया पलभाधिकोपचयिनी च तदा तृतीयपादः। एवं मध्याह्नच्छाया पलभाऽधिकाऽपचयिनी च तदा चतुर्थपादः। एतत्सर्वं सिद्धान्ततत्त्वविवेके कमलाकरेण समीचीनं विलिखितम्। एवमत्र सायनो रविरुत्पद्यत इति पूर्वमेव प्रतिपादितम्।

अत्रोपपत्तिः। छायाकर्णेन कर्णवृत्ताग्रा तदा त्रिज्यया किमिति। जाता

स्वाग्रा $= \frac{\text{त्रि} \times \text{कअ}}{\text{छाक}}$। ततस्त्रिज्याकर्णेन लम्बज्याकोटिस्तदाऽग्राकर्णेन किं लब्धा

क्रान्तिज्या $= \frac{\text{त्रि} \times \text{कअ} \times \text{ज्यालं}}{\text{छाक} \times \text{त्रि}} = \frac{\text{कअ} \times \text{ज्यालं}}{\text{छाक}}$ अत उपपन्नं क्रान्तिज्यानयनम्। ततः परमक्रान्तिज्यया त्रिज्यातुल्या दोर्ज्या तदाऽभीष्टक्रान्तिज्यया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किम् । जाता दोर्ज्या $= \frac{\text{त्रि} \times \text{ज्याक्रा}}{\text{ज्यापक्रा}}$ । शेषोपपत्तिः स्फुटा ॥ ४०–४०½

इदानीं भाभ्रमरेखामाह—

इष्टेऽह्नि मध्ये प्राक्पश्चाद्धृते बाहुत्रयान्तरे ॥ ४१ ॥
मत्स्यद्वयान्तरयुतेस्त्रिस्पृक्सूत्रेण भाभ्रमः ।

इष्टेऽह्नि मध्ये इष्टदिनमध्ये प्राक्कपाले पश्चात्कपाले वा पूर्वापरसूत्राद्यथादिशि बाहुत्रयान्तरे चिन्हे धृते स्थापिते तत्र मत्स्यद्वयान्तरयुतेः केन्द्रात् त्रिस्पृक्सूत्रेण पूर्वस्थापितचिह्नत्रयस्पृक्सूत्रेण यद्वृत्तं सोऽत्र भाभ्रमो भवति। पूर्वापरसूत्राद्यथादिक् छायाग्रपूर्वापरसूत्रान्तररूपं भुजत्रयं दत्त्वा तच्चिह्नोपरि गतं वृत्तं भाभ्रमो भवति, तस्मिन् दिने दिङ्मध्यस्थापितशङ्कोश्छाया तस्मिन् भ्रमिष्यतीति। भुजाग्रे छायाग्रमस्ति। अतः पूर्वापरसूत्रज्ञानाभावे दिङ्मध्यस्थापितशङ्कोश्छायात्रयाग्रचिह्नानां ज्ञानेन तदुपरि गतं वृत्तं च भाभ्रम इति फलितार्थः। चिह्नत्रयोपरिगतवृत्तस्य केन्द्रज्ञानार्थं मत्स्यद्वयान्तरसूत्रयुतिः कृता। चिह्नद्वयान्तर्गतरेखार्धविन्दूपरि लम्बकरणार्थं मत्स्यरचना पूर्वैः क्रियते। इयमेव रेखागणितचतुर्थाध्यायस्य चतुर्थी प्रतिज्ञा।

क्षेत्रदर्शनम्



अत्र सौरभाष्ये नृसिंहेन "यो मत्स्यपुच्छमुखनिर्गतरज्जुयोगस्तस्मात् प्रभाचितयचिह्नशिरोऽवगाहि। वृत्तं लिखेन्न विजहाति हि तस्य रेखां छाया कुलस्थितिमिवामलवंशजा स्त्री" इति लल्लवाक्यप्रमाणमेवाभिहितं न काचिदुपपत्तिः प्रदर्शिता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः। चिन्हत्रयोपरिगतवृत्तस्य केन्द्रज्ञानं रेखागणितचतुर्थाध्यायेन स्फुटम्। रवेरहोरात्रवृत्तमेकस्मिन् दिने यदि स्थिरं कल्प्यते क्रान्तेश्चलनाल्पत्वात्तदा "मेरुपृष्ठे सुखासीना ऋषयः" इत्यादि सूर्यसिद्धान्तप्रथमश्लोकटीकावचनेन सूर्यसिद्धान्तरचना मेरौ जाताऽतो मेरौ च भाभ्रमो वृत्ते भवति, अतस्तत्र सौरो भाभ्रमः समीचीनः। अन्यत्र तु वृत्ते भाभ्रमो न भवति-इति "भात्रितयाद्भाभ्रमणं न सत्" इत्यादि भास्करेण समीचीनमुक्तं स्वगोलाध्याये। वस्तुतः, एकस्मिन् दिनेऽहोरात्रवृत्तस्य स्थिरत्वे परमक्रान्त्यधिकाक्षदेशे भाभ्रमोऽतिपरवलये परमक्रान्त्यल्पाक्षदेशे दीर्घवृत्ते मेरौ च वृत्ते भवतीति सर्वं मदीयभाभ्रमरेखानिरूपणे समुपादितमस्तीति किमत्र ग्रन्थविस्तरेण विशेषज्ञानार्थं स एव ग्रन्थो द्रष्टव्यः॥ ४१-४१½ ॥

इदानीं लङ्कोदयासु साधनमाह—

त्रिभद्युकर्णार्धगुणाः स्वाहोरात्रार्धभाजिताः॥ ४२ ॥
क्रमादेकद्वित्रिभज्यास्तच्चापानि पृथक् पृथक्।
स्वाधोऽधः परिशोध्याथ मेषाल्लङ्कोदयासवः॥ ४३ ॥

एकद्वित्रिराशिज्याः त्रिभद्युकर्णार्धेन परमाल्पद्युज्यया गुणाः स्वस्वद्युज्याभिर्भाज्याः।

अथ फलानां चापानि पृथक् पृथक् स्वाधोऽधः परिशोध्य प्रथमं यथास्थितम्। द्वितीयात् प्रथमं परिशोध्य, तृतीयाद् द्वितीयं परिशोध्य, मेषात् क्रमाल्लङ्कोदयासवः साध्याः। प्रथमं मेषस्य, द्वितीयं वृषस्य, तृतीयं मिथुनस्य लङ्कोदयासुमानं भवतीत्यर्थः।

अत्रोपपत्तिः—क्रान्तिवृत्तनाडीवृत्तसम्पातात् क्रान्तिवृत्ते मेषादिचापांशाः कर्णः। तत्र गतध्रुवप्रोते क्रान्त्यंशा भुजः। नाडीवृत्ते सम्पाताद् ध्रुवप्रोतावधि विषुवांशा कोटिः। इति चापजात्ये सम्पातकोणस्य परक्रान्तिसमस्य ज्ञानात् चापीयत्रिकोणमित्या विषुवांशज्या $= \frac{\text{ज्याभु} \times \text{पद्यु}}{\text{द्यु}}$। ततः सर्वेषां चापानि नाडीक्रान्तिवृत्तसम्पातादागतानि शुद्धराश्युदयासुज्ञानार्थमधोऽधः परिशोधितानि। भास्कराचार्येणापि "मेषादिजीवास्त्रिगृहद्युमौर्व्या क्षुण्णा हृताः स्वस्वदिनज्यया वा" इत्यादिनाऽयं सौरः प्रकार एव सिद्धान्तशिरोमणावभिहितः।

पूर्वोक्तं सौरं क्रान्त्यानयनमिह च लङ्कोदयानयनमेव सम्प्रति प्रसिद्धचापीयत्रिकोणमितिप्रकाराणां मूलमिति भृशं विचिन्त्यं बुद्धिमद्भिः॥ ४२-४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं निष्पन्नानसून् स्वदेशोदयासूंश्चाह—

खागाष्टयोऽर्थगोऽगैकाः शरत्र्यङ्कहिमांशवः ।
स्वदेशचरखण्डोना भवन्तीष्टोदयासवः ॥ ४४ ॥

व्यस्ता व्यस्तैर्युताः स्वैः स्वैः कर्कटाद्यास्ततस्त्रयः ।
उत्क्रमेण षडेवैते भवन्तीष्टास्तुलादयः ॥ ४५ ॥

पूर्वप्रकारेण मेषस्यासवः = १६७० । वृषस्य = १७९५ । मिथुनस्य = १९३५ । एते स्वदेशीयमेषादिचरखण्डैः पूर्वसाधितैरूनाः इष्टे स्वदेशे मेषादित्रयाणामुदयासवो भवन्ति । मेषादित्रयाणां निरक्षोदया व्यस्ताः स्वैः स्वैर्मेषादिचरखण्डैर्व्यस्तैर्युतास्तदा ततोऽनन्तरं कर्कटाद्यास्त्रयः—उदया भवन्ति ।

ते मेषादिचरखण्डैर्व्यस्तैर्युताः स्वदेशे कर्कटादित्रयाणामुदया भवन्तीत्यर्थः । एते षट् उत्क्रमेण इष्टास्तुलोदयाः स्वदेशे तुलादीनामुदया भवन्तीत्यर्थः ।

अत्रोपपत्तिः । मेषादित्रयो राशयश्चरखण्डाल्पकाले स्वदेशे उद्गच्छन्ति कर्कटाद्याश्च चरखण्डाधिकालेनेति सर्वं गोलोपरि स्फुटं दृश्यते । भास्करेण सिद्धान्तशिरोमणावपि विस्तरतो विलिखितम्, अतः किमु ग्रन्थगौरवेणेति ।

अत्र निरक्षीयद्वितीयतृतीयोदययोर्भास्करोदिताभ्यां भेदः । तद्भेदकारणं च भास्करेण जीवानां स्थूलत्वात् तत्रैव प्रतिपादितम् ॥ ४४—४५ ॥

इदानीं गतभोग्यासुसाधने विशेषमाह—

गतभोग्यासवः कार्या भास्करादिष्टकालिकात् ।

इष्टकालिकात्, तात्कालिकात्, अर्कात्, सायनार्काद् वक्ष्यमाणप्रकारेण गतासवो भोग्यासवश्च कार्या इति—

स्वोदयासुहता मुक्तभोग्या भक्ताः खवह्निभिः ॥४६॥

अभीष्टघटिकासुभ्यो भोग्यासून् प्रविशोधयेत् ।
तद्वत् तदेष्यलग्नासूनेवं यातात् तथोत्क्रमात् ॥४७॥

शेषं चेत् त्रिंशताऽभ्यस्तमशुद्धेन विभाजितम् ।
भागहीनं च युक्तं च तल्लग्नं क्षितिजे तदा ॥४८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तात्कालिकसायनरवेर्भुक्ता वा भोग्या अंशा, यस्मिन् राशौ रविर्वर्तते तस्य स्वदेशे य उदयासवस्तैर्हताः ख वह्निभिः—३० भक्ता लब्धा, रवेर्भुक्तासवो भोग्यासवो वा भवन्ति।

अथ क्रमलग्नसाधने सावनेष्टघटिकासुभ्यो भोग्यासून् प्रविशोधयेत्। ततो रविनिष्ठराशेरनन्तरं यावन्त एष्यलग्नानामेष्यराशीनामुदयासवः शुध्यन्ति, तानसूंश्च तद्वत् तत्र विशोधयेत्। उत्क्रमलग्नसाधने चेष्टघटिकासुभ्यो यातान् भुक्तासून् तथा गतराश्युदयासूंश्चोत्क्रमाद् विशोधयेत्। मेषानन्तरं मीनस्य, मीनानन्तरं कुम्भस्येत्यादि।

अथ विशोधनेन चेच्छेषम् तदा तत् त्रिंशता हतं अशुद्धेनाशुद्धराश्युदयासुमानेन विभाजितं कार्यम्। लब्धैर्भागैरुत्क्रमलग्नसाधने विशुद्धराशिसंख्याहीना क्रमसाधने च युक्ता तदा क्रान्तिवृत्तस्य यः प्रदेशः क्षितिजे लग्नः, तदेव सायनं लग्नं स्यात्।

अत्रोपपत्तिः—उदये रविरेव लग्नम् ततः क्रमेण रवेर्भोग्यभागा एष्या राशयो वर्त्तमानराशेर्भुक्तांशाश्चोद्गच्छन्ति। अतो भोग्यासु—अग्रिमराश्युदयासु—वर्त्तमानराशिभुक्तासु—योगसमं नाक्षत्रीष्टघटिकासुमानं स्यात्, अतो विलोमेन वर्त्तमानराशिभुक्तांशमानमानीतम्। उत्क्रमलग्नसाधने चास्माद्विपरीता क्रिया।

अत्र तात्कालिकार्कभोग्यासुशोधनेन सावनेष्टघटिका नाक्षत्र्यो घटिकाः कृता भवन्ति—इति सर्वं "लग्नार्थमिष्टघटिका यदि सावनास्ताः" इत्यादिवासनायां भास्करेण स्वगोलाध्याये समुपपादितं किमत्र ग्रन्थगौरवेण।

राशयः किल क्रान्तिवृत्ते, अत एका कला नैकेनासुनोद्गच्छति क्रान्तिवृत्तस्य तिरश्चीनत्वात्। अतोऽनुपातेन भुक्तभोग्यासवः शेषतो वर्त्तमानराशेर्भुक्तभोग्याभागासवश्च स्थूला आयान्ति। अत एव भास्करः—"क्षेत्राणां स्थूलत्वात् स्थूला उदया भवन्ति राशीनाम्। सूक्ष्मार्थी होराणां कुर्याद् दृक्काणकानां वा" इत्युक्तवान्।

अथ सूक्ष्मं लग्नानयनमुच्यते—प्रथममिष्टकालतो रवेर्मध्यविषुवांशाः, ततो दशमलग्नमानं क्रान्तिवृत्तयाम्योत्तरवृत्तोत्पन्नकोणमानं यष्टिसंज्ञं दशमक्रान्तिकोटिमानं च ज्ञेयम्। अथ दशमलग्नात् क्षितिजावधि क्रान्तिवृत्ते कर्णः। दशमलग्नात् क्षितिजावधि याम्योत्तरवृत्ते दशमलग्नस्योत्तरगोले तद्द्युज्याचापाक्षांशयोगः कोटिः। दक्षिणगोले त्र तदन्तरसमा कोटिर्भवति। कोटिकर्णान्तर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतकोणो यष्टिचापसमोऽत्र परमक्रान्तिसंज्ञः कल्प्यः । ततः चापीयत्रिकोणमितितः कोटिपरमक्रान्तिज्ञानतः कर्णमानं सुबोधम् । कर्णदशमलग्नयोगसमं च सायनलग्नं स्फुटम्, अतो मत्सूत्रावतारः ।



आकाशमध्यविषुवांशवशात्प्रकुर्याद्यष्टिं दिवाकरमपक्रमकोटिभागम् ।
यष्टिं जिनांशजगुणं विषुवांशकं च अक्षाढ्यहीनदिनभागमितं क्रमेण ॥
सौम्यानुदग्गोलगते प्रकल्प्य साध्यो भुजांशोऽथ भुजांशखयोः ।
युतेर्मितं स्वोदयलग्नमानं भवेत् स्फुटं गोलविदां बुधानाम् ॥

एवं लाघवतः स्फुटलग्नमानं सिध्यति । सिद्धान्तशिरोमणेष्टिप्पण्यां च संशोधकोक्तलग्नानयनप्रकारो गौरवाद् व्यभिचाराच्च नादरणीय इति ॥४६-४८॥

इदानीं दशमलग्नानयनमाह—

प्राक्पश्चान्नतनाडीभिस्तस्माल्लङ्कोदयासुभिः ।
भानौ क्षयधने कृत्वा मध्यलग्नं तदा भवेत् ॥ ४९ ॥

ऊर्ध्वयाम्योत्तरवृत्ताद्यावता कालेन रविः प्राक्कपाले नतः स प्राग्नतः । पश्चिमकपाले च तदूर्ध्वयाम्योत्तरवृत्ताद्यावता कालेन नतः स पश्चिमनतः । इति नतपरिभाषा केशवजातकपद्धत्यादौ प्रसिद्धा । तस्मात् पूर्वोदितलग्नानयनात् प्राग्नतनाडीभिर्लङ्कोदयासुभिश्च यत् फलं तद्भानौ क्षयं कृत्वा पश्चान्नतनाडीभिश्च यत् फलं तद्रवौ धनं कृत्वा यद् भवेत् तदेव तदा मध्यलग्नं दशमलग्नं भवेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः—इष्टसमये क्रान्तिवृत्तस्य यः प्रदेशो याम्योत्तरवृत्ते लग्नस्तदेव दशमलग्नं मध्यलग्नं चोच्यते। "मध्यलग्नमिति दक्षिणोत्तरे' इति भास्करोक्तेश्च।

अथ प्राग्नते रविगतध्रुवप्रोतं यत्र नाडीमण्डले लग्नं तस्माद्याम्योत्तरवृत्तावधि नाडीमण्डले नतकालः। तत्समे निरक्षोदयासुमाने क्रान्तिवृत्ते क्षेत्रांशा दशमरव्यन्तरांशास्ते यदि रवेर्विशोध्यन्ते तदा दशमलग्नं भवेत्। एवं पश्चिमनते तेऽन्तरांशा रवौ क्षिप्यन्ते तदा दशमलग्नं भवतीति गोलस्थित्या सर्वं स्फुटम्। सिद्धान्तसम्राजि सायनलग्नस्य मेषादेः सकाशात् स्वोदयासुमानमानीय तत्र निरक्षमकरोदयमानादितः शोधनं कृत्वा पूर्ववत् शेषतोऽनुपातेन वर्त्तमानराशेर्भुक्तांशान् प्रसाध्य नतं विनैव दशमलग्नमानीतम्, तच्च गोलयुक्त्या समीचीनमेव, स्वदेशे मेषादौ क्षितिजं गते याम्योत्तरवृत्ते दशमलग्नस्य मकरादौ गतत्वात्।

तथा च तद्वाक्यम्:—

मेषादिशुद्धोदययुक्तशेषान्मृगादिलङ्कोदयका विशोध्याः।

ततोऽवशेषात् खगुणैर्विनिघ्नादशुद्धलङ्कोदयमानभक्तात्।

लवादिमेषादिकशुद्धमाढ्यं चलांशहीनं दशमाख्यलग्नम्।— इति ॥४९॥

इदानीं लग्नादिष्टकालज्ञानमाह—

भोग्यासूनूनकस्याथ भुक्तासूनधिकस्य च।
सम्पिण्ड्यान्तरलग्नासूनेवं स्यात् कालसाधनम् ॥५०॥

सूर्यादूने निशाशेषे लग्नेऽर्कादधिके दिवा।
भचक्रार्धयुताद् भानोरधिकेऽस्तमयात् परम् ॥५१॥

॥ इति त्रिप्रश्नाधिकारः ॥ ३ ॥

सायनसूर्यलग्नयोर्मध्ये य ऊनस्तस्य भोग्यासूनधिकस्य भुक्तासून् अथ तयोरन्तरे यानि लग्नानि तेषामुदयासूंश्च सम्पिण्ड्य संयोज्य एवं कालसाधनं स्यात्। सर्वेषां योग एवं नाक्षत्रेष्टकालासवः स्युः। सावनेष्टघटिकाज्ञानार्थमसकृत् कर्म कर्त्तव्यमित्यर्थाज्ज्ञायते। अथवा रविगत्युत्पन्नासुयुतभदिनासुमानेन रविस्फुटसावनदिनासुतुल्येन षष्टिघटिकास्तदानीतनाक्षत्रेष्टासुमानेन किमित्यनुपातेन व्यवहारयोग्याः सावनेष्टघटिकाः स्युः। लग्ने सूर्यादूने सति पूर्वप्रकारेण य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इष्टकालः स च रात्रिशेषे स्यात्। आनीतेष्टकालानन्तरं सूर्योदयो भविष्यतीति तदा वेदितव्यम्। अथार्कादधिके लग्ने तु दिवेष्टकालः सूर्योदयादागत इष्टकालो ज्ञेय इति। षड्राशियुतादर्कादधिके च लग्ने स च पूर्वागत इष्टकालोऽस्तमयात् परं रव्यस्तानन्तरं ज्ञेयः। अर्थात् स इष्टकालो दिनमानाधिको ज्ञेयः।

अत्रोपपत्तिः। लग्नानयनोपपत्तिवैपरीत्येन सुगमा। अत्रान्ये विशेषा भास्करलग्नानयने सिद्धान्तशिरोमणौ विज्ञेयाः। अत्र सर्वत्र सूर्यलग्नशब्देन सायन-सूर्यलग्ने विज्ञेये इति ॥५०–५१॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा।
सुखायामृतवर्षिण्यां गतः प्रश्नाधिकारकः ॥ ३ ॥

इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यां
त्रिप्रश्नाधिकारः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चन्द्रग्रहणाधिकारः

तत्रादौ रविचन्द्रविम्बे आह—

सार्धानि षट्सहस्राणि योजनानि विवस्वतः ।
विष्कम्भो मण्डलस्येन्दोः सहाशीत्या चतुश्शतम् ॥१॥

स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ ।
रवेः स्वभगणाभ्यस्तः शशाङ्कभगणोद्धृतः ॥२॥

शशाङ्ककक्षागुणितो भाजितो वाऽर्ककक्षया ।
विष्कम्भश्चन्द्रकक्षायां तिथ्याप्ता मानलिप्तिका ॥३॥

विवस्वतः सूर्यस्य मण्डलस्य विष्कम्भो विम्बः सार्धानि षट्सहस्राणि (६५००) योजनानि । इन्दोश्चन्द्रस्य चाशीत्या सह चतुश्शतम् (४८०) विष्कम्भः । तौ विष्कम्भौ स्वस्वस्फुटगत्या गुणितौ मध्यगत्या हृतौ तदा चन्द्रग्रहणोपयोगिनौ स्फुटौ भवतः । रवेः पूर्वागतो व्यासः पाठपठितमहायुगीयभगणैर्गुणितस्तत्रत्य-चन्द्रभगणैर्हृतः । वा चन्द्रकक्षायोजनैर्गुणितोऽर्ककक्षया भाजितः फलं चन्द्रकक्षायां रवेर्विष्कम्भो भवति । तस्मात् तिथिभिः पञ्चदशभिर्भक्तादाप्ता मानस्य विम्बस्य कला भवति ।

अत्रादौ सौरभाष्ये नृसिंहेन, ग्रहणं कथं भवति तस्य सम्भवश्च कथमित्यादि विस्तरेण, प्रतिपादितम् । तेन छादकनिर्णयेऽपि बहूदितम् । तत्र "अतः सूर्यस्य लघुच्छादकश्चन्द्रस्य महानिति कल्प्यते । न चैकस्य महत्त्वं लघुत्वं सम्भवति । न च बृहल्लघुत्वमन्यसापेक्षमिति सूर्यविम्बाल्लघु चन्द्रविम्बादधिकं राहुविम्बं कल्पयिष्यामः, तेन ग्राहकैक्येऽपि चन्द्रसूर्ययोस्तीक्ष्णकुण्ठतादर्शनमुपपन्नमिति वाच्यम्, कल्पयितुमशक्यत्वात् । प्रथमतोऽङ्गुलमानेन चन्द्रसूर्यविम्बयोः प्रायशस्तुल्यत्वाद्राहुबिम्बमेकस्मादधिकमन्यस्मान्न्यूनमिति कल्पयितुमशक्यम् । किन्तु सर्वदा राहुविम्बस्य सूर्यविम्बाल्लघुत्वे चोच्यमानसूर्यग्रहे सर्वग्रसनानुपपत्तिः स्यात् । दृश्यते च कदाचित् सर्वग्रसनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाहुः सकलागमाचार्याः—

शाके त्र्यब्धीन्द्र (१४४३) तुल्ये वृषशरदि मधौ मासि बाणेन्दुनाडी-
तुल्ये दर्शेऽश्विधिष्ण्ये दिनकरदिवसे भानुसर्वग्रहोऽभूत् ।
तस्मिन् ग्रस्तेऽश्विभं चास्तमितमपि बुधं काव्यसप्तर्षिमुख्या-
स्तारा दृष्ट्वान्धकाराकुलितमिह जगत् तत्र हा हा चकार ।

तथा वलयग्रासोऽप्युक्तोऽस्ति—

शाकेऽष्टाद्रिमनून्मिते (१४७८) नलशरद्यूर्जेऽष्टनाडीमिते
दर्शेऽब्जाह्नि मित्रभेऽभवदिनग्रस्तं महाश्चर्यकृत् ।
शेषोऽर्कः परितः सितो वलयवन्मध्येऽत्र कृष्णो यतोऽ-
ल्पं चान्द्रं वपुरैक्षतात्र कविविद्भाद्यन्धकारेऽपि च ॥ इति ।

तस्माद् राहुबिम्बस्य सूर्यविम्बाल्लघुत्वे चोच्यमाने सर्वग्रसनानुपपत्तिः स्यात् ।" एतेन १४४३ शके सूर्यस्य सर्वग्रहणम् १४७८ शके च वलयाकारग्रहणं वाराणस्यां जातमित्यस्य ज्ञानं जातमिति ।

अत्रोपपत्तिः—दृष्टिस्थानाद् ग्रहबिम्बकेन्द्रोपरिगतं सूत्रं कर्णः कर्णः । दृष्टि-स्थानाद् ग्रहविम्बोपरि स्पर्शरेखा कोटिः । ग्रहकेन्द्रात् स्पर्शरेखोपरि लम्बः ग्रह-योजनव्यासार्थं भुजः । भुजसम्मुखकोणो दृष्टिस्थानगतः स्फुटबिम्बार्धकला । ततस्त्रिकोणमित्या :—

$$ज्या\angle स्पदृके = ज्या\frac{स्फुवि}{२} = \frac{त्रि \times केस्प}{दृके} = \frac{त्रि \times \frac{१}{२} यो' व्या}{क} = \frac{स्फुवि}{२}$$

स्वल्पान्तराज्ज्याचापयोरभेदात् ।



$$अतः \frac{त्रि \times या' व्या}{क} = स्फुवि$$

$$\frac{त्रि \times योव्या}{मक} = मवि$$

$$मिथो भजनेन \frac{मक}{क} = \frac{स्फुवि}{मवि} (१)$$

स्वल्पान्तराद् यदि योव्या = यो'व्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उच्चस्थाने बिम्बं लघु गतिश्च लघ्वी। नीचस्थाने बिम्बं विपुलं गतिश्च महती। अतो बिम्बयोर्निष्पत्तिर्गत्योर्निष्पत्तिसमा।

ततः (१) अस्य रूपान्तरम् $\frac{\text{मक}}{\text{क}} = \frac{\text{स्फुग}}{\text{मग}}$, अतः $\text{क} = \frac{\text{मक} \times \text{मग}}{\text{स्फुग}}$।

स्फुटबिम्बेऽस्योत्थापनेन $\text{स्फुवि} = \frac{\text{त्रि} \times \text{यो}'\text{व्या}}{\text{क}} = \frac{\text{त्रि} \times \text{स्फुग} \times \text{यो}'\text{व्या}}{\text{मक} \times \text{मग}}$

स्वल्पान्तरात्।

अत्र यदि स्वल्पान्तरात् मध्यमकर्णः स्फुटकर्णसमः, तदा स्फुवि $= \frac{\text{त्रि} \times \text{स्फुग} \times \text{योव्या}}{\text{क} \times \text{मग}}$। अतस्तदा $\frac{\text{क स्फुवि}}{\text{त्रि}} = \text{यो}'\text{व्या} = \frac{\text{स्फुग} \times \text{योव्या}}{\text{मग}}$।

मध्यगति स्थाने हृके, हृस्प, यष्टिभ्यां वेधेन यत् केस्पमानं द्विगुणं तदेव योव्या मानं तथा स्फुटगतिमाने यत् केस्पमानं द्विगुणम् तत् यो' व्यामानं ज्ञेयम्।

एवमत्र रविचन्द्रयोर्बिम्बे दीर्घवर्त्तुलाकारे तदा ग्रहकेन्द्रात् स्पर्शरेखोपरि यो लम्बस्तद्द्विगुणोऽभीष्टव्यासो व्यवहारयोग्यः स्वल्पान्तरात् मध्यस्फुटकर्णयोः साम्यात् सिध्यति। रविचन्द्रयोः सर्वदा योजनात्मकं बिम्बं न सममिति सूर्यसिद्धान्तमतं मदुपपत्त्यैवोपपद्यत इति सुधीभिर्भृशं विचिन्त्यम्।

अत्र रङ्गनाथनृसिंहादिभिर्गतिकलागतियोजनैश्चानुपातेन योजनबिम्बं यत् साधितम् तत्तु गणितयुक्त्या कक्षास्थं चापात्मकं व्यवहारे स्वल्पान्तराज्ज्या-चापयोरभेदादयोग्यं ज्ञेयं गोलविद्भिरित्यलं प्रसङ्गेन।

वस्तुतो वर्त्तुलाभासबिम्बोपरि दृष्टिस्थानाद्याः स्पर्शरेखा भवन्ति। बिम्बकेन्द्रात् तासु ये लम्बास्ते प्रायो मिथः समाना न, तथापीष्टसमये व्यवहारार्थं ते समा इति प्रकल्प्य तात्कालिकयोजनव्यासः साध्यत इति। अधुना रविव्यासश्चन्द्रकक्षायां परिणाम्यते। रविकक्षायामयं रविव्यासस्तदा चन्द्रकक्षायां किमिति। लब्धश्चन्द्रकक्षायां रविव्यासः $= \frac{\text{रव्या} \times \text{चक}}{\text{रक}}$।

परन्तु खकक्षा स्वभगणहृता स्वकक्षा,

'ग्रहस्य चक्रैर्विहृता स्वकक्षा भवेत् स्वकक्षा" इति भास्करोक्तेः।

अतः $\text{चक} = \frac{\text{खक}}{\text{चभ}}$। $\text{रक} \frac{\text{खक}}{\text{रभ}}$। अनयोरुत्थापनेन चन्द्रकक्षायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रविव्यासः $= \frac{\text{रव्या} \times \text{चक}}{\text{रक}} = \frac{\text{खक} \times \text{रव्या} \times \text{रभ}}{\text{चभ} \times \text{खक}} = \frac{\text{रव्या} \times \text{रभ}}{\text{चभ}}$ । अनेन प्रथमः प्रकार उपपद्यते। चन्द्रकक्षायां पञ्चदशभिर्योजनैरेका कला, अतः पञ्चदशभक्ता मानकला भवन्ति। एवं चन्द्रकक्षायां चापात्मकं कलाबिम्बम्। बिम्बकलानामल्पत्वाज्ज्याचापयोः साम्यादेवं कलात्मकं बिम्बं जातमिति ॥१-३॥

अथ भूभाबिम्बानयनमाह—

स्फुटेन्दुभुक्तिर्भूव्यासगुणिता मध्ययोद्धृता ।
लब्धं सूची महीव्यासस्फुटार्कश्रवणान्तरम् ॥ ४ ॥
मध्येन्दुव्यासगुणितं मध्यार्कव्यासभाजितम् ।
विशोध्य लब्धं सूच्यां तु तमो लिप्तास्तु पूर्ववत् ॥ ५ ॥

चन्द्रस्य स्फुटा गतिर्भूव्यासेन "योजनानि शतान्यष्टौ" इत्यादिना साधितेन गुणिता मध्यया चन्द्रगत्या हृता लब्धं सूचीसंज्ञा भवेत्। अथ महीव्यासस्य स्फुटार्कश्रवणस्य पूर्वसाधितस्फुटरविव्यासस्य चान्तरं पाठपठितचन्द्रव्यासगुणं पाठपठितरविव्यासेन भाजितं लब्धं पूर्वगतायां सूच्यां विशोध्य गणकस्तमोभूच्छायां साधयेदिति। ततो योजनात्मकच्छायातः पूर्ववत् 'तिथ्याप्ता मानलिप्तिका' इत्यनेन भूभाकलाबिम्बं साधयेदित्यर्थः।



रस्प = रविव्यासार्धम्। भूस्प' = भूव्यासार्धम्। मूलरेखा, स्पर्शरेखा समान्तरा, तदा रल = $\frac{1}{2}$ रव्या − $\frac{1}{2}$ भूव्या। रभू = रविकर्णः। भूच = चन्द्रकर्णः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चल$_1$ स्पर्शरेखोपरि लम्बो भूभाव्यासार्धसमः। तत्समा च ल$'$ स्प$'$ रेखा। भू र ल त्रिभुजस्य सजातीयं भूचल त्रिभुजम्।

अतो रेखागणितषष्ठाध्यायेन $\text{भूल}' = \dfrac{\text{भूच}\left(\frac{1}{2}\text{रव्या} - \frac{1}{2}\text{भूव्या}\right)}{\text{रभू}}$

$= \dfrac{\text{चक}\left(\frac{1}{2}\ \text{रव्या} - \frac{1}{2}\ \text{भूव्या}\right)}{\text{रक}}$ अतः ल$'$ स्प$'$ = चल$_1$

$= \frac{1}{2}$ भूव्या $- \dfrac{\text{चक}}{\text{रक}}\left(\frac{1}{2} = \text{रव्या} - \frac{1}{2}\text{भूव्या}\right)$ अस्या द्विगुणो भूभाव्यासः = भूव्या

$- \dfrac{\text{चक}\ (\text{रव्या} - \text{भूव्या})}{\text{रक}}$ = अनेन भास्करोक्तमुपपद्यते।

अयं भूव्यासश्चन्द्रकक्षायां नायातीति क्षेत्रदर्शनेन स्फुटम्। कमलाकरेण सिद्धान्ततत्त्वविवेके सर्वं विशेषतः प्रतिपादितम्।

$$\text{अथ भूभाव्यासः} = \text{भूव्या} - \frac{\text{चक}}{\text{रक}}\ (\text{रव्या} - \text{भूव्या})$$

$$= \frac{\text{चमग}}{\text{चस्फुग}}\left\{\frac{\text{चस्फुग} \times \text{भूव्या}}{\text{चमग}} - \frac{\text{चस्फुग} \times \text{चक}}{\text{चमग} \times \text{रक}}\ (\text{रव्या} - \text{भूव्या})\right\}$$

$$= \frac{\text{चमग}}{\text{चस्फुग}}\left\{\text{सूची} - \frac{\text{चस्फुग} \times \text{चक}}{\text{चमग} \times \text{रक}}\ (\text{रव्या} - \text{भूव्या})\right\} \cdots\cdots\cdots\cdots (१)$$

अथ पूर्वप्रकारेण $\dfrac{\text{त्रि} \times \text{योचव्या}}{\text{चक}} = \text{च} \times \text{मविं}\ \therefore \text{चक} = \dfrac{\text{त्रि} \times \text{योचव्या}}{\text{चमविं}}$।

एवम् $\text{रक} = \dfrac{\text{त्रि} \times \text{योरव्या}}{\text{रमविं}}$।

(१) अस्मिन्नुत्थापनेन—

$$\text{भूभाव्यासः} = \frac{\text{चमग}}{\text{चस्फुग}}\left\{\text{सूची} - \frac{\text{चस्फुग} \times \text{त्रि} \times \text{योचव्या} \times \text{रमविं}}{\text{चमग} \times \text{त्रि} \times \text{योरव्या} \times \text{चमविं}}(\text{रव्या} - \text{भूव्या})\right\}$$

अत्र स्वल्पान्तरात् $\dfrac{\text{चमग}}{\text{चस्फुग}} = १$, तथा $\dfrac{\text{रमविं}}{\text{चमविं}} = १$। एवं कृते भूभाव्यासः

$$= \text{सूची} - \frac{\text{योचव्या}}{\text{योरव्या}}\ (\text{रव्या} - \text{भूव्या})$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेन सौरोक्तं भूभानयनमुपपद्यते।

अत्र रङ्गनाथादीनामुपपत्तिर्बहुत्र स्वल्पान्तरदोषसहिता न समीचीना। सौरभाष्ये नृसिंहेन स्वेच्छया सर्वं युक्तिशून्यमुपपादितम्।



अत्र रल$_1$ $= \frac{1}{2}$ रव्या $- \frac{1}{2}$ भूव्या। रभू = रक। ज्या $<$ल$_1$ भूर

$$\text{त्रि}\ \frac{(\frac{1}{2}.\text{रव्या} - \frac{1}{2}\ \text{भूव्या})}{\text{रक}} = \frac{\text{त्रि} \times \frac{1}{2}\ \text{रव्या}}{\text{रक}} - \frac{\text{त्रि} \times \frac{1}{2}\ \text{भूव्या}}{\text{रक}} =$$

ज्या $\frac{1}{2}$ रवि—ज्यारपलं, अस्य चापं चा--संज्ञं ज्ञेयम्। ततः

चा $= <$ रभूल$_1$ । ९० $= <$ ल$_1$ भूस्पं।

९०—चपलं $= <$ स्पं भूलं। सर्वयोगे $\angle$ रभूल $=$

चा $+$ ९० $+$ ९०—चपलं। भार्धाच्च्युते जातं भूभाबिम्बदलम् $=$

$<$ चभूल $=$ चपलं $-$ चा। अनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"रवितनुदलजीवा लम्बनस्य ज्ययोना
क्षितिजजनितया तत्कार्मुकं कार्यमार्यैः।
द्विजपतिजपराख्यं लम्बनं तद्विहीनं
भवति वसुमतीभाबिम्बखण्डं सुसूक्ष्मम् ॥"

इति मदुक्तमुपपद्यते।

अत्रैव स्वल्पान्तराज्ज्याचापयोरभेदात् चा = $\frac{1}{2}$ रविं — रपलं, तदा भूभा-बिम्बदलम् = चपलं + रपलं — $\frac{1}{2}$ रविं। एतेन

"दिवाकरनिशानाथपरलम्बनसंयुतिः ।
रविबिम्बार्धरहिता भूभाबिम्बदलं भवेत् ॥"

इति यूरोपदेशीयानां प्रकार उपपद्यते। अयं च स्वल्पान्तरात् ∠ रभू-स्प = रविबिम्बार्धम्। ∠ स्पभूस्पं = रविपरमलम्बनम् इति प्रकल्प्य रेखा-गणितयुक्त्या चोपपद्यते। एवं यदि स्प$_1$ स्पं$_1$ स्प$_2$ स्पं$_2$ विरुद्धस्पर्शरेखे क्रियेते, तदा चन्द्रकक्षायां ल$_3$, ल$_4$ बिन्द्वोरन्तर्गतो भागः सर्वरविकिरणानां संयोगाभावा-दवश्यं म्लान इव भवति। अतस्तत्र प्रदेशत एव चन्द्रकान्तिमालिन्यम्। अत एव ∠ ल$_3$ भूच इदं कोणमानं भूभाभाबिम्बदलं कल्प्यते, तदा त्रिकोणमित्याऽस्य ज्ञानं सुखेन भवति। यथा स्प$_1$ स्पं$_1$ समानान्तरा यदि रल$_2$ भवेत्, तदा भूल$_2$ = $\frac{1}{2}$ रव्या + $\frac{1}{2}$ भूव्या। ज्या ∠ल$_2$ रभू = $\frac{\text{त्रि} \times (\frac{1}{2}\text{ रव्या} + \frac{1}{2}\text{भूव्या})}{\text{रक}}$ =

ज्या $\frac{1}{2}$ रविं + ज्यारपलं। अस्य चापम् = चा।

∠ रभूल$_2$ = ९० — चा। ∠ स्पं$_1$ भूल$_3$ = ९० — चपलं द्वयोर्योगे

∠ रभूल$_3$ = १८० — चा — चपलं। अमुं भार्धाद् विशोध्य जातं भूभाभा-बिम्बदलम् = ∠ ल$_3$ भूच = चा + चपलं। अनेन

रवितनुदलजीवा लम्बनस्य ज्ययाऽऽढ्या
क्षितिजजनितया तत्कार्मुकं कार्यमार्यैः।
द्विजपतिजपराख्यं लम्बनं तद्युतं सद्-
भवति वसुमतीभाभावपुःखण्डमानम् ॥"

इति मदुक्तमुपपद्यते। अत्रैव स्वल्पान्तराज्ज्याचापयोरभेदाद् यदि चा = $\frac{1}{2}$ रविं + रपलं, तदा भूभाभाबिम्बदलम् = चपलं + रपलं + $\frac{1}{2}$ रविं। अनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"दिवाकरनिशानाथपरलम्बनसंयुतिः ।
रविबिम्बार्धसहिता भूभाभाविस्तृतेर्दलम् ॥"

इति मदुक्तं चोपपद्यते। इदमानयनं च पूर्वप्रतिपादितभूभोपपत्तिवत् क्षेत्रयुक्त्योपपद्यते।

एवमत्र भूभाकलाबिम्बानयनं कमलाकरादिप्रकारतोऽतीवलाघवं गोलविद्भिः परीक्षणीयमित्यलं प्रसङ्गागतविचारेण ॥ ४–५ ॥

इदानीं पर्वसम्भवमाह—

भानोर्भार्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा।
शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके ॥ ६ ॥

सूर्यस्य राशिषट्कान्तरे भूच्छाया भ्रमति। शशाङ्कपाते चन्द्रपाते तत्तुल्ये वा रविसमे वा कियद्भागाधिकोनकेऽर्थाच्चतुर्दशभागाधिकोनके ग्रहणं ग्रहणस्य सम्भवः। कं जलमस्यास्तीति की इन्द्रः। यस्य सपातस्य भागा अंशा इति यद्भागाः। की इव इन्द्रसमा अर्थाच्चतुर्दशसमा यद्भागा इति कियद्भागास्तैर्भूभातोऽर्कतो वाऽधिकोनके च पाते ग्रहणस्य संभव इत्यर्थः।

अत्रोपपत्तिः। भानुत एव छायोत्पद्यते। रविकेन्द्राद्भूकेन्द्रगामिसूत्रं यत्र क्रान्तिवृत्ते लगति तदेव भूभामध्यस्थानम्। रविः क्रान्तिवृत्ते क्रान्तिवृत्तस्य केन्द्रं च भूकेन्द्रम्। अतो रवेर्भूकेन्द्रगामिसूत्रं क्रान्तिवृत्तस्य व्यासत्वाद्रवितो भार्धान्तरे क्रान्तिवृत्ते लगति तेन भानोर्भार्धे महीच्छायेत्युपपद्यते। ग्रहणं हि मानैक्यार्धादल्पे शरे भवति। अत्र चक्रशुद्धः पातः। चन्द्रश्च ग्रहणसमये रवेर्भार्धान्तरे भूभासमः। भानुतुल्ये पाते विराह्वर्कः शून्यसमः। भूभातुल्ये च विराह्वर्कः षड्राशिसमः। उभयत्र भुजाभावात् शरः शून्यसमो मानैक्यार्धादल्पो ग्रहणस्य कारकः। चन्द्रग्रहणे सपातार्कस्य भुजः सपातचन्द्रस्य भुजेन समः। अर्काच्चन्द्रस्य षड्राश्यन्तरे स्थितत्वात्। चन्द्रग्रहे मध्यमं मानैक्यार्धं षट्पञ्चाशत्कलास्तत्समः शरा द्वादशभिर्भुजभागैर्भवति। मध्यस्फुटार्कयोरन्तरं परमं परममन्दफलं भागद्वयासन्नम्। अतस्तत्र सयोजनेन मध्यमसपातार्कस्य भुजभागैश्चतुर्दशसमैर्ग्रहणस्य सम्भवः। एवमत्र परममानैक्यखण्डसमे शरे ये सपातार्कभुजभागा भागद्वयाधिकास्तत्र ग्रहणसम्भवः। परमाल्पमानैक्यखण्डसमे शरे ये भुजभागा भागद्वयोनास्तत्र ग्रहणस्य निश्चयः। एवं परममानार्धान्तरतुल्ये शरे ये भुजभागा भागद्वयाधिकास्तत्र सर्वग्रहस्य सम्भवस्तथा परमाल्पमानार्धान्तरसमे शरे ये भुजभागा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागद्वयोनास्तत्र सर्वग्रहस्य निश्चय इति सर्वमनुक्तमपि बुद्धिमता ज्ञायते। सम्प्रति वेधोपलब्धं परमं परमाल्पं मानैक्यखण्डं मानान्तरार्धं च परिगणय्य आनीता विपातचन्द्रभुजभागा मया गणकानां सुखाय पठिताः।

"मन्वङ्कनागाश्विलवोनका यदा विपातचन्द्रस्य भुजांशकास्तदा।
स्यान् सम्भवोऽवश्यमथाऽत्र शीतगोर्ग्रहस्य सर्वग्रहणस्य च क्रमात् ॥"

इति। १४=ग्रहणसम्भवभुजांशा। ९=निश्चितग्रहणभुजांशाः। ८=सर्वग्रहण-सम्भवभुजांशाः। २=निश्चितसर्वग्रहणभुजांशाः। इति सर्वं निरवद्यम् ॥ ६ ॥

इदानीं ग्रहणयोः कालं तत्काले रविचन्द्रानयनं चाह—

तुल्यौ राश्यादिभिः स्याताममावास्यान्तकालिकौ।
सूर्येन्दू पौर्णमास्यन्ते भार्धे भागादिकौ समौ ॥ ७ ॥
गतैष्यपर्वनाडीनां स्वफलेनोनसंयुतौ।
समलिप्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथा ॥ ८ ॥

चन्द्रोपरि गतं कदम्बप्रोतं क्रान्तिवृत्ते यत्र लग त तत्रैव चन्द्रस्थानं तत्रैव च यदा रविः स एवामान्तकाल इत्यमान्तस्य परिभाषा। यदा रवितः षड्भान्तरे चन्द्रस्थानं तदा पूर्णिमान्त इत्युच्यते। अताऽमान्तकाले सूर्येन्दू सूर्यचन्द्रस्थाने राश्यादिभिः सर्वावयवैस्तुल्यौ स्याताम्। पौर्णमास्यन्ते चैकोऽन्यस्माद् भार्धेऽर्थाद् षड्भान्तरेऽतस्तौ भागादिकौ तदा समौस्यातामिति।

पर्वदर्शान्तकालः पूर्णान्तकालो वा। गतपर्वनाडीनां चालनफलेन 'गतैष्यगुणिता भुक्तिः' इत्यादिनाऽऽनीतेन रविचन्द्रौ हीनौ एष्यचालनफलेन च संयुतौ तदा तौ समलिप्तौ समे पर्वान्तकाले लिप्ता लिप्तादिमानं ययोस्तौ भवेताम्। अत्र पातस्य चक्रशुद्धत्वाद्वक्रगतेः पातोऽन्यथा विपरीतविधिना गते धनं एष्ये च चालनमृणमिति विधिना तात्कालिकः कर्त्तव्य इति सर्वं स्फुटम् ॥ ७—८ ॥

इदानीं छादकनिर्णयमाह—

छादको भास्करस्येन्दुरधःस्थो घनवद्भवेत्।
भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ ॥ ९ ॥

अधःस्थश्चन्द्रो घनवन्मेघवद्रवेश्छादको भवेदत एव कस्मिंश्चिद्देशे भास्करश्छन्नः क्वचिन्न छन्नो लक्ष्यते कक्षान्तरत्वात्। चन्द्रश्च प्राङ्मुखो गच्छन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूच्छायां विशत्यत एवास्य चन्द्रस्यासौ भूभैव छादकः। ग्रस्तश्चन्द्रश्च सर्वत्रैव दर्शनयोग्ये समये लक्ष्यत इति। अनेनैव छादकनिर्णयेन रवेः पश्चिमतः स्पर्शश्चन्द्रस्य च पूर्वत इत्यादयः सर्वे विशेषा भास्करादिलिखिता उत्पद्यन्ते किमु विज्ञेषु लेखविस्तरेणेति ॥ ९ ॥

इदानीं ग्रासानयनमाह—

तात्कालिकेन्दुविक्षेपं छाद्यच्छादकमानयोः ।
योगार्धात् प्रोज्झ्य यच्छेषं तावच्छन्नं तदुच्यते ॥ १० ॥

यद्ग्राह्यमधिके तस्मिन् सकलं न्यूनमन्यथा ।
योगार्धादधिके न स्याद्विक्षेपे ग्राससम्भवः ॥ ११ ॥

तात्कालिकः पूर्णिमान्तकालिको यश्चन्द्रस्य शरस्तं छाद्यच्छादकयोगार्धात् प्रोज्झ्य हित्वा यच्छेषं भवेत् तावदेव तत्ग्रासमानं छन्नमुच्यते। चन्द्रग्रहे चन्द्रश्छाद्यो भूभा छादकः। सूर्यग्रहे सूर्यश्छाद्यश्चन्द्रश्छादक इति। तस्मिन् छन्ने यद्ग्राह्यं छाद्यं तस्मादधिके सति सकलं सर्वग्रहणं भवति। अन्यथा ग्राह्यन्न्यूने छन्ने न्यूनं ग्रहणं वाच्यमित्यर्थः। विक्षेपे शरे योगार्धान्मानैक्यार्धादधिके सति ग्रासस्य सम्भवो न स्यादिति।

अत्रोपपत्तिः। पूर्णान्ते पूर्वापरान्तराभावादेकस्मिन्नेव कदम्बप्रोते भूभाचन्द्रयोः केन्द्रे स्याताम्। कल्प्यते क्रान्तिवृत्ते भूभाकेन्द्रं भू। भूच शराग्रे चन्द्रकेन्द्रं च। भू च कदम्बप्रोते शरः। तदा गोलयुक्त्या क ग = ग्रासमानम्।



भूक = भूभा बिम्बदलम्। चग = चन्द्र बिम्बदलम्। अथ भूग = भूक − कग। भूग + चग = भूच = शरः = भूक + चग − कग। अतः कग = भूक + चग − शरः। कग मानं चग − द्विगुणादधिकं तदा कग बिन्द्वन्तर्गतं सकलं चन्द्रबिम्बम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा यदि भूक + चग < शर तदा ग्रासमानमसम्भवं क्षयत्वादित्युपपन्नं सर्वमिति ॥ १०—११ ॥

इदानीं स्थितिविमर्दार्धानयनमाह—

ग्राह्यग्राहकसंयोगवियोगौ दलितौ पृथक् ।
विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यामुभे पदे ॥ १२ ॥
षष्ठ्या संगुण्य सूर्येन्द्वोर्भुक्त्यन्तरविभाजिते ।
स्यातां स्थितिविमर्दार्धे नाडिकादिफले तयोः ॥ १३ ॥
स्थित्यर्धनाडिकाभ्यस्ता गतयः षष्ठिभाजिताः ।
लिप्तादि प्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः ॥ १४ ॥
तद्विक्षेपैः स्थितिदलं विमर्दार्धे तथाऽसकृत् ।
संसाध्यमन्यथा पाते तल्लिप्तादिफलं स्वकम् ॥ १५ ॥

चन्द्रग्रहे ग्राह्यश्चन्द्रो ग्राहको भूभा । सूर्यग्रहे ग्राह्यः सूर्यो ग्राहकश्चन्द्रः— इति वेदितव्यम् । ग्राह्यग्राहकमानयोः संयोगो वियोगश्च दलितः कार्यस्ततस्तौ पृथक् स्थाप्यौ । तयोर्वर्गाभ्यांशरवर्गहीनाभ्यां ये उभे द्वे पदे वर्गमूले भवतस्ते षष्ठ्या संगुण्य रवीन्द्वोर्गत्यन्तरेण विभाजिते कार्ये । एवं क्रमेण घट्यादिफले स्थितिविमर्दार्धे भवतः । रविचन्द्रपातानां गतयः स्थित्यर्धघटीभिगुणिताः षष्ठ्या भाजिता लब्धं लिप्तादि प्रग्रहे स्पर्शस्थित्यर्धसाधने तेषु ग्रहेषु शोध्यम् । पातस्य ऋणगतित्वात् लिप्तादि फलमृणं संशोध्यमानः क्षयो धनं भवतीति बीजक्रियया धनं भवतीत्यनुक्तमपि बुद्धिमता ज्ञायते । एवं मोक्षे मोक्षस्थित्यर्ध-साधने तच्चालनफलं तेषु ग्रहेषु देयं याज्यमित्यर्थः । एवं तात्कालिकचन्द्रपाताभ्यां स्पार्शिकं मौक्षिकं संमीलनकालिकमुन्मीलनकालिकं च शरमानीय तैः पुनः स्पार्शिकं मौक्षिकं च स्थित्यर्धं साध्यं विमर्दार्धे च । एवं पुनः पुनः कर्म कर्त्तव्यं यावदविशेषस्तथाऽसकृत् सर्वं संसाध्यम् । पाते स्वकं स्पर्शादिभवं फलमन्यथा विपरीतं देयमिति स्फुटमेव ।

अत्रोपपत्तिः । ग्रहणे शरादिकं स्वल्पान्तरात् सरलरेखारूपं प्रकल्प्य स्थित्यर्धादिकं साध्यते । तत्र स्पर्शमोक्षकालयोर्मानैक्यार्धं कर्णं कर्णः । तात्कालिकः शरो भुजः । तद्वर्गान्तरपदं क्रान्तिवृत्ते ग्राहकमार्गखण्डं कोटिः । एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्मीलनोन्मीलनकालयोर्मानार्धान्तरं कर्णः। तात्कालिकोशरः भुजः। तद्वर्गान्तरपदं क्रान्तिवृत्ते ग्राहकमार्गखण्डं कोटिः। अत्र स्पर्शादिशराज्ञानात् मध्यकालिकशरेण सर्वं कर्म कृतमतोऽसकृत् कर्मणा सर्वं स्फुटं कर्तुं युज्यते। रविचन्द्रगत्यन्तरतः कोटिकलानां घटीकरणं ततश्चालनादिकं च स्फुटम्।

अत्र क्षेत्रदर्शनम्।



अथ शरादिकं सरलं कल्पयित्वाऽपि प्राचीनैनं सकृत्कर्मणा स्थित्यर्धाद्यानयनं ज्ञातमतः सकृत्कर्मणा तेषां ज्ञानमुच्यते।



भूसं सरलाकारं क्रान्तिवृत्तखण्डम्। भूपूर्णान्ते भूभास्थानम्। चं सं सरलाकारं विमण्डलखण्डम्। भूचं पूर्णान्ते चन्द्रशरः सरलाकारः। एकघटिकायां चच२, च२ च३ चन्द्रगतिः, भूभू२, भू२ भू३ भूभागतिश्च। पूर्णान्तानन्तरमेकघटिकायां भूभाचन्द्रान्तरं भू२ च२ तुल्यम्। तत्समानान्तरा तत्समा च स्थिरभूभातः भचं रेखा। एवं पूर्णान्ताद् घटिकाद्वयानन्तरं भूभाचन्द्रान्तरं भ३ च३ तुल्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्समानान्तरा तत्समा च स्थिर भूभातः भूचं$_1$ रेखा। अतो यदि चं चं चं$_1$ कल्पितचन्द्रस्य मार्गो भवेत् तदा स्थिरभूभाकल्पितचन्द्रान्तरमिष्टकाले यत् तदेव तदा वास्तवभूभाचन्द्रान्तरमतः स्थिरभूभातः कल्पितचन्द्रस्य स्पर्शादिकालः स एव वास्तवभूभातो वास्तवचन्द्रस्य। चं च$_2$ समानान्तरा चं$_1$ च$_3$ रेखा। चं$_1$च$_3$ = भू भू$_3$ = २ भूभू$_2$। चच$_3$ = २ चच$_2$। चं च$_2$ = भू भू$_2$। अतोरेखागणितषष्ठाध्यायेन चं चं च$_2$ चं चं$_1$ च$_3$ त्रिभुजे मिथः सजातीये। तेन चं चं चं$_1$ रेखा सरलरेखा जाता। अतः चं चं चं$_1$ सं कल्पितविमण्डलं सरलाकारं जातम्। चं ल$_1$ = एक घटिकायां रविचन्द्रगत्यन्तरम्। यतो भूभागती रविगतिसमा। चंल$_1$ = एक घटिकायां शरगतिः। चं चं = एक घटिकायां कल्पितचन्द्रगतिः। स्थिरभूभातः कल्पितविमण्डले लम्बः = भूल। अथ साजात्यात् जात्यत्रिभुजाच्चं च चं =

$$\sqrt{\text{शग}^2 + \text{गअ}^2},\ \text{भूल} = \frac{\text{चं ल}_1 \times \text{भू च}}{\text{चं चं}}$$

$$= \frac{\text{ग अं} \times \text{पू श}}{\text{चं चं}}\ ।\ \text{चं ल} = \frac{\text{चं ल}_1 \times \text{पू श}}{\text{च चं}},\ \text{तदीय घटिकात्मककालः}$$

$$= \frac{\text{चं ल}_1 \times \text{पू श}}{\text{चं चं}_2} = \frac{\text{श ग} \times \text{पूश}}{\text{श ग}^2 \times \text{गअं}_2}$$

भूस्प = भूमो = मानैक्यखण्डसममथवाऽभीष्टान्तरसमम्। तस्य भूलरेखायाश्च वर्गान्तरपदम् = लस्प = लमो। अस्य घटिकात्मकः कालश्च $= \frac{\text{लस्प}}{\text{च च}} = \frac{\text{ल मो}}{\text{चं चं}}$। अस्मिन् काले चं ल। कालं संस्कृत्य पूर्णान्तात् पृष्ठे स्प पर्यन्तमग्रे चमो पर्यन्तं कालज्ञानं भवेत्—इति सर्वं क्षेत्रतः स्फुटम्।

भूस्प = भूमो = अं। भूचं = पूर्णान्तकालिकान्तरम् = श।

चं ल$_1$ = एकघटिकायां शरगतिः = श ग। चं$_1$ ल$_1$ = एकघटिकायां रविचन्द्र-गत्यन्तरम् = गअं। चंच$_2$ = शग^2 + ग अं^{2} = ह।

$$\text{चं ल}_1 = \frac{\text{श ग} \times \text{श}}{\sqrt{\text{ह}}}\ ।\ \text{तत्कालः} = \frac{\text{श ग} \times \text{श}}{\text{ह}}\ ।$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$$लस्प = लमो = \sqrt{अं^2 - भूल^2} = \sqrt{अं^2 - अं^2 - \frac{ग\ अं^2 \times श^2}{ह}}।$$

$$अस्य\ कालः = \sqrt{\frac{अं^2\ गअं^2 \times श^2}{ह - ह^2}} = \sqrt{\frac{ह \times अं^2}{ह^2} - \frac{गअं^2\ श^2}{ह^2}}$$

$$अत्र\ \frac{श}{ह} = ध्रु।\ \frac{अं}{ह} = च।\ ततः$$

$$चंल\ कालः = श\ ग \times ध्रु।\ लस्प — कालः = \sqrt{ह \times च^2 — गअ^2 \times ध्रु^2}$$

$$चंलकालस्याद्यसंज्ञा = शग \times ध्रु।$$

अतो मत्सुत्रम्।

"पुष्पवतोर्गतिविवरं खरसहृतं स्याद्गतिर्गतिश्चैषोः।
खरसहृतेषु गतिस्तत्कृतियुतिरेवात्र हारः स्यात्।
पर्वान्तकाले च तथेष्टकाले यदन्तरं चन्द्रधराभयोस्ते।
हराख्यभक्ते ध्रुवचन्चलाख्ये अथेषुवेगध्रुवघात आद्य॥
चलकृतिर्हरनामहतोनिता गतिहतध्रुववर्गजसंख्यया।
पदमतः प्रथमोनयुतं द्विधा भवति कालमितिः परपूर्वजा॥
धनगतौ विपरीतमिषोस्तथा क्षयंगतौ निजपर्वविरामतः।
स्थितिदले भवतोऽत्र निजान्तर यदि च मानयुतेर्दलसम्मितम्॥'

एतत्प्रकारानुरूप एव सिद्धान्तशिरोमणिटिप्पण्यां "पूर्णान्तकाले विधुमार्गणो यः" इत्यादिसशोधकोक्तप्रकारः। अथ क्षेत्रदर्शनेन स्फुटं यद्भूभाचन्द्रयोः परमाल्पमन्तर भूल सम पूर्णान्तादन्यत्र भवति। इदमन्तरं च विमण्डले न लम्बरूपमतो विकदम्बप्रोतेऽपि न भूभाचन्द्रयोः परमाल्पान्तरमिति सुधीभिर्विचिन्त्यम्॥ १२ - १५॥

इदानीं स्पर्शादिकालज्ञानमाह।

स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत्।
स्थित्यर्धनाडिकाहीने ग्रासो मोक्षस्तु संयुते॥ १६॥

तद्वदेव विमर्दार्धनाडिकाहीनसंयुते।
निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे॥ १७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्फुटतिथ्यवसाने स्फुटरविचन्द्रवशेन यः पूर्णान्तकालस्तस्मिन् समये गणको मध्यग्रहणमादिशेत् कथयेत्। तस्मिन् मध्यग्रहणे स्पार्शिकस्थित्यर्धनाडिकाहीने ग्रासो ग्रासारम्भोऽर्थात् स्पर्शः। मौक्षिकस्थित्यर्धनाडिकासंयुते च तस्मिन् स्फुटपूर्णान्ते तु पुनर्मोक्षो भवतीत्यर्थः। तद्वदेव सकलग्रहे पूर्णान्तकाले विमर्दार्धनाडिकाहीनसंयुते निमीलनोन्मीलनसंज्ञे भवतः।

अत्रोपपत्तिः। पूर्वोदितक्षेत्रेण परमाल्पमन्तरं भूल-समं तत्रैव च परमाधिकग्रासान्मध्यग्रहणं भवितुमर्हति। आचार्यैः चं चं अन्तरं स्वल्पत्वात् त्यक्तं ततः चं चं बिन्द्वोरभेदात् पूर्णान्तकाल एव मध्यग्रहणं विलिखितम्। तत्र स्थितिविमर्दार्धवियोगयोगाभ्यां स्पर्शमोक्षसमीलनोन्मीलनज्ञानं सुगममिति ॥ १६-१७ ॥

इदानीमिष्टकालिकग्रासानयनमाह—

इष्टनाडीविहीनेन स्थित्यर्धेनार्कचन्द्रयोः ।
भुक्त्यन्तरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः॥ १८ ॥
भानोर्ग्रहे कोटिलिप्ता मध्यस्थित्यर्धसंगुणाः ।
स्फुटस्थित्यर्धसंभक्ताः स्फुटाः कोटिकलाः स्मृताः ॥ १९ ॥
क्षेपो भुजस्तयोर्वर्गयुतेर्मूलं श्रवस्तु तत् ।
मानयोगार्धतः प्रोज्झ्य ग्रासस्तात्कालिको भवेत् ॥ २० ॥

गणकोऽर्कचन्द्रयोर्गत्यन्तरं कलात्मकमिष्टनाडीहीनेन स्थित्यर्धेन गुणयेत्। स्पर्शाग्रतो मध्यात् प्रागिष्टं स्पार्शिकं मोक्षात् प्राग्मध्यानन्तरमिष्टं मौक्षिकमुच्यते। यदिष्टं भवेत् तत्सम्बन्धि स्थित्यर्धं गृहीत्वा क्रिया कार्येति। ततः षष्ट्या लब्धाः कोटिकला भवन्ति। सूर्यस्य ग्रहणे पूर्वप्रकारेण याः कोटिकलास्ता मध्यमस्थित्यर्धेन गुणाः स्फुटस्थित्यर्धेन भक्ताः स्फुटाः कोटिकला गणकैः स्मृताः कथिताः। तत्र तात्कालिकः शरो भुजो ज्ञेयः। तयोर्वर्गयुतेर्मूलं श्रवः। कर्णश्छाद्यच्छादककेन्द्रयोरन्तरं भवेत्। मानैक्यखण्डात् तत्कर्णं हित्वा शेषस्तात्कालिको ग्रासो भवेदिति। "वीष्टेन निघ्नाः स्थितिखण्डकेन"—इत्यादिना भास्करस्याप्ययमेव विधिः।

अत्रोपपत्तिः—वीष्टं स्थित्यर्धं गत्यन्तरकलागुणं षष्टिभक्तं क्रान्तिवृत्ते तात्कालिकभूभाकेन्द्रचन्द्रशरमूलपर्यन्तं कलाः कोटिकला उच्यन्ते। तात्कालिक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चन्द्रशरो भुजः, तद्वर्गयुतेर्मूलम् तात्कालिकं तयोः केन्द्रान्तरं कर्णः स्यात्। तन्मानैक्यार्धतः प्रोज्झ्येष्टग्रासानयनं सुबोधम्। रविग्रहे तु



ख = खस्वस्तिकम्। वि₁ = गर्भाभिप्रायेण चन्द्रबिम्बम्। च = चन्द्रस्थानं क्रान्तिवृत्ते। खवि₁ विं₁ = चन्द्रदृङ्मण्डलम् विं₁ = लम्बितचन्द्रः। विं₁ चं = स्पष्टशरश्चन्द्रस्य। वि = स्थानीयरविः। ख वि विं दृङ्मण्डले लम्बितरविः = विं। विरं = रविनतिः। विं स क्रान्तिवृत्तसमानान्तरम्। विं स = कोटिकला। वि₁ स = तात्कालिकलम्बितरविचन्द्रयोर्दक्षिणोत्तरमन्तरं स्पष्टशरः।

अत्र कोटिः = विं स = च रं − च चं = चवि + वि रं − च चं = चवि − इलं

∴ च वि = कोक + इलं। अत्र च चं − वि रं = इष्टकालिकलम्बनकला। चवि = इष्टकाले गर्भाभिप्रायेण रविचन्द्रान्तरम्।

अथात्र कल्प्यते वित्रिभतः प्राक् स्पष्टस्पर्शकालादनन्तरमिष्टकाले इ, समे इष्टग्रासोऽपेक्षितः, ततो गर्भक्षितिजादिष्टग्रासे

इष्टकालः = द − कोभ − इलंघ।

साधितस्पष्टस्पर्शकालः = द − स्फुस्थि − लं₁।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पर्शादनन्तरमिष्टग्रासे इष्टकालः

$= ($ द $-$ कोघ $-$ इलं घ $) - ($ द $-$ स्फुस्थि $-$ लं$_1$ $)$

$=$ स्फुस्थि $+$ लं$_1$ $-$ इलं घ $-$ कोघ $=$ इ

$\therefore$ कोघ $=$ स्फुस्थि $+$ लं$_1$ $-$ इलं घ $-$ इ............(१)

अथ स्पष्टदर्शान्तः $=$ द $-$ लं$_2$

स्पष्टस्पर्शकालः $=$ द $-$ स्फुस्थि $-$ लं$_1$ ।

द्वयोरन्तरेण स्पार्शिकं स्पष्टस्थित्यर्धम् $=$ स्फुस्थि $+$ लं$_1$ $-$ लं$_2$ $=$ स्पस्थि ।

अथ यदि स्पष्टस्थितिखण्डेन लं$_1$ $-$ लं$_2$ इदं लम्बनान्तरम् तदा स्पर्शादनन्तरम् इ $-$ मितेन कालेन किमित्यनुपातेन यदि वास्तवमानम्

(लं$_1$ $-$ इलंघ) अस्येदं $\frac{\text{इ (लं}_1 - \text{लं}_2)}{\text{स्पस्थि}}$ कल्प्यते, तदास्यास्मिन् (१) उत्थापनेन

$$\text{कोघ} = \text{स्फुस्थि} - \text{इ} + \frac{\text{इ (लं}_1 - \text{लं}_2)}{\text{स्पस्थि}}$$

$$= \frac{\text{स्फुस्थि} \times \text{स्पस्थि} - \text{इ} \times \text{स्पस्थि} + \text{इ (लं}_1 - \text{लं}_2)}{\text{स्पस्थि}}$$

$$= \frac{\text{स्फुस्थि} \times \text{स्पस्थि} - \text{इ} \{ \text{स्पस्थि} - (\text{लं}_1 - \text{लं}_2) \}}{\text{स्पस्थि}}$$

$$= \frac{\text{स्फुस्थि} \times \text{स्पस्थि} - \text{इ} \times \text{स्फुस्थि}}{\text{स्पस्थि}} = \frac{\text{स्फुस्थि (स्पस्थि} - \text{इ)}}{\text{स्पस्थि}}$$

कोटिघटिकागत्यन्तरकलागुणाः षष्टिभक्ता जाताः कोटिकलाः

$$= \text{कोक} = \frac{\text{स्फुस्थि}}{\text{स्पस्थि}} = \frac{\text{(गअं स्पस्थि} - \text{इ)}}{\text{६०}} = \frac{\text{स्फुस्थि} \times \text{चन्द्रग्रहणवत्कोटिः}}{\text{स्पस्थि}}$$

अत्र चन्द्रग्रहणवदागतं स्फुटशरतः स्थित्यर्धम् $=$ स्फुस्थि, इत्याचार्येण मध्यस्थित्यर्धमुच्यते । स्फुटस्पर्शकालदर्शान्तकालयोरन्तरम् $=$ स्पस्थि । इति च स्पष्टस्थितिखण्डमुच्यते । अत उपपन्नं सूर्यग्रहे कोटिसाधनमिति । एवमतो व्यस्तविधिना कोटिघटीतो वीष्टस्थि तदलमानम् $=$ स्पस्थि $-$ इ $=$ $\frac{\text{कोघ} \times \text{स्पस्थि}}{\text{स्फुस्थि}}$ ।

इष्टग्रासकालिकस्पष्टशराज्ञानान्मध्यकालिकस्पष्टशरतः कर्म कृतम्, भतोऽसकृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्कर्म युक्तमेव, यतस्तात्कालिकशराज्ञानात् स्फुटस्थितिदलादिकस्याज्ञानमिति। एवं स्पष्टस्थितिदलानुपाततो यदि लं$_1$ – इ लंघ अस्य मानमानीयते, तदा कोट्यादिसाधनं सूक्ष्ममाचार्योक्तम्। अनुपातस्य नियतैकरूपत्वात् तादृशानुपातेन लम्बनान्तरं न सूक्ष्ममायाति, अत आचार्योक्तं स्थूलमानयनम्। आचार्योक्तकोटिरेव भास्करस्य भुजसंज्ञा। भास्करेणापि तदेव स्थूलमानयनं कृतं स्वसूर्यग्रहणाधिकारे, अतो मदीयं सूत्रम्।

"चेत् स्पष्टस्थितिखण्डकेन जनितं तत्कालमध्येऽन्तरं
स्पष्टं लम्बनयोरिदं भवति किं तर्हीष्टकालेन चेत्।
सूक्ष्मं स्यादनुपातजातमनिशं दोरादिकं कोविद-
श्रीमद्भास्करसत्प्रकारविलसत् सत् स्यात् तदार्कग्रहे॥"

इदं युक्तमेवेति सुधीभिर्भृशं विचिन्त्यमिति।

एवं मौक्षिकेऽपि क्षेत्रसंस्थया स्फुटा वासनेति। अत्र सौरभाष्ये नृसिंहेन "अत्रोपपत्तिः स्पष्टैव" इत्यभिहितम्॥ १८-२०॥

इदानीं मौक्षिके चेष्टे विशेषमिष्टग्रासादिष्टानयनं चाह—

मध्यग्रहणतश्चोर्ध्वमिष्टनाडीर्विशोधयेत्।
स्थित्यर्धान्मौक्षिकाच्छेषं प्राग्वच्छेषं तु मौक्षिके॥ २१॥
ग्राह्यग्राहकयोगार्धाच्छोध्याः स्वच्छन्नलिप्तकाः।
तद्वर्गात् प्रोज्झ्य तत्कालविक्षेपस्य कृतिं पदम्॥ २२॥
कोटिलिप्ता रवेः स्पष्टस्थित्यर्धेनाहता हृताः।
मध्येन लिप्तास्तन्नाड्यः स्थितिवद् ग्रासनाडिकाः॥२३॥

मध्यग्रहणतश्चोर्ध्वं मोक्षात् प्राक् चेदिष्टनाड्यः तर्हि ता इष्टनाडीर्मौक्षिकात् स्थित्यर्धाद्विशोधयेद् गणक इति शेषः। शेषं गृहीत्वा शेषं कर्म मौक्षिके तु पूर्ववत् स्पार्शिके इष्टे यथा कृतं कोटिकलानयनाय तथैवात्रापि कार्यमित्यर्थः। अयमर्थः पूर्वमेव व्याख्यातः।

अथेष्टग्रासादिष्टज्ञानम्—स्वच्छन्नलिप्तिका अभीष्टग्रासकलाश्छाद्यच्छादकमानैक्यार्धाद्विशोध्याः, शेषं ग्राह्यग्राहककेन्द्रान्तरं कर्णः स्यात्। तद्वर्गात् तात्कालिकशरस्य कृतिं वर्गं प्रोज्झ्य पदं ग्राह्यम्। पदमेव कोटिकलाः स्युः। रवेः कोटिलिप्ताः पूर्वविधिना या आगतास्ताः स्पष्टस्थित्यर्धेन गुणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्येन स्थित्यर्धेन हृतास्तदेष्टकालानयनयोग्याः कोटिलिप्ताः स्युः। ताभ्या लिप्ताभ्यः स्थितिसाधनवत्—ग्रासनाडिकाः साध्याः। कोटिलिप्ताः षष्टिगुणा-रवीन्दुगत्यन्तरभक्त्या वीष्टाः स्थितिनाड्यः स्युः। तदूनं स्वं स्थित्यर्धं स्वेष्ट-कालो भवेदिति सर्वमर्थाद् गम्यते। तात्कालिकशराज्ञानादिदं कर्म चेन्मध्य-कालिकशरात् कृतम् तदा स्थितिसाधनवदत्राप्यसकृत्कर्म कर्तव्यमित्यपि 'स्थितिवत्' पदेन सूचितमिति।

अत्रोपपत्तिः प्रथमश्लोकस्य पूर्वमेव प्रतिपादिता। चन्द्रग्रहणे चेष्टकाला-नयनस्योपपत्तिरिष्टग्रासानयनवैपरीत्येन सुगमा। रविग्रहे कोटिघटीज्ञानार्थं प्रसङ्गेन कोटिलिप्तानयन एव लिखितेति सर्वं निरवद्यम् ॥ २१-२३ ॥

इदानीं परिलेखोपयोगिस्फुटमक्षवलनमाह—

नतज्याऽक्षज्ययाभ्यस्ता त्रिज्याप्ता तस्य कार्मुकम् ।
वलनांशा सौम्ययाम्याः पूर्वापरकपालयोः ॥ २४ ॥
राशित्रययुताद् ग्राह्यात् क्रान्त्यंशैर्दिक्समैर्युताः ।
भेदेऽन्तराज्ज्या वलना सप्तत्यङ्गुलभाजिता ॥ २५ ॥

नतज्या सममण्डलीयनतांशज्याऽक्षज्यया गुणिता त्रिज्यया भक्ता तस्य लब्धस्य चापं पूर्वापरकपालयोः क्रमेण सौम्ययाम्या अक्षजा वलनांशाः स्युः। पूर्वकपाले सौम्याः पश्चिमकपाले याम्या ज्ञेयाः। तेऽक्षजवलनांशा इत्यर्थः। ग्राह्यात् चन्द्रग्रहे चन्द्रात् सूर्यग्रहे च सूर्याद् राशित्रययुतात् क्रान्त्यंशा अयनवलनांशाः स्युः। तैः क्रान्त्यंशैः पूर्वागता अक्षजवलनांशा दिक्साम्ये युताः कार्याः। भेदे दिग्भेदे चाक्षजवलनांशानां क्रान्त्यंशानां चान्तरं कर्तव्यम्। ततो योगादन्तराच्च वा या ज्या सा सप्तत्यङ्गुलैर्भाजिता लब्धिर्वलना स्पष्टवलनाख्या भवतीत्यर्थः।

अत्रोपपत्तिः—ग्रहोपरि गतयोर्ध्रुवकदम्बप्रोतयोर्मध्ये ग्रहलग्नकोणोऽयन-वलनांशाः। समप्रोतध्रुवप्रोतयोर्मध्ये ग्रहलग्नकोणोऽक्षजवलनांशाः। समकदम्ब-प्रोतयोर्मध्ये च स्पष्टवलनांशाः। वा ग्रहत्रिज्यावृत्ते नाडीक्रान्तिमण्डलयोरन्तरे येंऽशास्तेऽयनवलनांशाः। नाडीसमवृत्तान्तरांशाः अक्षजवलनांशाः। समक्रान्ति-वृत्तान्तरांशाश्च स्पष्टवलनांशा इति। तत्र समस्थानाद् ग्रहोपरिगते समप्रोते उपवृत्तव्यासार्धमेको भुजः, ध्रुवप्रोते द्युज्या—व्यासार्धं द्वितीयो भुजः। याम्योत्तर-वृत्ते पलांशास्तृतीयो भुजः। द्वितीयभुजसम्मुखकोणः समस्थानगतः सममण्डलीय-नतांशाः। तृतीयभुजसम्मुखकोणश्च ग्रहगतोऽक्षजवलनांशास्तज्ज्या चापीय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिकोणमित्या ज्याअव $= \frac{\text{ज्याअ} \times \text{ज्यासन}}{\text{द्यु}}$ । आचार्येण द्युज्यायाश्चलत्वात् द्युज्यास्थाने सर्वत्र स्थूला त्रिज्या गृहीता, अत उपपन्नमक्षजवलनानयनम् ।

एवं ध्रुवाद् ग्रहपर्यन्तं ध्रुवप्रोते द्युज्याव्यासार्धमेको भुजः । कदम्बाद् ग्रहपर्यन्तं कदम्बप्रोते शरकोटिर्द्वितीयो भुजः । तृतीयभुजसम्मुखकोणो ग्रहलग्नोऽयनवलनांशाः । प्रथमभुजसम्मुखकोणो ग्रहकोट्यूनभार्धांशाः । ततश्चापीयत्रिकोणमित्या आयनवलनज्या $= \frac{\text{कोज्याग्र} \times \text{ज्यापक्रा}}{\text{द्यु}}$ । सत्रिभग्रहज्या च खेटकोटिज्यासमा । आचार्येणात्रापि द्युज्यास्थाने स्थूला त्रिज्या गृहीता । अत उपपन्नमायनवलनानयनम् ।

इदं वलनद्वयं क्रमज्ययैव कर्तव्यमिति चापत्रिकोणमितितः स्फुटम् तथापि भास्करेण मन्दानां प्रतीत्यर्थं बहु प्रतिपादितम् तच्च तद्गोलाध्याये प्रसिद्धम् । तत्र बहवो मद्विशेषाश्च विचिन्त्याः । तयोः संस्कारतः स्फुटवलनांशाः समकदम्बप्रोतमध्ये स्फुटाः । इह तज्ज्या त्रिज्यासप्तत्यंशमितत्रिज्यायां परिणता वलनाख्या कृता । अर्थात् स्वल्पान्तरात् सप्तवर्गमितत्रिज्यायां परिणता वलनाख्या कृतेति । सौरभाष्ये नृसिंहेन नतशब्देन नतकालो भ्रमाद् व्याख्यातः ।। २४-२५ ।।

इदानीमङ्गुललिप्तार्थमाह—

सोन्नतं दिनमध्यर्धं दिनार्धाप्तं फलेन तु ।
छिन्द्याद् विक्षेपमानानि तान्येषामङ्गुलानि तु ।। २६ ।।

इति चन्द्रग्रहणाधिकारः ।। ४ ।।

दिनं दिनमानमध्यर्धं सार्धैकेन $\frac{3}{2}$ गुणमिष्टकालिकोन्नतकालेन सहितं दिनार्धेन भक्तं यत्फलं तेन विक्षेपादीनां मानानि छिन्द्याद् विभजेद् गणक इति शेषः । तानि लब्धानि फलानि तेषां विक्षेपादीनामङ्गुलानि भवन्तीति ।

अत्रोपपत्तिः—गगनमध्यस्थ यद् ग्रहबिम्बं तस्याखिलकरनिकरपिहितपरिधित्वात् किञ्चित् सूक्ष्मं दृश्यते । उदये तु क्षितिजस्थं क्षितिव्यवहिततत्करनिकरं भूवायुना वलितं विशालमिव प्रतिभाति । तत् सूक्ष्मत्वं विशालत्वं चोपलब्ध्याऽऽचार्यैः कल्पितम् । तच्च गगनमध्ये चतुःकलम् । उदये त्रिकलमङ्गुलं कल्पितम् । अवान्तरेऽनुपातेन यदि दिनार्धसम उन्नतकालेऽङ्गुललिप्तान्तरं रूपं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ लभ्यते, तदेष्टोन्नतकालेन किमिति । फलं त्रियुक्तमङ्गुललिप्तिकाः स्युः ।

$$\text{पूर्वानुपातेनाङ्गुललिप्ताः} = ३ + \frac{\frac{\text{उ का}}{\text{दि}}}{२} = \frac{\frac{३\,\text{दि}}{२} + \text{उ का}}{\frac{\text{दि}}{२}}$$ अत उपपन्नम् ।

भास्करेण गगनमध्ये सार्धत्रिकलमुदये सार्धद्विकलमङ्गुलं कल्पितम् शङ्कुना सूक्ष्मोऽनुपातश्चावान्तरे कृतः । शङ्कुनोन्नतकालेन वा योऽनुपातस्तत्र कतरः सूक्ष्म इत्यस्य ज्ञानं वास्तवप्रकारज्ञानं विना न भवति । अतो भास्करस्य "शङ्क्वनुपातः सूक्ष्मः" इति कथनं न युक्तिमत् । वस्तुतस्तु अङ्गुललिप्ताकरण-प्रयासेन किम् ? केनापि समेनाङ्केन विक्षेपादयः परिलेखे लाघवार्थमपवर्त्याः । अत एव गणेशदैवज्ञादिभिस्त्रिभिरपवर्तिता विक्षेपादय एवाङ्गुलत्वेन कल्पिताः । अत्र सिद्धान्ततत्त्वविवेके कमलाकरेण व्यर्थमेव बहूक्तं यथार्थप्रकाराज्ञानात् ॥२६॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा ।
सुखायामृतवर्षिण्यां गतश्चन्द्रग्रहात्मकः ॥ ४ ॥

इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां
सुधावर्षिण्यां चन्द्रग्रहणाधिकारः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ सूर्यग्रहणाधिकारः

तत्रादौ लम्बननत्योरभावस्थानमाह—

मध्यलग्नसमे भानौ हरिजस्य न सम्भवः ।
अक्षोदङ्मध्यभक्रान्तिसाम्ये नावनतेरपि ॥ १ ॥

क्षितिजोपरि स्थितस्य क्रान्तिवृत्तखण्डस्य मध्यं वित्रिभम् । मध्यलग्नं वित्रिभलग्नं तत्समे रवौ हरिजस्य स्फुटलम्बनस्य सम्भवो न । तत्रस्थे रवौ स्फुटलम्बनाभाव इत्यर्थः । एवमक्षस्य उदग्मध्यभक्रान्तेश्च साम्येऽवनतेरपि न सम्भवः । अत्र मध्ये याम्योत्तरवृत्ते यद्भं लग्नं तन्मध्यभं तस्योत्तरा क्रान्तिर्यदाऽक्षेन समा, तदा मध्यभस्य वित्रिभसमस्य खस्वस्तिके स्थितत्वाद् दृक्क्षेपाभावात् तत्र नतेरप्यभाव इत्यर्थः ।

अत्र सौरभाष्ये हरिजशब्देन दृग्लम्बनं व्याख्याय दृग्लम्बननत्योरभावस्थानं खमध्ये निश्चित्य मध्यशब्देन खस्वस्तिकं गृहीतम् तन्न समीचीनम् "न लम्बनं वित्रिभलग्नतुल्ये रवौ' इत्यादिभास्करोक्तेः । 'यद्वद्राशिव्रजति हरिजम्' इति बृहज्जातकवचनेन हरिजशब्देन क्षितिजं गृह्यते । पृष्ठक्षितिजे लम्बनस्य परमत्वादत्रोपचाराद्धरिजशब्देन लम्बनमेव गृहीतमिति ।

अत्रोपपत्तिः—दृङ्मण्डले गर्भाभिप्रायेण स्थितस्य ग्रहबिम्बस्य पृष्ठाभिप्रायेण लम्बितस्य च यदन्तरं तद् दृग्लम्बनम् । स्थानलम्बितयोरुपरिगतयोः कदम्बप्रोतयोः क्रान्तिवृत्तावधि स्थानीयस्य लम्बितस्य चान्तरं मध्यस्फुटशरौ । तयोरन्तरं दक्षिणोत्तरं नतिः । तयोः कदम्बप्रोतयोः क्रान्तिवृत्तेऽन्तरं स्फुटलम्बनमिति प्रसिद्धं दृग्लम्बनक्षेत्रं ध्येयम् । वित्रिभस्थे रवौ दृङ्मण्डलमेव कदम्बप्रोतं दृक्क्षेपवृत्ताख्यम् । तत्र लम्बितस्य रवेरुपरि दृङ्मण्डलं तदेव दृक्क्षेपवृत्तम् । अतो लम्बितस्थानं च क्रान्तिवृत्ते तदेव वित्रिभमतः स्फुटलम्बनाभावः । एवं यदा क्रान्तिमण्डलमेव दृङ्मण्डलम् तदा स्थानीयलम्बितशरयोरभावात् तदन्तरमितनतेरप्यभावः । तत्र वित्रिभस्थानस्य खस्वस्तिके स्थितत्वात् क्रान्त्यक्षयोर्भिन्नदिक्कयोः समत्वान्मध्यनतांशाभावाच्च नतेरभाव इति दृग्लम्बनक्षेत्रतः स्फुट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिति। गणितस्कन्धे उपपत्तिमानागमः प्रमाणमिति नियमेनोपपत्त्या 'मध्य-लग्नेन' वित्रिभमेव सिध्यतीति ॥ १ ॥

इदानीं स्फुटलम्बनार्थं वित्रिभनतोन्नतांशज्यानयनमाह—

देशकालविशेषेण यथावनतिसम्भवः ।
लम्बनस्यापि पूर्वान्यदिग्वशाच्च तथोच्यते ॥ २ ॥

लग्नं पर्वान्तनाडीनां कुर्यात् स्वैरुदयासुभिः ।
तज्ज्यान्त्यापक्रमज्याघ्नी लम्बज्याप्तोदयाभिधा ॥३॥

तदा लङ्कोदयैर्लग्नं मध्यसंज्ञं यथोदितम् ।
तत्क्रान्त्यक्षांशसंयोगो दिक्साम्येऽन्तरमन्यथा ॥ ४ ॥

शेषं नतांशास्तन्मौर्वी मध्यज्या साभिधीयते ।
मध्योदयज्ययाभ्यस्ता त्रिज्याप्ता वर्गितं फलम् ॥५॥

मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदम् ।
तत्त्रिज्यावर्गविश्लेषान्मूलं शङ्कुः स दृग्गतिः ॥ ६ ॥

नतांशबाहुकोटिज्ये ऽस्फुटे दृक्क्षेपदृग्गती ।

देशविशेषेण कालविशेषेण च यथाऽवनतेः सम्भवः, तथा पूर्वापरदिग्वशाद् यथा लम्बनस्यापि सम्भवस्तथोच्यते मयेति शेषः। स्वैरुदयासुभिः स्वदेशोदयासुभिः दश.न्तनाडीनां त्रिप्रश्नाधिकारविधिना लग्नं कुर्याद् गणक इति शेषः। तज्ज्या सायनल नज्या परमक्रान्तिज्यया गुणा लम्बज्याप्ता फलमुदयाभिधा लग्नाग्रा स्यादिति। तदा पर्वान्तसमये दर्शान्तकाले लङ्कोदयासुभिर्मध्यसंज्ञं दशमं लग्नं च यथोदितं त्रिप्रश्नाधिकारोदितं कुर्यादिति। दिक्साम्ये तत्क्रान्त्यंशानामक्षांशानां च संयोगः। अन्यथा दिग्भेदे तेषामन्तरं च कार्यम्। एवं योगो वान्तरे शेषं मध्यनतांशा भवन्ति। तज्ज्या या सा मध्यज्याऽभिधीयते कथ्यत इति। मध्या मध्यज्या पूर्वानीतोदयज्यया गुणिता त्रिज्याभक्ता फलं वर्गितं कार्यम्। फलस्य वर्गः कार्य इत्यर्थः। तद्वर्गितेन फलेन मध्यज्यावर्गो विश्लिष्टः कार्यः। फलवर्गमध्यज्यावर्गयोरन्तरं कार्यमित्यर्थः। शेषतो यत् पदं स दृक्क्षेपो मध्यमदृक्क्षेपो, अर्थात् पूर्वानीतं फलं यथा यथाल्पं तथातथाऽयं दृक्क्षेपः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्फुटदृक्क्षेपासन्न इति वेदितव्यम् । तस्य दृक्क्षेपस्य त्रिज्यावर्गस्य च विश्लेषादन्तरान्मूलं शङ्कुर्भवेत् । स शङ्कुरेव दृग्गतिर्मध्यमदृग्गतिसंज्ञः ।

ननु स्फुटे दृक्क्षेपदृग्गती के इत्याशङ्कां परिहरन्नाह—नतांशेत्यादि । नतांशानां वित्रिभनतांशानां ये भुजकोटिज्ये ते एव स्फुटे दृक्क्षेपदृग्गती भवतः । वित्रिभनतांशानां ज्या स्फुटो दृक्क्षेपस्तत्कोटिज्या च स्फुटा दृग्गतिरित्यर्थः । अयमेव गोलयुक्तियुक्तोऽर्थः । रङ्गनाथादीनां व्याख्या च सदोषा विद्वद्भिर्नादरणीयेति । मदीया व्याख्या च कमलाकरसम्मता ।

अत्रोपपत्तिः—याम्योत्तरवृत्ते मध्यनतांशाः कर्णः । दृक्क्षेपवृत्ते खस्वस्तिकाद्वित्रिभावधि वित्रिभनतांशाः कोटिः । दशमवित्रिभयोरन्तरं क्रान्तिवृत्ते भुजः । भुजसम्मुखकोणः खस्वस्तिकलग्नो लग्नाग्रांशाः । मध्यनतांशसम्मुखकोणो वित्रिभगतो नवत्यंशाः । ततो यदि त्रिज्यया मध्यनतांशज्या, तदा लग्नाग्रया किमिति जाता दशमवित्रिभान्तरज्या $= \frac{\text{लज} \times \text{ज्याम}}{\text{त्रि}} =$ फलम् ।

अथ फलमध्यनतांशज्यावर्गान्तरमूलं फलकोटिज्याव्यासार्धे वित्रिभनतांशज्या दृक्क्षेपो भवितुमर्हति । अतोऽयं मध्यमदृक्क्षेपस्तत्कोटिज्या च मध्यमदृग्गतिः । फलस्याल्पत्वे ते स्फुटासन्ने दृक्क्षेपदृग्गती इति चापक्षेत्रतः स्फुटं सर्वमिति ।

अथ लग्नाग्राज्ञानाय प्रथमं क्रान्तिक्षेत्रेण लग्नक्रान्तिज्या $= \frac{\text{ज्याल} \times \text{ज्यापक्रा}}{\text{त्रि}}$ ।

ततोऽक्षक्षेत्रानुपातेन यदि लम्बज्याकोट्या त्रिज्या कर्णः, तदा क्रान्तिज्याकोट्या किमिति लब्धा लग्नाग्रोदयज्याभिधा $= \frac{\text{त्रि} \times \text{ज्याल} \times \text{ज्यापक्रां}}{\text{लम्बज्या} \times \text{त्रि}}$

$= \frac{\text{ज्याल} \times \text{ज्यापक्रां}}{\text{लम्बज्या}}$ । इत्युपपन्नं लग्नाग्रानयनम् । शेषोपपत्तिः ॥ २–६ ॥

इदानीं लम्बनानयनमाह—

एकज्यार्धगतश्छेदो लब्धं दृग्गतिजीवया ॥ ७ ॥
मध्यलग्नार्कविश्लेषज्या छेदेन विभाजिता ।
रवीन्द्वोर्लम्बनं ज्ञेयं प्राक्पश्चाद् घटिकादिकम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्यलग्नाधिके भानौ तिथ्यन्तात् प्रविशोधयेत् ।
धनमूनेऽसकृत् कर्म यावत् सर्वं स्थिरीभवेत् ॥ ९ ॥

एकज्ज्या एकराशिज्या । तस्या वर्गतो दृग्गतिजीवया यल्लब्धं भवेत्तत् छेदसंज्ञो भवेत् । मध्यलग्नं वित्रिभं तस्यार्कस्य च यदन्तरं तस्य ज्या छेदेन भाजिता, तदा घटिकादिकं वित्रिभात् प्राक् पश्चाच्च रवीन्द्वोर्लम्बनं ज्ञेयम् । रवीन्द्वोर्लम्बनान्तरं घटिकादिकं ज्ञेयमित्यर्थः । भानौ वित्रिभलग्नाधिके प्राक्-कपाले भवेत् तच्च तिथ्यन्तात्—गणितागतदर्शान्तात् प्रविशोधयेत् । वित्रिभ-लग्नाद् भानावूने च तिथ्यन्ते तल्लम्बनं धनं कार्यम् । एवं संस्कृतदर्शान्ते लग्नादिकं विधाय पुनः पूर्ववल्लम्बनमानेयमेवं तावदत्रासकृत् कर्म कर्त्तव्यं यावत् सर्वं स्थिरीभवेत् । यावत् सर्वं लग्नादिकं पुनः पुनस्तदेवागच्छेत् तावदसकृत् कर्म । अर्थाद्यावदविशेषस्तावदसकृत्कर्म कर्त्तव्यमित्यर्थः । एवं स्थिरीभूतः संस्कृतदर्शान्तः स्फुटदर्शान्तकाल इति ।

तत्र तावल्लम्बनक्षेत्रसंस्था प्रदर्श्यते



अत्रोपपत्तिः । ख=खस्वस्तिकम् । स्था$_1$ स्थाविक्रान्तिवृत्ते वि= वित्रिभम् । ग्र=ग्रहबिम्बम् । ग्रस्था=कदम्बप्रोते कग्रस्थासंज्ञके ग्रहशरः ।

स्था=ग्रहस्थानम् । खग्र=दृङ्मण्डलम् । ग्र ग्र$_1$=दृग्लम्बनकला= दृल । कग्र$_1$ ल$_1$ स्था$_1$=लम्बितग्रहोपरि कदम्बप्रोतवृत्तम् । ग्रल$_1$=ग्रबिन्दो-र्लम्बितकदम्बप्रोतोपरि लम्बः । खल=खस्वस्तिकाल्लम्बितकदम्बप्रोतोपरि लम्बः । स्थास्था$_1$=स्फुटलम्बनम्=लं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस्था = वित्रिभग्रहयोरन्तरम् = वि । ख वि = वित्रिभनतांशाः । क वि ख = ९० + वित्रिभनतांशाः । एतज्ज्या = वित्रिभशङ्कुः = दृगतिः । खग्र = ग्रहनतांशाः = दृ । खग्र$_1$ = पृष्ठीयनतांशाः = स्फुदृ । अथ प्रसिद्धलम्बन-क्षेत्रेण ज्यादृलं = $\frac{\text{ज्यास्फुदृ} \times \text{ज्यापलं}}{\text{त्रि}}$ । ततश्चापीयत्रिकोणमित्या ज्याखल = $\frac{\text{दृग} \times \text{ज्या}(\text{वि}+\text{लं})}{\text{त्रि}}$ ।

$$\text{ज्याग्रलं}_1 = \frac{\text{ज्यादृलं}}{\text{ज्यास्फुदृ}} \times \text{ज्याखल}$$

$$= \frac{\text{ज्यादृलं}}{\text{ज्यास्फुदृ}} \times \text{दृग} \times \frac{\text{ज्या}(\text{वि}+\text{लं})}{\text{त्रि}}$$

$$= \frac{\text{ज्यास्फुदृ} \times \text{ज्यापलं}}{\text{ज्यास्फुदृ} \times \text{त्रि}} \times \text{दृग} \times \frac{\text{ज्या}(\text{वि}+\text{लं})}{\text{त्रि}}$$

$$= \frac{\text{ज्यापलं}}{\text{त्रि}} \frac{\text{ज्या}(\text{वि}+\text{लं})}{\text{त्रि}} \times \text{दृग}$$

ततः ज्यास्थास्था$_1$ = ज्यालं

$$= \frac{\text{त्रि} \times \text{ज्यापलं}}{\text{त्रि}} \times \frac{\text{ज्या}(\text{वि}+\text{ल})}{\text{त्रि}} \times \frac{\text{दृग}}{\text{ज्या कग्र}}$$

$$= \frac{\text{त्रि} \times \text{ज्यापलं}}{\text{त्रि}} \times \frac{\text{ज्या}(\text{त्रि}+\text{लं})}{\text{त्रि}} \times \frac{\text{दृग} \times}{\text{कोज्याश}}$$

$$= \frac{\text{ज्यापलं} \times \text{ज्या}(\text{वि}+\text{लं})}{\text{त्रि}} \times \frac{\text{दृग}}{\text{कोज्याश}} \ldots\ldots (१)$$

अत्र परमलम्बनस्याल्पत्वाज्ज्याचापयोरभेदात्

$$\text{लं} = \frac{\text{पलं}}{\text{त्रि}} \frac{\text{ज्या}(\text{वि}+\text{लं})}{\text{त्रि}} \times \frac{\text{दृग}}{\text{कोज्याश}}$$ । गत्यन्तरेण षष्टिघटिका-स्तदा लम्बनेन किमिति । लब्धा लम्बनघटिकाः ।

$$= \frac{६० \times \text{पलं}}{\text{गअं}} \times \frac{\text{ज्या}(\text{वि}+\text{ल})}{\text{त्रि}} \times \frac{\text{दृग}}{\text{कोज्याश}}$$

$$= \frac{४\ \text{ज्या}(\text{वि}+\text{लं})}{\text{त्रि}} \times \frac{\text{दृग}}{\text{कोज्याश}} \quad \ldots \ldots \quad (२)$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र लम्बनस्याल्पत्वात्, ज्या (वि + लं) = ज्यावि, स्वल्पान्तरात् । तथा सूर्यस्य शरकोटिज्या = त्रिज्या, सूर्यग्रहे चन्द्रशराल्पत्वात् तत्कोटिज्या च स्वल्पान्तरात् त्रिज्यासमा कृता । ततो जाता लम्बनघटिकाः = लघ =

$$\frac{४\ ज्या\ वि \times दृग}{त्रि \times त्रि} = \frac{\frac{ज्या\ वि}{त्रि^२}}{४\ दृग}$$

एतेनोपपन्नं सौरं लम्बनानयनम् । अनेन प्रकारेण वस्तुतो रवेश्चन्द्रस्य च पृथक् पृथक् लम्बनमुपपद्यते । लम्बनयोरल्पत्वाद्रविग्रहणे द्वयोः स्थानयोश्च स्वल्पान्तरात् साम्यात् तयोः परमलम्बनान्तरवशेन स्फुटलम्बनान्तरघटिका एव आनीता आचार्यैरिति । एवं स्फुटदर्शान्ताज्ञानाद् गणितागतदर्शान्ते लम्बनमानीतमनोऽसकृद्विधिनाऽऽनीतस्फुटदर्शान्तेऽसकृत्कर्मणा भवं स्फुटलम्बनं च वास्तवमिति ।

$$अथ\ पूर्वप्रकारेण\ ज्यादृलं = \frac{ज्यापल}{त्रि} \times ज्यास्फुदृ$$

$$= \frac{ज्यापलं}{त्रि} \times ज्या\ (दृ + लं)$$

$$\therefore त्रि \times ज्यादृलं = ज्यापलं \times ज्या\ (दृ + दृलं)$$

$$= ज्यापलं \left(\frac{ज्यादृलं \times शं + कोज्यादृलं \times ज्यादृ}{त्रि} \right)$$

समच्छेदेन

$$त्रि \times {}^२ज्यादृलं \times = ज्यापलं \times शं \times ज्यादृलं + ज्यापलं \times ज्यादृ \times कोज्यादृलं$$

$$\therefore \frac{ज्यादृलं}{कोज्यादृलं} \times (त्रि^२ - ज्यापलं \times शं) = ज्यापलं \times ज्यादृ$$

$$ततः\ \frac{१२\ ज्यादृलं}{कोज्यादृलं} = \frac{ज्यापलं \times ज्यादृ \times १२}{त्रि^२ - ज्यापल \times शं} = \frac{\frac{\frac{१२\ ज्यादृ}{शं}}{त्रि^२}}{ज्यापलं \times शं} - १$$

$$= दृलंछा = \frac{दृइछा}{\frac{त्रि^२}{ज्यापलं \times शं} - १}$$

। अनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिज्याकृतिः परमलम्बनमौर्विकाप्ता
ग्राभाजिता च विधुना रहिताऽथ तेन।
भक्तेष्टभा फलमितां पलभां प्रकल्प्य
साध्या पलांशकलिकेष्टविलम्बनं तत्॥

इति मदुक्तं सूत्रमुपपद्यते।

अत्रैव यदि स्वल्पान्तरात् कोज्यादलं = त्रि। तदा पूर्वसमीकरणेन

$$\frac{\text{ज्यादलं}}{\text{त्रि}} = \frac{\text{ज्याद} \times \text{ज्यापलं}}{\text{त्रि}^{२} - \text{ज्यापलं} \times \text{शं}}$$

$$\therefore \text{ज्यादलं} = \frac{\text{ज्याद} \times \text{ज्यापलं}}{\text{त्रि} - \dfrac{\text{ज्यापलं} \times \text{शं}}{\text{त्रि}}}$$

अनेन 'बृहज्ज्यकाभिर्ग्रहशङ्कुदग्ज्ये' इत्यादि संशोधकोक्तमुपपद्यते। इदं पूर्वोदितं लम्बमानयनम्

$$\text{ज्यादलं} = \frac{\text{ज्यापलं}}{\text{त्रि}} \text{ज्या } (\text{द} + \text{दलं})$$ अस्मात् समीकरणादुत्पन्नम्।

(१) समीकरणे च

$$\text{ज्यालं} = \frac{\text{ज्यापलं} \times \text{दग}}{\text{कोज्याश}} \times \frac{\text{ज्या } (\text{वि} + \text{लं})}{\text{त्रि}}$$

अत्र यदि $\frac{\text{ज्यापलं} \times \text{दग}}{\text{कोज्याश}} = \text{परमलम्बनज्या} = \text{ज्यापलं}'$ कल्प्यते तदा

$$\text{ज्यालं} = \frac{\text{ज्यापलं}}{\text{त्रि}} \text{ज्या } (\text{वि} + \text{लं})$$ एतेन 'अथो कलायाः परलम्बनस्य' इत्यादि संशोधकोक्तं तथा 'त्रिभोनलग्नस्य नरस्त्रिभूघ्नः' इत्यादि भास्करोक्तं चोपपद्यते। अत्र भास्करस्य परो न समीचीनस्तेन लम्बने स्थूलता भवत्यत एव वासनायां भास्करः 'एतदानयनं किञ्चित् स्थूलम्' इत्याहेत्यलं पल्लवितेन। धनर्णवासना वित्रिभतः प्रागपरकपालयोः स्फुटेति॥ ७-९॥

इदानीं नतिसाधनं ततः स्पष्टशरसाधनं चाह—

दृक्क्षेपः शीततिग्मांश्वोर्मध्यभुक्त्यन्तराहतः।
तिथिघ्नत्रिज्यया भक्तो लब्धं सावनतिर्भवेत्॥ १०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृक्क्षेपात् सप्ततिहृताद्भवेद्वावनतिः फलम् ।
अथवा त्रिज्यया भक्तात् सप्तसप्तकसङ्गुणात् ॥ ११ ॥
मध्यज्यादिग्वशात् सा च विज्ञेया दक्षिणोत्तरा ।
सेन्दुविक्षेपदिक्साम्ये युक्ता विश्लेषिताऽन्यथा ॥ १२ ॥

शीततिग्मांश्वोः सूर्यचन्द्रयोर्यो दृक्क्षेपः स रवीन्दुगत्यन्तरकलागुणः पञ्चदशगुणितत्रिज्यया भक्तो लब्धं यत् सैवावनतिर्नतिः कलात्मिका भवेत् । वा दृक्क्षेपात् सप्ततिहृतात् फलमवनतिर्भवेत् । अथवा दृक्क्षेपात् सप्तसप्तकैरेकोनपञ्चाशता सङ्गुणात् त्रिज्यया भक्तात् फलमवनतिर्भवेत् । सा च नतिर्मध्यज्यादिग्वशात् दृक्क्षेपदिग्वशाद्दक्षिणोत्तरा विज्ञेया । दृक्क्षेपे सौम्ये नतिरुत्तरा दक्षिणे च दक्षिणा वेदितव्येत्यर्थः । सा चन्द्रशरदिक्साम्ये चन्द्रशरेण युक्ता । अन्यथा दिग्भेदे विश्लेषिता चन्द्रशराच्छोध्या तदा स्पष्टशरो भवेत् । अत्र स्पष्टशरस्य नाम स्पष्टा नतिरिति ज्ञेया ।

अत्रोपपत्तिः—अत्र ग्रहणे चन्द्रशरस्याल्पत्वात् क्रान्तिवृत्ते रविचन्द्रयोः



स्थानं च बिन्दौ । ख = खस्वस्तिकम् । वि = वित्रिभम् । तन्नतांशाः = ख वि । एषां ज्यैव दृक्क्षेपः । ख च = रविचन्द्रयोर्गर्भाभिप्रायेण नतांशा = दृ । चचं = चन्द्रस्य दृग्लम्बनम् । चं च$_1$ = नतिः । ख चं = पृष्ठीयनतांशाः = पृ । तदा लम्बनक्षेत्रेण ।

$$\text{ज्या च चं} = \frac{\text{ज्यापलं} \times \text{ज्यापृ}}{\text{त्रि}} = \frac{\text{ज्या पलं} \times (\text{दृ} + \text{चचं})}{\text{त्रि}}$$

$$\text{ज्या चं च}_1 = \frac{\text{ज्या ख वि} \times \text{ज्या च चं}}{\text{ज्या च ख}} = \frac{\text{दृक्क्षे} \times \text{ज्या च चं}}{\text{ज्यादृ}}$$

$$= \frac{\text{दृक्क्षे} \times \text{ज्यापलं} \times \text{ज्या}(\text{दृ} + \text{च चं})}{\text{त्रि} \times \text{ज्यादृ}} \quad \dots \quad \dots \quad (1)$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र परमलम्बनस्याल्पत्वाज्ज्याचापयोरभेदात् तथा ज्या (दृ + चं च) = ज्यादृ, स्वल्पान्तरात् ।

चं च$_1$ = नतिः = $\frac{\text{दृक्क्षे} \times \text{पलं}}{\text{त्रि}}$ । गतेः पञ्चदशांशः परमलम्बनं तेनोत्थापनेन जाता ।

चन्द्रनतिः = $\frac{\text{दृक्क्षे} \times \text{च ग}}{\text{१५ त्रि}}$

एवं रविनतिः = $\frac{\text{दृक्क्षे} \times \text{र ग}}{\text{१५ त्रि}}$

द्वयोरन्तरेण जाता सूर्यग्रहणे नतिः = $\frac{\text{गअं} \times \text{दृक्क्षे}}{\text{१५ त्रि}}$ अनेन प्रथमः प्रकार उपपन्नः । अथ स्वल्पान्तरात् $\frac{\text{ग अं}}{\text{१५}}$ = ४९ अतो नतिः = $\frac{\text{ग अं}}{\text{१५}} \times \frac{\text{दृक्क्षे}}{\text{त्रि}} = \frac{\text{४९ दृक्क्षे}}{\text{त्रि}}$ अनेन तृतीयः प्रकार उपपन्नः । दृक्क्षेपगुणकेन त्रिज्यामपवर्त्य जातो द्वितीयः प्रकारः नतिः = $\frac{\text{दृक्क्षे}}{\frac{\text{त्रि}}{\text{४९}}} = \frac{\text{दृक्क्षे}}{\frac{\text{३४३८}}{\text{४९}}} = \frac{\text{दृक्क्षे}}{\text{७०}}$, स्वल्पान्तरात् ।

(१) समीकरणेन 'कक्षयोरन्तरं यत् स्याद्वित्रिभे सर्वतोऽपि तत्' इति भास्करोक्तं न समीचीनम् । गर्भपृष्ठीयदृग्ज्ययोः साम्येन तत्समीचीनं भवितुमर्हति, तत्तु दृग्लम्बनाभावस्थल एव नान्यत्रेति सुधीभिर्भृशं विचिन्त्यम् । एवमत्र दक्षिणोत्तरा नतिः शरश्च दक्षिणोत्तरस्तयोः संस्कारेण स्फुटः शर इत्यस्य स्फुटोपपत्तिः ॥ १०-१२ ॥

अथ शेषं चन्द्रग्रहणाधिकारवदित्यतिदिशति —

तया स्थितिविमर्दार्धग्रासाद्यं तु यथोदितम् ।
प्रमाणं वलनाभीष्टग्रासादि हिमरश्मिवत् ॥ १३ ॥

तया पूर्वोदितया स्फुटनत्याऽर्थात् स्फुटशरेण यथोदितं स्थितिविमर्दार्धं ग्रासाद्यं वलनाभीष्टग्रासादि च सर्वं प्रमाणं हिमरश्मिवच्चन्द्रग्रहणवत् साध्यं ततो विशेषश्चाग्रिमप्रकारेण विज्ञेयः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं स्थित्यर्धादिके विशेषमाह—

स्थित्यर्धोनाधिकात् प्राग्वत् तिथ्यान्ताल्लम्बनं पुनः ।
ग्रासमोक्षोद्भवं साध्यं तन्मध्यहरिजान्तरम् ॥ १४ ॥

प्राक्कपालेऽधिकं मध्याद्भवेत् प्राग्रहणं यदि ।
मौक्षिकं लम्बनं हीनं पश्चार्धे तु विपर्ययः ॥ १५ ॥

तदा मोक्षस्थितिदले देयं प्रग्रहणे तथा ।
हरिजान्तरकं शोध्यं यत्रैतत् स्याद्विपर्ययः ॥ १६ ॥

एतदुक्तं कपालैक्ये तद्भेदे लम्बनैकता ।
स्वे स्वे स्थितिदले योज्या विमर्दार्धेऽपि चोक्तवत् ॥ १७ ॥

॥ इति सूर्यग्रहणाधिकारः ॥ ५ ॥

स्फुटशरवर्गो नान्मानैक्यखण्डवर्गान्मूलं स्थित्यर्धकलास्ताः षष्टिगुणा रवीन्दुगत्यन्तरभक्ता घटिकादिकं स्थित्यर्धं भवेत् । तिथ्यन्ताद् गणितागत-दर्शान्तात् स्थित्यर्धेनोनाद्युक्ताच्च प्राग्वल्लम्बनसाधनविधिना ग्रासमोक्षोद्भवं स्पर्शमोक्षोद्भवं पुनर्लम्बनं साध्यम् । तस्य (स्पार्शिकस्य वा मौक्षिकस्य लम्बनस्य) पूर्वसाधितस्फुटदर्शान्तकालिकलम्बनस्य चान्तरं कार्यम् । अन्तरे क्रियमाणे विशेषं कथयति—यदि वित्रिभतः प्राक्कपाले स्पर्शमध्यमोक्षस्थितिस्तदा यदि प्राग्रहणं स्पर्शकालिकलम्बनं मध्यान्मध्यकालिकलम्बनादधिकं मौक्षिकं लम्बनं च हीनमल्पं भवेत् । पश्चार्धे वित्रिभतः पश्चिमकपाले स्पर्शमध्यमोक्षस्थितौ तु यदि विपर्ययः—मध्यलम्बनात् स्पर्शलम्बनमल्पं मोक्षलम्बनमधिकं भवतीत्यर्थः । तदा तल्लम्बनान्तरं मोक्षस्थितिदले प्रग्रहणे स्पार्शिकस्थितिदले च देयमेवं स्फुटमोक्षमध्यकालयोरन्तररूपं स्पष्टं मौक्षिकं स्थित्यर्धं तथा स्फुटस्पर्श-मध्यकालयोरन्तररूपं स्पष्टं स्पार्शिकं स्थित्यर्धं च क्रमेण भवतीत्यर्थः ।

अथ यत्र विपर्ययो भवति, अर्थात् प्राक्कपाले मध्यलम्बनात् स्पर्शलम्बन-मल्पं मोक्षलम्बनं चाधिकं भवति पश्चिमकपाले चैतद्विपरीतं तत्रैतद्धरिजान्तरं लम्बनान्तरं मोक्षस्थित्यर्धे स्पर्शस्थित्यर्धे च शोध्यं तदा तत् स्पष्टं मौक्षिकं स्पार्शिकं च स्थित्यर्धं भवति । एतत् सर्वं कपालैक्येऽर्थाद्यदैकस्मिन्नेव कपाले स्पर्शमध्यमोक्षस्थितिस्तदोक्तम् । तद्भेदे च यदा पूर्वकपाले स्पर्शः पश्चिमकपाले च मध्योऽथवा प्राक्कपाले मध्यः पश्चिमकपाले च मोक्षस्तदा तयोः स्पर्शमध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लम्बनयोर्वा मोक्षमध्यलम्बनयोर्भेदः। तस्मिन् भेदे लम्बनयोरेकता युतिः कर्त्तव्या। सा च स्वे स्वे स्थित्यर्धे योज्या, तदा स्पष्टस्थित्यर्धं भवेत्। एवमुक्तवत्क्रिया विमर्दार्धेऽपि कर्त्तव्येत्यनुक्तमपि बुद्धिमता ज्ञायते।

अत्रोपपत्तिः—तत्र प्रथमं स्फुटस्पर्शकालः सूर्यग्रहणे कीदृश इत्यस्य निरूपणं क्षेत्रसंस्थया प्रदर्श्यते।

गर्भक्षितिजरव्युदयात् कियद्घटिकासु पृष्ठाभिप्रायेण स्पर्शकालो भवतीति किलापेक्षितम्। कल्प्यते, तदा पृष्ठाभिप्रायेण स्पर्शोऽभूत्, तदा वि =



रविकेन्द्रम् = रविस्थानम्। वि$_1$ = चन्द्र विम्बकेन्द्रम्। च = चन्द्रस्थानम्। च च$'$ र$'$ = क्रान्तिवृत्तखण्डम्। ख = खस्वस्तिकम्। ख वि$_1$ वि$'_1$ = चन्द्रदृङ्मण्डलम्। ख वि वि$'$ = रविदृङ्मण्डलम्। वि$'_1$ = लम्बितचन्द्रविम्बकेन्द्रम्। वि$'^1$ च$'$ = चन्द्रस्य स्फुटशरः। वि$'$ र$'$ = रविनतिसमो रवेः स्पष्टशरः। वि$'$ स = क्रान्तिवृत्तसमानान्तरवृत्तम्। वि$'_1$ स = स्फुटस्पर्शकाले स्पष्टशरः। वि$'$ वि$_1$ =

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानैक्यार्धम् । एतानि लघुचापानि लघुत्वात् सरलरेखाकाराण्याचार्यैः कल्पितानि । अतो विं विं$_1$ स–जात्ये विं विं$_1$, विं$_1$ स वर्गान्तरसमाः स्फुटस्थित्यर्धकलाः = विं स = रं चं = स्फुस्थिक । च चं = चन्द्रलम्बनकलाः = चलंक । वि रं = रविलम्बनकलाः = रलंक । अनयो रविचन्द्रलम्बनयोरन्तरकलाः (= ल$_1$ क) षष्टिगुणा रविचन्द्रगत्यन्तरकलाहृता आचार्यसाधिताः स्पर्शे लम्बननाड्यः = ल$_1$ । तथा स्फुटस्थित्यर्धकलाः (स्फुस्थिक) षष्टिगुणा गत्यन्तरहृता आचार्योक्तं स्फुट स्थित्यर्धं घटिकात्मकम् = स्फुस्थि । अथतस्मिन् स्पर्शकाले गर्भाभिप्रायेण रविचन्द्रान्तरकलाः = च वि = च रं—वि रं चं रं + च चं – वि रं = स्फुस्थिक + चलंक – रलंक = स्फुस्थिक + ल$_1$ क । एतद्घटिकाः = स्फुस्थि + ल$_1$ । गणितागतदर्शान्ते गर्भाभिप्रायेण रविचन्द्रान्तराभावः स्पर्शकाले च ततः प्रागानीतान्तरं तयोः स्फुस्थि + ल$_1$ एतावतीषु घटिकासु । अतो गणितागतदर्शान्तिकालादागता इष्टघटिका विशोध्य जातः स्फुटस्पर्शकालः = द–स्फुस्थि–ल$_1$ । स्फुटस्पर्शकाले स्फुटस्थितिदलशरलम्बनाज्ञानादसकृत्कर्मानुक्तमप्युचितमेव । एवं मोक्षसंमीलनोन्मीलनेष्वपि क्षेत्रसंस्थया स्फुटा वासना । अनया मत्क्षेत्रयुक्त्या भास्करोक्तं च सर्वं स्फुटमुपपद्यते । अथ कल्प्यते प्राक्कपाल एव स्पर्शमध्यमोक्षाः । स्पर्शमध्यमोक्षेषु क्रमेण लम्बनं ल$_1$, ल$_2$, ल$_3$ तदा पूर्वयुक्त्या ।

मध्यकालः = द—ल$_2$

स्पर्शकालः = द—स्पस्फुस्थि—ल$_1$

प्रथमाद् द्वितीयं विशोध्यय स्पष्टं स्पार्शिकं स्थितिखण्डम् = स्पस्फुस्थि + ल$_1$—ल$_2$, अत्र यदि ल$_1$ 7 ल$_2$ तदा लम्बनान्तरं स्पार्शिकस्थितिदले देयम् ।

अथ मध्यकालः = द—ल$_2$ ।

मोक्षकालः = द + मौस्फुस्थि—ल$_3$ ।

अत्र प्रथमं द्वितीयाद् विशोध्य स्पष्टं मौक्षिकं स्थितिखण्डम् = मौस्फुस्थि + ल$_2$—ल$_3$ । अत्र यदि ल$_2$ 7 ल$_3$ अतस्तदापि मौक्षिकस्फुटस्थित्यर्धे लम्बनान्तरं देयम् । अथैवमेव वित्रिभतः पश्चिमकपाले स्पर्शमध्यमोक्षेषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्यकालः = द + ल$_2$

स्पर्शकालः = द — स्पस्फुस्थि + ल$_1$

प्रथमाद् द्वितीयं विशोध्य जातं स्पष्टं स्पार्शिकस्थितिखण्डम् = स्फुस्थि + ल$_2$ — ल$_1$ अत्र यदि ल$_2$ 7 ल$_1$ तदाऽत्रापि लम्बनान्तरं देयम् । एवम्

मध्यकालः = द + ल$_2$

मोक्षकालः = द + मौस्फुस्थि + ल$_3$

द्वितीयात् प्रथमं विशोध्य जातं स्पष्टं मौक्षिकं स्थितिखण्डम् = मौस्फुस्थि + ल$_3$ - ल$_2$ । अत्र यदि ल$_3$ > ल$_2$ तदाऽत्रापि लम्बनान्तरं देयम् । यदैतद्विपर्ययोऽर्थात् प्राक्कपाले यदि ल$_1$ ∠ ल$_2$, तथा ल$_2$ ∠ ल$_3$ । पश्चिमकपाले च ल$_2$ ∠ ल$_1$ तथा ल$_3$ < ल$_2$ तदा क्षयात्मकत्वाद्धरिजान्तरं स्वे स्वे स्थितिदले शोध्यमिति स्फुटमेव । एवं यदा प्राक्कपाले स्पर्शः पश्चिमकपाले मध्यस्तदा

मध्यकालः = द + ल$_2$

स्पर्शकालः = द - स्पस्फुस्थि - ल$_1$ *

प्रथमाद् द्वितीयमपास्य जातं स्पष्टं स्पार्शिकं स्थितिखण्डम् = स्पस्फुस्थि + ल$_2$ + ल$_1$ अतस्तत्र लम्बनयुतिर्योज्या । एवं यदा प्राक्कपाले मध्यः पश्चिमकपाले मोक्षस्तदा

मध्यकालः = द - ल$_2$

मोक्षकालः = द + मौस्फुस्थि + ल$_3$

द्वितीयात् प्रथमं विशोध्य जातं स्पष्टं मौक्षिकं स्थित्यर्धम् = मौस्फुस्थि + ल$_2$ + ल$_3$ ।

---

* अत्र रविचन्द्रयोः पृथक् पृथक् लम्बने आनीय तदन्तरवशतो वित्रिभासन्ने ग्रहणे एवं कदाचित् स्थितिर्भवितुमर्हति । यथा वित्रिभे चन्द्रस्थाने तत्स्फुटलम्बनाभावः स्पर्शकाले तदग्रे रवौ हि रविस्फुटलम्बनं किञ्चिद् भवति । एतादृशस्थले रविलम्बनमेव चन्द्रलम्बनादधिकमित्यादि निपुणं विलोक्यं सुधीभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतस्तत्रापि लम्बनैकता मोक्षस्थितिदले योज्या। एवं विमर्दार्धयोरपि क्रिया कार्या। अत्र स्पर्शाद्यज्ञानान्मध्यकालिकशरवशतः स्थित्यर्धं स्फुटं प्रथमं साधितमतोऽसकृत्कर्मावश्यकमित्युपपत्तितः सिध्यतीति। अत्र मदीया व्याख्योपपत्तिश्च गोलविद्भिभृ शं विचिन्त्या। रङ्गनाथादीनां व्याख्योपपतिश्च न रमणीयेति। रविचन्द्रग्रहणयोरनेके विशेषा मदीयग्रहणकरणे विलोक्या, किमत्र ग्रन्थगौरवेणेति ॥ १४-१७ ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा।
सुखायामृतवर्षिण्यां गतः सूर्यग्रहे विधिः ॥ ५ ॥

इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यां
सूर्यग्रहणाधिकारः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ छेद्यकाधिकारः

तत्रादौ तदारम्भप्रयोजनमाह—

न छेद्यकमृते यस्माद् भेदा ग्रहणयोः स्फुटाः ।
ज्ञायन्ते तत् प्रवक्ष्यामि छेद्यकज्ञानमुत्तमम् ॥ १ ॥

यस्मात् छेद्यकं परिलेखं विना सूर्यचन्द्रग्रहणयोः स्फुटा भेदाः स्पर्शमोक्षादयो न ज्ञायन्तेऽतस्तत् उत्तमं छेद्यकज्ञानं प्रवक्ष्यामि कथयिष्याम्यहमिति शेषः । संशयं छेदयतीति छेद्यकः ॥ १ ॥

इदानीं परिलेखमाह—

सुसाधितायामवनौ बिन्दुं कृत्वा ततो लिखेत् ।
सप्तवर्गाङ्गुलेनादौ मण्डलं वलनाश्रितम् ॥ २ ॥
ग्राह्यग्राहकयोगार्धसम्मितेन द्वितीयकम् ।
मण्डलं तत् समासाख्यं ग्राह्यार्धेन तृतीयकम् ॥ ३ ॥

याम्योत्तराप्राच्यपरासाधनं पूर्ववद्दिशाम् ।
प्रागिन्दोर्ग्रहणं पश्चान्मोक्षोऽर्कस्य विपर्ययात् ॥ ४ ॥

यथादिशं प्राग्ग्रहणं वलनं हिमदीधितेः ।
मौक्षिकं तु विपर्यस्तं विपरीतमिदं रवेः ॥ ५ ॥
वलनाग्रान्नयेन्मध्यं सूत्रं यद्यत्र संस्पृशेत् ।
तत्समासे ततो देयौ विक्षेपौ ग्रासमौक्षिकौ ॥ ६ ॥
विक्षेपाग्रात् पुनः सूत्रं मध्यबिन्दुं प्रवेशयेत् ।
तद्ग्राह्यबिन्दुसंस्पर्शाद् ग्रासमोक्षौ विनिर्दिशेत् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्यशोऽर्कस्य विक्षेपाः परिलेखे यथादिशम् ।
विपरीताः शशाङ्कस्य तद्वशादथ मध्यमम् ॥ ८ ॥
वलनं प्राङ्मुखं देयं तद्विक्षेपैकता यदि ।
भेदे पश्चान्मुखं देयमिन्दोर्भानोर्विपर्ययात् ॥ ९ ॥
वलनाग्रात् पुनः सूत्रं मध्यबिन्दुं प्रवेशयेत् ।
मध्यसूत्रेण विक्षेपं वलनाभिमुखं नयेत् ॥ १० ॥
विक्षेपाग्राल्लिखेद् वृत्तं ग्राहकार्धेन तेन यत् ।
ग्राह्यवृत्तं समाक्रान्तं तद्ग्रस्तं तमसा भवेत् ॥ ११ ॥
छेद्यकं लिखता भूमौ फलके वा विपश्चिता ।
विपर्ययो दिशां कार्यः पूर्वापरकपालयोः ॥ १२ ॥

सुसाधितायां जलवत्समीकृतायां भूमौ बिन्दुं कृत्वा तस्माद्बिन्दोः सप्तवर्गाङ्गुलेन प्रथमं वलनाश्रितं मण्डलं लिखेत् । द्वितीयं छाद्यछादकमानैक्यखण्डेन मण्डलं लिखेत् तत् समाससंज्ञं ज्ञेयम् । एवं तृतीयं ग्राह्यबिम्बार्धेन ग्राह्यं मण्डलं लिखेत् । ततो पूर्वबिन्दुं दिङ्मध्यं कृत्वा याम्योत्तराप्राच्यपरासाधनं सर्वदिशां साधनं च पूर्ववत् त्रिप्रश्नाधिकारविधिना कार्यम् । चन्द्रस्य प्राग्ग्रहणं स्पर्शो भवति पश्चान्मोक्षश्च । अर्कस्य च विपर्ययात् स्पर्शमोक्षौ भवतः । पश्चात् स्पर्शः प्राङ्मोक्ष इत्यर्थः । चन्द्रस्य स्पार्शिकं वलनं यथादिशं वलनाश्रिते मण्डले प्राचीचिह्नतो ज्यावद्देयं मौक्षिकं वलनं तु विपर्यस्तं देयम् । प्रतीचीचिह्नतो यथादिशं देयम् ! स्पार्शिकं वलनमुत्तरं प्राचीचिह्नादुत्तरदिशि दक्षिणं च दक्षिणदिशि देयम् । एवं मौक्षिकं याम्यसौम्यं वलनं च प्रतीचीचिह्नाद्यमसौम्यदिशि ज्यावद्देयम् । रवेरिदं विपरीतं देयम् । स्पार्शिकं वलनं पश्चिमचिह्नान्मौक्षिकं च प्राक्चिह्नाद्देयमित्यर्थः । वलनाग्रान्मध्यबिन्दुपर्यन्तमेकं सूत्रं नयेत् । तत् सूत्रं समाससंज्ञे वृत्ते यत्र स्पृशेत् ततो ज्यावत् स्पार्शमौक्षिकौ विक्षेपौ यथांशौ देयौ । पुनर्विक्षेपाग्रान्मध्यबिन्दुपर्यन्तं सूत्रं वेशयेत् कुर्यादिति । तद्ग्राह्यवृत्ते यस्मिन् बिन्दौ स्पृष्टं तस्माद् गणकः स्पर्शमोक्षौ विनिर्दिशेत् कथयेत् । स्पर्शशराग्रगसूत्रं यत्र ग्राह्यवृत्ते लग्नं तत्र स्पर्शो मोक्षशराग्रगसूत्रं यत्र ग्राह्यवृत्ते लग्नं तत्र मोक्षश्च भवतीत्यर्थः । अथ शरदाने विशेषः । परिलेखेऽर्कस्य विक्षेपा यथादिशं गणितेन यद्दिक्कास्तद्दिक्का एव नित्यं वेद्याः । शशाङ्कस्य च शरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विपरीता ज्ञेयाः। गणितेन याम्यास्तदा परिलेख उत्तरा उत्तराश्च याम्या वेद्या इत्यर्थः। अथ मध्यमं मध्यकालिकं वलनं यदि तद्विक्षेपैकता तस्य विक्षेपस्य चैकैव दिक् तदा विक्षेपदिशो दक्षिणादुत्तरतो वा ज्यावत् प्राङ्मुखं देयम्। दिग्भेदे च शरदिशः पश्चान्मुखं देयम्। एवं चन्द्रस्य ग्रहे भानोर्ग्रहे तु विपर्ययाद् देयम्। दिक्साम्ये शरदिशः पश्चान्मुखं दिग्भेदे च पूर्वाभिमुखं ज्यावद्देयमित्यर्थः। मध्यकालिकवलनाग्रात् मध्यबिन्दुपर्यन्तं पुनरेकं सूत्रं प्रवेशयेत्। तत्सूत्रं च मध्यसूत्रसंज्ञं ज्ञेयम्। तन्मध्यसूत्रेण मध्यबिन्दोर्मध्यवलनाभिमुखं मध्यकालिकं विक्षेपं गणको नयेत्। ततो मध्यशराग्राद् ग्राहकार्धेन वृत्तं लिखेत्। तेन वृत्तेन यद्ग्राह्यवृत्तं समाक्रान्तं छादितं तदेव तमसा भूभया ग्रस्तं छन्नं भवेद् ग्राह्यवृत्तमिति। एवं विपश्चिता गणकेन भूमौ वा फलके परिलेखं लिखता पूर्वापरकपालयोर्दिशां विपर्ययः कार्यः। पूर्वप्रतिपादितः परिलेखः पूर्वकपाले समीचीनः। पश्चिमकपाले च तत्रत्यदिशां विपर्ययः। पूर्वा पश्चिमा, पश्चिमा पूर्वा, दक्षिणा सौम्या, सौम्या च दक्षिणा ज्ञेयेत्यर्थः।

अत्रोपपत्तिः। वस्तुतो मृण्मयं काष्ठमयं वा गोलं विरचय्य तत्र पृष्ठे क्रान्तिवृत्तादि विधाय तत्र स्पर्शादिकालिकौ छाद्यच्छादकौ सन्निवेश्य यथावत् परिलेखो वेदितव्यः। इह तु स्पर्शान्मोक्षावधि क्रान्तिवृत्तादेर्यत् खण्डं तत्सरलं स्वल्पान्तरादङ्गीकृत्य स्थूलः परिलेखो विरच्यते। तत्र चन्द्रग्रहणे वलनमेकोनपञ्चाशदङ्गुलव्यासार्धे साधितमतो वलनाश्रितं मण्डलं विलिखितम्। तत्र मध्यबिन्दुतो वलनाग्रगं सूत्रं समासवृत्ते यत्र लग्नं तस्मात् पूर्वापररेखायां यो लम्बस्तदेव मानैक्यार्धवृत्ते परिणतं वलनं क्षेत्रयुक्त्या भवति। अथ मानैक्यार्धवृत्ते ग्राहकवृत्तस्य मध्यं यदा भवति तदा ग्राह्यग्राहकयोर्बिम्बप्रान्तौ भवतोऽतो मानैक्यार्द्धवृत्तं च विलिखितम्। तच्च दिगङ्कितं तत्र या प्राची सा सममण्डलप्राची ततस्तस्या वलने दत्ते या केन्द्राद्वलनाग्रगा रेखा सा क्रान्तिवृत्तप्राची। एवं सर्वदिशां वलनम्।

अथ वलनसूत्राज्ज्यावद् विक्षेपः। यतः क्रान्तिवृत्तप्राच्या विक्षेपा याम्योत्तराः। एवं स्पर्शमोक्षयोः किल। अथ मध्यशरः केन्द्राद्वलनसूत्रेऽतो दत्तो यतो मध्यवलनं नाम तत्कालक्रान्तिवृत्तप्राच्या याम्योत्तरा दिक्। विक्षेपाग्रे ग्राहकवृत्तमध्यमतः स्पर्शमोक्षयोस्तस्माद्ग्राह्यवृत्तकेन्द्रगतं सूत्रं यत्र ग्राह्यवृत्ते लग्नं तत्रैव ग्राहकवृत्तं ग्राह्यवृत्तं स्पृशति। अतस्तत्रैव स्पर्शो मोक्षो वा। मध्यकाले तु ग्राहकवृत्तमध्याद् ग्राहकार्धमानेन कृतं वृत्तं यावद्ग्राह्यवृत्तं खण्डयति तावदेव ग्रस्तं भवेदिति स्पष्टम्। शराग्रे हि चन्द्रः शरमूले भूभाऽतश्चन्द्र विक्षेपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दम्यदिशि भूभा वर्त्तते। तत्केन्द्रज्ञानार्थं चन्द्रग्रहणे व्यस्तदिशः शरा वेद्याः। शेषोपपत्तिः स्फुटा। मानैक्यार्धं सर्वदा चलमतः परमाल्पमानैक्यखण्डस्थिरव्यासार्धे स्वल्पान्तरात् सप्तवर्गमिते वलनं परिणतं कृतं तस्मात् सूत्रनिवेशेनैव समासाख्ये मानैक्यखण्डवृत्ते वलनं परिणतं भवतीति सर्वं निरवद्यम्। भास्करेणाप्ययमेव परिलेखः स्वसिद्धान्तशिरोमणौ प्रदर्शित इति। पश्चिमकपाले स एव परिलेखः परिवर्त्तितोऽस्तस्तत्रत्या पूर्वा चेह पश्चिमा भवति, ततः सर्वदिशां विपर्ययो जात इति॥ २-१२॥

इदानीं ग्रहणयोर्दृश्यादृश्यत्वमाह—

स्वच्छत्वाद् द्वादशांशोऽपि ग्रस्तश्चन्द्रस्य दृश्यते।
लिप्तात्रयमपि ग्रस्तं तीक्ष्णत्वान्न विवस्वतः॥ १३॥

चन्द्रस्य चन्द्रबिम्बस्य द्वादशांशोऽपि ग्रस्तः स्वच्छत्वाच्चन्द्रस्य निर्मलत्वाल्लोकैर्दृश्यते। विवस्वतः सूर्यबिम्बस्य लिप्तात्रयमपि ग्रस्तं लोकैर्न दृश्यते रवेस्तीक्ष्णत्वात्। अत एतदल्पं ग्रहणं नादेश्यम्। तथा च भास्करः—

इन्दोर्भागः षोडशः खण्डितोऽपि
तेजःपुञ्जच्छन्नभावान्न लक्ष्यः।
तेजस्तैक्ष्ण्यात् तीक्ष्णगोर्द्वादशांशो
नादेश्योऽतोऽल्पो ग्रहो बुद्धिमद्भिः॥

एवमत्रोपलब्धिरेव वासना नान्यत्कारणं वक्तुं शक्यते॥ १३॥

अथ ग्राहकमार्गानयनमाह—

स्वसंज्ञितास्त्रयः कार्या विक्षेपाग्रेषु बिन्दवः।
तत्र प्राङ्मध्ययोर्मध्ये तथा मौक्षिकमध्ययोः॥ १४॥
लिखेन्मत्स्यौ तयोर्मध्यान्मुखपुच्छविनिःसृतम्।
प्रसार्य सूत्रद्वितयं तयोर्यत्र युतिर्भवेत्॥ १५॥
तत्र सूत्रेण विलिखेच्चापं बिन्दुत्रयस्पृशा।
स पन्था ग्राहकस्योक्तो येनासौ सम्प्रयास्यति॥ १६॥

पूर्वोदितपरिलेखे दत्तेषु स्पर्शमध्यमोक्षशराग्रेषु स्वसंज्ञिताः स्पर्शमध्यमोक्षाख्यास्त्रयो बिन्दवः कार्याः। तत्र प्राङ्मध्ययोः स्पर्शमध्यबिन्द्वोस्तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मौक्षिकमध्ययोर्बिन्द्वोर्मध्ये द्वौ मत्स्यौ विलिखेत्। ततस्तयोर्मध्यात् मुखपुच्छ-विनिःसृतं सूत्रद्वितयं प्रसार्य यत्र तयोः सूत्रयोर्युतिर्भवेत्, तत्र युतिबिन्दुकेन्द्रेण बिन्दुत्रयस्पृशा सूत्रेण चापं वृत्तखण्डं विलिखेत्। स एवाचार्यैर्ग्राहकस्य पन्था मार्ग उक्तो, येन मार्गेणासौ ग्राहको ग्रहणसमये सम्प्रयास्यति गमिष्यतीति।

अत्रोपपत्तिः। स्पर्शमध्यमोक्षशराग्रेषु तत्तत्काले ग्राहककेन्द्रम्। यथा त्रिप्रश्नाधिकारे छायात्रयाग्रगतं मत्स्यद्वयेन वृत्तखण्डं कृतम्, तथाऽत्रापि मत्स्य-द्वयेन बिन्दुत्रयोपरि गतं वृत्तचापं भवति। तत्र स्पर्शमध्यमोक्षबिन्दुषु ग्राहको गमिष्यति, परन्तु तच्चाप एव ग्राहको गच्छेदित्यत्र न काचिद् युक्तिः। चन्द्र-ग्रहणाधिकारे यथा कल्पितविमण्डलं स्थिरभूभातः सरलरेखाकारं सिध्यति, तथाऽत्रापि यदि पूर्णान्तकालिकं चन्द्रबिम्बं स्थिरीकृत्य कल्पितभूभामार्गः साध्यते, तदा सोऽपि सरलाकार एव भविष्यति। अतोऽत्र शरादिकानां सरलत्वे नैव वृक्षखण्डाकारः नापि भास्करकृतः 'ये स्पर्शमुक्त्योर्विशिखाग्रचिह्ने' इत्यादिना वक्राकारो ग्राहकमार्ग इति सुधीभिर्भृशं विचिन्त्यम्। प्राचीनैर्ग्रहणे यथा शरादिकानां सरलत्वं रविचन्द्रयोर्गती चैकरूपे कल्पिते, तत्कल्पनातश्च ग्राहकमार्गः कल्पितविमण्डलवत् सरलाकार एवेति मे सिद्धान्त इति ॥१४-१६॥

इदानीं परिलेखेनेष्टग्रासानयनमाह—

ग्राह्यग्राहकयोगार्धात् प्रोज्झ्येष्टग्रासमागतम्।
अवशिष्टाङ्गुलसमां शलाकां मध्यबिन्दुतः ॥ १७ ॥

तयोर्मार्गोन्मुखीं दद्याद् ग्रासतः प्राग्ग्रहाश्रिताम्।
विमुञ्चतो मोक्षदिशि ग्राहकाध्वानमेव सा ॥ १८ ॥

स्पृशेद् यत्र ततो वृत्तं ग्राहकार्धेन संलिखेत्।
तेन ग्राह्यं यदाक्रान्तं तत् तमोगूस्तमादिशेत् ॥ १९ ॥

ग्राह्यग्राहकमानैक्यार्धादागतं स्वेष्टग्रासं प्रोज्झ्य शेषमिता शलाकैका धार्या। ग्रासतो मध्यग्रहणतः प्रागिष्टग्रासे तयोः स्पर्शमोक्षयोर्मार्गयोर्ग्रहाश्रितां स्पर्शाश्रितां मार्गोन्मुखीं ग्राहकमार्गोन्मुखीं तां शलाकां दद्यात्। विमुञ्चतो मध्यादनन्तरं मोक्षात् प्राक्स्थितस्याभीष्टग्रासस्य शलाकां च मोक्षदिशि ग्राहकमार्गोन्मुखीं दद्यात्। सा शलाका यत्र ग्राहकमार्गं स्पृशेत्, तस्मात् केन्द्राद् ग्राहकार्धेन वृत्तं संलिखेत्। तेन ग्राह्यबिम्बं यदाक्रान्तं तदेव तमसा भूभया ग्रस्तछन्नं गणक आदिशेत् कथयेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः—इष्टग्रासोनमानैक्यखण्डं तत्काले केन्द्रान्तरम्। तन्मितां शलाकां ग्राह्यकेन्द्राद् ग्राहकमार्गपर्यन्तं दत्त्वा इष्टग्राससमये ग्राहकमार्गे ग्राहककेन्द्रज्ञानं कृतम्। ततो ग्राहकवृत्तेनेष्टग्रासमितं छन्नं ग्राह्यबिम्बं लक्ष्यत इति सर्वं परिलेखेनैव स्फुटम्॥ ७-१९॥

इदानीं संमीलनोन्मीलनपरिलेखमाह—

मानान्तरार्धेन मितां शलाकां ग्रासदिङ्मुखीम्।
निमीलनाख्यां दद्यात् सा तन्मार्गे यत्र संस्पृशेत्॥ २०॥

ततो ग्राहकखण्डेन प्राग्वन्मण्डलमालिखेत्।
तद्ग्राह्यमण्डलयुतिर्यत्र तत्र निमीलनम्॥ २१॥

एवमुन्मीलने मोक्षदिङ्मुखीं सम्प्रसारयेत्।
विलिखेन्मण्डलं प्राग्वदुन्मीलनमथोक्तवत्॥ २२॥

ग्रासदिङ्मुखीं स्पर्शदिङ्मुखीं मानान्तरार्धेन समां शलाकां निमीलनाख्यां दद्याद् गणकः। सा तन्मार्गे ग्राहकमार्गे यत्र संस्पृशेत् ततस्तस्माद् ग्राहकखण्डेन पूर्ववदिष्टग्रासवन्मण्डलमालिखेद् गणकः। तस्य ग्राहकमण्डलस्य ग्राह्यमण्डलस्य च यत्र युतिरन्तःस्पर्शः, तत्र निमीलनं ज्ञेयम्। अथैवमुन्मीलने उन्मीलनपरिलेखे तामेव मानान्तरार्धसमां शलाकां मोक्षदिङ्मुखीं गणकः सम्प्रसारयेत्। तद्ग्राहकमार्गयोगबिन्दुतः प्राग्वद्ग्राहकखण्डेन मण्डलं विलिखेत्, तदोक्तवदुन्मीलनं भवेत्।

अत्रोपपत्तिः - संमीलनोन्मीलनयोः केन्द्रान्तरं मानान्तरार्धसमम्, अत इष्टग्रासपरिलेखवत् संमीलनोन्मीलनपरिलेखो भवेदिति सर्वं सुगममिति॥ २०-२२॥

इदानीं ग्रहणे चन्द्रवर्णमाह—

अर्धादूने सधूम्रं स्यात् कृष्णमर्धाधिकं भवेत्।
विमुञ्चतः कृष्णताम्रं कपिलं सकलग्रहे॥ २३॥

अर्धादूने ग्रासे चन्द्रबिम्बं सधूम्रं धूम्रवर्णेन सहितं धूम्राभं लक्ष्यते। अर्धाधिकं ग्रस्तं चन्द्रबिम्बं कृष्णं भवेत्। मोक्षारम्भोन्मुखस्य पादोनबिम्बाधिकग्रस्तस्य कृष्णताम्रं श्यामरक्तमिश्रवर्णः। सम्पूर्णग्रहे कपिलं पिशङ्गवर्णं बिम्बं भवेत्। सूर्यग्रहे वर्णानुक्तत्वात् सर्वदा कृष्णवर्ण इति सूचितम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः—वर्णसंयोगेनवर्णान्तरमुत्पद्यते इति लोके प्रत्यक्षप्रतीतिः। भूभा कृष्णा, चन्द्रबिम्बं पीतम्। अर्धादूने ग्रासे पीतमधिकं कृष्णं चाल्पमतो धूम्रवर्णः; अर्धाधिके तु कृष्णाधिक्यम् तेन कृष्णवर्णः; पादोनबिम्बग्रासे तु ततोऽप्यधिकः कृष्णस्तेन कृष्णताम्रं बिम्बम्। सकलग्रहे तु कपिलं बिम्बं कथं भवतीत्यत्र केषांचिन्मते तत्र नक्षत्रादीनां तेजःसङ्गाद् भूभा पिशङ्गवर्णाऽऽभाति। बहूनां मते चन्द्रे पीता मृत्तिका सैव भूभामध्यतः पिशङ्गवर्णाभा सकलग्रहे लोकैर्लक्ष्यते। यत्रैतादृशी पीता मृत्तिका तत्र प्रायो जलं न भवति। अतश्चन्द्रलोके जलं नास्त्यत एव तत्र निवसतां पितॄणां तृप्त्यर्थं भारतवासिभिर्जलं दीयत इति नवीनानां कल्पनेति। भानुग्रहे तु छाद्यच्छादकयोः संयोगाभावात् केवलमावरणत्वाद् वर्णान्तरं नैवोत्पद्यत इति ॥ २३ ॥

इदानीमधिकारोपसंहारमाह—

रहस्यमेतद्देवानां न देयं यस्य कस्यचित्।
सुपरीक्षितशिष्याय देयं वत्सरवासिने ॥ २४ ॥

इति छेद्यकाधिकारः ॥ ६ ॥

एतद्ग्रहणच्छेद्यकं देवानामपि रहस्यं गुप्तं वस्तु। अत एव यस्य कस्यचिन्न देयम्। वत्सरवासिने सुपरीक्षितशिष्याय देयम्। वर्षपर्यन्तं य आत्ममन्दिरे वसति तस्य सदसच्चरित्रं ज्ञातं भवति अत एव यो वत्सरवासी सुपरीक्षितः सदाचरणशीलः पात्रशिष्यस्तस्मै देयमित्यर्थः ॥ २४ ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा।
सुखायामृतवर्षिण्यां गतश्छेद्यक सद्विधिः ॥ ६ ॥

इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यां
छेद्यकाधिकारः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ ग्रहयुत्यधिकारः

तत्र तावद्युतौ भेदमाह—

ताराग्रहाणामन्योन्यं स्यातां युद्धसमागमौ ।
समागमः शशाङ्केन सूर्येणास्तमनं सह ॥ १ ॥

तारारूपा ये ग्रहाः कुजबुधगुरुशुक्रशनयस्तेषां मिथो योगे रूपस्थानभेदेन युद्धसमागमौ ख्याताम् । एषां ताराग्रहाणां शशाङ्केन सह समागमो भवति, सूर्येण सह चास्तमनमस्तो भवति । एषां चन्द्रेण सह यदा युतिर्भवति तर्हि सा युतिः समागमाख्या । सूर्येण सह च यदा युतिर्भवति तदा रवेस्तेजःपुञ्जभावाद् ग्रहाणामस्तोऽदर्शनं भवतीत्यर्थः ॥ १ ॥

इदानीं युतेर्गतैष्यत्वमाह—

शीघ्रे मन्दाधिकेऽतीतः संयोगो भविताऽन्यथा ।
द्वयोः प्राग्यायिनोरेवं वक्रिणोस्तु विपर्ययात् ॥ २ ॥
प्राग्यायिन्यधिकेऽतीतो वक्रिण्यैष्यः समागमः ।

शीघ्रगतौ ग्रहे मन्दग्रहादधिके संयोगोऽतीतो युतिर्गता । अन्यथा शीघ्रे मन्दाल्पे संयोगो भविता भविष्यति । एवं द्वयोः प्रग्यायिनोर्मार्गगयोर्ग्रहयोर्युतेर्गतैष्यत्वं ज्ञेयम् । द्वयोर्वक्रिणोस्तु विपर्ययाद्युतेगतैष्यत्वं भवति । शीघ्रे मन्दाधिके युतिरेष्याऽल्पे च गतेति । एको वक्रोऽपरो मार्गश्चेत्तदा प्राग्यायिनि मार्गे ग्रहे वक्रादधिके योगोऽतीतो वक्रिणि च मार्गादधिके समागमो योग एष्यो वाच्य इति ।

अत्रोपपत्तिः—शीघ्रे मन्दाधिकेऽग्रे चालनेन ग्रहान्तरमुत्तरोत्तरमधिकमतो योगो गतः । अतोऽन्यथा भविता । द्वयोर्वक्रिणोश्च शीघ्रेऽधिके चालनेन वक्रगतित्वान्मन्दसमः शीघ्रो भविष्यत्यतो योगो भविताऽतोऽन्यथा गतः । मार्गिणि वक्रादधिकेऽग्रे चालनेन महदन्तरमतो योगो गतोऽतोऽन्यथा गम्य इति सर्वं स्फुटम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं युतौ तुल्यग्रहयोः साधनं युतिकालं चाह—

ग्रहान्तरकलाः स्वस्वभुक्तिलिप्ताः समाहताः ॥ ३ ॥

भुक्त्यन्तरेण विभजेदनुलोमविलोमयोः ।

द्वयोर्वक्रिण्यथैकस्मिन् भुक्तियोगेन भाजयेत् ॥ ४ ॥

लब्धं लिप्तादिकं शोध्यं गते देयं भविष्यति ।

विपर्ययाद्वक्रगत्योरेकस्मिंस्तु धनव्ययौ ॥ ५ ॥

समालिप्तौ भवेतां तौ ग्रहौ भगणसंस्थितौ ।

विवरं तद्वदुद्धृत्य दिनादिफलमिष्यते ॥ ६ ॥

ग्रहयोरन्तरकलाः स्वस्वगतिलिप्ताभिर्गुणिता द्वयोरनुलोमविलोमयोर्ग्रहयोरर्थाद्द्वयोर्मार्गयोर्वा वक्रिणोर्गत्यन्तरेण विभजेत् । अथैकस्मिन् वक्रिणि सति तयोर्गतियोगेन भाजयेत् । लब्धं लिप्तादिकं फलं गते योगे ग्रहयोः शोध्यं भविष्यति योगे च देयम् । द्वयोर्ग्रहयोर्वक्रगत्योस्तु विपर्ययात् फलं देयम् । गते योज्यं भविष्यति च शोध्यम् । एकस्मिन् वक्रिणि तु धनव्ययौ कार्यौ । गते याते वक्रिणि धनं मार्गगे च व्ययमृणं कर्त्तव्यम् । भविष्यति योगे च वक्रिणि व्ययं मार्गे च धनं कार्यमित्यर्थः । एवं भगणसंस्थितौ क्रान्तिवृत्तस्थितौ ग्रहौ युतिकाले समलिप्तौ गत्यन्तरेण समसंख्यौ भवेताम् । ग्रहयोर्विवरं तद्वत् पूर्वप्रकारेण गत्यन्तरेण वा गतियोगेन विभज्य फलं समागमे गतं गम्यं वा दिनादि इष्यते कथ्यत इत्यर्थः ।

अत्रोपपत्तिः । द्वयोर्मार्गयोर्वा वक्रिणोर्ग्रहयोरेकदिने गत्यन्तरसममन्तरम् । एकस्मिन् वक्रिणि च गतियोगसममन्तरमेकस्मिन् दिने । ततोऽनुपातो यदि गत्यन्तरेण वा गतियोगेनैकं दिनं लभ्यते तदा ग्रहान्तरेण किमिति फलं गतं गम्यं वा दिनादि । तत एकस्मिन् दिने गतिसमं चलनं तदा पूर्वागतदिनादिना किमिति । लब्धं चालनफलम् $= \frac{\text{ग्रअं} \times \text{ग्रग}}{\text{गअं वा गयो}}$। धनर्णवासना चातिसुगमा ।

एवमिष्टदिनासन्नदिनेष्वेव यदि युतिकालस्तदाऽनुपातेन युतिकालज्ञानम् । यदीष्टदिनाद्दूरे युतिकालस्तदा गत्योर्वैलक्षण्याद्युतिकाले महदन्तरं स्यादतोऽसकृत्कर्मणा युतिसाधनं समुचितमित्यनुक्तमपि बुद्धिमता स्वयं ज्ञायते । एवं कदम्बप्रोते क्रान्तिवृत्तस्थानत्रशेन युतिकालो ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं दृक्कर्मार्थमुपकरणमाह—

कृत्वा दिनक्षपामानं तथा विक्षेपलिप्तिकाः ।
नतोन्नतं साधयित्वा स्वकाल्लग्नवशात् तयोः ॥ ७ ॥

युतिकाले तयोस्तुल्ययोर्ग्रहयोः स्वस्वक्रान्तिवशाच्चरासुभिर्दिनमानं रात्रिमानञ्च कृत्वा स्वकाल्लग्नवशान्नतमुन्नतं च साधयित्वा पृथक् स्थाप्यम् । युतिकाले सायनं लग्नं साध्यम् । तत्र सायनो ग्रहश्च करणीयः । तत 'ऊनस्य भोग्योऽधिकभुक्तयुक्तो मध्योदयाढ्य'—इत्यादिभास्करोक्तविधिना य इष्टकालः स ग्रहस्य दिनगतं ज्ञेयं, ततो दिनरात्रिमानवशेनोन्नतकालो नतकालश्च साधनीय इति ॥ ७ ॥

इदानीमक्षजं दृक्कर्म तत्संस्कारञ्चाह—

विषुवच्छायया‌भ्यस्ताद्विक्षेपाद् द्वादशोद्धृतात् ।
फलं स्वनतनाडीघ्नं स्वदिनार्धविभाजितम् ॥ ८ ॥

लब्धं प्राच्यामृणं सौम्याद्विक्षेपात् पश्चिमे धनम् ।
दक्षिणे प्राक्कपाले स्वं पश्चिमे तु तथा क्षयः ॥ ९ ॥

पलभया गुणिताद्द्वादशभिर्हृतात् फलं स्वनतनाडीभिः पूर्वंगताभिर्गुणितं स्वीयदिनार्धेन रात्रौ स्वीयरात्र्यर्धेन विभाजितम् । प्राच्यां प्राक्कपाले सौम्याद्‌बाणाद्यत् फलं तदृणं पश्चिमे कपाले च धनं ज्ञेयम् । दक्षिणे शरे तु प्राक्कपाले धनं तथा पश्चिमे कपाले तु क्षयो ज्ञेय इति ।

अत्रोपपत्तिः । अदृस्था = क्रान्तिवृत्तखण्डम् । ध्रुग्रस्थां = ग्रहबिम्बोपरि ध्रुवप्रोतम् । ग्रस्थां = ग्रहस्य ध्रुवप्रोतीयः शरः । स्था = आयनदृक्कर्मसंस्कृतग्रहस्थानम् । ∠ग्रस्थांदृ = स्थांग्रहस्यायनवलनकोटिज्या । सग्रदृ = ग्रहोपरि समप्रोतवृत्तम् । स्थांदृ = अक्षजं दृक्कर्म । ∠ स्थांग्रदृ=ग्रहस्याक्षजं वलनम् । स्थां=ग्रहस्य लघुज्यया द्युज्या = द्यु । तदा तद्वलनकोटिज्या ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$= \frac{\text{त्रि} \times \text{पद्यु}}{\text{द्यु}}$ । अत्र शरस्याल्पत्वात् स्थंग्र = ग्रह = ग्रहस्य कदम्बप्रोतीयः शरः = श ततो लघुज्यया स्वल्पान्तराद् भागाद् द्विगुणा जीवेति नियमेन ज्याश $= \frac{\text{२ शक}}{\text{६०}}$ । सममण्डलीया नतांशाः $= \frac{\text{९० नघ}}{\text{दिद}}$ । एषां ज्या $= \frac{\text{२} \times \text{९०} \times \text{नघ}}{\text{दिद}}$ ततोऽक्षवनलज्या । $= \frac{\text{२०} \times \text{९०} \times \text{नघ} \times \text{ज्याअ}}{\text{दिद} \times \text{द्यु}'}$ =

<स्थाग्रह । (द्यु' = ग्रग्रहस्य द्युज्या) ततोऽनुपातेन ।

$$\text{ज्याहस्थां} = \frac{\text{ज्याहग} \times \text{ज्या} \angle \text{स्थांग्रह}}{\text{ज्या} \angle \text{हस्थाग्र}} = \frac{\text{ज्याश} \times \text{ज्यास्थांग्रह}}{\text{ज्या} \angle \text{हस्थाग्र}}$$

$= \frac{\text{२ शक}}{\text{६०}} \times \frac{\text{२} \times \text{९०} \times \text{नघ} \times \text{ज्याअ}}{\text{दिद} \times \text{द्यु}'} \times \frac{\text{द्यु}}{\text{त्रि} \times \text{पद्यु}}$ । इयं द्विभक्ताऽक्षजदृक्कर्मभागाः षष्टिगुणाः कलाः । एवम्

$$\text{अक्षजदृक्कर्मकलाः} = \frac{\text{२ शक}}{\text{२} \times \text{६०}} \times \frac{\text{६०} \times \text{नघ} \times \text{ज्याअ} \times \text{९०}}{\text{दिद} \times \text{द्यु}'} \times$$

$\frac{\text{द्यु,}}{\text{त्रि} \times \text{पद्यु}}$ । स्वल्पान्तराद् द्यु' = द्यु

$$= \frac{\text{२शक} \times \text{९०} \times \text{नघ} \times \text{ज्याअ}}{\text{दिद} \times \text{त्रि} \times \text{पद्यु}} = \frac{\text{२शक} \times \text{९०} \times \text{नघ} \times \text{ज्याअ}}{\text{दिद} \times \text{१२०} \times \text{पद्यु}}$$

$$= \frac{\text{२शक} \times \text{९०} \times \text{नघ} \times \text{ज्याअ}}{\text{पद्यु} \times \text{दिद} \times \text{१२०}} = \frac{\text{२शक} \times \text{९०} \times \text{नघ} \times \text{ज्याअ} \times \text{ज्यालं}}{\text{२} \times \text{पद्यु} \times \text{ज्यालं} \times \text{दिद} \times \text{१२०}}$$

$$= \frac{\text{शक} \times \text{पलभा २}}{\text{१२}} \times \frac{\text{९०} \times \text{नघ} \times \text{ज्यालं}}{\text{१२०} \times \text{दिद} \times \text{पद्यु}}$$

$$= \frac{\text{शक} \times \text{पलभा}}{\text{१२}} \times \frac{\text{नघ}}{\text{दिद}} \times \frac{\text{२} \times \text{९०} \times \text{ज्यालं}}{\text{पद्यु} \times \text{१२०}}$$

अत्राचार्येणार्धाल्पे त्याज्यमर्धाधिके रूपं ग्राह्यमिति नियमेन $\frac{\text{९०}}{\text{१२०}} = \text{१}$ ।

तथा $\frac{\text{ज्याल}}{\text{पद्यु}} = \text{१}$ । ततो जाताऽक्षजदृक्कर्मकला $= \frac{\text{शक} \times \text{पलभा}}{\text{१२}} \times \frac{\text{नघ}}{\text{दिद}}$ ।

अनेनोपपन्नमाचार्योक्तं सूत्रम् । अत्र रङ्गनाथनृसिंहयोरुपपत्तिर्गोलबहिर्भूता बुद्धिमद्भिर्विचारणीया । धनर्णवासना च ध्रुवसमप्रोतवशेन गोलयुक्त्या सुगमेति ॥ ८—९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीमायनं दृक्कर्माह—

सत्रिभग्रहजक्रान्तिभागघ्नाः क्षेपलिप्तिकाः ।
विकलाः स्वमृणं क्रान्तिक्षेपयोर्भिन्नतुल्ययोः ॥ १० ॥

क्षेपकलाः सत्रिभग्रहक्रान्तिभागैर्गुणिताः फलं क्रान्तिशरयोर्भिन्नैकदिक्कयोः स्वमृणमायनदृक्कर्मविकलाः स्युरिति ।

अत्रोपपत्तिः । अआस्था क्रान्तिवृत्तखण्डम् । ग्र ग्रहोपरि कग्रस्था कदम्बप्रोतम् । ध्रुग्रआ ध्रुवप्रोतम् । आस्था आयनं दृक्कर्म । ग्रस्था = कदम्बप्रोतीयः शरः । आग्रस्था = ग्रहायनवलनांशाः । ∠स्थाआग्र = आयनदृक्कर्मसंस्कृतग्रहस्यायनवलनकोटिः । अत्र सर्वत्र स्वल्पान्तरात् स्थानबिम्बद्युज्याक्रान्त्योः



साम्याल्लघुज्यया कर्मणि कृते स्वल्पान्तरात् सत्रिभग्रहक्रान्तिसमैरायनवलनांशैः

$$\text{ज्याआस्था} = \frac{\text{स्थाग्र} \times \text{ज्या}\angle\text{स्थाग्रआ}}{\text{ज्या}\angle\text{स्थाआग्र}} = \frac{२\ \text{शक}}{६०} \times \frac{\text{क्राभा} \times २}{१२०}$$

(शरस्याल्पत्वात् स्थाग्र = आग्र, तेन ∠ आस्थाग्र = ९० = ∠स्थाआग्र) इयं द्विभक्ता दृक्कर्मभागास्ते षष्टिवर्गेण गुणा जाता आयनदृक्कर्मविकलाः =

$$\frac{२\ \text{शक}}{२ \times ६०} \times \frac{६० \times ६० \times \text{क्राभा} \times २}{१२०} = \text{शक} \times \text{क्राभा} ।$$

अत उपपन्नं सूत्रम् । धनर्णवासना च "ता ग्रहेऽयनपृषत्कयोः क्रमादेकभिन्नककुभोर्ऋणं धनम्" इत्यादि भास्करोक्त्या स्फुटा ॥ १० ॥

इदानीं दृक्कर्मप्रयोजनमाह—

नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने ।
शृङ्गोन्नतौ तु चन्द्रस्य दृक्कर्मादाविदं स्मृतम् ॥ ११ ॥

नक्षत्रग्रहाणां योगेषु ग्रहाणामस्तोदयसाधने चन्द्रस्य शृङ्गोन्नतौ तु ग्रहाणां मध्ये पूर्वसाधितमायनमाक्षजं च दृक्कर्माद्यैः स्मृतम् । दृक्कर्मद्वयसंस्कारेणैव क्षितिजे बिम्बोदयास्तसाधनमतः पूर्वोदितकर्मसु दृक्कर्मद्वयस्यावश्यकमिति ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं ग्रहयुतौ विशेषमाह—

तात्कालिकौ पुनः कार्यौ विक्षेपौ च तयोस्ततः ।
दिक्तुल्ये त्वन्तरं भेदे योगः शिष्टं ग्रहान्तरम् ॥ १२ ॥

"ग्रहान्तरकलाः स्वस्वभुक्तिलिप्तासमाहताः" इत्यादिना युतिकालिकग्रहाभ्यां सपाताभ्यां पुनस्तयोस्तात्कालिकौ शरौ साध्यौ तदा क्रान्तिवृत्ते द्वयोरेकस्थानत्वात् तावेककदम्बप्रोते भवतः। अतः शरयोर्दिक्तुल्येऽन्तरं दिग्भेदे योगस्तयोर्ग्रहयोर्याम्योत्तरमन्तरं शिष्टं विशिष्टमर्थादेककदम्बप्रोतेऽन्तरं भवतीति सर्वं स्फुटम्। चन्द्रग्रहणयुक्त्या ग्रहयोरल्पगतिं भूभामधिकगतिं च चन्द्रं प्रकल्प्य भेदयोगे साधितकल्पितविमण्डलादिदं स्फुटं भवति यद्ग्रहयोः परमाल्पमन्तरं न कदम्बप्रोतेऽतः "युतिर्नाम यदाकाशे द्वयोरल्पमन्तरं तत् प्रायः कदम्बसूत्रस्थयोरेव भवति" इति ग्रहयुत्यधिकारे भास्करेण पर्यभाषि। तत्र प्रायःपदेन भास्करेण कदम्बप्रोतादन्यत्रापि कदाचित् परमाल्पमन्तरं दृष्टमिति सिध्यति। वस्तुतो ग्रहयोर्दक्षिणोत्तरान्तरसत्त्वे कदम्बप्रोते नैव तयोरल्पमन्तरमिति कल्पितविमण्डलात् सिध्यतीत्यलं बहुविचारेण ॥ १२ ॥

इदानीं ग्रहाणां कलाविम्बान्याह—

कुजार्किज्ञामरेज्यानां त्रिंशदर्धार्धवर्धिताः ।
विष्कम्भाश्चन्द्रकक्षायां भृगोः षष्टिरुदाहृता ॥ १३ ॥
त्रिचतुः कर्णयुत्याप्तास्ते द्विघ्नास्त्रिज्यया हताः ।
स्फुटाः स्वकर्णास्तिथ्याप्ता भवेयुर्मानलिप्तिकाः ॥ १४ ॥

भौमशनिबुधगुरूणां त्रिंशदर्धार्धवर्धिताश्चन्द्रकक्षायां योजनात्मकव्यासाः स्युः। भृगोः शुक्रस्य च चन्द्रकक्षायां योजनात्मकव्यासः षष्टिरुदाहृता कथिताऽऽद्यैः। चन्द्रकक्षायां मध्यममानेन भौमादीनां परिणतयोजनात्मकव्यासाः भौ = ३०। अस्यार्धार्धं सार्धसप्त तेनाधिका त्रिंशत् शनेः = ३७।३०। इयं संख्या पुनः सार्धसप्तयुता बुधस्य = ४५।०। इयं पुनः सार्धसप्तयुता गुरोः ५२।३०। इयं पुनः सार्धसप्तयुता जाता शुक्रस्य षष्टिरिति। ते पठिता व्यासा द्विघ्नास्त्रिज्यया गुणितास्त्रिज्यायाश्चतुर्थकर्मोत्पन्नस्य शीघ्रकर्णस्य च या युतिस्तयाऽऽप्तास्तदा चन्द्रकक्षायां स्फुटाः कर्णा योजनात्मकव्यासाः स्युः। ते पञ्चदशभिर्भक्तास्तदा मानलिप्तिकाः स्युः। मानानां योजनात्मकव्यासानां कलाः स्युरित्यर्थः। शाकल्यमते सर्वे ग्रहपिण्डाश्चन्द्रकक्षायामेव दृष्टिवशेन दृश्यन्तेऽत एव चन्द्रकक्षायामेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहाणां व्यासाः साधिताः। तेषां मते चन्द्रगोल एवास्माकं दृश्यगोल इति। सम्प्रति परीक्षया दृश्यगोलव्यासप्रमाणं सार्धैकक्रोशासन्नाधिकमिति नवीनानां मतम्। चन्द्रगोल एवास्माकं दृश्यगोल इत्यत्र शाकल्यसंहितायाम्—

"अन्तरुन्नतवृक्षाश्च वनप्रान्ते स्थिता इव।
दूरत्वाच्चन्द्रकक्षायां दृश्यन्ते सकला ग्रहाः॥
व्यर्धाष्टवर्धितास्त्रिशद्विष्कम्भाः शास्त्रदृष्टितः।

मध्यमा योजनव्यासाः पञ्चदशहृता भौमादीनां सौरा बिम्बकलाः भौ.२'। बु.३'। गु.३'। ३०"। शु.४'। श.२'।३९"।

भास्करमते बिम्बकलाः भौ.४'।४५"। बु.६'।१५"। गु.७'। २०"। शु ९'। श.५'।२०"।

सम्प्रति वेधोपलब्धा विम्बकलाः, भौ.४'।६८"। बु. ३'।३४"।गु.९४"।२३"। शु.८".४०"। श.८०".८२"। वेधोपलब्धासन्ना सौरा एव भास्करोक्ताश्च महास्थूला बोध्या इति।

अत्रोपपत्तिः। यस्मिन् दिने त्रिज्यातुल्यः शीघ्रकर्णस्तस्मिन् दिने चन्द्रकक्षापरिणता व्यासाः पठिताः। त्रिज्यातुल्ये कलात्मके शीघ्रकर्णे कल्प्यते मध्ययोजनकर्णः = मक। यदा चन्द्रकर्णेन पाठपठितो व्यासस्तदा मध्ययोजनकर्णेन किमिति लब्धो ग्रहकक्षायां योजनात्मकव्यासः $= \frac{\text{मक} \times \text{योव्या}}{\text{चक}}$, इष्टकालेऽयमेव व्यासः स्वेष्टकर्णे। तत्र मध्यममानेन स्फुटः कलात्मकः कर्णो हि त्रिज्याऽन्त्यशीघ्रकर्णयोगार्धसमः कल्पितः। यदि तन्मानम् $= \frac{\text{यु}}{२}$, तदाऽस्य योजनात्मकमानम् $= \frac{\text{मक} \times \text{यु}}{\text{त्रि} \times २}$। ततोऽस्मिन् कर्णे पूर्वोक्तो व्यासः $= \frac{\text{मक} \times \text{योव्या}}{\text{चक}}$, तदा चन्द्रकर्णे कः। जातोऽभीष्टकाले चन्द्रकक्षायां व्यासः

$$= \frac{\frac{\text{चक} \times \text{मक} \times \text{योव्या}}{\text{चक}}}{\frac{\text{मक} \times \text{यु}}{२\text{त्रि}}}$$

$$= \frac{\text{मक} \times \text{योव्या} \times २\ \text{त्रि}}{\text{मक} \times \text{यु}} = \frac{२\ \text{त्रि} \times \text{योव्या}}{\text{यु}}$$ अत उपपद्यते।

भास्कराचार्येणोच्चनीचयोर्मध्यमविम्बकलात्रिभागापचयोपचयवशेन यत् स्फुटविम्बानयनं कृतं तन्निर्युक्तिकम्। कमलाकरेण सिद्धान्ततत्त्वविवेके तस्य यत् खण्डनं कृतं तत्सयुक्तिकं द्रष्टव्य बुद्धिमद्भिरिति। चन्द्रकक्षायां पञ्चदशभिर्योजनै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेका कलेति पूर्वं सूर्यविम्बानयने प्रतिपादितमेव। रङ्गनाथेन गूढार्थप्रकाशके त्रिचतुःकर्णयुत्याप्ता इत्यत्र तृतीयकर्मणि मन्दकर्णश्चतुर्थकर्मणि शीघ्रकर्णस्तयोर्युतिर्वासनाविरुद्धा गृहीता ॥ १३-१४ ॥

इदानीं युतिदर्शनार्थमाह—

छायाभूमौ विपर्यस्ते स्वच्छायाग्रे तु दर्शयेत्।
ग्रहः स्वदर्पणान्तःस्थः शङ्क्वग्रे सम्प्रदिश्यते ॥ १५ ॥

यस्यां समायां भूमौ ग्रहदर्शनार्थं शङ्कुर्निवेश्यते सा छायाभूमिस्तस्यां विपर्यस्ते विपरीतेन ग्रहो यस्मिन् कपाले तद्विपरीतकपाले दत्ते स्वच्छायाग्रे छायाकर्णमार्गाऽधोदृष्ट्या छायाग्रस्थिते जले वा दर्पणे ग्रहं दर्शयेद्गणक इति। वा शङ्क्वग्रे स्वदर्पणान्तःस्थो ग्रहश्छायाकर्णमार्गेणोर्ध्वदृष्ट्या सम्प्रदृश्यते लौकैरिति।

अत्रोपपत्तिः। ग्रहविम्बकेन्द्रात् शङ्क्वग्रोपरिगतं सूत्रं यत् समभूमौ लगति तस्माच्छङ्कुमूलावधिच्छाया। तत्सूत्रे शङ्कुच्छायाग्रयोरन्तरं छायाकर्ण इति छायाक्षेत्रविन्यासेनैव ग्रहदर्शनं स्फुटम्। इत्यस्यैव व्याख्यारूपः प्रकारो 'विधाय बिन्दुं समभूमि भागे' इत्यादिना, भास्करस्य। अत्र छायाग्रे स्थापितस्य दर्पणादेर्मध्ये ग्रहप्रातविम्बं छायाकर्णसजातीयसूत्रे छायाग्रतो विरुद्धदिग्गते स्थापितया स्वदृष्ट्या पश्यन्ति लोका इति ज्योतिर्विद्यया पतनपरावर्त्तनकोणयोस्तुल्यत्वात् सिध्यतीति "जलाद्यस्यां दिशि यावति दूरे यावदुच्चं वेण्वादिकं वर्त्तते तत् तस्यां दिशि तावति दूरे तदुच्चप्रमाणं भुवः सकाशादधोमुखं कृतं सद्रष्ट्रा पुरुषेण जले दृश्यत इति जलदृष्ट्योर्वस्तुशक्तिः" इत्यनेन भास्करोऽपि वक्ति तं ज्योतिर्विद्यायाः पतनपरावर्त्तनकोणसिद्धान्तम्। इत्यलं प्रसङ्गागतविचारेणेति ॥ १५ ॥

इदानीं युतिकाले ग्रहयोर्दर्शनार्थमाह—

पञ्चहस्तोच्छ्रितौ शङ्कू यथादिग्भ्रमसंस्थितौ।
ग्रहान्तरेण विक्षिप्तावधो हस्तनिखातगौ ॥ १६ ॥
छायाकर्णौ ततो दद्याच्छायाग्राच्छङ्कुमूर्धगौ।
छायाकर्णाग्रसंयोगे संस्थितस्य प्रदर्शयेत् ॥ १७ ॥
स्वशङ्कुमूर्धगौ व्योम्नि ग्रहौ दृक्तुल्यतामितौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्शनयोग्यौ यदा ग्रहौ स्यातां तदा पञ्चहस्तप्रमाणदीर्घौ शङ्कू काष्ठघटितसरलदण्डाकारौ वा वेणुजौ यथादिग्भ्रमसंस्थितौ कार्य्यौ। युतिकाले त्रिपश्नाधिकाररीत्या ग्रहयोः शङ्कू कार्यौ तौ पूर्वापररेखातो यद्दिशि यत्कपाले च गणितेन सिद्धौ भवतस्तथा स्वच्छाया भूमाविमौ स्थाप्यौ यथा वास्तवशङ्कुरूपौ स्याताम्। युतिकाले ग्रहयोः पूर्वापरशङ्कुमूलान्तररूपौ भुजौ दिङ्मध्यतः प्राच्यपरसूत्रे यथादिक्के कोटी च विधाय तत्संस्कारेण स्पष्टभुजं स्पष्टकोटिं च कृत्वा तद्वर्गयोगपदं ग्रहयोः शङ्कुमूलान्तरं स्यात्! तन्मितौ विक्षिप्तावन्तरितौ यथादिक्कौ स्थाप्यौ क्षितिजे लम्बरूपस्थित्यर्थं तौ च भूम्यधो हस्तमितनिखातगौ कार्यौं यथा तयोरधः पतनं न भवेदिति। ततः स्वस्वच्छायादानेन यत्र तदग्रं स्यात् तस्मात् स्वस्वशङ्कुमूर्धगौ छायाकर्णौ दद्याद्गणकः। छायाकर्णसूत्रं वर्धनेन ग्रहकेन्द्रोपरि गतं स्यादिति छायाक्षेत्रेण प्रसिद्धम्। अतश्छायाकर्णदृष्ट्या ग्रहस्य दर्शनं भवेत्। अतस्तयोश्छाया कर्णयोः संयोगस्थाने यदि दृष्टिस्तदा केवलं दृष्टिसञ्चालनेन द्वयोर्ग्रहयोर्दर्शनं भविष्यत्यतस्तत्रारोपितदृष्टेः संस्थितस्य शिष्यस्य वा राज्ञः प्रतीत्यर्थं गणको व्योम्नि आकाशे स्वस्वशङ्कुशिरोगतौ दृक्तुल्यतामितौ प्राप्तौ ग्रहौ प्रदर्शयेदिति। अत्र ग्रहान्तरेण कदम्बप्रोतीयान्तरं रङ्गनाथेन स्वगूढार्थप्रकाशे व्याख्यातं तद्गोलवासनाबहिर्भूतं विद्वद्भिर्नादरणीयमिति।

अत्रोपपत्तिः। छायाक्षेत्रपरिभाषयैव स्फुटा। तथैव भास्कराद्युक्तेश्च। प्रायः पादुकादिसहितस्य नरस्योच्छ्रितिर्हस्तचतुष्टयमितोऽतः क्षितितलाच्चतुर्हस्तमितौ शङ्कू उपरि स्थापितौ यथा शङ्क्वग्रासन्ना एव शिष्यस्य राज्ञो वा दृष्टिर्भवेदिति ॥ १६-१७ ॥

अधुना युद्धसमागमादीनां लक्षणमाह—

उल्लेखं तारकास्पर्शाद्भेदे भेदः प्रकीर्त्यते ॥ १८ ॥
युद्धमंशुविमर्दाख्यमंशुयोगे परस्परम्।
अंशादूनेऽपसव्याख्यं युद्धमेकोऽत्र चेदणुः ॥ १९ ॥
समागमोंऽशादधिके भवतश्चेद्बलान्वितौ।
अपसव्ये जितो युद्धे पिहितोऽणुरदीप्तिमान् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रूक्षो विवर्णो विध्वस्तो विजितो दक्षिणाश्रितः ।
उदक्स्थो दीप्तिमान् स्थूलो जयी याम्येऽपि यो बली ॥२१ ।
आसन्नावप्युभौ दीप्तौ भवतश्चेत् समागमः ।
स्वल्पौ द्वावपि विध्वस्तौ भवेतां कूटविग्रहौ ॥ २२ ॥
उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी ।
शशाङ्केनैवमेतेषां कुर्यात् संयोगसाधनम् ॥ २३ ॥
भावाभावाय लोकानां कल्पनेयं प्रदर्शिता ।
स्वमार्गगाः प्रयान्त्येते दूरमन्योन्यमाश्रिताः ॥ २४ ॥

इति ग्रहयुत्यधिकारः ॥ ७ ॥

द्वयोर्ग्रहयोस्तारकयोर्विम्बयोः स्पर्शमात्रादुल्लेखं नाम योगस्तथा तारकयोर्भेदादेकस्या उपरि अपरस्या आवरणाद्योगो भेदो नाम प्रकीर्त्यते कथ्यते । परस्परं किरणानां संयोगे चांशुविमर्दाख्यं द्वयोर्ग्रहयोर्युद्धं कथ्यते । द्वयोर्ग्रहयोः कदम्बप्रोते दक्षिणोत्तरेऽन्तरे षष्टिकलातोऽल्पे ग्रहयोरेकश्चेदणुबिम्बस्तदाऽपसव्याख्यं युद्धं ज्ञेयम् । अन्तरेऽशाधिके चेद् द्वावपि कान्तिमद्बिम्बौ बलान्वितौ तदा तयोः समागमो ज्ञेयः । अपसव्ये युद्धेऽणुविम्बोऽकान्तिमान् विपुलविम्बांशुभिश्चेत् पिहितस्तदा सोऽणुविम्बग्रहो विपुलविम्बेन जितो वेद्यः । यो दक्षिणाश्रितो ग्रहो रुक्षो विवर्णो मलिनो विध्वस्तः सोदक्स्थेन विजितो वेद्यः । उदक्स्थः स्थूलो दीप्तिमांश्च जयी भवति । यो बली दीप्त्यादिभिः स दक्षिण आश्रितोऽपि जयी भवति । चेदुदक्भावासन्नगतौ दीप्तौ भवतस्तदा तयोः समागमो वेदितव्यः । द्वावपि स्वल्पौ सूक्ष्मविम्बौ वा द्वावपि विध्वस्तौ तदा कूटविग्रहौ भवेताम् । द्वौ सूक्ष्मविम्बौ तदा कूटाख्यं युद्धम् । द्वावपि विध्वस्तौ तदा विग्रहाख्यं युद्धमन्तरे च मानैक्यार्धादल्पे सति । प्रायशो बाहुल्येन भार्गवो विपुलविम्बत्वादुदक्स्थो वा दक्षिणस्थः सर्वदा जयी भवति । गणक एतेषां पञ्चानां भौमादीनां शशाङ्केन चन्द्रेण सह संयोगसाधनं समागमाख्ययोगसाधनं कुर्यादिति । शशाङ्केनैतेषां सदा मानैक्यार्धादल्पेऽधिके वान्तरे समागम एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवतीत्यर्थः। एते ग्रहाश्च स्वमार्गगा अन्योन्यं दूरमाश्रिताः सन्ति अतस्तेषां युद्धादेरसम्भव अत आह।

इयं सर्वा मया लोकानां प्राणिनां भावाय शुभाय अभावायाऽशुभाय च कल्पना प्रदर्शिता सा च संहितादौ विस्तरतः प्रतिपादिताऽन्यथा मिथो दूरान्तरिता ग्रहा न मिथो युद्ध्यन्ते न मिलन्ति चेति ॥ १८-२४ ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा।
सुखायामृतवर्षिण्यां गतो ग्रहयुतेर्विधिः ॥ ७ ॥

॥ इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यां ग्रहयुत्यधिकारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ नक्षत्रग्रहयुत्यधिकारः

तत्र तावन्नक्षत्रध्रुवानयनमाह—

प्रोच्यन्ते लिप्तिका भानां स्वभोगोऽथ दशाहतः ।
भवन्त्यतीतधिष्ण्यानां भोगलिप्तायुता ध्रुवाः ॥ १ ॥

भानामश्विन्यादीनामुत्तराषाढाभिजिच्छ्रवणधनिष्ठारहितानां लिप्तिका भोगकलाः प्रोच्यन्ते । अथ वक्ष्यमाणः पाठपठितो भोगो दशाहतः फलं कलास्तत्र गतनक्षत्राणां भोगलिप्तायुता वर्त्तमाननक्षत्रस्य ध्रुवाः कलात्मकाः स्युः । भभोगोऽष्टशतीलिप्तेति पूर्वं प्रतिपादितम् । गतनक्षत्रसङ्ख्या भभोगेनाष्टशतप्रमितेन गुणा दशगुणवर्त्तमाननक्षत्रभोगसहिता वर्त्तमाननक्षत्रस्य ध्रुवकः स्यादित्यर्थः ।

यथा रोहिण्या भोगकलाः = ५७ । दशगुणिताः = ५७० ।

गतनक्षत्रत्रयभोगकलाः = ३ × ८०० = २४००
अनयोर्योगे जाता रोहिणीध्रुवकलाः = २९७० = ४९°।३०' ।

"अष्टौ नखा गजगुणाः खशरा" इत्यादि भास्करोक्तेन पञ्चाशद्भागा रोहिणीध्रुवोऽस्ति । एवं सर्वेषां नक्षत्राणां तदीयभोगकलाभ्यो ध्रुवाः साध्या इति । आचार्येण पाठे लाघवार्थं सर्वेषां नक्षत्राणां भोगकला एवं पठिताः ॥ १ ॥

इदानीं नक्षत्राणां भोगकला आह—

अष्टार्णवाः शून्यकृताः पञ्चषष्टिर्नगेषवः ।
अष्टार्था अब्धयोऽष्टागा अङ्गागा मनवस्तथा ॥ २ ॥
कृतेषवो युगरसाः शून्यबाणा वियद्रसाः ।
खवेदाः सागरनगा गजागाः सागरर्त्तवः ॥ ३ ॥
मनवोऽथ रसा वेदा वैश्वमाप्यार्धभोगगम् ।
आप्यस्यैवाभिजित्प्रान्ते वैश्वान्ते श्रवणस्थितिः ॥ ४ ॥
त्रिचतुः पादयोः सन्धौ श्रविष्ठा श्रवणस्य तु ।
स्वभोगतो वियन्नागाः षट्कृतिर्यमलाश्विनः ॥ ५ ॥
रन्ध्राद्रयः क्रमादेषां विक्षेपाः स्वादपक्रमात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अश्विनीभोगोऽष्टचत्वारिंशत् कलाः। भरण्याश्चत्वारिंशत्। कृत्तिकानां पञ्चषष्टिः। रोहिण्याः सप्तपञ्चाशत्। आर्द्रायाश्चत्वारः। अत्र गूढार्थप्रकाशे रङ्गनाथः। 'अत्राब्धय इत्यत्र गोऽब्धयो गोऽग्नय इति वा पाठस्तु अयुक्तः। शाकल्यसंहिताविरोधात्। एतेन —

सौरोक्तरुद्रभस्यांशास्त्र्यद्रयोऽगाब्धयः कलाः।

इति नार्मदोक्तं दशकलोनपञ्चदशभागा मिथुने सर्वजनाभिमतध्रुवको दशकलायुतत्रयोदशभागाः पर्वताभिमतध्रुवकश्च निरस्तः।"

पुनर्वस्वोरष्टसप्ततिः। पुष्यस्य षट्सप्ततिः। आश्लेषायाश्चतुर्दश। मघानां चतुःपञ्चाशत्। पूर्वफाल्गुन्याश्चतुः षष्टिः। उत्तरफाल्गुन्याः पञ्चाशत्। हस्तस्य षष्टिः। चित्रायाश्चत्वारिंशत्। स्वात्याश्चतुः सप्ततिः। विशाखाया अष्टसप्ततिः। अनुराधायाश्चतुः षष्टिः। ज्येष्ठायाश्चतुर्दश। मूलस्य षट्। पूर्वाषाढायाश्चत्वारः।

अथोत्तराषाढाया ध्रुवकमाह। वैश्वमिति। उत्तराषाढा आप्यार्धभोगगम्। आप्यात् पूर्वाषाढनक्षत्रादर्धभोगान्तरे चतुःशतकलान्तरे उत्तराषाढाया योगतारेत्यर्थः। तद्यथा उत्तराषाढध्रुवः = पूर्वाषाढध्रु० + ४००

= १९ × ८०० + ४० + ४०० = १५२०० + ४० + ४००

= १५६४ = २६०°। ४० = $\frac{\text{रा}}{८}$। २०°। ४०° अयं च पर्वतसम्मतो ध्रुवो यस्य खण्डनं रङ्गनाथेन स्वगूढार्थप्रकाशे कृतम्। रङ्गनाथेन पूर्वाषाढाया अर्धभोगगमुत्तराषाढायोगनक्षत्रमिति व्याख्यातम्। तन्मते तद्ध्रुवः = (१९$\frac{१}{२}$) × ८०० = १५२००, + ४०० = १५६००, = २६०° = $\frac{\text{रा}}{८}$। २०°। अयं च ब्रह्मसिद्धान्तोक्तसमोऽत एव रङ्गनाथमतेन समीचीनः। आप्यस्योत्तराषाढायाः प्रान्तेऽभिजित् तेन तद्ध्रुवः = २० × ८०० = १६००० = २६६°। ४०' = $\frac{\text{रा}}{८}$। २६''। ४०'। वैश्वस्योत्तरषाढाया अन्ते श्रवणस्य स्थितिरतस्तद्ध्रुवः = २१ × ८०० = १६८०० = २८०° = $\frac{\text{रा}}{९}$। १०°। श्रवणस्य त्रिचतुष्पादयोः सन्धौ तृतीयपादान्ते चतुर्थपादादौ च श्रविष्ठा धनिष्ठा अर्थात्तद्योगताराऽतस्तद् ध्रुवः = $\frac{\text{रा}}{९}$ + १०° + ६००° = $\frac{\text{रा}}{९}$। २०°। अत्र रङ्गनाथः "तुकारात् क्षेत्रान्तर्गतधनिष्ठास्थानं कुम्भस्य विंशतिकलोनसप्तभागा निरस्तम्" इत्याह। स्वभोगता धनिष्ठाभोगात् शततारकाया अशीतिर्भोगः। अतः प्राग्वद्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्रुवा इति ज्ञापनार्थं स्वभोगत इत्युक्तम् । अवशिष्टनक्षत्राणां भोगानाह । षट्-कृतिरिति । पूर्वभाद्रपदायाः षट्त्रिंशत् । उत्तरभाद्रपदाया द्वाविंशतिः । रेवत्या एकोनाशीतिरिति । एषां नक्षत्राणां स्वात् स्थानीयापक्रमात् क्रान्त्यन्तादेते वक्ष्यमाणा विक्षेपाः शराः सन्तीति ॥ २–५ ॥

इदानीं नक्षत्राणां शरानाह—

दिङ्मासविषयाः सौम्ये याम्ये पञ्च दिशो नव ॥ ६ ॥
सौम्ये रसाः खं याम्येऽगाः सौम्ये खार्कास्त्रयोदश ।
दक्षिणे रुद्रयमलाः सप्तत्रिंशदथोत्तरे ॥ ७ ॥
याम्येऽध्यर्धत्रिककृता नव सार्धशरेषवः ।
उत्तरस्यां तथा षष्टिस्त्रिंशत् षट्त्रिंशदेव हि ॥ ८ ॥
दक्षिणे त्वर्धभागस्तु चतुर्विंशतिरुत्तरे ।
भागाः षड्विंशतिः खं च दास्रादीनां यथाक्रमम् ॥ ९ ॥

उत्तरदिशि अश्विन्यादित्रयाणां शराः क्रमेण दश द्वादश पञ्च । दक्षिणदिशि रोहिण्यादित्रयाणां पञ्च दश नव । उत्तरस्यां पुनर्वसोः षट् । पुष्यस्य खं विक्षेपाभावः । दक्षिणसमयाश्लेषायाः सप्त । उत्तरस्यां मघादित्रयाणां शून्यं द्वादश त्रयोदश । दक्षिणदिशि हस्तचित्रयोरेकादश द्वौ । उत्तरदिशि स्वात्याः सप्तत्रिंशत् । दक्षिणस्यां विशाखादिकानां षण्णां सार्धैकः त्रयश्चत्वारो नव सार्धपञ्च पञ्च । उत्तरदिश्यभिजितो विक्षेपभागाः षष्टिः । उत्तरदिशि श्रवणायास्त्रिंशत् । धनिष्ठायाःष ट्त्रिंशत् । दक्षिणदिशि शततारकाया अर्ध-भागः । उत्तरस्यां पूर्वभाद्रपदायाश्चतुर्विंशतिः । तस्यामेवोत्तरस्यां दिश्युत्तर-भाद्रपदायाः षड्विंशतिः । रेवत्या विक्षेपाभावः । इति दास्रादीनां क्रमेण शरांशाः सन्तीति ॥ ६—९ ॥

इदानीमगस्त्यादीनां ध्रुवविक्षेपानाह—

अशीतिभागैर्याम्यायामगस्त्यो मिथुनान्तगः ।
विंशे च मिथुनस्यांशे मृगव्याधो व्यवस्थितः ॥ १० ॥
विक्षेपो दक्षिणे भागैः खार्णवैः स्वादपक्रमात् ।
हुतभुग्ब्रह्महृदयौ वृषे द्वाविंशभागगौ ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टाभिस्त्रिशता चैव विक्षिप्तावुत्तरेण तौ ।
गोलं बध्वा परीक्षेत विक्षेपं ध्रुवकं स्फुटम् ॥ १२ ॥

मिथुनान्तगोऽगस्त्यो याम्यायां स्वक्रान्त्यग्रादशीतिभागैः स्थितः। अगस्त्यस्य ध्रुवः ९०° । दक्षिणः शरश्च = ८०° इत्यर्थः, मृगव्याधो लुब्धको मिथुनस्य विंशेऽंशे व्यवस्थितः । तस्य ध्रुवः = ८०° । तस्य लुब्धकस्य स्वादपक्रमाद् दक्षिणे दक्षिणदिशि खार्णवैः–४० भागैर्विक्षेपः । तस्य दक्षिणशरांशाः = ४०° इत्यर्थः । हुतभुगग्निः तथा ब्रह्महृदयश्च तौ वृषे द्वाविंशभागगौ स्तस्तथा तौ क्रमेणाष्टाभिर्भागैर्भागानां त्रिंशता चोत्तरेण विक्षिप्तौ । तयोर्ध्रुवः पञ्चाशद्भागाः ५० । अग्नेरुत्तरः शरोऽष्टौ भागाः । ब्रह्महृदयस्य चोत्तरः शरश्च त्रिंशद्भागा इति । अथैषां दास्रादीनामगस्त्यादीनां च शरं स्फुटं ध्रुवकं च गणको गोलयन्त्रं बध्वा विरचय्य परीक्षेत परीक्षां कुर्यात् । विपुलं गोलयन्त्रं विरचय्य रात्रौ गोलमध्यगतया दृष्ट्या रेवतीतारां विलोक्य क्रान्तिवृत्ते यो मीनान्तस्तं रेवतीतारायां निवेश्य मध्यगतयैव दृष्ट्या नक्षत्रं विलोक्य तदुपरि कदम्बप्रोतं वा ध्रुवप्रोतं कार्यम् । तत् क्रान्तिवृत्ते यत्र लग्नं क्रान्तिवृत्तनाडीवृत्तसम्पातात्तदवधि येऽंशास्ते सायना ध्रुवाः । कदम्बप्रोते नक्षत्रबिम्बस्य कदम्बप्रोतक्रान्तिवृत्तसम्पातस्य च यद्दक्षिणमुत्तरं वान्तरं तत्तस्य दक्षिण उत्तरो वा शरः । एवं क्रान्तिवृत्तनाडीवृत्तसम्पातात् क्रान्तिवृत्ते ध्रुवप्रोतावधि आयनदृक्कर्मसंस्कृता नक्षत्रध्रुवाः सायनाः । नक्षत्रबिम्बस्य ध्रुवप्रोतक्रान्तिवृत्तसम्पातस्य च ध्रुवप्रोते यदन्तरं तत् तस्य ध्रुवप्रोतीयः स्फुटः शरो वेदितव्यः । एवं स्वसमये वेधेन ध्रुवशराः परीक्षणीयाः ।

भास्करमतेन प्राचीनैर्ध्रुवप्रोतं नक्षत्रबिम्बोपरि निवेश्य तद्वशत आयनदृक्कर्मसंस्कृतध्रुवा ध्रुवप्रोतीयाः शराश्च वेधेन विज्ञाय पठिताः । भास्कराचार्येण "इत्यभावेऽयनांशानां कृतदृक्कर्मका ध्रुवा" इत्यादिना विपरीतविधिना स्फुटनक्षत्रशरात् कदम्बप्रोतीयः शरो यः साधितः स न समीचीनः । यतस्त्रिज्यावर्गादयनवलनज्याकृतिं प्रोह्यमूलमित्यादिना कदम्बप्रोतीयबाणात् कर्णरूपाद् ध्रुवप्रोतीयः कोटिरूपोऽल्पो भवति । इह तु नक्षत्रबिम्बात् क्रान्तिवृत्तावधि कदम्बप्रोते शरः कोटिरूपः । तद्बिम्बात् क्रान्तिवृत्तावधि ध्रुवप्रोते नक्षत्रस्पष्टशरश्च कर्णरूपः कदम्बप्रोतीयबाणादधिकः । तद्विलोमविधिना नक्षत्रस्पष्टशरतोऽप्यधिको महानशुद्धो भविष्यति तद्वशतोऽन्ये ध्रुवादयश्च न समीचीनाः । भास्करकथनं सर्वं निर्युक्तिकं बुधैर्भृशं चिन्त्यम् । वस्तुतस्तु वेधोपल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्धदृक्कर्मसंस्कृतध्रुवतो याऽऽयनवलनकोटिज्या सा नक्षत्रस्फुटशरज्यया गुणिता त्रिज्याभक्ता फलं कदम्बप्रोतीयशरज्या भवेदिति चापक्षेत्रतः स्फुटम्। ततो ज्ञाताभ्यां चापीयकर्णकोटिभ्यामायनदृक्कर्मकलारूपभुजज्ञानं सुगमम्। एवमत्र सर्वं सकृत्कर्मणैवोत्पद्यतेऽतोऽशुद्धो भास्करविधिर्नादरणीयो विद्वद्भिरिति दिक्। १०-१२ ॥

इदानी रोहिणीशकटभेदमाह—

वृषे सप्तदशे भागे यस्य याम्योऽंशकद्वयात्।
विक्षेपोऽभ्यधिको भिन्द्याद्रोहिण्याः शकटं तु सः ॥ १३ ॥

यस्य ग्रहस्य स्थानं वृषे सप्तदशे भागे भवेद्याम्यः शरश्चांशकद्वयादधिकः स तु रोहिण्याः शकटं भिन्द्यात् भेदयेदिति।

अत्रोपपत्तिः। रोहिणीनक्षत्राणां स्थितिवशेन शकटाकारं रोहिणीरूपमाकाशेऽस्तीति प्राचीनानां वाक्यम्। तस्य शकटस्य ध्रुवो वृषसप्तदशभागः क्रान्तिवृत्तासन्नताराया‍श्च याम्यः शरो भागद्वयमितोऽतो यस्य ग्रहस्य वृषसप्तदशे भागे स्थितिः शरश्च याम्यो भागद्वयादधिकः स शकटान्तर्गतत्वात् शकटं भेदयेदेव। अत्र गणेशदैवज्ञेन स्वग्रहलाघवे "स्वर्भानावदितिभतोऽष्टऋक्षसंस्थे" इत्यादिना विशेष उक्तस्तदुपपत्तिश्च मत्कृतग्रहलाघववासनायां विलोक्या किमत्र ग्रन्थविस्तरेणेति ॥ १३ ॥

अथ भग्रहयोगसाधनार्थमतिदिशति—

ग्रहवद् द्युनिशे भानां कुर्याद् दृक्कर्म पूर्ववत्।
ग्रहमेलकवच्छेषं ग्रहभुक्त्या दिनानि च ॥ १४ ॥
एष्यो हीने ग्रहे योगो ध्रुवकादधिके गतः।
विपर्ययाद्वक्रगते ग्रहे ज्ञेयः समागमः ॥ १५ ॥

ग्रहवद्भानां द्युनिशे दिनरात्रिमाने पूर्ववत् दृक्कर्म च कुर्यात्। भस्पष्टक्रान्तिवशेन चरमानीय नक्षत्रस्य द्युरात्रिमाने साध्ये ततो "विषुवच्छायया-भ्यस्तात्" इत्यादिना "सत्रिभग्रहजक्रान्तिभागघ्ना" इत्यादिना च दृक्कर्मद्वयं नक्षत्रध्रुवके संस्कृत्य नक्षत्रस्योदयास्तज्ञानं कर्त्तव्यम्। नक्षत्रोदयं दर्शनयोग्यसमये विज्ञाय ततो ग्रहेण सह तद्युतिर्विचार्या। एवं सति सौरा ध्रुवाः शराश्च कदम्बप्रोतीया इति स्पष्टमन्यथोदयज्ञानार्थं ध्रुवके दृक्कर्मद्वयसंस्कारो व्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्रुवप्रोतीयध्रुवेण सह युतिविचारे च ग्रहमध्येऽप्यायनदृक्कर्मसंस्कार आवश्यकः। अतः 'अत्र नक्षत्रध्रुवके पर्वतेनायनदृक्कर्मापि उदाहरणे कृतं तदयुक्तम्' इति रङ्गनाथखण्डनं निर्युक्ति। मन्मते पर्वतकृतं समीचीनमित्यलम्। एवं नक्षत्रस्य दर्शनयोग्ये समये नक्षत्रग्रहयुतिसाधने शेषं कर्म ग्रहमेलकवत् कार्यम्। "विवरं तद्वदुद्धृत्य" इत्यादिप्रकारे नक्षत्रस्य गतिं शून्यां प्रकल्प्य केवलया ग्रहगत्यैव दिनानि साध्यानि। ग्रहे ध्रुवकादल्पे योग एष्योऽधिके च गतो वाच्यः। वक्रगते ग्रहे च समागमो विपर्ययाद्ज्ञेयः। ग्रहे ध्रुवकादधिके योग एष्योऽल्पे च गत इत्यर्थः। एवं कदम्बप्रोतीयेन ग्रहेण स्फुटक्रियाऽऽगतेन नक्षत्रयोगो भगवता सूर्यांशपुरुषेणानीत इति स्फुटम्। भास्कराचार्येण कदम्बप्रोतीययोर्ग्रहयोर्योगं गतैष्यं विचार्य तेनैव विधिना ध्रुवप्रोतीययोर्ग्रहयोश्च गतैष्या युतिर्विचारिता सा च न समीचीना, कदम्बप्रोतयुतिर्यदा गतैष्या वा तदा ध्रुवप्रोतीययोर्ग्रहयोर्युतिरपि न सर्वदा गतैष्या कदाचिद्गतष्यत्वे विपर्ययो भवति। तद्यथा। अ क ख ग घ च क्रान्तिवृत्तम्। क=सौम्यं कदम्बम्।



ध्रु=सौम्यं ध्रुवम्। कदम्बप्रोते ग्र^{1} मन्दगतिर्ग्रहो मार्गो यस्य स्थानम्=ग्र$_1$। ग्र$_2$ अधिकगतिर्ग्रहो मार्गो यस्य स्थानम्=घ। तदा कदम्बप्रोतीया युतिर्गताऽधिकगतेर्ग्रहस्याग्रे गतत्वात्। ग्रहयोरुपरि ध्रुवप्रोतकरणेनच ग्र$_2$ ग्रहस्यायनदृक्कर्मदत्तस्थानं क बिन्दौ ग्र$_1$ ग्रहस्य च ख बिन्दौ। एवमत्राधिकगतिर्ग्रहो मन्दगतिग्रहात् पृष्ठेऽतोऽत्र युतिर्भविता। एवं बहुत्र व्यभिचारो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवति। अत एव कमलाकरेण स्वसिद्धान्ततत्त्वविवेके भास्करयुतिसाधनस्य खण्डनं साधु कृतमिति दिक्।

अत्रोपपत्तिः। नक्षत्रस्थानं ध्रुवं तद्गतिं च शून्यां प्रकल्प्य सर्वा क्रिया ग्रहमेलकवदुपपाद्या किमत्र लेखबाहुल्येनेति ॥ १४-१५ ॥

अथाश्विन्यादिनक्षत्राणां बहुतारात्मकत्वात् कां योगताराम वलम्ब्य वेधेन ध्रुवशरा आनीता इत्याह—

फाल्गुन्योर्भाद्रपदयोस्तथैवाषाढयोर्द्वयोः।
विशाखाश्विनिसौम्यानां योगतारोत्तरा स्मृता ॥ १६ ॥

पश्चिमोत्तरताराया द्वितीया पश्चिमे स्थिता।
हस्तस्य योगतारा सा श्रविष्ठायाश्च पश्चिमा ॥ १७ ॥

ज्येष्ठाश्रवणमैत्राणां बार्हस्पत्यस्य मध्यमा।
भरण्याग्नेयपित्र्याणां रेवत्याश्चैव दक्षिणा ॥ १८ ॥

रोहिण्यादित्यमूलानां प्राची सार्पस्य चैव हि।
यथा प्रत्यवशेषाणां स्थूला स्याद्योगतारका ॥ १९ ॥

पूर्वफाल्गुनी—उत्तरफाल्गुनी—पूर्वभाद्रपदोत्तरभाद्रपद—पूर्वाषाढोत्तराषाढ-- विशाखाश्विनिमृगशीर्षाणां नक्षत्राणां प्रत्येकं स्वतारापुञ्जे योत्तरदिक्स्था तारा सा योगतारा स्मृताऽऽद्यैः। तामवलम्ब्य वेधेनानीता ध्रुवशरा इति। हस्तनक्षत्रं पञ्चतारात्मकं हस्ताकारं तत्र वायुकोणस्थितताराया: सकाशाद् द्वितीया या तारा पश्चिमदिशि स्थिता सा हस्तस्य योगतारा ज्ञेया। श्रविष्ठायाः श्रवणायाश्च पश्चिमा तारा योगतारा वेद्या। ज्येष्ठाश्रवणानुराधानां पुष्यस्य च तारापुञ्जे या मध्ये स्थिता तारा सा योगतारा। भरणीकृत्तिकामघानां रेवत्याश्च तारापुञ्जे या दक्षिणदिशि स्थिता तारा सा योगतारा। रोहिणीपुनर्वसुमूलानामाश्लेषायाश्च तारापुञ्जे प्राची प्रागृदिक्स्थिता तारा योगतारा ज्ञेया। प्रत्यवशेषाणामवशिष्टनक्षत्राणामार्द्राचित्रास्वात्यभिजिच्छतभिषजां स्वस्वतारापुञ्जेषु याऽत्यन्तं स्थला विपुला कान्तिमती च सा योगतारा विज्ञेयेति ॥१६-१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं ब्रह्मादीनामवस्थानमाह--

पूर्वस्यां ब्रह्महृदयादंशकैः पञ्चभिः स्थितः ।
प्रजापतिर्वृषान्तेऽसौ सौम्येऽष्टत्रिंशदंशकैः ॥ २० ।

अपांवत्सस्तु चित्राया उत्तरेंऽशैस्तु पञ्चभिः ।
बृहत् किञ्चिदतो भागैरापः षड्भिस्तथोत्तरे ॥ २१ ॥

॥ इति नक्षत्रग्रहयुत्यधिकारः ॥ ८ ॥

ब्रह्महृदयाख्यस्थानात् पूर्वभागे पञ्चभिरंशैः प्रजापतिस्तारात्मको ब्रह्मा क्रान्तिवृत्ते स्थितः । अर्थाद्वृषान्ते वृषान्तसमीपे ब्रह्महृदयध्रुवे पञ्चभागान् संयोज्य प्रजापतेर्ध्रुवो ज्ञेयं इत्यर्थः । स च सप्तपञ्चाशद्भागा भवतीति । असौ प्रजापतिः सौम्य उत्तरस्यां दिशि अष्टत्रिंशदंशकैः स्थितः । अस्य सौम्याः शरभागा अष्टत्रिंशदिति । चित्रायाः सकाशादपांवत्साख्यः पञ्चभिर्भागैरुत्तरस्यां दिशि स्थितः । चित्राध्रुव एवापांवत्सध्रुवस्तस्य सौम्याः शरांशाश्च त्रय इत्यर्थः । चित्राया भागद्वयमितदाक्षिण शरत्वात् । अतोऽस्मादपांवत्सात् किञ्चिदल्पान्तरेण बृहत् विपुलतारात्मक आपसञ्ज्ञकः । अपांवत्सध्रुवासन्न एवापध्रुव इत्यर्थः । तथाऽपांवत्सात् षड्भिरंशैरुत्तरस्या दिशि स्थितः । आपस्य सौम्याः शरभागा नवेत्यर्थः ॥ २०-२१ ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा ।
सुखायामृतवर्षिण्यां गतो भग्रहयोगजः ॥ ८ ॥

इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यां
नक्षत्रग्रहयुत्यधिकारः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथोदयास्ताधिकारः

तत्र तावदुदयास्तयोर्विशेषमाह—

अथोदयास्तमययोः परिज्ञानं प्रकीर्त्यते ।
दिवाकरकराक्रान्तमूर्त्तिनामल्पतेजसाम् ॥ १ ॥

अथ दिवाकरकराक्रान्तमूर्त्तिनां सूर्यकिरणैराक्रान्ता मूर्त्तिर्येषां तेषामल्प-तेजसां चन्द्रादीनां षड्ग्रहाणामुदयास्तमययोः परिज्ञानं प्रकीर्त्यते कथ्यते । सूर्यसान्निध्यवशेन चन्द्रादीनां यावदुदयास्तौ तयोर्ज्ञानं कथं भवतीति कथ्यत इति ॥ १ ॥

इदानीमुदयास्तयोर्दिग्ज्ञानमाह--

सूर्यादभ्यधिकाः पश्चादस्तं जीवकुजार्कजाः ।
ऊनाः प्रागुदयं यान्ति शुक्रज्ञौ वक्रिणौ तथा ॥ २ ॥
ऊना विवस्वतः प्राच्यामस्तं चन्द्रज्ञभार्गवाः ।
व्रजन्त्यभ्यधिकाः पश्चादुदयं शीघ्रयायिनः ॥ ३ ॥

गुरुभौमशनयः सूर्यादभ्यधिकाः सन्तः पश्चादस्तं यान्ति ऊनाः सन्तश्च प्रागुदयं यान्ति । तथा वक्रिणौ बुधशुक्रौ च रवेरधिकौ पश्चादस्तमूनौ च प्रागुदयं यातः । शीघ्रयायिनश्चन्द्रबुधशुक्राश्च विवस्वतः सूर्यादूनाः प्राच्यामस्तमभ्यधिकाश्च पश्चादुदयं व्रजन्ति ।

अत्रोपपत्तिः । यो ग्रहो रवेः सकाशादूनगतिरसौ प्राच्यां दिशि कलांशान्तरित उदेति प्रतीच्यामस्तमेति । यथा भौमगुरुशनयो रवेरल्पाः कलांशान्तरितास्तदा निशाशेषे प्राच्यां रव्युदयात् प्रागेवोदयं यान्ति लोकैश्च दृश्या भवन्ति । रवेरभ्यधिकाः सन्तस्त एव कालांशान्तरिताः पश्चिमदिश्यस्तं यान्तीति । योऽधिकभुक्तिरसौ प्रतीच्यामुदेति प्राच्यां प्रतितिष्ठति । यथा चन्द्रः । मार्गिणौ बुधशुक्रौ च रवेरधिकगतित्वात् प्रतीच्यामुद्गच्छतः । ततस्तत्रैव वक्रतां प्राप्यास्तं गच्छतः । ततस्तयैव वक्रतया प्राच्यामुद्गम्य ततोऽवक्रतां प्राप्याधिकभुक्तित्वात् प्राच्यामेवास्तं व्रजेताम् । बुधशुक्रयोर्यत् प्राच्यां दिश्युद्गमनं प्रतीच्यामस्तमयस्तद्वक्रता वैपरीत्यमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ सम्प्रति नवीनानां मते ग्रहा दीर्घवृत्ते भ्रमन्ति । यत्रैकनाभिस्थाने रविः स्थिरः, तत्र स्वल्पान्तराद्दीर्घवृत्तं वृत्तमिव भाति । यत्केन्द्रे रविः स्थिरः, भूश्च रविपरितः स्वकक्षावृत्ते भ्रमति, तत्र भुवं स्थिरां प्रकल्प्य शुक्रस्य सापेक्ष्यं



कक्षावृत्तं स्पकस्प$_1$, ख कल्प्यते भवलयं च ततोऽति दूरे मे स्प$'$ क$'$ उक$'_1$ स्प$'_1$ कल्प्यते, यत्र मेषादीनां गणना बाणमुखाग्रतः पूर्वाभिमुखे तदा स्वकक्षायां क, उ$_1$ क$_1$, स्प$_1$ विन्दुगतः शुक्रो भवलये भूनिवासिभिः क्रमेण स्प$'$, क$'$, उ, क$'_1$, स्प$'_1$ विन्दौ लक्ष्यते । स्पविन्दोः स्प$_1$ विन्दुपर्यन्तं स्वकक्षायां शुक्रो भवलये प्राग्गतित्वात् स्प$'$ विन्दोः स्प$'_1$ विन्दुपर्यन्तं गच्छन्निव भाति । अतः उस्थाने यदा भवलये शुक्रस्तदा रविशुक्रयोः साम्यात् परमास्तकालः । ततः कालांशान्तरिते शुक्रे क$'_1$ विन्दुगते भू र उ$_1$ उ रेखायां प्रवहेणास्तं गते रवौ क$'_1$ विन्दुगतस्य शुक्रस्य पश्चाद्दिशि दर्शनम् । ततः पश्चिमदिशि प्रत्यहं रविशुक्रान्तरं महदतः शुक्रविम्बं प्रत्यहं द्युतिमद् दृश्यते । स्प$'_1$ विन्दुगतः शुक्रो महाद्युतिमान् । तदा स्वकक्षास्थः शुक्रः स्प$_1$ विन्दौ । ततः क्रमेण स्वकक्षां भ्रमन् शुक्रो भवलये स्प$'_1$ विन्दुत उत्तरोत्तरं पश्चिमदिशि विलोक्यते ततो वक्रगतेः पुनः क$'_1$ स्थानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतः शुक्रो रवितः कालांशान्तरितत्वात् न दृश्यते। अतो मार्गः शुक्रः पश्चिमायामुदेति वक्रगतिं प्राप्य तत्रैवास्तं च याति। एवं वक्रगतेर्यदा उस्थानात् क विन्दुगतः शुक्रस्तदा कालांशान्तरितत्वान्निशाशेषे रव्युदयात् प्राक् प्राग्दिशि दृश्यते। ततोऽनन्तरं यावत् स्प' विन्दुगतो लक्ष्यते सूर्यान्महान्तरितः स्यात्। तदा स्वकक्षायां स्पस्थानगतः शुक्रो भविष्यति। भूस्प स्प, भू स्प१ स्प'१ रेखे स्थिर भूविन्दुतः शुक्रसापेक्ष्यकक्षोपरि स्पर्शरेखे बोध्ये। ततः स्पस्थानात् स्वकक्षायां क्रमेण गच्छन् शुक्रो भवलये मार्गगतिर्लक्ष्यतेऽतो मार्गगतत्वात् पुना रव्यासन्ने पूर्वदिश्यदृश्यो भवति। एवं बुधस्यापि स्थितिस्तेन नवीनानां मतेन सौरोक्तबुधशुक्रोदयास्तदिक् स्फुटमुपपद्यते। एतेन प्राचीनानां मनसि सूर्यकेन्द्राभिप्रायिकैव कक्षाऽऽसीत्। लोकानां प्रतीतिजननाय भुवः समन्ताद् ग्रहाणां कक्षा प्रतिपादिता तैरिति कल्पना सयुक्तिका। पूर्वोदितक्षेत्रेण 'ज्ञशुक्रावृजू प्रत्यगुद्गम्य वक्रां गतिं प्राप्य तत्रैव यातः प्रतिष्ठाम्' इत्यादि भास्करोक्तं च स्फुटमुपपद्यत इत्यलं प्रसङ्गागतविचारेण ॥ २–३ ॥

इदानीमितिकर्त्तव्यतामाह—

सूर्यास्तकालिकौ पश्चात् प्राच्यामुदयकालिकौ।
दिवा चार्कग्रहौ कुर्याद् दृक्कर्माथ ग्रहस्य तु ॥४॥

उदयास्तासन्ने दिवाऽभीष्टे दिने पश्चाद्दिश्युदयास्तसाधने सूर्यास्तकालिकौ सूर्यग्रहौ प्राच्यां चोदयकालिकौ सूर्यग्रहौ गणकः कुर्यात्। अथ तदा तु ग्रहस्य मध्ये स्पष्टं दृक्कर्म च दद्याद्येन ग्रहविम्बोदये वास्ते प्राक्क्षितिजे क्रान्तिवृत्तस्य लग्नप्रदेशो विदितो भवेत्। एवमत्र ग्रहस्योदयलग्नं विभार्धमस्तलग्नं च ज्ञायत इति ॥ ४ ॥

अथेष्टकालांशानयनमाह—

ततो लग्नान्तरप्राणाः कालांशाः षष्टिभाजिताः।
प्रतीच्यां षड्भयुतयोस्तद्वल्लग्नान्तरासवः ॥ ५ ॥

ततः सूर्योदयलग्नयोर्वा सूर्यास्तलग्नयोरन्तरे लग्नसूर्यान्तरवत् "भोग्यासूनूनकस्याथ" इत्यादिना प्राणा असवः साध्यास्ते षष्टिभाजिता इष्टकालांशाः स्युः। प्रतीच्यां च षड्भयुतयोः रव्युदयलग्नयोर्वा रव्यस्तलग्नयोस्तद्वल्लग्नान्तरासवो लग्नसूर्यवदन्तरप्राणाः साध्या इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः। ग्रहविम्बोदयात् कियत्कालान्तरे रव्युदय इत्यस्य ज्ञानम् ज्ञाताभ्यां रविलग्नाभ्यां यथेष्टकालो ज्ञायते तथैवात्र कृतम्। असवः षड्भक्ता विनाड्यस्ताः षष्टिहृता नाड्यस्ताश्च षड्गुणाः कालवृत्ते जाता अंशाः $= \frac{अ \times ६}{६ \times ६०}$

$= \frac{अ}{६०}$ अत उपपन्नमिष्टकालांशानयनम्। पश्चिमे यावता कालेन रव्यस्ताद् दृग्ग्रहास्तस्तावताकालेन सषड्भरव्युदयात् सषड्भदृग्ग्रहोदयोऽतो राश्युदयैरन्तरप्राणानयनार्थं रविदृग्ग्रहौ सषड्भौ कृताविति। एवं रविदृग्ग्रहयोरुदये वास्ते यः कालस्तस्यांशा जाताः॥ ५॥

इदानीं ग्रहोदयास्तमययो रविदृग्ग्रहयोरुदये वाऽस्ते ये कालांशाः प्राचीनैरुपलब्धास्तानाह—

एकादशामरेज्यस्य तिथिसङ्ख्यार्कजस्य च।
अस्तांशा भूमिपुत्रस्य दश सप्ताधिकास्ततः॥ ६॥

पश्चादस्तमयोऽष्टाभिरुदयः प्राङ्महत्तया।
प्रागस्तमुदयः पश्चादल्पत्वाद्दशभिर्भृगोः॥ ७॥

एवं बुधो द्वादशभिश्चतुर्दशभिरंशकैः।
वक्री शीघ्रगतिश्चार्कात् करोत्यस्तमयोदयौ॥ ८॥

अस्तांशाः कालांशा उदयांशाश्चैकपर्यायाः। गुरोरेकादश कालांशाः। अर्कजस्य शनेश्च पञ्चदश। ततोऽनन्तरं भूमिपुत्रस्य भौमस्य सप्ताधिका दश, सप्तदशेत्यर्थः। भृगोः शुक्रस्य विम्वमहत्तया नीचासन्नगतत्वादष्टाभिः कालांशैः पश्चादस्तमयः प्रागुदयश्च। तथा विम्बाल्पत्वादुच्चासन्नगतत्वात् शुक्रस्य दशभिः कालांशैः प्रागस्तं पश्चादुदयश्च। एवं वक्री बुधोऽर्कात् द्वादशभिः कालांशैर्विम्बमहत्वादस्तमयोदयौ करोति, शीघ्रगतिर्मार्गी च बुधो विम्बाल्पत्वादर्काच्चतुर्दशभिः कालांशैरस्तमयोदयौ करोति।

अत्रोपपत्तिः। उच्चनीचवशेन ग्रहबिम्बं लघुत्वं विपुलत्वं च भवति। रवेस्तेजश्च विम्बान्तरसूत्रवशाद्ग्रहविम्बोपरि न्यूनाधिकत्वं जायतेऽतः कालांशा न स्थिरा अतो लोकव्यवहारार्थं प्राचीनैः स्थूलाः कालांशा मुहुर्वेधेन समवगम्य पठिताः। तेषां च विम्बस्य स्थूलसूक्ष्मतावशान्न्यूनाधिकता। अत एव बुधशुक्रयोर्वक्रगतग्रहविम्बस्य स्थूलत्वाद् द्विहीना इति॥ ६-८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ कालांशानां प्रयोजनमाह—

एभ्योऽधिकैः कालभागैर्दृश्या न्यूनैरदर्शनाः ।
भवन्ति लोके खचरा भानुभाग्रस्तमूर्त्तयः ॥ ९ ॥

एभ्यः पाठपठितेभ्यः कालांशेभ्योऽभीष्टकालभागैरधिकैर्लोके खचरा दृश्या, न्यूनैरिष्टकालभागैश्चादर्शना अदृश्या भवन्ति। कीदृशाः खचरा भानुभाग्रस्तमूर्त्तयः। रविदीप्त्या ग्रस्ता मूर्त्तिर्येषां ते—इति ॥ ९ ॥

अथोदयास्तयोर्गतैष्यदिनाद्यानयनमाह—

तत्कालांशान्तरकला भुक्त्यन्तरविभाजिताः ।
दिनादि तत्फलं लब्धं भुक्तियोगेन वक्रिणः ॥ १० ॥
तल्लग्नासुहते भुक्ती अष्टादशशतोद्धृते ।
स्यातां कालगती ताभ्यां दिनादि गतगम्ययोः ॥ ११ ॥

तयोः पठितेष्टकालांशयोरन्तरकला रविग्रहयोर्भुक्त्यन्तरेण कालात्मकगत्यन्तरेण विभाजितास्तल्लब्धं फलं दिनादि ग्राह्यं गतमेष्यं वा पूर्वविधिना। कालात्मिका गतिः कथं साधनीयेत्याह। तल्लग्नासुहते—इत्यादि। भुक्ती रविग्रहयोर्गती रविग्रहाधिष्ठितलग्नादयासुभिर्हते अष्टादशशतभक्ते तदा तयोः कालगती स्याताम् ताभ्यां गतिभ्यां गतगम्ययोरुदयास्तमययोः पूर्वानुपातेन दिनादि फलं साधनीयमिति।

अत्रोपपत्तिः। प्रोक्तेष्टकालांशान्तरकलाः कालवृत्तेऽतस्तत्सजातीयग्रहकालगत्योरन्तरेण ग्रहे वक्रे च गतियोगेनैकं दिनं लभ्यते तदा कालांशान्तरकलाभिः किमिति। लब्धं दिनादि। कालगत्यानयनार्थं चानुपातः। क्रान्तिवृत्तीयाष्टादशशतकलाभिर्ग्रहनिष्ठराश्युदयासवो लभ्यन्ते तदा क्रान्तिवृत्तीयग्रहगतिकलाभिः किमिति। लब्धा कालगतिरिति सर्वं स्फुटम्। पठितकालांशतो यदि भिन्नदिशीष्टकालांशास्तर्हि प्रोक्तेष्टकालांशयुतेः कलाभिर्गतैष्यदिवसाः साध्या इति सर्वं भास्करेण सिद्धान्तशिरोमणावुदयास्ताधिकारे स्फुटं वर्णितम् ॥ १०-११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं नक्षत्राणां कालांशानाह—

स्वात्यगस्त्यमृगव्याधचित्राज्येष्ठाः पुनर्वसुः ।
अभिजिद् ब्रह्महृदयं त्रयोदशभिरंशकैः ॥ १२ ॥

हस्तश्रवणफाल्गुन्यः श्रविष्ठा रोहिणीमघाः ।
चतुर्दशांशकैर्दृश्या विशाखाश्विनिदैवतम् ॥ १३ ॥

कृत्तिकामैत्रमूलानि सार्पं रौद्रर्क्षमेव च ।
दृश्यन्ते पञ्चदशभिराषाढाद्वितयं तथा ॥ १४ ॥

भरणीतिष्यसौम्यानि सौक्ष्म्यात् त्रिःसप्तकांशकैः ।
शेषाणि सप्तदशभिर्दृश्यादृश्यानि भानि तु ॥ १५ ॥

स्वाती-अगस्त्य-लुब्धक-चित्रा-ज्येष्ठा - पुनर्वसु - अभिजिद्ब्रह्महृदयाख्यानि नक्षत्राणि त्रयोदशकालांशैरुदयास्तमयौ कुर्वन्ति। हस्त-श्रवण-पूर्वाफालगुनी-उत्तराफालगुनी-श्रविष्ठा-रोहिणी - मघाश्चतुर्दशकालांशै - रुदयास्तमयौ कुर्वन्ति। तास्तैः कालांशैर्दृश्या भवन्तीत्यर्थः। विशाखाश्विनीकृत्तिकाऽनुराधा-मूलाश्लेषाऽऽर्द्रापूर्वाषाढोत्तराषाढाः पञ्चदशभिरंशैर्दृश्यन्ते। भरणीपुष्य-मृगशीर्षाणि सौक्ष्म्यविम्बादकेविंशतिकालांशैर्दृश्यन्ते। शेषाणि नक्षत्राणि शततारा-पूर्वोत्तराभाद्रपदसञ्ज्ञकानि। वह्नि ब्रह्मापांवत्सापाख्यानि च सप्तदशभिः कालांशैर्दृश्यादृश्यानि भवन्तीत्यर्थः। एवं पठितकालांशेभ्यः पूर्वोक्तविधिना नक्षत्राणामुदयास्तमयौ साध्यौ। तत्र नक्षत्रगतिः शून्या प्रकल्प्येति ॥ १३-१५ ॥

अथैषां प्रकारान्तरेणोदयास्तसाधनमाह—

अष्टादशशताभ्यस्ता दृश्यांशाः स्वोदयासुभिः ।
विभज्य लब्धाः क्षेत्रांशास्तैर्दृश्यादृश्यताथवा ॥ १६ ॥

नक्षत्राणां दृश्यांशाः—कालांशाः। अष्टादशशतगुणाः सायनध्रुवाधिष्ठित-राशिस्वदेशोदयासुभिर्विभज्य लब्धाः क्षेत्रांशाः क्रान्तिवृत्तीयांशास्तैरथवा दृश्यादृश्यता साध्या। तैः क्षेत्रांशैर्ध्रुवाधिको रविस्तदा नक्षत्रोदयस्तथा तैरेव क्षेत्रांशैर्ध्रुवाद्यदाल्पो रविस्तदा नक्षत्रास्त इत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः । अत्र सायनध्रुवाधिष्ठितराशिस्वोदयासुभिः कालवृत्तगतैः क्षेत्रकला अष्टादशशतमितास्तदा दृश्यासुभिः (कालांशासुभिः) किमिति । लब्धास्तत्सम्बन्धिन्यः क्रान्तिवृत्ते कलास्ताः षष्टिहृताः क्षेत्रांशा जाताः $= \frac{१८०० \times का भा \times ६०}{उ अ \times ६०} = \frac{१८०० \times काभा}{उ अ}$ अत उपपन्नम् ॥ १६ ॥

अथ नक्षत्राणामुदयास्तदिगाद्याह—

प्रागेषामुदयः पश्चादस्तो दृक्कर्म पूर्ववत् ।
गतैष्यदिवसप्राप्तिर्भानुभुक्त्या सदैव हि ॥ १७ ॥

एषां नक्षत्राणां प्राग्गतेरभावात् सदा रवेरल्पगतित्वात् प्राग्दिश्युदयः पश्चादस्तो भवति । अत्रापि पूर्ववद् दृक्कर्म स्पष्टं दृक्कर्मायनाक्षजदृक्कर्मसंस्कारोद्भवं देयम् । उदयास्तयोर्गतैष्यदिवसप्राप्तिश्च सदैव नक्षत्रगतेः शून्यत्वाद्रविगत्यैव विभज्य ज्ञेया ।

अत्रोपपत्तिः । ग्रहोदयास्तविधिनैव नक्षत्रगतिं शून्यां प्रकल्प्य ज्ञेयेति ॥ १७ ॥

इदानीं सदोदितनक्षत्राण्याह—

अभिजिद् ब्रह्महृदयं स्वातीवैष्णववासवाः ।
अहिर्बुध्न्यमुदक्स्थत्वान्न लुप्यन्तेऽर्करश्मिभिः ॥ १८ ॥

॥ इत्युदयास्ताधिकारः ॥ ९ ॥

अभिजित् । ब्रह्महृदयम् । स्वातीश्रवणधनिष्ठाः । अहिर्बुध्न्यमुत्तराभाद्रपदाः । एतानि उत्तरदिक्स्थत्वात् सूर्यकिरणैर्न लुप्यन्ते । स्वल्पान्तरादभिजिदुत्तरस्पष्टक्रान्तिः $= २८^\circ$ । ब्रह्महृदयस्फुटाक्रान्तिः $= ४७^\circ$ उत्तरा । स्वात्युत्तरस्फुटाक्रान्तिः $= २९^\circ$ । श्रवणस्फुटाक्रान्तिरुत्तरा $= ७^\circ$ । धनिष्ठास्फुटाक्रान्तिरुत्तरा $= १५^\circ$ । उत्तराभाद्रपदोत्तरस्फुटाक्रान्तिः $= १७^\circ$ । अतोऽत्र यदि श्रवणाया उत्तराक्रान्तिः परमाल्पा गृह्यते तत्समो लम्बश्च तदा पलांशाः $= ८३^\circ$ इत्यायान्ति यत्र सूर्यसिद्धान्तरचना जाता परन्तु तत्रान्यानि बहूनि नक्षत्राणि लम्बाधिकोत्तरक्रान्तित्वात् सर्वदा दृश्यानि यानि चाचार्येण न पठितानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतो "यस्योदयार्कादधिकोस्तभानुरित्यादि" भास्करविधिना पाठपठितानि नक्षत्राणि सदोदितानि भवन्ति तत्र देशे सूर्यसिद्धान्तरचना जातेति वेद्या । आचार्येण चाधिकोत्तरशराणि गृहीतानि यतोऽभिजितः शरः = ६२° । ब्रह्महृदयस्य: = ३०° । स्वात्याः = ३७° । श्रवणस्य = ३०° । धनिष्ठायाः = ° । उत्तरभाद्रपदायाः = २६° । एते शरभागाश्चान्यशरभागेभ्योऽधिकाः । देशज्ञानं विना सदोदितनक्षत्राणां ज्ञानं न भवति निरक्षे च सौम्यध्रुवोऽप्यदृश्योऽतः केनचिद्गोलानभिज्ञेनायं श्लोकः प्रक्षिप्त इति मन्मतं सुधिभिर्भृशं विचिन्त्यमिति ॥ १८ ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्थथा ।
सुखायामृतवर्षिण्यां गतोऽस्तोदयसाधनः ॥ ९ ॥

॥ इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यामुदयास्ताधिकारः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चन्द्रशृङ्गोन्नत्यधिकारः

तत्र तावच्चन्द्रस्य दृश्यादृश्यत्वमाह—

उदयास्तविधिः प्राग्वत् कर्त्तव्यः शीतगोरपि ।
भागैर्द्वादशभिः पश्चाद्दृश्यः प्राग् यात्यदृश्यताम् ॥ १ ॥

प्राग्वदुदयास्ताधिकारविधिना चन्द्रस्योदयास्तविधिः कर्त्तव्यः । उदयास्ताधिकारेण पश्चिमे चन्द्रस्यास्तलग्नं साध्यम् । ततो यदि रव्यस्तानन्तर द्वादशभिः कालांशैश्चन्द्रास्तस्तदा तस्मिन् दिने पश्चिम दशि चन्द्रो दृश्यः । एवमुदयलग्नं चन्द्रस्य कृत्वा ततो यदि प्राक्क्षितिजे चन्द्रोदयानन्तरं द्वादशभिः कालांशैः रवेरुदयस्तदा तस्मिन् दिने प्राग्भागे चन्द्रोऽदृश्यतां यातीति ।

अत्रोपपत्तिः । अतिसुगमा यतश्चन्द्रस्य कालांशा द्वादश प्राचीनैर्निर्णीता अतस्तद्रव्योरुदययोरस्तयोर्वा मध्ये यदि द्वादश कालांशा आगच्छेयुस्तदा चन्द्रस्य दृश्यादृश्यत्वं भवतीति ॥ १ ॥

इदानीमिष्टदिने सूर्यास्तानन्तरं कियत्काले चन्द्रास्त इत्यादि साधयति—

रवीन्द्वोः षड्भयुतयोः प्राग्वल्लग्नान्तरासवः ।
एकराशौ रवीन्द्वोश्च कार्या विवरलिप्तिकाः ॥ २ ॥

तन्नाडिकाहते भुक्ती रवीन्द्वोः षष्टिभाजिते ।
तत्फलान्वितयोर्भूयः कर्त्तव्या विवरासवः ॥ ३ ॥

एवं यावत् स्थिरीभूता रवीन्द्वोरन्तरासवः ।
तैः प्राणैरस्तमेतीन्दुः शुक्लेऽर्कास्तमयात् परम् ॥ ४ ॥

भगणार्धं रवेर्दत्त्वा कार्यास्तद्विवरासवः ।
तैः प्राणैः कृष्णपक्षे तु शीतांशुरुदयं व्रजेत् ॥ ५ ॥

सूर्यास्तकाले रवेरिन्दोश्चन्द्रस्य च पश्चिमक्षितिजेऽस्तलग्ने कृत्वा तयोः षड्राशियुतयोर्मध्ये रविलग्नान्तरवदसवः साध्याः । यदि रवीन्दू एकराशौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यातां तदा तयोरन्तरकला यास्ताभिर्विवरासवः कार्याः। अष्टादशशतकलाभिस्तद्राशिस्त्रोदयासवो लभ्यन्ते तदा विवरलिप्ताभिः किमिति! एवं लब्धा विवरासवा भवन्ति ते कार्या इत्यर्थः। रवीन्द्वोर्गतौ तदसूना या नाडिकास्ताभिहत षष्ट्या भाजिते च तयाश्चालनफले भवतः। तन स्वस्वफलेनान्वितया रवीन्द्वोर्मध्य भूयः पुनर्विवरासवः कर्तव्याः। तैरसुभिः पुनश्चालनफले कार्ये। तत्फलान्वितयारवीन्द्वोर्मध्य पुनर्विवरासवः कार्याः। एवं तावत् कर्म कर्तव्य यावत् रवीन्द्वोरन्तरासवः स्थिरीभूताः स्युः। एवं स्थिरीभूतैस्तैरसुभिः शुक्लपक्षेऽर्कास्तमयात् पर रव्यस्तानन्तर चन्द्रोऽस्मतीति। कृष्णपक्षे तु सूर्यास्तकालिकरवौ राशिषट्कं संयोज्य प्राक्क्षितिजस्थं तात्कालिकलग्नं विज्ञाय तदुदयात् कियत्काले चन्द्रोदयो भविष्यतीत्यस्य ज्ञानं विवरासुभिः कार्यम्।

अत्रोपपत्तिः। सूर्यास्तानन्तरं कियत्काले चन्द्रास्तो भविष्यतीत्येतदर्थं सषड्भयो रविचन्द्रास्तलग्नयोर्मध्ये प्राक्क्षितिजे ह्युदयासवः साधिता यतो या येन समयेनोदेति तत्सप्तमस्तेन समयेनास्तं गच्छतीति। एवं यदि रविचन्द्रयोर्गती न स्यातां तदा तद्विवरासुभिरर्कास्तानन्तरं चन्द्रास्तोऽभविष्यत्। गतिवशेन वास्तवविवरासुमध्येऽन्तरं जातमतो निरन्तरार्थं तात्कालिकाभ्यां रविचन्द्राभ्यामसकृत्कर्म कृतमिति स्फुटं गोलविदामिति ॥ २—५॥

इदानीं शृङ्गोन्नतौ भुजकोटिकर्णानामानयनमाह—

अर्केन्द्वोः क्रान्तिविश्लेषो दिक्साम्ये युतिरन्यथा।
तज्ज्येन्दुरर्काद्यत्रासौ विज्ञेया दक्षिणोत्तरा ॥ ६ ॥

मध्याह्नेन्दुप्रभाकर्णसङ्गुणा यदि सोत्तरा।
तदार्कघ्नाक्षजीवायां शोध्या योज्या च दक्षिणा ॥ ७ ॥

शेषं लम्बज्यया भक्तं लब्धो बाहुः स्वदिङ्मुखः।
कोटिः शङ्कुस्तयोर्वर्गयुतेर्मूलं श्रुतिर्भवेत् ॥ ८ ॥

दिक्साम्ये रविचन्द्रयोः क्रान्तिविश्लेषः क्रान्तिज्यान्तरं कार्यमन्यथा दिग्भेदे च क्रान्तिज्ययोर्युतिः कार्या। अन्तरे योगे वा यज्जातं सव ज्या वेद्या। असौ रवेः सकाशाद्यत्र यस्यां दिशि चन्द्रो भवेत् तद्दिशि दक्षिणा वोत्तरा विज्ञेया। यस्मिन् दिने शृङ्गोन्नतिः कर्तव्या तद्दिने त्रिप्रश्नाधिकारोक्तविधिना चन्द्रस्य मध्याह्ने। अह्नो हारात्रस्य मध्यमिति मध्याह्नः सूर्यास्तकालस्तस्मिन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समये चन्द्रच्छायाकर्णः साध्यः। तेन सा ज्या सङ्गुणा। यदि च सोत्तरा तदा छायाकर्णगुणा साऽर्कघ्नाक्षजीवायां द्वादशगुणपलज्यायां शोध्या यदि च सा दक्षिणा तदा तत्रैव द्वादशगुणाक्षज्यायां योज्या। योजने वा वियोजने यच्छेषं तल्लम्बज्यया भक्तं लब्धः स्वदिङ्मुखः स्वसंस्कारमुखो दिशि बाहुर्भवेत्। द्वादशगुणाक्षज्या सर्वदा दक्षिणा भवति तज्ज्या च दक्षिणा वोत्तरा। तयोः संस्कारेण या दिग्भवेत् तद्दिक्को बाहुर्भवतीति।

शङ्कुर्द्वादशाङ्गुलशङ्कुः कोटिर्भवति तयोर्वर्गयोगान्मूलं कर्णो भवेच्छृङ्गो-न्नताविति।

अत्रोपपत्तिः। अत्राऽभीष्टदिने सूर्यास्तकाले शृङ्गोन्नतिः साध्यते 'मध्याह्नेन्दुप्रभाकर्ण' इत्युक्तत्वात्। तदा रविशङ्क्वभावात् तदग्रैव शङ्कुमूलपूर्वापरान्तररूपा भुजः। तत्क्रान्तिज्या च ज्याक्रा$_1$। तत्र चन्द्रस्पष्टक्रान्तिज्या= ज्याक्रा$_2$। लम्बज्याक्षज्यात्रिज्यात्मकेनाक्षक्षेत्रेणानुपातेन।

$$\text{र व्यग्रा} = \text{अ}_1 = \frac{\text{वि} \times \text{ज्याक्रा}_1}{\text{ज्यालं}} \text{ । चन्द्रग्रा} = \text{अ}_2 == \frac{\text{वि}\times\text{ज्याक्रा}_2}{\text{ज्यालं}}$$

$$\text{चन्द्रशङ्कुतलम्} = \text{शंत} = \frac{\text{ज्याअ} \times \text{शं}}{\text{ज्यालं}} \text{ । रविभुजः } = \frac{\text{त्रि}\times\text{ज्याक्रा}_1}{\text{ज्याल}}$$

$$\text{चन्द्रभुजः} = \frac{\text{त्रि}\times\text{ज्याक्रा}_2}{\text{ज्यालं}} + \frac{\text{ज्याअ}\times\text{शं}}{\text{ज्यालं}}$$

दिक्साम्ये तयोरन्तरेण चन्द्रस्य स्पष्टो भुजः=

$$\text{भु}_1 = \frac{\text{त्रि (ज्याक्रा}_1 - \text{ज्याक्रा}_2)}{\text{ज्याल}} + \frac{\text{ज्याअ. शं}}{\text{ज्याल}}$$

चन्द्र-शङ्कुकोटावयं भुजस्तदा द्वादशकोटौ किमिति। जातो लघुक्षेत्रे

$$\text{चन्द्रस्पष्टभुजः} = \frac{\text{१२ त्रि}}{\text{श}} \quad \frac{(\text{ज्याक्रा}_1 - \text{ज्याक्रा}_2)}{\text{ज्याल}} + \frac{\text{१२ ज्याअ}}{\text{ज्याल}}$$

$$= \frac{\text{छाक (ज्याक्रा}_1 - \text{ज्याक्रा}_2) + \text{१२ ज्याअ}}{\text{ज्याल}}$$

अथ यदि अत्र द्वयोः क्रान्तिरुत्तरा ज्याक्रा$_1 \not>$ ज्याक्रा$_2$ तदा रवितो दक्षिणे चन्द्रः। अतः प्रथमखण्डं दक्षिणं जातं तत्र द्वितीयखण्डं धनं कार्यम्। यदि ज्याक्रा$_1 \not<$ ज्याक्रा$_2$ तदा रवित उत्तरे चन्द्रः। प्रथमखण्डमृणं तच्च धनात्मके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयखण्डे ऋणं कर्त्तव्यम् । एवं द्वयोर्दक्षिणां क्रान्तिं प्रकल्प्य द्वितीयखण्डमृणं च प्रकल्प्य स्पष्टभुजदिग्ज्ञेया । एवमत्र संस्कारविचारो गूढार्थप्रकाशे रङ्गनाथकृतो विचिन्त्योऽत्र ग्रन्थगौरवेणालम् । भास्करेणायमेव प्रकारः स्वचन्द्रशृङ्गोन्नतौ वृहत्क्षेत्रे स्पष्टभुजस्योक्तोऽत एव तच्छृङ्गोन्नतौ या स्थूलता सैवात्रापि । तदर्थं मदीयवास्तवचन्द्रशृङ्गोन्नतिसाधनं द्रष्टव्यम् ॥ ६-८ ॥

इदानीं शुक्लाङ्गुलानयनमाह—

सूर्योनशीतगोर्लिप्ताः शुक्लं नवशतोद्धृताः ।
चन्द्रविम्बाङ्गुलाभ्यस्तं हृतं द्वादशभिः स्फुटम् ॥ ९ ॥

सूर्योनचन्द्रस्य कला नवशतभक्ताः शुक्लं भवति । तच्चन्द्रविम्बाङ्गुलेन गुणं द्वादशभक्तं स्फुटं शुक्लाङ्गुलमानं भवेत् ।

अत्रोपपत्तिः । पूर्णिमायां सकलं द्वादशाङ्गुलमितं चन्द्रविम्बं शुक्लं भवति तदा रविचन्द्रयोरन्तरकलाश्च भार्धकलासमाः $= १८०० \times ६$ । अतोऽनुपातो यद्यावतान्तरेण द्वादशाङ्गुलशुक्लं तदेष्टरविचन्द्रान्तरकलाभिः किमिति लब्धं शुक्लाङ्गुलमानम् $= \frac{१२ \times अक}{१८०० \times ६} = \frac{अंक}{९००}$ । स्फुटार्थमन्योऽनुपातो यदि द्वादशाङ्गुलमितविम्बेनेदं शुक्लं तदाभीष्टचन्द्रविम्बेन किमिति ।

लब्धं स्फुटशुक्लाङ्गुलमानम् $= \frac{शु \times चवि}{१२}$ । अनेनोपपन्नमाचार्यानयनम् ।

एवं स्थानीयान्तरानुपातेन वास्तवशुक्लं नायातीत्येतदर्थं सितवृत्तीयान्तराद्यानयनं कमलाकरोक्तं विचिन्त्यम् । तत्रापि क्रमज्ययोत्क्रमज्यया वा शुक्लसाधनमुचितमित्येतदर्थं मदीयवास्तवचन्द्रशृङ्गोन्नतिसाधनं द्रष्टव्यम् ॥ ९ ॥

इदानीं चन्द्रशृङ्गोन्नत्यर्थं परिलेखमाह—

दत्त्वार्कसंज्ञितं बिन्दुं ततो बाहुं स्वदिङ्मुखम् ।
ततः पश्चान्मुखीं कोटिं कर्णं कोट्यग्रमध्यगम् ॥ १० ॥

कोटिकर्णयुताद्बिन्दोर्विम्बं तात्कालिकं लिखेत् ।
कर्णसूत्रेण दिक्सिद्धिं प्रथमं परिकल्पयेत् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्लं कर्णेन तद्बिम्बयोगादन्तर्मुखं नयेत् ।
शुक्लाग्रयाम्योत्तरयोर्मध्ये मत्स्यौ प्रसाधयेत् ॥ १२ ॥
तन्मध्यसूत्रसंयोगाद्बिन्दुत्रिस्पृग् लिखेद्धनुः ।
प्राग्बिम्बं यादृगेव स्यात् तादृक् तत्र दिने शशी ॥ १३ ॥
कोट्या दिक् साधनात् तिर्यक्सूत्रान्ते शृङ्गमुन्नतम् ।
दर्शयेदुन्नतां कोटिं कृत्वा चन्द्रस्य साकृतिः ॥ १४ ॥
कृष्णे षड्भयुतं सूर्यं विशोध्येन्दोस्तथासितम् ।
दद्याद्वामं भुजं तत्र पश्चिमं मण्डलं विधोः ॥ १५ ॥

॥ इति शृङ्गोन्नत्यधिकारः ॥ १० ॥

फलकेऽर्कसंज्ञकं बिन्दुं दत्त्वा ततस्तस्माद्बिन्दोः स्वदिङ्मुखं बाहुं दत्त्वा ततः पश्चान्मुखीं कोटिं दत्त्वा कोट्यग्रमध्यगं कर्णसूत्रं च दत्त्वा कोटिकर्णसंयोगबिन्दोः परितश्चन्द्रस्य तात्कालिकं बिम्बं लिखेद्गणकः। तत्र बिम्बे प्रथमं कर्णसूत्रेण गणको दिक्सिद्धिं परिकल्पयेत् । कर्णरेखां पूर्वापररेखां प्रकल्प्य मत्स्यनिर्माणेन तस्मिन् बिम्बे याम्योत्तरां रेखां च कुर्यात् । कर्णेन कर्णमार्गेण तस्य कर्णस्य चन्द्रस्य चन्द्रबिम्बस्य च यो योगस्तस्माद्बिम्बान्तर्मुखं बिम्बान्तर्गतं गणकः शुक्लं शुक्लाङ्गुलं नयेत् । ततः शुक्लाग्रयाम्योत्तरयोर्मध्ये द्वौ मत्स्यौ च प्रसाधयेत् । याम्यो बिन्दुः, उत्तरो बिन्दुः, शुक्लाग्रबिन्दुश्चेति बिन्दुत्रयतश्छायाग्रत्रयवन्मत्स्यावुत्पादयेदिति । तन्मत्स्ययोर्मध्यसूत्रयोगात् केन्द्राद्बिन्दुत्रिस्पृग्धनुर्विलिखेद्गणकः। तेन धनुषा यादृक् खण्डितं बिम्बं स्यात् तस्मिन् दिने तादृगेवाकाशे शशी दृश्यत इति । कोट्या दिक्साधनात् तिर्यक्सूत्रान्ते गणकः कोटिमुन्नतां कृत्वोन्नतं शृङ्गं दर्शयेत् । कोटिरेखां पूर्वापरां प्रकल्प्य तत्तिर्यक्सूत्रं दिक्साधनप्रकारात् सौम्ययाम्यसूत्रम् । तस्य सूत्रस्यान्ते याम्ये वा सौम्ये उन्नतं शृङ्गं कोटिरेखामूर्ध्वाधरां कृत्वा गणको दर्शयेदित्यर्थः। कृष्णे कृष्णपक्षे तु सषड्भं सूर्यं चन्द्राद्विशोध्य तथा तेन शुक्लसाधनप्रकारेणात्रासितं कृष्णाङ्गुलमानयेत् । शुक्लात् कृष्णविपरीतदिशि स्थितत्वादत्र गणको विपरीतं भुजं दद्यात् । तथा कर्णकोट्यग्रयोगबिन्दुपरितश्चन्द्रस्य पश्चिमं पश्चिमकपालीयं बिम्बं तत्र विलेख्यं शेषं कर्म पूर्ववत्कर्त्तव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपपत्तिः/ रविकेन्द्राद्याम्योत्तरवृत्तधरातले लम्बं कृत्वा लम्बमूले रविः कल्पितः। एवं चन्द्रकेन्द्राद्याम्योत्तरवृत्तधरातले यो लम्बस्तन्मूले चन्द्रः प्रकल्पितः। ततो याम्योत्तरवृत्तधरातले कल्पितरविचन्द्रयोर्याम्योत्तरमन्तरं तद्भुजयोः संस्कारात् स्पष्टभुजसमम्। सूर्यस्यास्तकाले क्षितिजे स्थितत्वात् कल्पितरवियाम्योत्तरवृत्तधरातले याम्योत्तररेखायामेव भविष्यत्यतस्तयोरूर्ध्वाधरमन्तरं कोटिरूपं चन्द्रशङ्कुसमम्। तत्र परिलेखे लाघवार्थं शङ्कुद्वादशांशेन शङ्कुभुजस्तद्वर्गयोगमूलसमः कर्णश्चापवर्तितः। अतो रविबिन्दुतो भुजं दत्त्वा तदग्रादूर्ध्वाधररूपां कोटिं दत्त्वा कोट्यग्ररविबिन्दुगतं कर्णसूत्रं दत्तम्। कोट्यग्रे कल्पितचन्द्रविम्बं तस्मिन् कल्पितरविः कर्णमार्गेण शुक्लं ददाति। अतस्तत्सूत्रे विम्बान्तरे शुक्लं दत्तम्। कर्णरेखोपरि या याम्योत्तरा तिर्यग्रेखा तया छिन्नमर्धं विम्बं रविणा शुक्लं भवति। अतो दृश्यवृत्ते तत्प्रान्तयोश्च शुक्लम्। अतस्तद्बिन्दुत्रयोपरि गतेन वृत्तखण्डेन चन्द्रखण्डाकृतिरुत्पद्यते। अत्र कोट्यूर्ध्वाधररेखोपरि या तिर्यग्रेखा तद्वशतो भुजान्यदिशि श्रृङ्गमुन्नतं भवति, तत्सर्वं क्षेत्रदर्शनेन स्फुटम्। एवमेव परिलेखो भास्करेणापि स्वश्रृङ्गोन्नत्यधिकारे विलिखितः, तेन च कल्पितरविणा कल्पितचन्द्रस्य श्रृङ्गोन्नतिर्न वास्तवस्य खण्डनं कमलाकरेण सिद्धान्ततत्त्वविवेके विस्तरतः कृतम्।



वस्तुतो रविचन्द्रकेन्द्रगतं महद्वृत्तं सितवृत्तसञ्ज्ञं चन्द्रदृङ्मण्डलात् तत् सितवृत्तं यद्दिक् तद्दिश्येव श्रृङ्गमुन्नतं भवति। अतो यदा चन्द्रोपवृत्तं यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सितवृत्ते लगति तस्मादधो यदि सितवृत्ते रविः स्यात्तदा वास्तवोन्नताच्छृङ्गाद्-भिन्नदिशि भास्करविधिना शृङ्गोन्नतिः स्यादिति वैचित्र्यं भृशं बुद्धिमद्भिः परीक्षणीयम्। कृष्णे षड्भयुतमित्यादिवासना गोलयुक्तितः स्फुटा। परमक्रान्त्य-धिकाक्षदेशे चन्द्रस्य दक्षिणविक्षेपे चन्द्रोपरिग्यस्तस्य दृङ्मण्डलस्य क्रान्तिवृत्तस्य च सम्पातश्चन्द्रस्थानादुपरि खस्वस्तिकासन्ने भवति। चन्द्रदर्शने तु चन्द्रस्थाना-दधः कुत्रापि क्षितिजाधा रविरतः सितवृत्तं चन्द्रदृङ्मण्डलादुत्तरदिशि तेनोत्तरं शृङ्गमुन्नतम्। चन्द्रस्योत्तरे शरे तु चन्द्रदृङ्मण्डलक्रान्तिवृत्तयोगश्चन्द्रस्थानादधः। अतस्ततोऽप्यध यदि रविस्तद तत्रापि उत्तरश्शृङ्गोन्नतिः। अथ चन्द्रशरो भुजः। चन्द्रस्थानात् तत्सम्पातावधिः क्रान्तिवृत्ते कोटिः। सितवृत्ते सम्पातचन्द्र-विम्बावधिः कर्णः। ततश्चापक्षेत्रेण चन्द्रदृङ्मण्डलक्रान्तिमण्डलसम्पातोत्पन्न-कोणज्या = ज्याचा $= \frac{\text{ज्याश} \times \text{त्रि}}{\text{ज्याक}}$। अथ ज्याश -स्थाने यदि परमशरज्या तथा दृश्यशृङ्गोन्नतौ ज्याक—स्थाने परमाल्पकर्णज्या कालांशज्या गृह्येत तदा परमाधिका 'चा' अस्य ज्या $= \frac{\text{ज्यापश} \times \text{त्रि}}{\text{ज्याक}}$। अथ तत्सम्पातोत्पन्नकोणश्च तयोर्वृत्तयोः परमान्तरत्वात् खस्वस्तिकात् क्रान्तिवृत्तोपरि कृताल्लम्बाद्वित्रि-भनतांशसमात् सर्वदाधिकः। अथ वित्रिभपरमाल्पनतांशाश्च अक्षांशाः—परमक्रान्त्यंशाः। एतत्समान् पूर्वागतचापभागान् प्रकल्प्य जाता अक्षांशाः = चा + परमक्रान्त्यंशाः। एतदधिकाक्षदेशे वित्रिभनतांशाः सर्वदा चापाधिका-स्ततस्तत्सम्पातोत्पन्नकोणश्च सर्वदा चापाधिकस्ततो विपरीतविधिना कर्णमानं सर्वदा कालांशमानाल्पं कोटिश्च सुतरां कालांशाल्पिका, अतो दृश्यशृङ्गोन्नतौ सर्वदा रविचन्द्रान्तरस्य कालांशाधिकत्वात् तच्चन्द्रदृङ्मण्डलक्रान्तिमण्डल-सम्पाततोऽधो रविरतः सितवृत्तं सर्वदा चन्द्रदृङ्मण्डलादुत्तरदिशि गतं भविष्यति. तेन तत्र देशे सर्वतिथिषु सर्वदोत्तरश्शृङ्गोन्नतिरतो मदीयवास्तव-चन्द्रशृङ्गोन्नतिसाधने मदीयम्--

"त्रिज्यागुण्यः सुधांशोः परमशरगुणः कालजीवाविभक्त-
श्चापं लब्धस्य लब्धं यदिह बुधवरैस्तद्युतान्त्यापमांशाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेभ्योऽनल्पाः पलांशाः सितविधिकुशला यत्र तत्रोन्नतिःस्या-
च्छृङ्गस्यैवोत्तरस्यां दिशि सकलतिथिष्वेव विद्वद्वरिष्ठा ॥"
इति सूत्रमुपपद्यते ।

शृङ्गोन्नतावन्ये चमत्कृता विशेषा मदीयवास्तवचन्द्रशृङ्गोन्नतिसाधने द्रष्टव्याः किमत्र पिष्टपेषणेनेति ॥ १०—१५ ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा ।
सुखायामृतवर्षिण्यां गतः शृङ्गविधिर्विधोः ॥ १० ॥

॥ इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां
सुधावर्षिण्यां शृङ्गोन्नत्यधिकारः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ पाताधिकारः

तत्रादौ वैधृतव्यतिपातयोर्लक्षणमाह—

एकायनगतौ स्यातां सूर्यचन्द्रमसौ यदा ।
तद्युतौ मण्डले क्रान्त्योस्तुल्यत्वे वैधृताभिधः ॥ १ ॥

विपरीतायनगतौ चन्द्रार्कौ क्रान्तिलिप्तिकाः ।
समास्तदा व्यतीपातो भगणार्धे तयोर्युतौ ॥ २ ॥

यदा सूर्यचन्द्रमसौ सूर्यचन्द्रौ द्वावेकायनगतौ स्यातां तयोरविचन्द्रयोर्युतौ च मण्डले राशिद्वादशके तदा रविचन्द्रक्रान्त्योस्तुल्यत्वे वैधृताभिधः पातो वेदितव्यः । यदा चन्द्रार्कौ विपरीतायनगतौ भिन्नायनगतौ तयोर्युतौ च भगणार्धे राशिषट्के तत्र तयोः क्रान्तिकलास्तुल्याः स्युस्तदा स व्यतीपातो नाम पातो ज्ञेयः । अत्र रविचन्द्रौ सायनावेव ज्ञेयौ सायनादेव क्रान्तेः सिद्धत्वात् । चन्द्रस्य क्रान्तिश्च स्फुटा विम्बकदम्बप्रोते विम्बान्नाडीवृत्तावधिरिति ।

अत्रोपपत्तिः । ययोर्योगो द्वादशराशिसमस्तौ भिन्नगोलावेकायनगतौ स्याताम् । तद्यथा—यद्येकः $= \frac{\text{रा}}{१}$ । तदापरः $= \frac{\text{रा}}{११}$ । एवं तयोः प्रमाणे २।१०॥ ३।९॥४।८॥५।७॥६।६॥७।५॥ इत्यादि । अत्र द्वयोर्भिन्नगोलावयनयोरेकत्वं च । एवमत्र भुजयोस्तुल्यत्वादर्कक्रान्तिसमा चन्द्रस्थानक्रान्तिस्तत्रेन्दुक्रान्तिश्च शरवशात् किञ्चिद्भिन्ना अतस्तदासन्ने वैधृतसम्भवः । एवं योगे भगणार्धे सर्वदा तयोर्भिन्नायनौ स्यातां गोलैकत्वं च । तत्र द्वयोः प्रमाणे १।५॥२।४॥३।३ ।४।२ इत्यादि । अत्रापि भुजयोः साम्यात् तयोः स्थानीये क्रान्ती समे अतस्तत्र व्यतीपात सम्भवः । अनेनैकायने भिन्नगोले क्रान्त्योः साम्ये वैधृतः । एकगोले भिन्नायने क्रान्त्योः साम्ये व्यतिपात इति वैधृतव्यतिपातयोर्लक्षणं समीचीनम् । अत एव भास्करः ।

व्यतिपातोऽयनभेदे गोलैकत्वेऽर्कचन्द्रयोः क्रान्त्योः ।
साम्ये वैधृत एकायनेऽन्यदिगपक्रमसमत्वे ॥ इत्याह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मङ्गलं विशेषेण ध्रियते अवरोध्यत इति विधृतः। एव वैधृतः। मङ्गलं विशेषेण अतिशयेन पातयतीति व्यतिपातो व्यतीपातो वेति ॥ १—२ ॥

इदानीं मङ्गलनाशने हेतुमाह—

तुल्यांशुजालसम्पर्कात् तयोस्तु प्रवहाहतः ।
तद्दृक्क्रोधभवो वह्निर्लोकाभावाय जायते ॥ ३ ॥

तयोः क्रान्तिसाम्यकालिकयो रविचन्द्रयोस्तुल्यकिरणजालसंयोगात् तयोर्मिथो दृष्टिभ्यां क्रोधभवो वह्निःप्रवहवायुनाऽऽहतो लोकानां प्राणिनामभावाय विनाशाय जायत इति।

वस्तुतो रविचन्द्रयोः कक्षाभेदात् चन्द्रेऽपि रविकिरणैरेव तेजोगतत्वात् तुल्यांशुजालसंयोगाभाव एव। आचार्यैस्त्वदृष्टफलजनकत्वादियं कल्पना प्रतिपादिता।

इदानीं व्यतीपातवैधृताख्ययोर्हेतुमाह—

विनाशयति पातोऽस्मिन् लोकानामसकृद्यतः ।
व्यतीपातः प्रसिद्धोऽयं सञ्ज्ञाभेदेन वैधृतः ॥ ४ ॥

यतोऽयं पातोऽस्मिन् जगति लोकानां प्राणिनां मङ्गलान्यसकृद्विनाशयति अतोऽयं व्यतीपात इति प्रसिद्धः। सोऽयमेव संज्ञाभेदेन वैधृतो जातः। क्वचिद् वैधृतिरिति पाठः। नामव्युत्पत्त्यर्थं १–२ श्लोकयोष्टीका द्रष्टव्या ॥ ४ ॥

इदानीं पातस्यादृष्टरूपमाह—

स कृष्णो दारुणवपुर्लोहिताक्षो महोदरः ।
सर्वानिष्टकरो रौद्रो भूयो भूयः प्रजायते ॥ ५ ॥

पाताख्योऽग्निपुमान् कृष्णो महाश्यामः, दारुणवपुः कठिनतनुः। लोहिताक्षो रक्तनेत्रः, महोदरः पृथूदरः। रौद्रः क्षयकारको भयङ्कररूपः। सर्वप्राणिनामनिष्टकरः पुनः पुनः प्रतिमासं प्रायो वारद्वयं जायत इति ॥ ५ ॥

इदानीं स्पष्टक्रान्तिसाम्यज्ञानायेतिकर्त्तव्यतामाह—

भास्करेन्द्वोर्भचक्रान्तश्चक्रार्धावधिसंस्थयोः ।
दृक्तुल्यसाधितांशादियुक्तयोः स्वावपक्रमौ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृक्तुल्येन विधिना 'प्राक्चक्रं चलितं हीने' इत्यादिना पूर्वोदितप्रकारेण साधिता अंशादयोऽयनांशा ये तैर्युक्तौ यौ भास्करचन्द्रौ ययोर्योगो भचक्रान्तः पूर्णद्वादशराशिसमोऽथवा चक्रार्धावधिसंस्थितः पूर्णषड्राशिसंस्थितः। एतादृशयो भास्करचन्द्रयोः स्वस्वापक्रमौ गोलयुक्त्या साध्यौ। यस्मिन् काले सायनरविशशियोगो भार्धसमश्चक्रसमो वा जातस्तस्मिन् काले रविक्रान्तिश्चन्द्रविम्बस्य स्फुटा क्रान्तिश्च साध्येत्यर्थः॥ ६॥

इदानीं तस्मात् कालात् क्रान्तिसाम्यस्य गतैष्यत्वप्रतिपादनार्थमाह—

अथौजपदगस्येन्दोः क्रान्तिर्विक्षेपसंस्कृता।
यदि स्यादधिका भानोः क्रान्तेः पातो गतस्तदा॥ ७॥

ऊना चेत् स्यात् तदा भावी वामं युग्मपदस्य च।
पदान्यत्वं विधोः क्रान्तिर्विक्षेपाच्चेद्विशुध्यति॥ ८॥

यत्र दक्षिणक्रान्तेरभावस्तत्र प्रथमगोलसन्धिस्ततः परमोत्तरं स्पष्टक्रान्तिपर्यन्तं प्रथममोजपदम्। प्रथममोजपदान्तमेव प्रथमायनसन्धिः कथ्यते। ततः स्पष्टक्रान्त्यभावपर्यन्तं प्रथमसमपदम्। प्रथमसमपदान्तं च द्वितीयगोलसन्धिः।

ततः परमदक्षिणस्पष्टक्रान्तिपर्यन्तं द्वितीयौजपदम्। तत्पदान्तं च द्वितीयायनसन्धिः कथ्यते। ततो दक्षिणस्पष्टक्रान्त्यभावपर्यन्तं द्वितायसमपदमिति मनसि ध्येयम्।

अत्राचार्येण यद्यपि रविचन्द्रगोलायनसन्ध्यानयनं न कृतम्, तथापि गणितस्कन्धे जातबोधेन तदानयनं कर्त्तव्यमेव। अथ चन्द्रस्य स्वौजपदगतस्य विक्षेपसंस्कृता क्रान्तिर्यदि भानोः क्रान्तेरधिका स्यात्तदा पातो गत इति वेद्यम्। चेदूना तदा पातो भाव्यैष्यो ज्ञेयः। युग्मपदस्य चन्द्रस्य च वामं विपरीतं ज्ञेयम्। यदि समपदे शशी भवति तस्य क्रान्तिर्यदा सूर्योपमाल्लघुर्भवति तदा गतः पातोऽधिका चेत्तदैष्य इत्यर्थः। यदि चन्द्रस्य स्थानीया क्रान्तिर्बाणाद्विशुध्यात, अर्थाद्यत्र स्थानक्रान्तिबाणयोरन्तरेण स्फुटा क्रान्तिर्भवति तदा यदि शरादेव चन्द्रस्थानक्रान्तिर्विशुद्धा भवति तदा मध्यमस्फुटक्रान्त्योर्दिग्भेदात् स्थानीयपदाद्विधोः पदान्यत्वं ज्ञेयमिति प्रसिद्धम्। तत्र स्थानक्रान्तेरुपचये स्फुटक्रान्तेरपचयः। स्थानक्रान्तेरपचये च स्फुटक्रान्तेरुपचयः। अत उपचयापचययोर्भेदात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थानीयपदाद्विधोर्विम्बपदान्यत्वं भवत्येव। स्थानपदं समे तदा विम्बपदमोजे। एवं स्थानपदमोजे विम्बपदं सम इति बुद्धिमताऽनुक्तमपि ज्ञायत इति।

अत्रोपपत्तिः। रविस्तावत् स्थिरगतिश्चन्द्रोऽतीव चलस्तस्यैव क्रान्तेः प्रतिक्षणमन्यथात्वम्। अतश्चन्द्रमधिकृत्योच्यते। अत्रौजपदे वर्त्तमानस्य चन्द्रस्य क्रान्तिरुपचये वर्त्तते। यथा यथा ग्रहोऽग्रतो याति तथा तथा तस्य क्रान्तिरोजपद उपचीयते। प्रथमपदस्य तृतीयपदस्य च गोलसन्धावादिः। तदग्रतस्त्रिभेऽन्तरे क्रान्तेः परमत्वम्। अतो विषमपदे वर्त्तमानो यथा यथाऽग्रतो याति तथा तथा क्रान्तिरूपचीयते। ततस्त्रिभात् परतो द्वितीयगोल सन्धिं यावत् समपदम्। तत्र वर्त्तमानो यथा यथाऽग्रतो याति तथा तथा क्रान्तिरपचीयते। एवं तृतीय-चतुर्थं पदयोरपि। अत ओजपदे वर्त्तमानस्येन्दोः क्रान्तिर्यदा सूर्योपमान्महती तदाग्रे चालितस्य विधोरतिशयेन महती भवति। यदि यथा यथा पृष्ठतश्चाल्यते शशी तथा तथा क्रान्तिरूनैव भवति। अतोऽन्यया रविक्रान्त्या सह साम्यं गतमेवानुमितम्। अथ समपदे वर्त्तमानस्य विधोः क्रान्तिर्लघ्वी सूर्योपमाद्भवति तदापि पृष्ठतश्चालितस्येन्दोः क्रान्तिर्महती भवति। अतो महत्या सूर्यक्रान्त्या सह साम्यं गतमिति ज्ञातम्। अस्माल्लक्षणादन्यथात्वे क्रान्तिसाम्यमेष्यमित्यर्थाज्ज्ञायते। अतो गतगम्यलक्षणं युक्तमुक्तम्, इति भास्करोक्तिरतिरमणीया। अत्र रविचन्द्र



गोलायनसन्ध्यानयनार्थं भास्करोक्तं विचिन्त्यम्। तत्रापि रविगोलायनसन्धी भास्करकृतौ नैव समीचीनौ। चन्द्रगोलसन्ध्यर्थम् चसं=नाडीमण्डलम्। पास्थासंमे=क्रान्तिवृत्तम् पाच=विमण्डलम्। मेसंस्थापा=चन्द्रपातः। ∠स्थासंच=परमक्रान्त्यंशा रवेः=प। ∠स्थापाच=चन्द्रपरमशरः=श। ∠पाचसं= चन्द्रपरक्रान्त्यूनभार्धांशाः। संस्थापा= अयनांशोनितपातः=पा। चापीयत्रिकोणमित्या कोणोनभार्धांशा भुजा भुजोनभार्धांशाः कोणाः। इति स्पर्धित्रिभुजेन।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$$\frac{\text{त्रि}_2\ \text{कोज्याचपक्रा} - \text{त्रि} \times \text{कोज्याप} \times \text{कोज्याश}}{\text{ज्याप} \times \text{ज्याश}} = -\text{कोज्यापा}$$

$$\therefore \text{कोज्याचपक्रा} = \frac{\text{त्रि} \times \text{कोज्याप} \times \text{कोज्याश} - \text{ज्याप} \times \text{कोज्यापा} \times \text{ज्याश}}{\text{त्रि}^2}$$

$$= \frac{\text{कोज्याप} \times \text{कोज्याश}}{\text{त्रि}} - \frac{\text{ज्याप} \times \text{कोज्यापा} \times \text{ज्याश}}{\text{त्रि} \quad \text{त्रि}}$$

अत्र सरलत्रिकोणमित्या मृगादिकेन्द्रे व्यनांशपाते तत्कोटिज्या धनमन्यथा ऋणं ज्ञेयम् । लब्धस्य कोटिश्चन्द्रपराक्रमः स्यात् ।

ततः संपाच त्रिभुजे, च–चन्द्रविम्बात् क्रान्तिवृत्तोपरि चस्थालम्बकरणंन स्था--चन्द्रगोलसन्धिः । अतः कोणज्यानुपातेन

$$\text{ज्याचसं} = \frac{\text{ज्यापा} \times \text{ज्याश}}{\text{ज्याचपस्पक्रां}}$$ । चसं-समे भुजांशमाने विषुवांशाः संस्थापिताः ।

अत्र मे–मेषादेः क्रमगणनया सं–पर्यन्तं रविगोलसन्धिः स व्यनांशोनितपाते मेषादिषट्कस्थे संस्था–चापेन हीनोऽन्यथा युक्तश्चन्द्रगोलसन्धिः स्यात् । एतेन परेषुजीवा व्ययनांशपातकोटिज्यकाघ्नी” इत्यादि संशोधकोक्तमुपपद्यते । अत्र—

'चन्द्रस्य गोलसन्धी राशित्रितयेन संयुक्तौ ।
क्रमशस्तदनयनसन्धी ज्ञेयौ स्वल्पान्तरौ सुगोलविदा ॥ इति

संशोधकोक्तो विशेषः कमलाकररीतिवद्विचिन्त्यः । चन्द्रायनसन्ध्यानयनं तयोर्मतेन स्थूलं सूक्ष्मार्थं मुद्रितसिद्धान्ततत्त्वविवेकपाताध्याये मद्विशेषश्च द्रष्टव्यः किमत्र ग्रन्थविस्तरेणेति दिक् । पदान्यस्वं विधोरित्यादिवासना पूर्वलिखितव्याख्यान एव स्फुटेति ॥ ७–८ ॥

अथ यस्मिन् काले सायनरविशशियोगश्चक्रसमो वा भार्धसमो जातस्तस्मात् कालाद्गतगम्यस्य क्रान्तिसाम्यकालस्य परिज्ञानमाह—

क्रान्त्योर्ज्ये त्रिज्ययाभ्यस्ते परक्रान्तिज्ययोद्धृते ।
तच्चापान्तरमर्धं वा योज्यं भाविनि शीतगौ ॥ ९ ॥

शोध्यं चन्द्राद्गते पाते तत्सूर्यगतिताडितम् ।
चन्द्रभुक्त्या हृतं भानौ लिप्तादि शशिवत् फलम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्वच्छशाङ्कपातस्य फलं देयं विपर्ययात् ।
कर्मैतदसकृत् तावद्यावत् क्रान्ती समे तयोः ॥ ११ ॥

क्रान्त्योः समत्वे पातोऽथ प्रक्षिप्तांशोनिते विधौ ।
हीनेऽर्धरात्रिकाद्यातो भावी तात्कालिकेऽधिके ॥ १२ ॥

स्थिरीकृतार्धरात्रेन्द्वोर्द्वयोर्विवरलिप्तिकाः ।
षष्टिघ्न्यश्चन्द्रभुक्त्याप्ताः पातकालस्य नाडिकाः ॥ १३ ॥

रविचन्द्रयोः क्रान्त्योर्ज्ये त्रिज्यया गुणिते स्वस्वपरमक्रान्तिज्यया विभक्ते लब्धयोश्चापे कार्ये ततो यदि तस्मात् कालाददूरे क्रान्तिसाम्यसम्भवस्तदा तयोश्चापयोरन्तरं भाविनि गम्ये पाते चन्द्रे योज्यम् । यदि निकटे पातसम्भवस्तदा चापयोरन्तरार्धं वा गम्ये पाते चन्द्रे योज्यम् । गते पाते तु यथा सम्भवं चापान्तरं वा तदर्धं चन्द्राच्छोध्यमेवं पातमध्यकश्चन्द्रः स कल्प्यः । तत्रत्यसूर्यसाधनार्थं तु चालनमाह । चन्द्रगत्या यदि तच्चापान्तरं वा तदर्धं चालनं तदा रविगत्या किमिति । लब्धरविचालनं लिप्तादिफलं चन्द्रवद्रवौ धनमृणं वा देयम् । तद्वच्चन्द्रपातस्य फलं विपर्ययाद्देयम् । चन्द्रगत्या तच्चापान्तरं तदर्धं वा चालनं तदा पातगत्या किमिति । एवं लब्धं फलं पातस्य विलोमगतत्वात् पाते विपरीतं देयम् । ततः पुना रविचन्द्रपातै रविचन्द्रक्रान्ती साध्ये पुनस्ताभ्यां चापे चापान्तरं तदर्धं वा चन्द्रे चालनम् । एवं तावदसकृत् कर्म यावत् तयो रविचन्द्रयोः क्रान्ती समे स्तः । चापान्तरं तदर्धं वेत्युपलक्षणं तेन सम्भवे सति चापान्तरतृतीयांशं चतुर्थांशादिकं च चालनमसकृत्कर्मविरामाय गणकेन देयम् । अथैवं रविचन्द्रयोः क्रान्त्योः समत्वे पातः पातमध्यो भवति । स च तस्मिन् दिनेऽर्धरात्रिकाच्चन्द्रात् प्रक्षिप्तांशोनिते विधौ हीने सति अर्धरात्रे यातो ज्ञेयः । अर्धरात्रिकाच्चन्द्रात् तात्कालिके विधावधिके सति भावी गम्यः पातो वेद्यः । क्रान्तिसाम्यकाले चापान्तरादिसंस्कारेण यश्चन्द्रः स प्रक्षिप्तांशोनितः (प्रक्षिप्ता अंशाश्चापान्तरादितुल्या वा जनिता यत्रासौ प्रक्षिप्तांशोनित इति) स्तात्कालिकः स्थिरीकृतश्चन्द्रश्च कथ्यत इति । एवं स्थिरीकृतोऽर्धरात्रिकश्चन्द्रश्च यस्तयोर्द्वयोर्विवरकलाः षष्टिगुणाश्चन्द्रगत्या भक्ताः फलमर्धरात्राद्गता गम्या वा पातकालस्य नाडिका ज्ञेया–इति ।

अत्रोपपत्तिः अतिसुगमा यतश्चापान्तरादिचालनं चन्द्रे दत्तं तत्सम्बन्धि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चालनफल गत्यनुपाततो रवौ पाते चानीतम्। ततः क्रान्तिसाम्यकाले स्थिरीकृतश्चन्द्रो जातः स चार्धरात्रकालिकचन्द्रान्न्यूनः पातो गतोऽधिकश्च पातो गम्योऽर्धरात्रकालात्। अतो द्वयोश्चन्द्रयोरन्तरेण चन्द्रगत्या षष्टिघटिकास्तदान्तरेण किमिति। लब्धा पातमध्यनाडिका—इति ॥ ९—१३ ॥

इदानीं पाताद्यन्तकालावाह—

रवीन्दुमानयोगार्धं षष्ट्या सङ्गुण्य भाजयेत्।
तयोर्भुक्त्यन्तरेणाप्तं स्थित्यर्धं नाडिकादि तत् ॥ १४ ॥
पातकालः स्फुटो मध्यः सोऽपि स्थित्यर्धवर्जितः।
तस्य सम्भवकालः स्यात् तत्संयुक्तोऽन्त्यसंज्ञितः ॥ १५ ॥

रविचन्द्रविम्बमानयोर्योगार्धं षष्टया सङ्गुण्य तयोः क्रान्त्योर्गत्यन्तरेण गणको भजेत्। आप्तं तत् नाडिकादि स्थित्यर्धं स्यात्। पूर्वोदितः स्फुटः पातकालो रविचन्द्रकेन्द्रयोः क्रान्तिसाम्यात् पातस्य मध्य कालो ज्ञेयः। स च स्थित्यर्धघटिकाभिर्वर्जितस्तस्य पातस्य सम्भवकालः प्रारम्भकालः स्यात्। अथ पातमध्यकालस्ताभिः स्थित्यर्धनाडोभिः संयुक्तः पातस्यान्त्यसंज्ञितः कालो निवृत्तिकालः स्यादिति।

अत्रोपपत्तिः। रविचन्द्रकेन्द्राभिप्रायेण क्रान्तिसाम्यकालः पातमध्यकालः। यावद्विम्बैकदेशयोः क्रान्तिसाम्यं तावत्तस्य स्थितिरिति मनसि प्रधार्य प्राचीनैस्तदारम्भनिवृत्तिकालौ च केन्द्राभिप्रायक्रान्त्योरन्तरं मानैक्यार्धसमं प्रकल्प्य साधितौ। मध्यात् प्रागपरयोस्तत्कालज्ञानार्थमनुपातो यदि षष्टिघटिकात्मकरविचन्द्रकान्त्यन्तरेण षष्टिघटिकास्तदा मानैक्यार्धेन किमिति। लब्धं मध्यात् प्रागपरयोः स्थित्यर्धनाडयः। मध्यकाले तदन्तरेण प्रारम्भकालो योजनेन च निवृत्तिकाल स्फुटः।

तथा च भास्करः—

तावत् समत्वमेव क्रान्त्योर्विवरं भवेद्यावत्।
मानैक्यार्धादूनं साम्याद्विम्बैकदेशज क्रान्त्योः ॥ इति ॥ १४-१५ ॥

इदानीं पातस्थितिकालस्य फलमाह—

आद्यन्तकालयोर्मध्यः कालो ज्ञेयोऽतिदारुणः।
प्रज्वलज्ज्वलनाकारः सर्वकर्मसु गर्हितः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकायनगतं यावदर्केन्द्वोर्मण्डलान्तरम् ।
सम्भवस्तावदेवास्य सर्वकर्मविनाशकृत् ।। १७ ।।

स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः ।
प्राप्यते सुमहच्छ्रेयस्तत्कालज्ञानतस्तथा ।। १८ ।।

पातस्याद्यन्तकालयोर्मध्यः कालो यः सोऽतिदारुणः प्रज्वलद्दहनाकारः सर्वकर्मसु निन्दितो ज्ञेयः। यावदर्केन्द्वोर्मण्डलान्तरमेकायनगतमेकस्थानगतमर्थात् समानक्रान्तिजनकं मण्डलस्पर्शरूपं केन्द्राभिप्रायेण क्रान्त्यन्यरं मानक्याधंसमं तावदेवास्य सम्भवो विम्बैकदेशजक्रान्त्योः साम्यात्। अयं कालश्च सर्वकर्मविनाशकृज्ज्ञेयः। नन्वयं कालः सर्वदाऽनिष्टजनकः केषु कर्मस्वपि न शुभफलद इत्याशङ्क्याह। स्नानदानादि। अत्र पातकाले स्नानदानजपश्राद्धव्रत होमादिकर्मभिः समुहच्छ्रेयो महत्कल्याणं प्राप्यते। तथैव महत्कल्याणं तस्य पातस्य कालज्ञानतश्च गणकैः प्राप्यते लोके तत्कालादेशात् प्राणिनां स्ननादिषु नियोजनाच्चेति ।। १६-१८ ।।

इदानीं पाते विशेषमाह—

रवीन्द्वोस्तुल्यता क्रान्त्योर्विषुवत्सन्निधौ यदा ।
द्विर्भवेद्धि तदा पातः स्यादभावो विपर्ययात् ।। १९ ।।

विषुवत्सन्निधौ रविगोलसन्धिसमीपे यदा रविचन्द्रयोः क्रान्त्योस्तुल्यता तदाऽल्पेनैव कालेन द्विर्द्विवारः पातः स्यात्। एवं विपर्ययात् पातस्याभावः स्यात्। यदा रवेरयनसन्धिसमीपे क्रान्तिसाम्याभावस्तदा बहुकालपर्यन्तं क्रान्तिसाम्याभावः स्यादित्यर्थः।

अत्रोपपत्तिः। रविगोलसन्धिसमीपे क्रान्तिसाम्ये कल्प्यते चन्द्र उत्तरगोले रविश्चोत्तरगोले द्वयोर्भिन्नायनम्। यथा सायनश्चन्द्रः= $\frac{\text{रा}}{५}$ । २९° ।। सायनो रविः = $\frac{\text{रा}}{०}$ १°। तदाऽस्मिन् समये व्यतिपातनामा पातः स्यादेव चेच्चन्द्रशराभावः। तदग्रे चन्द्रमध्ये ७० कला धनचालनेन, रविमध्ये च स्वल्पान्तराच्चन्द्रचालनत्रयोदशांशचालनेन भुजयोः साम्यात् स्वल्पान्तरात् शराभावाच्च पुनः क्रान्त्योः समत्वे पातः स्यादिति वारद्वयं पातसम्भवः। न ह्येकायनगतौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यातामित्यादिलक्षणोक्तः पातो वारद्वयं भविष्यतीति बुधैर्भृशं विभावनीयम्। रव्ययनसन्धिसमीपे क्रान्तिसाम्याभावे बहुकालपर्यन्तं पातस्यासम्भव इत्येतदर्थं "ऊना यावत् तावत् क्रान्त्योः साम्यं तयोर्नास्ति" इत्यस्य वासना भास्करसिद्धान्तशिरोमणौ विलोक्या, किमत्र पिष्टपेषणेनेति ॥ १९ ॥

इदानीं पातान्तरं गण्डान्तं चाह—

शशाङ्कार्कयुतेर्लिप्ता भभोगेन विभाजिताः।
लब्धं सप्तदशान्तोऽन्यो व्यतीपातस्तृतीयकः ॥ २० ॥
सार्पेन्द्रपौष्ण्यधिष्ण्यानामन्त्याः पादा भसन्धयः।
तदग्रभेष्वाद्यपादो गण्डान्तं नाम कीर्त्यते ॥ २१ ॥
व्यतीपातत्रयं घोरं गण्डान्तत्रितयं तथा।
एतद्भसन्धित्रितयं सर्वकर्मसु वर्जयेत् ॥ २२ ॥

चन्द्रसूर्ययुतेः कला भभोगेनाष्टशतमितेन विभाजिता लब्धं विष्कम्भादि-सप्तविंशतियोगेषु सप्तदशान्त उक्तवैधृतव्यतीपातान्यस्तृतीयो व्यातीपातो भवति। अथाश्लेषान्ते कर्की ज्येष्ठान्ते वृश्चिकः। रेवत्यन्ते मीनः इति नियमादुक्तनक्षत्राणामन्त्याः पादा त्रयो राश्योः कर्किसिंहयोर्वृश्चिकधनुषो मीनमेषयोः सन्धयः स्युः। अतस्तदग्रभेषु तदग्रनक्षत्रेषु मघामूलदास्त्रेष्वाद्यश्चरणो गण्डान्तं नाम कीर्त्यते कथ्यते गणकैः। गण्डस्य मुखभागस्यान्तो यस्मिन् तद्गण्डान्तमिति। अथ पूर्वप्रतिपादितं घोरं भयङ्करं व्यतिपातत्रयं तथैतत्पूर्वोदितं भसन्धित्रितयं गणकः सर्वकर्मसु वर्जयेदनिष्टफलजनकत्वादिति।

अत्रोपपत्तिः अतिसुगमा यतो योगसाधनविधिना सप्तदशान्तो योगो विष्कम्भादिषु व्यतिपात एव। भसन्धिगण्डान्तादिकमनिष्टफलजनकमत्र प्राचीनानां वचनमेव प्रमाणं नान्यत्कारणं वक्तुं शक्यते—इति ॥ २०-२२ ॥

इदानीमधिकारोपसंहारमाह—

इत्येतत् परमं पुण्यं ज्योतिषां चरितं हितम्।
रहस्यं महदाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥ २३ ॥

इति सूर्यसिद्धान्ते पाताऽधिकारः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्यांशः पुमान् मयं प्रति कथयति । हे मय, तुभ्यमित्येतज्ज्योतिषां ग्रहनक्षत्रादीनां परमं पुण्यं हितं हितसाधकं रहस्यं गुप्तं महच्चरितमाख्यातम् । अधुनाऽन्यत् किं श्रोतुमिच्छसीति ।

एतेन सूर्यांशेन ग्रहनक्षत्राणां चरितं कथितमिति सूचितमतोऽवशिष्टं तु भूगोलचरितमस्ति तस्य श्रवणे मयस्य रुचिरस्ति वा नेतिज्ञानाय तेन प्रश्नः कृतइति स्फुटं सुबुद्धोनामिति ॥ २३ ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा ।
सुखायामृतवर्षिण्यां गतः पाताधिकारकः ॥ ११ ॥

सौराद्यभागटीकायां सुधापानेन सज्जनाः ।
सुधाकरकृतायां वै विहरन्तु सुखश्रियै ॥

॥ इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यां पाताधिकारः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ भूगोलाध्यायः

रमालीलाविलासेन रामं कनकमन्दिरे ।
नत्वा लसन्तं व्याख्यामि सौरोत्तरदलं स्फुटम् ॥

अथ मुनीन् प्रति कश्चिद्विशिष्टो मुनिः सूर्यांशपुरुषवचनमनुवाद्यानन्तरं मयासुरेण सूर्यांशपुरुषः पृष्ट इत्याह--

अथार्कांशसमुद्भूतं प्रणिपत्य कृताञ्जलिः ।
भक्त्या परमयाभ्यर्च्य पप्रच्छेदं मयासुरः ॥ १ ॥

अथ सूर्यांशरुपुषवचो निशम्य मयासुरो मयदैत्यः कृताञ्जलिर्विरचितकराग्राञ्जलिपुटः परमया भक्त्याऽर्कांशसमुत्पन्नं पुरुषमभ्यर्च्य पूजयित्वा प्रणिपत्य च प्रणिपातपूर्वकं नमस्कृत्येदं वक्ष्यमाणं प्रश्नवृन्दं पप्रच्छ पृष्टवानिति ॥ १ ॥

अथ प्रश्नानाह—

भगवन् किम्प्रमाणा भूः किमाकारा किमाश्रया ।
किंविभागा कथं चात्र सप्तपातालभूमयः ॥ २ ॥

अहोरात्रव्यवस्थां च विदधाति कथं रविः ।
कथं पर्येति वसुधां भुवनानि विभावयन् ॥ ३ ॥

देवासुराणामन्योन्यमहोरात्रं विपर्ययात् ।
किमर्थं तत् कथं वा स्याद्भानोर्भगणपूरणात् ॥ ४ ॥

पित्र्यं मासेन भवति नाडीषष्ट्या तु मानुषम् ।
तदेव किल सर्वत्र न भवेत् केन हेतुना ॥ ५ ॥

दिनाब्दमासहोराणामधिपा न समाः कुतः ।
कथं पर्येति भगणः सग्रहोऽयं किमाश्रयः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूमेरुपर्युपर्यूर्ध्वाः किमुत्सेधाः किमन्तराः ।
ग्रहर्क्षकक्षाः किमात्राः स्थिताः केन क्रमेण ताः ॥ ७ ॥
ग्रीष्मे तीव्रकरो भानुर्न हेमन्ते तथाविधः ।
कियती तत्करप्राप्तिर्मानानि कति किं च तैः ॥ ८ ॥
एवं मे संशयं छिन्धि भगवन् भूतभावन ।
अन्यो न त्वामृते छेत्ता विद्यते सर्वदर्शिवान् ॥ ९ ॥

हे भगवन् ! सूर्यांश ! भूः किम्प्रमाणा कियत् प्रमाणं यस्याः सा । किमाकारा कथमाकारो यस्याः सा । किमाश्रया क आश्रयो यस्याः सा । किं विभागा कथं विभागा विभक्तांशा यस्याः सा । अत्र भूमौ सप्तसंख्याकाः पातालभूमयः पातालविभागरूपा आश्रयाः । ननु "योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु ।" इत्यादिना भूप्रमाणं पूर्वं कथितमेव पुनः प्रश्नकरणमयुक्तम् । सत्यम् । तदुच्यते । अत्र पुराणोक्तभूमानाद्भिन्नं मानं पूर्वं यदुदितं तत्र संशये जाते पुनर्मयप्रश्नो युक्त इति । रविरहोरात्रव्यवस्थां दिननिशोर्विवेकं कथं केन प्रकारेण विदधाति करोति । कथं च भुवनानि विभावयन् प्रकाशयन् वसुधां पृथ्वीं पर्येति प्रदक्षिणरूपेण भ्रमति । देवासुराणां विपर्ययान्मिथः किमर्थंमहोरात्रं भवति । तच्च भानोर्भगणपूरणद्वा कथं स्यात् । तत्प्रमाणमेकसौरवर्षं कथं भवतीति । सुरासुराणामन्योऽन्यमहोरात्रं विपर्ययादिति पूर्वार्धे दिव्यमाने यदुक्तं तत्र देवासुरयोर्दिनं रजनी चाभिन्ना कथं नोक्तेति प्रश्नः । पितृणामिदमिति पित्र्यमहोरात्रं चान्द्रेण मासेन किं भवति । मानुषं दिनमानं तु नाडीषष्ट्या किं भवति । केन हेतुना तदेव दिनमानं सर्वत्र न भवेत् । दिनवर्षमासाहोरात्राणामधिपाः कुतो न समाः । तेषामेक एव पतिः किमु न । अयं सग्रहो भगणो भचक्रं कथं पर्येति भ्रमति किमाश्रयश्चास्ति । केनाधारेण व्योम्नि तिष्ठतीत्यर्थः । भूमेः सकाशादुपरि उपरि ग्रहनक्षत्रकक्षा ऊर्ध्वा ऊर्ध्वस्था आकाशे किमुत्सेधाः । कियानुत्सेधः उच्चता यासां ताः । भूमेरुपरि ग्रहर्क्षमार्गकक्षा कियदन्तरेण सन्तीत्यर्थः । किमन्तराः कियदन्तरं यासां ताः । उत्तरोत्तरमुच्चा अपि परस्परं तासां मध्ये कियदन्तरमित्यर्थः । किमात्राः किंप्रमाणास्ताश्च केन क्रमेणाकाशे स्थिताः । ग्रीष्मर्त्तौ यथा सूर्यस्तीव्रकरस्तीक्ष्णकिरणस्तथाविधस्तादृशो हेमन्ते किमु न भवति । तस्य सूर्यस्य करप्राप्तिश्च कियती । सूर्यकिरणैः कियदाकाशस्य तमो विनष्टं भवतीति । सावननाक्षत्रादीनि कतिमानानि सन्ति तैर्मानैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रयोजनं च किम् । हे भगवन् ! षड्गुणैश्वर्यसम्पन्न ! भूतभावन ! भूतानां पदार्थानां भावना विचारो यस्य तत्सम्बोधने । एवं मे मम संशयं त्वं छिन्धि छेदय । त्वामृते विना सर्वदर्शिवानन्यः संशयच्छेत्ता न विद्यते नास्तीति ॥२-९॥

अथ मुनीन् प्रति स विशिष्टो मुनिर्मयोक्तप्रश्नानननूद्य सूर्यांशो मयं प्रति पुनर्वदतिस्मेत्याह--

इति भक्त्योदितं श्रुत्वा मयोक्तं वाक्यमस्य हि ।
रहस्यं परमध्यायं ततः प्राह पुनः स तम् ॥ १० ॥

इति भक्त्योदितं मयोक्तं वाक्यं पूर्वोदितं श्रुत्वा ततः स सूर्यांशपुरुषस्तं मयं प्रति पुनर्हि अस्य सूर्यसिद्धान्तस्य परमन्यमुत्तरार्धरूपं रहस्यं गुप्तमध्यायं प्राह ॥ १० ॥

इदानींमध्यायमाहात्म्यमाह--

शृणुष्वैकमना भूत्वा गुह्यमध्यात्म संज्ञितम् ।
प्रवक्ष्याम्यतिभक्तानां नादेयं विद्यते मम ॥ ११ ॥

हे मय ! वक्ष्यमाणमध्यात्मसंज्ञितं गुह्यं गोप्यमध्यायमेकमना भूत्वा शृणुष्वाहं तं वक्ष्यामि यतोऽतिभक्तानां मध्ये मम किमपि नादेयं विद्यते । अतो गुह्यमपीदमध्यात्मरूपमुत्तरार्धं वक्ष्यामीति ॥ ११ ॥

अधुना तद्गुह्यमाह--

वासुदेवः परं ब्रह्म तन्मूर्त्तिः पुरुषः परः ।
अव्यक्तो निर्गुणः शान्तः पञ्चविंशात् परोऽव्ययः ॥ १२ ॥
प्रकृत्यन्तर्गतो देवो बहिरन्तश्च सर्वगः ।
सङ्कर्षणोऽपः सृष्ट्वादौ तासु वीर्यमवासृजत् ॥ १३ ॥
तदण्डमभवद्धैमं सर्वत्र तमसावृतम् ।
तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः ॥ १४ ॥
हिरण्यगर्भो भगवानेष छन्दसि पठ्यते ।
आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परं ज्योतिस्तमः पारे सूर्योऽयं सवितेति च ।
पर्येति भुवनान्येष भावयन् भूतभावनः ॥ १६ ॥
प्रकाशात्मा तमोहन्ता महानित्येष विश्रुतः ।
ऋचोऽस्य मण्डलं सामान्युस्रामूर्त्तिर्यजूंषि च ॥ १७ ॥
त्रयीमयोऽयं भगवान् कालात्मा कालकृद्विभुः ।
सर्वात्मा सर्वगः सूक्ष्मः सर्वमस्मिन् प्रतिष्ठितम् ॥ १८ ॥
रथे विश्वमये चक्रं कृत्वा संवत्सरात्मकम् ।
छन्दांस्यश्वाः सप्त युक्ताः पर्यटत्येष सर्वदा ॥ १९ ॥
त्रिपादममृतं गुह्यं पादोऽयं प्रकटोऽभवत् ।
सोऽहङ्कारं जगत्सृष्टचै ब्रह्माणमसृजत्प्रभुः ॥ २० ॥

"वसत्यस्मिन् जगत् समस्तमसौ वा समस्ते जगति वसतीति वासुः । वसतेरुणि प्रत्ययः । देवनाद्भासनाद्देवः । वासुश्चासौ देवश्चेति वासुदेवः ।

तथा चोक्तम् –

सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ।
अतोऽसौ वासुदेवाख्यो विद्वद्भिः परिगीयते ॥ इति

"नहि वसुदेवस्यापत्यमिति विग्रहः । तस्य जगत्कारणतानिरूपणावसरेऽनुपयोगात् ।" इत्यादि गूढार्थप्रकाशके रङ्गनाथेनोक्तम् । स एव परं ब्रह्म सच्चिदानन्दः । तस्य मूर्त्तिरव परः पुरुषः । अव्यक्तोऽतीन्द्रियः । अव्यक्तत्वे च कारणं निर्गुणः । शान्तः षडूर्मिरहितः । षोडश विकृतयः सप्त प्रकृतिविकृतयो मूलप्रकृतिश्चेति चतुर्विंशतितत्त्वानि । पञ्चविंशस्तु जीवस्तस्मात्परः । पञ्चत्रिंशात्मक इति पाठे जगदात्मकः । विशुद्धस्य ब्रह्मणो जगत्कारणत्वासम्भवः । अत एवाह । प्रकृत्यन्तर्गतो मायोपहितो बहिरन्तश्च सर्वगो जगदुत्पादकत्वात् । एतानि विशेषणानि सङ्कर्षणस्य वासुदेवांशस्यापि बोध्यानि । वासुदेवांशः सङ्कर्षणः प्रथममपो जलानि निर्माय तास्वप्सु वीर्यं शक्तिविशेषमवासृजच्चिक्षेप । तच्छक्तिमिलितं तज्जलं हैमं सौवर्णमण्डं गोलाकारं सर्वत्र बहिरन्तश्च तमसान्धकारेणावृतमभवत् । अन्धकारावृताकाशे सौवर्णमण्डमभूदित्यर्थः । तत्रादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुवर्णाण्डोऽनिरुद्धः सनातनो नित्यो वासुदेवांशसङ्कर्षणोंऽशरूपत्वाद्व्यक्तीभूतोऽभिव्यक्तो न तूत्पन्नः सत्कार्यवादाभ्युपगमात् । यथा तिलेभ्यस्तैलं न तूत्पन्नम् । अथास्य नामान्तराण्याह । एष सङ्कर्षणांशोऽनिरुद्धो न निरुद्धः कैश्चिदिति । भगवान् षड्गुणैश्चर्यसम्पन्नः । छन्दसि वेदे हिरण्यगर्भः पठ्यते सुवर्णाण्डगर्भे स्थितत्वात् । वेदेऽस्य हिरण्यगर्भ इति नामान्तरम् । प्रथममभिव्यक्तत्वादयमादित्य उच्यते । प्रसूत्याऽस्माज्जगदुत्पत्तितयाऽयमनिरुद्धः सूर्यश्चोच्यते ।' 'हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीदिति श्रुतिः ।' अयं सूर्यनामकः सविता चेतिनाम्ना प्रसिद्धः । तमः पारेऽन्धकारस्यावसाने परमुत्कृष्टं ज्योतिस्तेजोरूपम् । अन्धकारहारक इत्यर्थः । 'आदित्यवर्णं तमसस्तु पारे-इति श्रुतिः ।' एष सविता भूतभावनः उत्पत्तिस्थितिसंहारकारको वक्ष्यमाणानि भुवनानि भावयन् प्रकाशयन् सुवर्णाण्डमध्ये सदा पर्येति भ्रमति । प्रकाशरूपोऽन्धकारहारकोऽत एवैषोऽनिरुद्धाख्यः सूर्यो महान् महत्तत्वमिति ।

एवं विश्रुतो वेदपुराणादौ निरुक्तोऽस्य निरुक्तस्य सूर्यस्य । ऋचः । ऋग्वेदमन्त्रा मण्डलम् । सामानि । सामवेदमन्त्रा, उस्राः किरणाः । यजूंषि । यजुर्वेदमन्त्रा मूर्त्तिः स्वरूपम् । अत एवायं निरुक्तो भगवान् । त्रयीमयो वेदत्रयात्मकः कालरूपः कालस्य हेतुः । विभुर्जगदुत्पत्तिस्थितिसंहारेषु समर्थः । अत एव सर्वात्मा जगत्स्वरूपः सर्वगः सर्वत्र स्थितो व्यापकः सूक्ष्मोऽव्यापकमूर्त्तिधारी । अस्मिन्नुक्ते सूर्ये सर्वं जगत् प्रतिष्ठितम् । एतेन व्यापकाव्यापकयोरत्राविरोधः । त्रैलोक्यात्मके रथे संवत्सरात्मकं द्वादशमासात्मकं वर्षचक्रं नियोज्य सप्तछन्दांसि गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्योऽश्वा युक्ताः संयोजिताः । 'छन्दांस्यश्वान् सप्तयुक्त्या' इति पाठे सप्ताश्वान् रथे नियोज्येत्यर्थः । सर्वदा नित्यमेषोऽनिरुद्धनामा पर्यटति भ्रमति । अस्य वेदात्मनस्त्रिपादं चरणत्रयममृतं दिवि ज्ञेयम् । अत एव गुह्यमगम्यमिदम् । पादश्चतुर्थश्चरणः । अयं स्थावरजङ्गमात्मकजगद्रूपः प्रकटः प्रत्यक्षोऽभवत् । 'त्रिपादूर्ध्वमुदैत् पुरुषः पादोऽस्येहाभवत् पुनरिति श्रुतिरपि व्यक्ता । सोऽनिरुद्धनामा प्रभुरुत्पत्तिसमर्थः अहङ्कारतत्त्वरूपं पुरुषं ब्रह्माणं जगत्सृष्टयै जगत्सर्जननिमित्तमसृजदुत्पादयामासेत्यर्थः । एतद्व्याख्यानं सर्वं रङ्गनाथानुरूपमिति ॥ १२–२० ॥

अथ विशेषमाह—

तस्मै वेदान् वरान् दत्त्वा सर्वलोकपितामहम् ।
प्रतिष्ठाप्याण्डमध्येऽथ स्वयं पर्येति भावयन् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोऽनिरुद्धस्तस्मैउत्पादितब्रह्मपुरुषाय वरानुत्कृष्टान् वेदान् दत्त्वा वेदोक्तमार्गेण सृष्टिसर्जनार्थं सर्वलोकानां सर्वप्राणिनां पितामहरूपं ब्रह्माणं सुवर्णाण्डमध्ये प्रतिष्ठाप्य संस्थाप्य स्वयं भावयन् प्रकाशयन् पर्येति भ्रमति ॥ २१ ॥

अथ जगत्सिसृक्षुर्ब्रह्मा किमकरोदित्याह—

अथ सृष्ट्यां मनश्चक्रे ब्रह्माहङ्कारमूर्त्तिभृत् ।
मनसश्चन्द्रमा जज्ञे सूर्योऽक्ष्णोस्तेजसां निधिः ॥ २२ ॥

मनसः खं ततो वायुरग्निरापो धरा क्रमात् ।
गुणैकवृद्ध्या पञ्चैव महाभूतानि जज्ञिरे ॥ २३ ॥

अग्नीषोमौ भानुचन्द्रौ ततस्त्वङ्गारकादयः ।
तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्च जज्ञिरे ॥ २४ ॥

पुनर्द्वादशधात्मानं व्यभजद्राशिसञ्ज्ञकम् ।
नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी ॥ २५ ॥

अथाधिकारप्राप्त्यनन्तरमहङ्कारमूर्त्तिधारको ब्रह्मा सृष्ट्यां सृष्टिरचनायां मनश्चक्रे ददौ । अहं सृष्टिं कुर्यामितीच्छा जाता । जातायामिच्छायां सद्यो मनसः सकाशाच्चन्द्रमा जज्ञे जातः । चन्द्रो भवत्विति मनसा चन्द्रो जात इत्यर्थः । अक्ष्णोर्नेत्राभ्यां सकाशात् तेजसां निधिराकररूपः सूर्य उत्पन्नः । चक्षुरिन्द्रियस्य तैजसत्वात् । मनस आकाशम् । आकाशत् क्रमाद्यथोत्तरं वायुरग्निर्जलं पृथिवी । आकाशाद्वायुः । वायोरग्निः । अग्नेर्जलम् । जलात् पृथिवी । इति गुणैकवृद्ध्या गुणस्यैकोपचयेन महाभूतानि पञ्चसङ्ख्यानि जज्ञिरे उत्पन्नानि । शब्दगुणसहितमाकाशम् । शब्दस्पर्शगुणद्वयसमेतो वायुः । शब्दस्पर्शरूपात्मकगुणत्रययुतोऽग्निः । शब्दस्पर्शरूपरसात्मकगुणचतुष्टयसमेतं जलम् । शब्दस्पर्शरूपरसगन्धात्मकगुणपञ्चकोपेता पृथिवीति स्फुटोऽर्थः । सूर्यचन्द्रौ प्रागुक्तौ अग्नीषोमौ । सूर्योऽग्निस्वरूपस्तेजोगोलकश्चाक्षुषत्वात् । चन्द्रस्तु सोमस्वरूपः । मद्यस्य सोमवाचकत्वाज्जलरूपः । अग्नीषोमाविति वैदिकप्रयोगः । ततोऽनन्तरमङ्गारकादयो भौमादयः पञ्च ताराग्रहास्तेजोभूखाम्बुवायुभ्यः क्रमादुत्पन्नाः । भौमस्तेजसः । बुधो भूमितः गुरुकाशात् । शक्रो जलात् । शनिर्वायोरिति । नव्यानां मते परमेश्वरः प्रथमं तेजोमयं रविं निर्माय स्वाक्षोपरि परिभ्राम्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्योम्नि संस्थापयामास । ततः स्वाक्षोपरि भ्रमणाद्रवेस्तेजोमयखण्डानि निःसृत्याकाशेऽन्तरितानि परस्पराकर्षणतः स्वस्वकक्षासु भ्रमन्ति । तान्येव तेजःखण्डानि भौमादिविम्बानि कथ्यन्त इति । पुनरनन्तरमात्मानं द्वादशधा द्वादशस्थानेषु राशिसञ्ज्ञकं व्यभजत् । मनः कल्पितं वृत्तं द्वादशविभागं राशिवृत्तं क्रान्तिवृत्ताख्यमकरोत् । भूयो द्वितीयवारमात्मानं नक्षत्ररूपिणं सप्तविंशात्मकं व्यभजत् । मनः कल्पितं तदेव क्रान्तिवृत्तं सप्तविंशतिविभागात्मकं चाकरोदित्यर्थः । ननु न्यूनाधिका विभागाः किमु न कृता उक्तसङ्ख्यासु नियामकाभावादित्याह । वशीति । इच्छाविषयं वशं विद्यते यस्येति वशी । स्वतन्त्रेच्छस्य नियोगानर्हत्वात् । स्वेच्छया तत्सङ्ख्यका विभागाःकृता इति भावः । सप्तविंशतिविभागसूचकानि नक्षत्राणि च निर्मितानि ब्रह्मणेत्यर्थः ॥ २३–२५ ॥

पुनः किमकरोदित्याह—

ततश्चराचरं विश्वं निर्ममे देवपूर्वकम् ।
ऊर्ध्वमध्याधरेभ्योऽथ स्रोतोभ्यः प्रकृतीः सृजन् ॥ २६ ॥

अथ ततो ग्रहर्क्षादीनां रचनानन्तरं स ब्रह्मा ऊर्ध्वमध्याधरेभ्यः श्रेष्ठमध्यमाधमेभ्यः स्रोतोभ्यो व्यक्तिभ्यः प्रकृतीः सत्त्वरजस्तमोविभेदात्मिकाः प्रजाः सृजन् रचयन् देवमनुष्यासुरादिकं चराचरं विश्वं जगन्निममे कृतवानिति ।

मनुश्च स्वस्मृतिप्रथमाध्याये—

"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥
ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥
योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥
सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु बीजमवासृजत् ॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥"

इत्यादिना प्रायः सौरानुरूप एव सृष्टिक्रम उक्त इति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ रचितपदार्थानामवस्थानमाह--

गुणकर्मविभागेन सृष्ट्वा प्राग्वदनुक्रमात् ।
विभागं कल्पयामास यथास्वं वेददर्शनात् ।। २७ ।।
ग्रहनक्षत्रताराणां भूमेर्विश्वस्य वा विभुः ।
देवासुरमनुष्याणां सिद्धानां च यथाक्रमम् ।। २८ ।।

गुणास्त्रयः सत्त्वरजस्तमोरूपाः। कर्म पूर्वजन्मार्जितं सदसद्वा। अनयोर्गुणकर्मणोर्विभागेन प्राग्वच्चन्द्रसूर्यादिरचनानुक्रमात् देवासुरादिसृष्ट्वा रचयित्वा वेददर्शनाद्वेदोक्तप्रकारात् यथास्वं यथादेशं यथाकालमवस्थानविभागं कल्पयामास रचितवान्। 'यथा पूर्वमासीत्तथैव धाताऽकल्पयदिति श्रुतिश्च।' केषां विभागं कृतवानित्याह। ग्रहनक्षत्रेति। विभुः सर्वनियोजनकुशलो ब्रह्मा ग्रहनक्षत्रताराविम्बानां पृथिव्यास्त्रैलोक्यस्य चाकाशेऽवस्थानं कृतवान्। ग्रहनक्षत्राणां यथाकालमनियतावस्थानम्। भूमेश्च नियतावस्थानम्। भूमौ तु त्रैलोक्यस्य यथादेशमवस्थानम्। तत्र यथाक्रमं यथायोग्यं देवासुरमनुष्याणां सिद्धानां चावस्थानं यथाक्रमं कृतवानिति।। २७–२८।।

इदानीं कुत्र सर्वेषामवस्थानं कृतमित्याह--

ब्रह्माण्डमेतत् सुषिरं तत्रेदं भूर्भुवादिकम् ।
कटाहद्वितयस्येव सम्पुटं गोलकाकृति ।। २९ ।।
ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाभिधीयते ।
तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा ।। ३० ।।
मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः ।
परिभ्रमन्त्यधोऽधः स्थाः सिद्धविद्याधरा घनाः ।। ३१ ।।

एतत् प्रागुदितं ब्रह्मणाधिष्ठितं हैममण्डं सुषिरं छिद्रमनन्तावकाशं तत्राकाशे भूर्भुवादिकमिदं विश्वम्। कटाहद्वितयस्य सम्पुटमिव ब्रह्माण्डं गोलाकृति। व्यासस्योपरि समन्ताद्वृत्तार्धभ्रमणेन यत् क्षेत्रं स एव गोलो गोलको वा तद्वदाकृतिरिवाकृतिर्यस्य तदिति। ब्रह्माण्डस्य मध्ये कटाहद्वितयस्य सन्धौ यः परिधिः सा व्योमकक्षाऽभिधीयते कथ्यत इति। तस्य मध्ये भानां नक्षत्राणां भ्रमणं कक्षा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा क्रमशोऽधोऽधः शनिगुरुभौमसूर्यशक्रबुधचन्द्रा भ्रमन्ति। तेषामधोऽधःस्थाः सिद्धविद्याधराः, घना मेघाश्च तिष्ठन्ति। अर्थादूर्ध्वक्रमेण भूमेरुपरि चन्द्रस्ततो बुधस्ततः शुक्रस्ततो रविस्ततो भौमस्ततो गुरुस्ततः शनिस्ततो नक्षत्राणि भ्रमन्ति। भूमेरुपरि चन्द्रादधः सिद्धविद्याधरा मेघाश्च निवसन्तीति। सम्प्रति वेधेन चन्द्रो भुवः समन्ताद्भ्रमणं करोति, तथा सूर्यात् परितः क्रमेण बुधशुक्रभूमिभौमगुरुशनिनक्षत्राणि भ्रमन्तीति सिध्यति। अत एव प्राचीनानां भूस्थिरवादिनां भूपरितो ग्रहा भ्रमन्तीति वदतां मते बुधशुक्रकर्णयोर्महदन्तरमिति प्रसिद्धम्। पूर्वपश्चिमयोस्तयोर्दृश्यादृश्यत्वं च तन्मते न घटत इति पूर्वमेवोदयास्ताधिकारे प्रतिपादितम्। यवनानां मते भूमेरुपरि जलकक्षा ततोऽग्निकक्षेति कमलाकरेण सिद्धान्ततत्त्वविवेके विलिखितम्। ग्रहाणामूर्ध्वाधरत्वं च तेषां कर्णानां वेधेन स्फुटं विज्ञायते। एवं रविग्रहबिम्बान्तरवेधेन सर्वे ग्रहा रविपरितो भ्रमन्तीति स्फुटं सम्प्रति नव्यमतेन विज्ञायत इति।

नव्यानां मतेन नक्षत्राणामनन्तदूरे स्थितत्वात् तेषां कक्षाप्रमाणं तद्व्यासप्रमाणं चानन्तमिति युक्तियुक्तं वेधेन विज्ञायये। अनन्तदूरे स्थितस्य पदार्थस्य पर्यन्तं दृग्द्वयाद्गतं दृष्टिसूत्रं द्वयं मिथः समानान्तरं भवति-इति रेखागणितेन सिध्यति। यथा कल्प्यते अध, कग रेखे मिथःसमानान्तरे। अ-एकं दृष्टिस्थानं क-



द्वितीयं दृष्टिस्थानम्। क ग रेखायां च, ज, त, द बिन्दवस्तत्र अ स्थानगताः अच, अज, अत, अद, रेखा अघ रेखया क्रमशोऽल्पकोणान् रचयन्ति। अतो यदि गबिन्दुरनन्तदूरे स्यात् तर्हि अग रेखा अघ रेखया शून्यकोणं रचयिष्यति, अर्थात् अग रेखा अघ रेखोपरि पतिष्यतीति। अतः कग, अघ दृष्टिरेखे मिथः समानान्तरे भविष्यतः। अत एव प्राचीनैः कक्षावृत्तप्रतिवृत्तकेन्द्राभ्यां रेवत्यन्तं गते रेखे समानान्तरे कल्पयित्वा तयोर्वृत्तयोर्मेषादिस्थानं निर्णीतमिति। अतोऽत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्योमकक्षामानं नक्षत्रकक्षातो भिन्नं दिव्यं कल्पनामात्रमेवं सुधीभिर्विज्ञेयमिति दिक् ॥ २९-३१ ॥

इदानीं भूगोलसंस्थानं तत्र पातालादिस्थितिं चाह—

मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति ।
बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम् ॥ ३२ ॥

तदन्तरपुटाः सप्त नागासुरसमाश्रयाः ।
दिव्यौषधिरसोपेता रम्याः पातालभूमयः ॥ ३३ ॥

अनेकरत्ननिचयो जाम्बूनदमयो गिरिः ।
भूगोलमध्यगो मेरुरुभयत्र विनिर्गतः ॥ ३४ ॥

उपरिष्टात् स्थितास्तस्य सेन्द्रा देवा महर्षयः ।
अधस्तादसुरास्तद्वद् द्विषन्तोऽन्योन्यमाश्रिताः ॥ ३५ ॥

ततः समन्तात् परिधिः क्रमेणायं महार्णवः ।
मेखलेव स्थितो धात्र्या देवासुरविभागकृत् ॥ ३६ ॥

अण्डस्य समन्तात् सर्वप्रदेशान्मध्ये केन्द्रे भूगोलो व्योम्न्याकाशे तिष्ठति । ननु—आकाशे विनाऽऽधारं कथं तिष्ठतीत्याह—बिभ्राण इति। ब्रह्मणो धारणात्मिकां निराधारावस्थानरूपां शक्तिं विभ्राणो धारयन् । एतेन भूः किमाकारा किमाश्रयेति प्रश्नद्वयस्योत्तरं जातम् । यस्य गोलस्य पृष्ठे द्रष्टा तिष्ठति तं गोलमचलं मन्यतेऽन्ये च गोलास्तद्वशतो भ्रमन्त इव भान्त्यतोऽत्राचार्यैर्भूगोलपृष्ठवास्यभिप्रायेण 'भूगोलो व्योम्नि तिष्ठति' इत्युक्तमिति नवीनानां कल्पना युक्तियुक्ता । 'कथं चात्र सप्त पातालभूमयः' इत्यस्योत्तरमाह । तस्य भूगोलस्यान्तरपुटा मध्यस्थपुटा गुह्यरूपाः सप्तातलवितल-सुतल-रसातल-तलातल-महातल-पातालाख्याः पातालभूमयः पातालप्रदेशा रम्याः सन्ति । "पातालळोकाः पृथिवीपुटानि" इति भास्करोक्तिश्च । अनन्तादयः सर्पा असुराश्चैषां पातालानामाश्रयभूताः । दिव्यौषधिरसोपेताः । दिव्या या ओषधयः स्वयंप्रकाशरूपास्तासां तेजोमयै रसैर्युक्ता अत एव तत्प्रकाशेन सर्पासुरादयो विलसन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भास्करस्तु—

"चञ्चत्फणामणिगणांशुकृतप्रकाशा
एतेषु सासुरगणाः फणिनो वसन्ति ।
दीव्यन्ति दिव्यरमणीरमणीयदेहैः
सिद्धाश्च तत्र च लसत्कनकावभासाः ॥" इति वदन्ति भुवनकोशे ।

अथ मेरुसंस्थानमाह । भूगोलमध्यग इति । उभयत्र भूकेन्द्राद्भागद्वयेऽपि भूपृष्ठप्रदेशयोरुपरि वर्धितभूव्यास इव मेरुनामा गिरिर्विनिर्गतः । अयं चानेकरत्ननिचयः । अनेकेषां वज्रादिरत्नानां निचयः समूहो यत्रासौ । जाम्बूनदमयः । जाम्बूनदं सुवर्णं तन्मयः स्वर्णमय इत्यर्थः । तस्य मेरोरुपरिष्टात् सौम्यध्रुवाधोभागे महर्षय इन्द्रसहिता देवाश्च स्थिताः सन्ति, तथाऽधस्ताद् देवानामधः स्वस्तिकदिशि तत्पृष्ठे तद्वद्देवा इवासुरा आश्रिताः स्थिताः सन्ति । ते देवासुरा अन्योन्यं द्विषन्तो वैरभावं कुर्वन्तः परस्थानजयाभिलाषिणस्तत्र तिष्ठन्तीति । ततो मेरुस्थानात् समन्तात् सर्वप्रदेशात् तुल्यान्तरेण परिधिरिव क्रमेणायं महार्णवः क्षारसमुद्रो धात्र्याः पृथिव्या मेखला कटिबन्ध इव देवासुरविभागकृत् । देवदैत्ययोर्भूगोलपृष्ठे विभागयोरवधिरुप इव स्थितः । एतेन समुद्रोत्तरतटादुत्तरं भूगोलस्यार्धं जम्बूद्वीपं देवानां समुद्रसहितं दक्षिणभूगोलार्धं च दैत्यानामिति सिध्यति ॥ ३२-३६ ।

इदानीं समुद्रोत्तरतटेषु नगरीराह—

समन्तान्मेरुमध्यात्तु तुल्यभागेषु तोयधेः ।
द्वीपेषु दिक्षु पूर्वादिनगर्यो देवनिर्मिताः ॥ ३७ ॥

भूवृत्तपादे पूर्वस्यां यमकोटीति विश्रुता ।
भद्राश्ववर्षे नगरी स्वर्णप्राकारतोरणा ॥ ३८ ॥

याम्यायां भारते वर्षे लङ्का तद्वन्महापुरी ।
पश्चिमे केतुमालाख्ये रोमकाख्या प्रकीर्त्तिता ॥ ३९ ॥

उदक् सिद्धपुरी नाम कुरुवर्षे प्रकीर्त्तिता ।
तस्यां सिद्धा महात्मानो निवसन्ति गतव्यथाः ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूवृत्तपादविवरास्ताश्चान्योन्यं प्रतिष्ठिताः ।
ताभ्यश्चोत्तरगो मेरुस्तावानेव सुराश्रयः ॥ ४१ ॥

तासामुपरिगो याति विषुवस्थो दिवाकरः ।
न तासु विषुवच्छाया नाक्षस्योन्नतिरिष्यते ॥ ४२ ॥

मेरुमध्यात् समस्तादभितो भूगोलपृष्ठे तुल्यभागेषु नवत्यंशसंमितेषु पूर्वादिदिक्षु तोयधेः समुद्रस्य तटेषु द्वीपेषु वर्षेषु देवनिर्मिताः पूर्वादिदिक्षु नगर्यः सन्ति। समुद्रस्योत्तरतीरेषु जम्बूद्वीपस्यादिभागरूपेषु मिथस्तुल्यान्तरेण पूर्वादिदिक्षु चत्वारि नगराणि सन्तीत्यभिप्रायः। मेरुतः पूर्वस्यां भूवृत्तपादे नवत्यंशान्तरे यमकोटीति विश्रुता भद्राश्ववर्षे स्वर्णप्राकारतोरणा सुवर्णरचिताः प्राकारास्तोरणानि च यस्यां सा अस्ति । यद्यपि मेरौ वस्तुतः काचिदप्याशा स्थिरा गोलयुक्तितो न भवति तथापि यस्यां दिशि यमकोटी साऽऽचार्यैः पूर्वा कल्पितेति वेद्या। एवं मेरुतो याम्यायां दिशि तद्वत् स्वर्णप्राकारतोरणा लङ्का नाम महापुरी भारतवर्षे वर्तते । अत एव मुनीश्वरेण स्वसिद्धान्ते सार्वभौमे रघुनाथसेतुबन्धविषये विशेषोऽभिहितो 'ननु सिन्धुत उत्तरे' इत्यादि। तथा मेरुतः पश्चिमे केतुमालनामवर्षे रोमकनाम्नी पुरी प्रकीर्त्तिताऽऽचार्यैः। एवं मेरुत उदग्दिशि कुरुवर्षे सिद्धपुरी नाम प्रकीर्त्तिता। तस्यां पुर्यां गतव्यथा वीतदुःखाः सिद्धा महात्मानश्च निवसन्ति । ताश्चतस्रः पुर्योऽन्योन्यं मिथो भूवृत्तपादविवरा नवत्यंशान्तरिताः प्रतिष्ठिताः स्थिताः सन्तीति। ताभ्यः सर्वाभ्यः पुरीभ्यो मेरुरुत्तरगः स्वस्थानान्मेरुर्यद्दिक् सैवोत्तरेतिपरिभाषातः । तावानेव मेरुः सुराश्रयः । यो मेरुर्देवालयस्तावानेव सर्वाभ्यः पुरीभ्यउत्तरगो न दैत्यालयो द्वितीयखण्डात्मको मेरुरित्यर्थः। विषुवस्थः सायनमेषतुलादिगो रविः क्रान्त्यभावान्नाडीमण्डलगतस्तद्धरातलगतानां तासां चतसृणां पुरीणामुपरि गतो भवति। अतस्तासु पुरीषु विषुवच्छाया पलभा न तथाऽक्षस्य ध्रुवयष्टेरुन्नतिश्च नेष्यते नाङ्गीक्रियते गोलविद्भिरिति। समुद्रोत्तरतीरवर्त्तिपुरेषु पलभाया अक्षस्य चाभाव इत्यर्थः ॥ ३७-४२ ॥

अथ ध्रुवतारास्थितिमाह—

मेरोरुभयतो मध्ये ध्रुवतारे नभः स्थिते ।
निरक्षदेशसंस्थानामुभये क्षितिजाश्रये ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतो नाक्षोच्छ्रयस्तासु ध्रुवयोः क्षितिजस्थयोः ।
नवतिर्लम्बकांशास्तु मेरावक्षांशकास्तथा ॥ ४४ ॥

मेरोरुभयतो देवभागे दैत्यभागे च मध्ये खमध्ये देवानां खस्वस्तिकोपरि दैत्यानां च खस्वस्तिकोपरि नभः स्थिते ध्रुवतारे स्तः । अतो निरक्षदशेसंस्थानां समुद्रोत्तरतीरनिवासिनां ते उभये ध्रुवतारे क्षितिजाश्रये स्तः । अतो ध्रुवोन्नत्यभावात् तासु पूर्वोदितासु यमकोट्यादिपुरीषु क्षितिजस्थयोर्ध्रुवयोर्नाक्षोच्छ्रायः। अत एव तत्राक्षांशोननवतिरूपा लम्बांशका नवतिः । मेरौ तु तथाऽक्षांशका नवतिरिति । अक्षांशपरमत्वाल्लम्बांशाभावोऽर्थाद्गम्यते । निरक्षेऽक्षाभावो मेरौ परमा अक्षांशका नवतिः । अवान्तरे तु अपसारयोजनैरनुपातः कर्त्तव्य इति सूचितम् । अक्षांशज्ञानतः पुरान्तरयोजनैर्भूपरिधिज्ञानं च सुगममित्यनुक्तमपि बुद्धिमतोह्यम् । अनेनेवे "पुरान्तरं चेदिदमुत्तरं स्यात्" इत्यादि भास्करानयनमुत्पद्य इति ॥ ४३-४४ ॥

इदानीं देवासुरयो रविदर्शनस्थितिमाह—

मेषादौ देवभागस्थे देवानां याति दर्शनम् ।
असुराणां तुलादौ तु सूर्यस्तद्भागसञ्चरः ॥ ४५ ॥

मेषादौ देवभागस्थे सूर्यो देवानां दर्शनं याति प्राप्नोति । तुलादौ दैत्यभागस्थे च स सूर्योऽसुराणां दर्शनं याति । किं विशिष्टः सूर्यः तद्भागसञ्चरः। तयोर्देवदैत्ययोर्भागयोः सञ्चरतीति सः । मेषादिषड्राशिस्थःसूर्यो देवभागे सञ्चरति । अतः क्षितिजोर्ध्वगतत्वाद्देवैः स दृश्यते । एवं तुलादिषड्राशिस्थो दैत्यभागे सञ्चरति । अतस्तत्क्षितिजोर्ध्वगतत्वाद्दैत्यैः स दृश्यत इति ॥ ४५ ॥

इदानीं ग्रीष्मे तीव्रकरो भानुरिति प्रश्नोत्तरमाह—

अत्यासन्नतया तेन ग्रीष्मे तीव्रकरा रवेः ।
देवभागे सुराणां तु हेमन्ते मन्दताऽन्यथा ॥ ४६ ॥

देवभागे जम्बूद्वीपे । अत्यासन्नतया सूर्यस्यात्यन्तनिकटस्थत्वेन सुराणां मध्ये ग्रीष्मे सूर्यस्य किरणास्तीव्रा अत्युग्रा भवन्ति । हेमन्ततौं अन्यथा सूर्यस्य दूरस्थत्वेन कराणाँ मन्दता । अत एव तत्र शीताधिक्यम् । इदं च स्थूलं कारणम्। वस्तुतो भूगालपृष्ठे स्थलविशेषे पर्वतादीनां निवेशेन रविकिरणानां प्रभावोऽल्पो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवति तेन तत्र शीताधिक्यं भवति। यथा यथा रविः खस्वस्तिकासन्नो भवति तथा तथा भूपृष्ठे रविकिरणानां क्षितिजे लम्बनिभत्वात् प्रभावोऽधिको भवत्यत एव ग्रीष्मे भारतवर्षेऽत्युष्णता। हेमन्ते तु खस्वस्तिकाद्दूरे रविरतः किरणानां तिर्यक्पतनात् तत्प्रभावोऽल्पो भवत्यत एव तदा शीताधिक्यमिति बुद्धिमता वेद्यमिति ॥ ४६ ॥

इदानीं देवासुराहोरात्रं विवृणोति—

देवासुरा विषुवति क्षितिजस्थं दिवाकरम्।
पश्यन्त्यन्योन्यमेतेषां वामसव्ये दिनक्षपे ॥ ४७ ॥
मेषादावुदितः सूर्यस्त्रीन् राशीनुदगुत्तरम्।
सञ्चरन् प्रागहर्मध्यं पूरयेन्मेरुवासिनाम् ॥ ४८ ॥
कर्क्यादीन् सञ्चरंस्तद्वदह्नः पश्चार्धमेव सः।
तुलादींस्त्रीन् मृगादींश्च तद्वदेव सुरद्विषाम्। ४९ ॥
अतो दिनक्षपे तेषामन्योन्यं हि विपर्ययात्।
अहोरात्रप्रमाणं च भानोर्भगणपूरणात् ॥ ५० ॥
दिनक्षपार्धमेतेषामयनान्ते विपर्ययात्।
उपर्यात्मानमन्योन्यं कल्पयन्ति सुरासुराः ॥ ५१ ॥
अन्येऽपि समसूत्रस्था मन्यन्तेऽधः परस्परम्।
भद्राश्वकेतुमालस्था लङ्कासिद्धपुराश्रिताः ॥ ५२ ॥
सर्वत्रैव महीगोले स्वस्थानमुपरि स्थितम्।
मन्यन्ते खे यतो गोलस्तस्य क्वोर्ध्वं क्व वाऽप्यधः ॥ ५३ ॥

देवासुरा विषुवति सायनमेषतुलादौ क्षितिजस्थं सूर्यं पश्यन्ति। अत ऊर्ध्वाधरस्थितत्वादेतेषां देवासुराणामन्योन्यं मिथो दिननिशे भवतः। मेषादौ रविमुदितं प्रत्यह क्षितिजोपरिगतं यदा देवाः पश्यन्ति तदा देवानामधःस्थितत्वाद्दैत्यास्तं रविं न पश्यन्त्यतस्तेषां विलोमेन दिननिशे। यदा देवानां दिनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदा दैत्यानां रजनी यदा देवानां रजनी तदा दैत्यानां दिनमिति । सूर्यो मेषादौ नाडीमण्डलरूपक्षितिजे उदितस्त्रीन् राशीन् क्रमेणोदगुत्तरं सञ्चरन् परमोन्नतिं गतो मरुवासिनां प्रागहर्मध्यं पूर्वदिनदलं पूरयेत् । ततस्तैरेव वृत्तैः कर्क्यादीन् त्रीन्राशीन् तद्वत् सञ्चरन् स रविर्मेरुवासिनामह्नः पश्चार्धं परदिनदलं पूरयेत् । तत्र देवानां दिनावसानं भवतीति । अथ तद्वदेव तुलादीन् त्रीन् राशीन् सञ्चरन् रविः सुरद्विषां दैत्यानां प्रागहर्मध्यं मृगादीन् त्रीन् राशीन् सञ्चरंश्च पश्चादहर्दलं पूरयेदिति । अतो विपर्ययात् तेषां दिननिशे भवत इति पूर्वोक्तस्योपपत्तिरूपः श्लोकोऽयम् । नाडीमण्डलक्रान्तिमण्डलसम्पाते सायनमेषादौ सायनतुलादौ च रविदर्शनानन्तरं पुनस्तत्सायनमेषादौ सायनतुलादौ च रवेर्दर्शनमतस्तेषां देवासुराणां भानोर्भगणपूरणात् सायनभगणपूरणादहोरात्रप्रमाणं भवतीत्यर्थः । एवमेतेषां देवासुराणामयनान्ते विपर्ययाद्दिनरात्र्यर्धं भवति । उत्तरायणान्ते सायनमिथुनान्ते देवानां दिनार्धं दैत्यानां रात्र्यर्धं, दक्षिणायनान्ते सायनधनुरन्ते देवानां रजनीदलं दैत्यानां दिनार्धमिति तद्द्वयं विपर्ययाद्भवतीत्यर्थः सुरासुरा अन्योन्यं मिथ आत्मानमुपरि कल्पयन्ति । देवा आत्मानमुपरि दैत्यगणं चाधो मन्यन्ते । एवं दैत्या आत्मानमुपरि देवगणं चाधो मन्यन्ते । एवमन्येऽपि समसूत्रस्थाः कुदलान्तरस्थाः परस्परमधो मन्यन्ते । यथा भद्राश्वकेतुमालस्थास्तथा लङ्कासिद्धपुराश्रिताश्च कुदलान्तरस्थितत्वान्मिथोऽधो मन्यन्ते इति । अथ वस्तुस्थितिमाह । सर्वत्रैवेति । यतो महीगोले सर्वत्रैव भूपृष्ठस्थाः स्वस्थानमुपरिस्थितं मन्यन्ते । वस्तुतस्तु अयं गोलो यतः रवे व्योम्नि स्थितस्तस्य गोलस्य क्वोर्ध्वं क्व वाऽप्यधोऽर्थात् कुत्रापि नोर्ध्वं नाप्यध इति । पृथिव्यामाकर्षणशक्तिरतः सर्वेषां पादमूलस्य पृथिवीपृष्ठे गतत्वात् सर्वे निजस्थानमधस्तदुपरि चात्मानं स्थितं मन्यन्त इति ॥ ४७–५३ ॥

इदानीं पृथिवीदर्शने विशेषमाह—

अल्पकायतया लोकाः स्वस्थानात् सर्वतो मुखम् ।
पश्यन्ति वृत्तामप्येतां चक्राकारां वसुन्धराम् ॥ ५४ ॥

लोकाः प्राणिनः स्वाधिष्ठितपृष्ठस्थानात् सर्वदिक्षु मुखमभिमुखमेतां वृत्तां गोलाकृतिमपि वसुन्धरां चक्राकारां वर्तुलमुकुरोदरसन्निभां पश्यन्त्यल्पकायतयाऽतिह्रस्वशरीरत्वेन । अत्यल्पाच्चो नरः स्वस्थानाच्चतुर्दिक्षु पृथिव्या अत्यल्पभागं पृथिवीशतांशादप्यल्पं पश्यन्ति तत्र वृत्तस्यात्यल्पभागत्वाद्वक्रता कथमपि नोपलक्ष्यत इति । समुद्रयात्रादिकरणेन वेधसौक्ष्म्याच्चेयं भूमिर्दीर्घव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्त्तुलाभा नव्यैर्निर्णीता तस्या वृहद्व्यासः = ७९२६ अङ्को। लघुव्यासः = ७८९६ अङ्को। अथानयोर्योगार्धसमो व्यवहारार्थं स्वल्पान्तराद्भूगोलस्य व्यासः कल्प्यते



तदा रेखागणितयुक्त्या पृष्ठस्थानगतस्य नरस्योच्छ्रितिः = ६ पदानि। अर्थाद्यदि पृउ = ६ = उ। के पृ = अ = केस्प = ७९०२·५ मी। तदा स्पल = केस्प × उस्प ÷ केउ (उस्प स्पर्शरेखा ज्ञेया)।

केउ = केपृ+पृउ = ७९०२·५ × ५२८० + ६ = ४१७७८००६

उस्प = $\sqrt{\text{केउ}^2 - \text{केस्प}^2}$ = $\sqrt{\text{पृउ}}$ (२ केपृ + पृउ)

= $\sqrt{\text{६ (८३५५६००० + ६}}$ = $\sqrt{\text{६ × ८३५५६००६}}$

= $\sqrt{\text{५०१३३६०३६}}$ = २२३९० स्वल्पान्तरात्।

४१७७८०००
२२३९०
―――――
३७६००२
१२५३३४
८३५५६
८५५५६
―――――

४१७७८००६) ९५५४०९४२०००० (२२८६८·७ पदानि
८३५५६०१२
―――――

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

```
११९८४९२००
 ८३५५६०'२
---------------
३६ ९३२८८०
३३×२२४०४८
---------------
 २८७०८८३२०
 २५०६६८०३६
---------------
 ३६४२०२८४०
 ३३४२२४०४८
---------------
 २९९७८७९२०
```

} ५·८०) २२८६८·७ (४ अर्धं क्रो,
·११२०
———
१७४८

एवममत्र यदि द्रष्टुरुच्छ्रितिर्हस्तचतुष्टय भवेत्तदा स्वल्पान्तरात् स्पल=पृस्पचापम्=४ अर्धक्रोशसमम्। तच्च पृथ्वीपरिधेः सहस्रभागतोऽप्यल्पमतो वृत्तस्य षण्णवत्यंशो दण्डवत् परिदृश्यते—इत्यादिना वक्रत्वस्याभावः पृस्पमानं चतुर्दिक्षु सरलरेखावद्भाति। तद्व्यासार्धेन कृतं वृत्तं दृश्यक्षितिजं च चक्राकारं भात्यतो भास्करश्च--

समो यतः स्यात् परिधेः शतांशः
पृथ्वी च पृथ्वी नितरां तनीयान्।
नरश्च तत्पृष्ठगतस्य कृत्स्ना
समेव तस्य प्रतिभात्यतः सा ॥ इत्याह ॥ ५४ ॥

इदानीं भचक्रभ्रमणाव्यवस्थां दिनमानव्यवस्थां चाह—

सव्यं भ्रमति देवानामपसव्यं सुरद्विषाम्।
उपरिष्टाद्भगोलोऽयं व्यक्षे पश्चान्मुखः सदा ॥ ५५ ॥
अतस्तत्र दिनं त्रिंशन्नाडिकं शर्वरी तथा।
हानिवृद्धी सदा वामं सुरासुरविभागयोः ॥ ५६ ॥
मेषादौ तु सदा वृद्धिरुदगुत्तरतोऽधिका।
देवांशे च क्षपाहानिर्विपरीतं तथासुरे ॥ ५७ ॥
तुलादौ द्युनिशोर्वामं क्षयवृद्धी तयोरुभे।
देशक्रान्तिवशान्नित्यं तद्विज्ञानं पुरोदितम् ॥ ५८ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयं भगोलो देवानां मध्ये सव्यं सुरद्विषां मध्येऽपसव्यं व्यक्षे निरक्षदेशे च उपरिष्टात् तन्मस्तकोपरि सदा पश्चान्मुखो भ्रमति। अतस्तत्र निरक्षे नतोन्नताभावात् सर्वदा त्रिंशद्घटिकात्मकं दिन तथा तावती शर्वरी रात्रिश्च भवति। देवासुरविभागयोर्वामं विपरीतक्रमेण दिननिशोर्हानिवृद्धी भवतः। देवभागे यदा दिनवृद्धिस्तदा दैत्यभागे दिनह्रासः। एवं देवभागे यदा रात्रिवृद्धिस्तदा दैत्यभागे रात्रिह्रास इत्यर्थः। तदेव विशदीकरोति। मेषादौ राशिषट्के सूर्ये उदगुत्तरतोऽर्थाद्यथायथोत्तरतो रविर्याति तथा तथा देवभागे सदा दिनस्य वृद्धिः क्षपाहानी रात्रिहानिश्च भवति। तथाऽसुरे भागे च विपरीतम्। दिनह्रासो रात्रिवृद्धिर्भवति। एवं तुलादौ राशिषट्के सूर्ये तयोर्देवासुरभागयोर्द्युनिशोरुभे क्षयवृद्धी वामं विपरीते स्याताम्। देवभागे दिनह्रासो रात्रिवृद्धिरसुरभागे च दिनवृद्धिः क्षपाह्रास इति। तयोर्द्युनिशोर्विज्ञानं च देशक्रान्तिवशात् अक्षांशानां क्रान्त्यंशानां च वशान्नित्यं पुरा प्रथममुदितं 'क्रान्तिजा विषुवद्भाघ्नी' इत्यादि स्पष्टाधिकारोक्तविधिनेति।

अत्रोपपत्तिः। देवभागे गोलस्य यादृगवस्थितिस्तद्विपरीता दैत्यभागे। देवभागे यदि क्षितिजमुन्मण्डलादधश्चरनाडीभिस्तदातावतीभिर्घटिकाभिरसुरभागे ह्यूर्ध्वमुन्मण्डलाद्भवतीति सर्वं गोलोपरि स्फुटं दृश्यते। चरज्ञानं च देशक्रान्तिवशात् स्पष्टाधिकारे पूर्वमुक्तमेवेति सर्वं स्फुटम् ॥ ५५-५८ ॥

इदानीं दिनमानार्थं देशविशेषं तत्र दिनमानं चाह—

भूवृत्तं क्रान्तिभागघ्नं भगणांशविभाजितम्।
अवाप्तयोजनैरर्को व्यक्षाद्यात्युपरिस्थितः॥ ५९॥
परमापक्रमादेवं योजनानि विशोधयेत्।
भूवृत्तपादाच्छेषाणि यानि स्युर्योजनानि तैः॥ ६०॥
अयनान्ते विलोमेन देवासुरविभागयोः।
नाडीषष्ट्या सकृदहर्निशाप्यस्मिन् सकृत्तथा॥ ६१॥
तदन्तरेऽपि षष्ट्यन्ते क्षयवृद्धी अहर्निशोः।
परतो विपरीतोऽयं भगोलः परिवर्त्तते॥ ६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऊने भूवृत्तपादे तु द्विज्यापक्रमयोजनैः ।
धनुर्मृगस्थः सविता देवभागे न दृश्यते ॥ ६३ ॥
तथा चासुरभागे तु मिथुने कर्कटे स्थितः ।
नष्टच्छाया महीवृत्तपादे दर्शनमादिशेत् ॥ ६४ ॥
एकज्यापक्रमानीतैर्योजनैः परिवर्जिते ।
भूमिकक्षाचतुर्थांशे व्यक्षाच्छेषैस्तु योजनैः ॥ ६५ ॥
धनुर्मृगालिकुम्भेषु संस्थितोऽर्को न दृश्यते ।
देवभागेऽसुराणां तु वृषाद्ये भचतुष्टये ॥ ६६ ॥
मेरौ मेषादिचक्रार्धे देवाः पश्यन्ति भास्करम् ।
सकृदेवोदितं तद्वदसुराश्च तुलादिगम् ॥ ६७ ॥

भूपरिधिं क्रान्त्यंशैर्गुणितं भगणांशैश्चक्रांशैर्भाजितम् । लब्धयोजनैरुपरिस्थित आकाशे स्थितः सूर्यो व्यक्षान्निरक्षदेशात् क्रान्तिदिग्वशादुत्तरतो दक्षिणतो वा याति । एवं परमापक्रमाद्यानि योजनान्यागच्छेत् तानि भूपरिधिचतुर्थांशाद्विशोधयेत् । शेषाणि यानि योजनानि स्युस्तैर्योजनैर्देवासुरविभागयोर्निरक्षदेशादुत्तरदक्षिणप्रदेशयोर्यौ देशौ तयोर्विलोमेनायनान्ते रवौ गते सति सकृदेकवारं नाडीषष्ट्या दिनं तथाऽस्मिन् प्रदेशे सकृन्नाडीषष्ट्या निशा च । निरक्षादुत्तरप्रदेशे मिथुनान्तगे रवौ षष्टिघटिकात्मकं दिनमसुरविभागे तद्दक्षिणप्रदेशे च षष्टिघटिकात्मिका रजनी । एवं मकरान्ते रवावुत्तरप्रदेशे षष्टिघटिकात्मिका निशा दक्षिणप्रदेशे च षष्टिघटिकात्मकं दिनमित्यर्थः । तदन्तरे निरक्षतत्प्रदेशयोरन्तरे अहर्निशोः षष्ट्यन्ते षष्टिघटिकामध्ये क्षयवृद्धी भवतः । दिनरात्रिमानयोर्योगस्तत्र षष्टिघटिकात्मको भवतीत्यर्थः । परतस्तदुत्तरदक्षिणप्रदेशतोऽनन्तरं भूपृष्ठे यो देशस्तत्रायं भगोलो विपरीतो वर्त्तते । तत्र त्रिप्रश्नोक्तविधिनाऽग्राचरज्याराश्युदयमानानि न सिध्यन्ति—इति । कथं तत्र गोलस्थितिरित्याह । द्विज्यापक्रमयोजनैः राशिद्वयक्रान्तिजैर्योजनैः 'भूवृत्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रान्तिभागघ्नम्' इत्यादिविधिनाऽऽनीतैरूने भूपरिधिचतुर्थांशे यानि योजनानि निरक्षात् तैर्योजनैर्देवभागे यो देशस्तत्र धनुर्मृगस्थसूर्यो न दृश्यते तथा तैर्योजनैरसुरभागे यो देशस्तत्र मिथुने कर्कटे च स्थितः सूर्यो न दृश्यते। नष्टा छाया भूछाया यत्र तादृशे भूपरिधिचतुर्थांशे निरक्षाद्भूपरिधिचतुर्थभागान्तर्गते देशे सदा रविदर्शनमादिशेत् कथयेद्गणक इति। यत्र देशे यावत्कालमहोरात्रवृत्तानि क्षितिजोर्ध्वगानि तत्र रवेः क्षितिजोर्ध्वगतत्वाद्भूछाया नष्टा भवत्यतस्तावत्कालपर्यन्तं तत्र दिनं भवतीत्यर्थः। एवं भूमिकक्षाचतुर्थांशे एकराशिक्रान्त्याऽऽनीतैर्योजनैः परिवर्जिते यानि शेषाणि योजनानि तैर्निरक्षाद्देवासुरविभागयोर्यौ देशौ तत्र देवभागे धनुर्मृगवृश्चिककुम्भेषु संस्थितोऽर्को न दृश्यते। असुराणां विभागे तु तत्र वृषाद्ये भचतुष्टये स्थितोऽर्को न दृश्यते। एवं मेरौ देवा मेषादिचक्रार्धे स्थितं भास्करं सकृदेवोदितं पश्यन्ति। तद्वदसुराश्च सकृदेवोदितं तुलादिगं भास्करं पश्यन्ति।

अत्रोपपत्तिः। निरक्षाद्याम्योत्तरमण्डले खस्वस्तिकावध्यक्षांशा अहोरात्रवृत्तावधि क्रान्त्यंशाः। तत्समान्तरे भूमौ याम्योत्तरवृत्ते क्रान्त्यंशानां योजनीकरणमनुपातेन। यदि चक्रांशैर्भूपरिधिस्तदा क्रान्त्यंशैः किमिति। लब्धयोजनैः क्रान्तिवशादर्को निरक्षादुत्तरतो दक्षिणतो वाऽऽकाशे स्वाहोरात्रवृत्ते गच्छतीति। परमापक्रमोद्भवयोजनोनभूवृत्तपादयोजनैरन्तरितो यः प्रदेशस्तत्र षट्षष्टिः पलांशा लम्बांशाश्च परमापमभागसमाः। अत उत्तरगोले देवभागे मिथुनान्तस्थे रवावहोरात्रवृत्तस्य क्षितिजोर्ध्वगतत्वाद्रात्र्यभावो दिनं परमं षष्टिघटीतुल्यम्। मकरादिगे रवौ त्वहोरात्रवृत्तस्य क्षितिजाधःस्थितत्वाद्दिनाभावो देवभागे रात्रिमानं परमं षष्टिमितम्। असुरभागे च दिन परमं षष्टिमितं रात्रेरभाव इति।

एवं षट्षष्टिभागतोऽल्पाक्षदेशे दिनमानं रात्रिमानं च षष्टिघटिकाल्पं भवति अहोरात्रवृत्तस्य क्षितिजाऽधऊर्ध्वयोः स्थितत्वात्। द्विराश्युद्भवक्रान्तियोजनोनभूवृत्तपादयोजनैर्निरक्षादुत्तरे दक्षिणे वा यो देशस्तत्र्यंशयुङ्नवरसाः पलांशाः ६९°।२०। तत्र देवभागे मिथुनादिगार्काहोरात्रवृत्तं क्षितिजादुपरि भवति तत एव सकृदुदितरविदर्शनारम्भः। एवं कर्क्यन्तपर्यन्तमहोरात्रवृत्तानां क्षितिजोपरिगतत्वात् सततं रवेर्दर्शनम्। धनुर्मृगस्थाकस्य तदहोरात्रवृत्तयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षितिजाधः स्थितत्वाददर्शनम्। असुरभागे चैतद्विपरीतम्। एवमेकज्यापक्रमानीतैरित्यादिना यो देशस्तत्र साङ्घ्रिगजवाजिसंमिताः पलभागा भवन्ति तत्र धनुर्मृगालिकुम्भाः क्षितिजाधःस्था देवभागे न दृश्या, असुराणां भागे क्षितिजाधःस्थितत्वाद्वृषादिचतुष्टयं न दृश्यम्। मेरौ च देवभागे मेषादिषड्राशयः क्षितिजोर्ध्वगतत्वाद् दृश्या असुरभागे च तुलादिषड्राशयो दृश्या इत्यादि सर्वं गोलोपरि प्रत्यक्षं दृश्यते। आचार्योक्तप्रकार एव भास्करेणापि सिद्धान्तशिरोमणौ विन्यस्तस्तत्र योजनतः पलांशानानीय पठिताः।

तद्वाक्यं च।

त्र्यंशयुङ्नवरसाः पलांशका,
यत्र तत्र विषये कदाचन।
दृश्यते न मकरो न कार्मुकं
किञ्च कर्किमिथुनौ सदोदितौ॥
यत्र साङ्घ्रिगजवाजिसम्मिता-
स्तत्र वृश्चिकचतुष्टयं न च।
दृश्यतेऽथ वृषभाच्चतुष्टयं
सर्वदा समुदितं च लक्ष्यते॥
यत्र तेऽथ नवतिः पलांशका-
स्तत्र काञ्चनगिरौ कदाचन।
दृश्यते न भदलं तुलादिकं
सर्वदा समुदितं क्रियादिकम्॥ इति॥

अथोर्ध्वगदृष्टिवशेन रविदर्शनविचारः क्रियते।

रविकक्षागोले गर्भक्षितिजं यत्र लग्नं तस्मादधो रविकक्षायां दृश्यांशाः कल्प्या यत्रस्थो रविरूर्ध्वगेन द्रष्ट्रा दृश्यत इति कल्प्यते तदा दृश्यांशाग्राद् भूपृष्ठोपरि या स्पर्शरेखा सोर्ध्वाधररेखायां यत्र लग्ना तत्स्थदृष्टिवशेनावश्यं द्रष्ट्रा दृश्यांशाग्रस्थो रविर्दृश्यतेऽस्तत्र भूपृष्ठादूर्ध्वाधररेखायां स्पर्शरेखावधि द्रष्टुरुच्छ्रितिरिति वेद्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ तदर्थं क्षेत्रदर्शनम् —



अत्र ग = गर्भक्षितिजरविगोलयोगबिन्दुः । ∠गकेर = गर्भक्षितिजादधो दृश्यांशाः । र–रवितो भुवि स्पर्शरेखा रक स्पदृ–रेखा । स्प = भूस्पर्शबिन्दुः । ∠केरक = रवेः परमलम्बनम्=कुच्छन्नकलासञ्ज्ञं च । केरक–त्रिभुजे ∠गकर = दृ + कु = ∠दृ क के = यु । (दृ = दृश्यांशाः । कु = कुच्छन्नकलाः) ततो युकोटि = ∠क दृके । ततः केस्पदृ त्रिभुजे त्रिकोणमित्या केदृ $= \frac{\text{केस्प} \times \text{त्रि}}{\text{कोज्यायु}} = \frac{\frac{1}{2}\text{ भूव्या} \times \text{त्रि}}{\text{कोज्यायु}}$ । एवमेतद्वैपरीत्येन दृष्ट्युच्छ्रायाद्दृश्यांशसाधनम् ।

सौम्यसमस्थानादधो लम्बांशान्तरे याम्योत्तरवृत्ते नाडीवृत्तस्य सम्पातस्ततोऽधः परमक्रान्त्यंशान्तरे मकरादिद्युरात्रवृत्तस्य योगोऽतः सौम्यसमस्थानाल्लम्बांशपरक्रान्तियोगादधो न रवेः सञ्चारः । अतो यदि दृश्यांशाः = दृ = लम्बांशाः + परक्रान्त्यंशाः । तदा यद्दृष्ट्युच्छ्रायस्तद्वशेन सदा रविदर्शनम् । परन्तु तदा दृ + कु = युतिर्यदिनवत्यंशाल्पा तदैव रकस्प–स्पर्शरेखाया ऊर्ध्वाधररेखया सहोर्ध्वभागे योगः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतःदृ + कु = लं + पक्रा + कु ∠ ९०

∴ लं < ९० – (पक्रा + कु) अर्थादक्षांशा यदि कुच्छन्नपराक्रान्तियोगतोऽधिका यत्र तत्रैवैतादृशी दृष्ट्युच्छ्रितिर्भवितुमर्हति, यद्वशेन सततं रविदर्शनं भवति । अत्रान्ये विशेषाः कमलाकरकृतसिद्धान्ततत्त्वविवेकत्रिप्रश्नाधिकारे द्रष्टव्या इत्यलं प्रसङ्गागतविचारेण ॥ ५९—६७ ॥

इदानीं रविभ्रमणे विशेषमाह—

भूमण्डलात् पञ्चदशे भागे देवेऽथ वाऽसुरे ।
उपरिष्टाद् व्रजत्यर्कः सौम्ययाम्यायनान्तगः ॥ ६८ ॥

तदन्तरालयोश्छाया याम्योदक् सम्भवत्यपि ।
मेरोरभिमुखं याति परतः स्वविभागयोः ॥ ६९ ॥

भूमण्डलात् पञ्चदशे भागे देवे देवभागे वाऽसुरेऽसुरभागे सौम्ययाम्यायनान्तगो रविरुपरिष्टात् तन्मण्डलस्य पञ्चदशो भागश्चतुर्विंशत्यंशास्तत्समैरक्षांशैर्देवभागे सौम्यायनान्तस्थे रवावक्षान्यदिक्क्रान्तिसाम्ये मध्यनतांशाभावात् खमध्ये रविर्भवति । एवमसुरभागे तत्समैरक्षांशैर्याम्यायनान्तस्थो रविः खमध्यतो व्रजतीति गोलतः प्रसिद्धम् । तदन्तरालयोर्निरक्षदेशात् पञ्चदशभागमध्यस्थितदक्षिणोत्तरदेशयोश्छायाशङ्कोर्मध्याह्नच्छायाग्रं दक्षिणाग्रमुत्तराग्रं वा भवति । उत्तरदेशे मध्यनतांशानां दक्षिणत्वाच्छायाग्रमुत्तरमुत्तरत्वाच्च दक्षिणम् । दक्षिणदेशे च मध्यनतांशानामुत्तरत्वाच्छायाग्रं दक्षिणं दक्षिणत्वाच्चोत्तरमिति । एवं परतस्ततोऽनन्तरं परक्रान्त्यधिकाक्षे देशे मेरोरभिमुखं स्वविभागयोर्याति सति क्रमेण छायाग्रं दक्षिणमुत्तरं स्यादिति । अर्थाद्देवभागे याति छायाग्रमुत्तरं दैत्यभागे च याति छायाग्रं दक्षिणमिति गोलदर्शनतः स्फुटम् ॥ ६८—६९ ॥

अथ कथं पर्येति भुवनानि विभावयन्निति प्रश्नोत्तरमाह—

भद्राश्वोपरिगः कुर्याद्भारते तूदयं रविः ।
रात्र्यर्धं केतुमाले तु कुरावस्तमयं तदा ॥ ७० ॥

भारतादिषु वर्षेषु तद्वदेव परिभ्रमन् ।
मध्योदयार्धरात्र्यस्तकालान् कुर्यात्प्रदक्षिणम् ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भद्राश्ववर्षोपरिगो रविर्भारतवर्षे स्वोदयं कुर्यात् । भद्राश्ववर्षोपरिगतत्वात् तत्र मध्याह्नमिति स्फुटम् । तदा तस्मिन् काले केतुमालवर्षेऽर्धरात्रं कुरौ कुरुवर्षे चास्तमयं स्वास्तं कुर्यात् । अत्र भद्राश्ववर्षादिग्रहणेन तत्रत्यप्रधाननगरीणां यमकोटि-लङ्का-रोमकसिद्धपुरीणां ग्रहणं कर्त्तव्यमिति स्फुटं गोलविदां 'लङ्कापुरेऽर्कस्य यदोदयः स्यादिति भास्करोक्तेश्च । अथ भारतादिषु त्रिषु भारतकेतुमालकुरुवर्षेषु तद्वद्भद्राश्ववर्षोपरिगवत् परिभ्रमन् स्वस्वाभिमतस्थानोपरि स्थितिं कुर्वन् सूर्यः प्रदक्षिणं यथा स्यात्तथा सव्यक्रमेण उक्तचतुर्वर्षेषु मध्योदयार्धरात्र्यस्तकालान् कुर्यात् । अत्रैतदुक्तं भवति । भारतवर्षोपरिगे रवौ भारतकेतुमालकुरुभद्राश्ववर्षेषु क्रमेण मध्याह्नोदयार्धरात्रास्तकालाः स्युः । एवमन्यवर्षमध्याह्नतोऽपरवर्षकालाश्चिन्त्याः किं लेखविस्तरेण । एतत् सर्वं गोलस्थितितः स्फुटम्—इति ॥ ७०—७१ ॥

इदानीं भचक्रस्थितिमाह—

ध्रुवोन्नतिर्भचक्रस्य नतिर्मेरुं प्रयास्यतः ।
निरक्षाभिमुखं यातुर्विपरीते नतोन्नते ॥ ७२ ॥
भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्रवहानिलैः ।
पर्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम् ॥ ७३ ॥

मेरुं मेर्वभिमुखं यास्यतो गच्छतो नरस्य ध्रुवोन्नतिरुत्तरध्रुवोन्नतिस्तथा भचक्रस्य नतिर्भवति । एवमुत्तरभागतो निरक्षाभिमुखं यातुर्नरस्य विपरीते नतोन्नते भवतः । उत्तरध्रुवस्य नतिर्भचक्रस्य चोन्नतिर्भवति । 'उदग्दिशं याति यथा यथा नरः' इत्यादिभास्करोक्तेरिदं स्फुटमस्ति । निरक्षाद्बहुत्रोत्तरदेशेऽपि सौम्यध्रुवदर्शनं न भवत्यतोऽत्र सिद्धान्तप्रतिपादने भूपृष्ठावराधनमनङ्गीकृत्य भूगर्भतः सर्वं विचार्यमिति स्फुटं सुबुद्धिनाम् । ध्रुवयोर्बद्धं भचक्रं प्रवहानिलैराक्षिप्तमजस्रं सततं पश्चिमाभिमुखं पर्येति भ्रमति । चन्द्रादीनां ग्रहाणां यथाक्रमं कक्षाश्च तस्मिन् भचक्रे नद्धा बद्धाश्च भ्रमन्तीति 'कथं पर्येति भगणः सग्रहोऽयं किमाश्रयः' इति प्रश्नोत्तरमेतेन जातमिति ॥ ७२—७३ ॥

इदानीं पित्र्यं दिनं मासेन कथं भवतीत्यस्योत्तरमाह—

सकृदुद्गतमब्दार्धं पश्यन्त्यर्कं सुरासुराः ।
पितरः शशिगाः पक्षं स्वदिनं च नरा भुवि ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा पूर्वोदितप्रकारेण खमध्यस्थेऽर्के मध्याह्ने भवतीत्यादिरीत्या सकृदुदितमर्कमब्दार्धपर्यन्तं पश्यन्ति भुवि नराश्च स्वदिनमानपर्यन्तं पश्यन्ति तथैव दर्शान्ते रवेरुर्ध्वयाम्योत्तरवृत्ते स्थितत्वात् पूर्णान्ते चाधो याम्योत्तरवृत्ते स्थितत्वाच्च शशिलोकनिवासिनः पितरः सकृदुदितं रविं पक्षं पक्षपर्यन्तं पश्यन्ति। दर्शे मध्याह्नत्वात् पूर्णान्ते च निशीथत्वादेषां पितृणां कृष्णपक्षदले रविरुदेति शुक्लपक्षदले चास्तमेतीति सिध्यति। तथा च भास्करः।

"विधूर्ध्वभागे पितरो वसन्तः
स्वाधः सुधादीधितिमामनन्ति।
पश्यन्ति तेऽर्कं निजमस्तकोर्ध्वे
दर्शे यतोऽस्माद्द्युदलं तदैषाम्॥
भार्धान्तरत्वान्न विधोरधःस्थं
तस्मान्निशीथः खलु पौर्णमास्याम्।
कृष्णे रविः पक्षदलेऽभ्युदेति
शुक्लेऽस्तमेत्यर्थत एव सिद्धम्॥ इति॥

यस्मिन् वृत्ते ग्रहबिम्बं भ्रमति तदन्तर्गतो द्रष्टा यदि सर्वदा ग्रहबिम्बस्यैकं भागमेव पश्यति तदा ग्रहबिम्बं स्वाक्षोपरि स्वाङ्गभ्रमं करोति। यथा यदा वयं देवमन्दिरस्य प्रदक्षिणां कुर्मस्तदा भ्रमणवृत्तान्तर्गतो द्रष्टा सर्वदाऽस्मद्दक्षिणभाग-मेवास्मदङ्गभ्रमणेन पश्यति, भ्रमणवृत्तबहिर्गतो द्रष्टा च स्वाभिमुखस्मच्छरीरा-वयवं भिन्नं भिन्नं पश्यतीति प्रत्यक्षप्रतीतिः। यथा बाला वात्ययावद्भूमौ लघुप्रदेशे भ्रमन्तः स्वाङ्गभ्रममुत्पादयन्ति तथा वयं महति प्रदेशे प्रदक्षिणापरिधौ भ्रमन्तः स्वाङ्गभ्रममुत्पादयामः। भ्रमणवृत्तस्यात्यल्पत्वात्तद्बहिःस्था द्रष्टारो बालानां स्वाङ्गभ्रमेण भिन्नान् भिन्नानवयवान् पश्यन्तीति। अथ यस्मिन् वृत्ते चन्द्रो भ्रमति तदन्तर्गता वयं सदा चन्द्रस्य कलङ्कसहितं तमेव भागं पश्यामोऽतः पूर्वोदितसिद्धान्तेन चन्द्रो भ्रमन् स्वाङ्गभ्रममुत्पादयतीति सिध्यति। अथ यच्च चन्द्रे कलङ्कनाम्ना प्रसिद्धं तच्च सूक्ष्मदर्शकयन्त्रबलेन चन्द्रोपरि वनं पर्वतादिकं चास्तीति स्फुटं दृश्यते। नव्यैस्तत्पर्वतादीनामुच्छ्रितिज्ञानं च कृतमस्तीत्यलं पल्लवितेन॥ ७४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं ग्रहाणां गतावतुल्यत्वे कारणमाह—

उपरिष्टस्य महती कक्षाऽल्पाऽधःस्थितस्य च ।
महत्या कक्षया भागा महान्तोऽल्पास्तथाऽल्पया ॥ ७५ ॥
कालेनाल्पेन भगणं भुङ्क्तेऽल्पभ्रमणाश्रितः ।
ग्रहःकालेन महता मण्डले महति भ्रमन् ॥ ७६ ॥
स्वल्पयातो बहून् भुङ्क्ते भगणान् शीतदीधितिः ।
महत्या कक्षया गच्छन् ततः स्वल्पं शनैश्चरः ॥ ७७ ॥

उपरिस्थितस्य ग्रहस्य कक्षा भ्रमणवृत्तं महती वर्त्ततेऽधःस्थितस्य चाल्पा । सर्वासु कक्षासु चक्रांशा वा चक्रकला विभागाः समा अतो महत्या कक्षया भागा महान्तोऽल्पया कक्षया चाल्पा भवन्ति । ग्रहाणां योजनात्मिका गतिस्तु समा वर्त्तत इति पूर्वमेवोक्तम् । अतोऽल्पभ्रमणाश्रितोऽल्पकक्षावृत्तस्थितो ग्रहोऽल्पेन कालेन भगणं कक्षावृत्ताश्रितं द्वादशराश्यात्मकं प्रमाणं भुङ्क्ते । महति मण्डले कक्षावृत्ते च भ्रमन् ग्रहो महता कालेन भगणं भुङ्क्ते । अतः स्वल्पायां कक्षायां जातः शीतदीधितिश्चन्द्रो ह्यकेयुगे बहून् भगणान् भुङ्क्ते । शनैश्चरश्च महत्या कक्षया गच्छन् सन् ततश्चन्द्रात् स्वल्पं भगणमानं भुङ्क्त इति ॥ ७५—७७ ॥

इदानीं 'दिनाब्दमासहोराणामधिपा न समाःकुतः' इति प्रश्नोत्तरमाह—

मन्दादधः क्रमेण स्युश्चतुर्था दिवसाधिपाः ।
वर्षाधिपतयस्तद्वत् तृतीयाश्च प्रकीर्त्तिताः ॥ ७८ ॥
ऊर्ध्वक्रमेण शशिनो मसानामधिपाः स्मृताः ।
होरेशाः सूर्यतनयादधोऽधः क्रमशस्तथा ॥ ७९ ॥

कक्षाक्रमेण मन्दात् शनैश्चरादधःक्रमेण चतुर्था दिवसाधिपा भवन्ति । यथा कक्षाक्रमेण श । गु । भौ । र । शु । बु । चं । तत्र प्रथमं यदि शनिर्दिवसपतिस्तदा द्वितीयः शनेश्चतुर्थो रविस्ततश्चतुर्थश्चन्द्रस्तृतीयः । चन्द्राच्चतुर्थो भौमश्चतुर्थं इत्यादयः । तद्वच्छनैश्चरादधःक्रमेण तृतीया वर्षाधिपतयः प्राचीनैः प्रकीर्त्तिताः कथिता । यथा प्रथमः शनिस्ततस्तृतीयो भौमस्ततस्तृतीयः शुक्र इत्यादयः । अथ शशिनश्चन्द्राद्ूर्ध्वक्रमेण मासानामधिपाः पूर्वैः स्मृताः । यथा प्रथमः शशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयो बुधस्तृतीयः शुक्र इत्यादयः। तथा सूर्यतनयाच्छनेरधोऽधःक्रमेण होरेशा भवन्ति। यथा यदि प्रथमहोरेशः शनिस्तदा द्वितीयो गुरुस्तृतीयो भौम इत्यादयः। सूर्योदयात्सार्धघटीद्वयेनैकैका होरा भवति। यस्मिन् दिने यो वारःस एव प्रथमहोरायाः पतिर्भवति ततः पूर्वोक्तप्रकारेणान्ये होरेशा ज्ञेयाः। अत्र प्राचीनकारिका च।

वारप्रवृत्तिसमयाद्धोरा सार्धघटीद्वयम्।
अपि तद्वारनाथस्य षष्ठः षष्ठस्ततोऽपरः॥ इति॥ ७८—७९॥

इदानीं भकक्षामाह—

भवेद्भकक्षा तीक्ष्णांशोर्भ्रमणं षष्टिताडितम्।
सर्वोपरिष्टाद् भ्रमति योजनैस्तैर्भमण्डलम्॥ ८०॥

तीक्ष्णांशो रवेर्भ्रमणं कक्षा षष्टिगुणितं भकक्षा नक्षत्रणां कक्षा भवेत्। सर्वोपरिष्टात् सर्वेषां ग्रहाणामुपरि दूरे तैर्योजनैर्भमण्डलं कल्पितनक्षत्राणां वृत्तं भ्रमति। नक्षत्राणां स्थितिः पृथिव्या अनन्तदूरे वेधेन सिध्यति। इयं भकक्षा चाचार्यैरदृष्टानां कतिपयनक्षत्राणां कल्पितेति मे मतम्। अत एव भास्करः "अत्रार्ककक्षातो भकक्षा षष्टिगुणा। अर्को भषष्ट्यंश इत्यागमप्रामाण्येनाङ्गीकृता' इत्याह॥ ८०॥

इदानीं खकक्षामाह—

कल्पोक्तचन्द्रभगणा गुणिताः शशिकक्षया।
आकाशकक्षा सा ज्ञेया करव्याप्तिस्तथा रवेः॥ ८१॥

"ग्रहर्क्षकक्षाः किमात्राः" इत्यस्य प्रश्नोत्तरे पूर्वं नक्षत्रकक्षोक्ता। अधुना ग्रहाणां कक्षानयनार्थं खकक्षामाह। कल्पे य उक्ताश्चन्द्रभगणाः 'एते सहस्रगुणिताः कल्पे स्युर्भगणादयः' इत्यादिना ते शशिकक्षया गुणिताः सा तथा नक्षत्रकक्षावदाकाशकक्षा ज्ञेया। नन्वनन्तस्याकाशस्य कथमियत्ता कर्तुं शक्यत इत्याह। आकाशे चतुर्दिक्षु यावत्—रवेः कराणां किरणानां व्याप्तिस्तत्परिधेः प्रमाणमिदं ज्ञेयम्। एतत् सर्वमागमप्रामाण्येन मान्यम्। वस्तुतो रवेश्चलत्वात्—व्योम्नि कराणां सञ्चारेण यावत्तमोहानिस्तदाकारो वृत्तवन्न भवति। अत एव कल्पकुदिन—गतियोजनघातसमेयं खकक्षा कल्पे ग्रहाणां गमनयोजनैः समेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वक्तुं शक्यते, वेधेन गतियोजनज्ञानं च भवितुमर्हति तत्कल्पकुदिनघातसमेयं सङ्ख्या भवति वा नेति परीक्षा च भवितुमर्हति। अत एव भास्करः।

"ब्रह्माण्डमेतन्मितमस्तु नो वा
कल्पे ग्रहः क्रामति योजनानि।
यावन्ति पूर्वैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः॥" इति।

अत्रोपपत्तिः। खकक्षातुल्यानि योजनानि कल्पे ग्रहः क्रामति भगणाश्च पाठपठितसभाः। एकभगणभोगेन ग्रहः खकक्षावृत्तयोजनानि भ्रमति। ततोऽनुपातो यदि कल्पग्रहभगणैः खकक्षामितयोजनानि तदैकेन भगणेन किमिति। जाता ग्रहकक्षा $= \frac{\text{ख क}}{\text{क ग्र भ}}$। आचार्येणात्र ग्रहस्थाने शश्येव गृहीत स्तेन श क $= \frac{\text{खक}}{\text{कशभ}}$ हरगुणितेन श क × क श भ = ख क। अत उपपन्नमानयनम्॥ ८१॥

इदानीमन्यकक्षार्थं योजनागत्याद्यर्थं चाह—

सैव यत्कल्पभगणैर्भक्ता तद्भ्रमणं भवेत्।
कुवासरैर्विभज्याह्नः सर्वेषां प्राग्गतिः स्मृता॥ ८२॥
भुक्तियोजनजा सङ्ख्या सेन्दोर्भ्रमण सङ्गुणा।
स्वकक्षाप्ता तु सा तस्य तिथ्याप्ता गतिलिप्तिका॥८३॥

सैव खकक्षा यस्य ग्रहस्य भगणैर्भुक्ता लब्धं तस्य भ्रमणं कक्षा भवेत्। तां खकक्षां कल्पकुदिनैर्विभज्य लब्धं सर्वेषां ग्रहाणां योजनात्मिकाऽह्न एकदिवसस्य प्राग्गतिर्भवेत् 'समा गतिश्च योजनैर्नभःसदां सदा भवेत्' इत्यादि भास्करोतिश्च। गतियोजनसंङ्ख्या या सा चन्द्रकक्षागुणिता खकक्षभक्त्या या लब्धिः सा पञ्चदशभक्ता तस्य ग्रहस्य सा गतिकला भवेत्।

अत्रोपपत्तिः। ग्रहकक्षानयनस्य गतियोजनानयनस्य च प्रागुक्ता। गतिकलानयनार्थं चानुपातः। यदि ग्रहकक्षया ग्रहयोजनात्मिका गतिर्लभ्यते तदा चन्द्रकक्षया किमिति। लब्धा चन्द्रकक्षायां ग्रहयोजनात्मिका गतिस्तत्र पञ्चदश योजनैरेका कलास्तः पञ्चदशभक्ता कलात्मिका गतिः स्यादिति॥ ८२—८३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं ग्रहकक्षाव्यासार्धमाह—

कक्षा भूकर्णगुणिता महीमण्डलभाजिता ।
तत्कर्णा भूमिकर्णोना ग्रहौच्च्यं स्वं दलीकृताः ॥ ८४ ॥

ग्रहकक्षा भूकर्णेन भूव्यासेन गुणिता महीमण्डलेन भूपरिधिना भजिता तदा तत्कर्णा ग्रहकक्षाव्यासाः स्युस्ते भूव्यासेनोना दलीकृताश्च एवं ग्रहोच्च्यं स्वपृष्ठस्थानाद् ग्रहकक्षावधि ग्रहोच्छ्रितिः स्यादिति ।

अत्रोपपत्तिः । भूपरिधिना भूव्यासस्तदा ग्रहकक्षया किमिति । लब्धो ग्रहकक्षाव्यासः = ग्रक । तदर्धं भूकेन्द्राद् ग्रहोच्छ्रितिः = $\frac{\text{ग्रक}}{२}$ । इयं भूव्यासार्धेनोना स्वपृष्ठस्थानादुच्छ्रितिः = $\frac{\text{ग्रक}}{२} - \frac{\text{भूक}}{२} = \frac{\text{ग्रक} - \text{भूक}}{२}$ ।

अत उपन्नम् । एवं 'किमुत्सेधाः' इति प्रश्नस्योत्तरं जातम् ॥ ८४ ॥

इदानीं पूर्वोक्तप्रकारेण ग्रहकक्षा आनीय पठति—

खत्रयाब्धिद्विदहनाः कक्षा तु हिमदीधितेः ।
ज्ञशीघ्रस्याङ्कखद्वित्रिकृतशून्येन्दवस्तथा ॥ ८५ ॥
शुक्रशीघ्रस्य सप्ताग्निरसाब्धिरसषड्यमाः ।
ततोऽर्कबुधशुक्राणां खखार्थैकसुरार्णवाः ॥ ८६ ॥
कुजस्याप्यङ्कशून्याङ्कषड्वेदैकभुजङ्गमाः ।
चन्द्रोच्चस्य कृताष्टाब्धिवसुद्वित्र्यष्टवह्नयः ॥ ८७ ॥
कृतर्त्तुमुनिपञ्चाद्रिगुणेन्दुविषया गुरोः ।
स्वर्भानोर्वेदतर्काष्टद्विशैलार्थखकुञ्जराः ॥ ८८ ॥
पञ्चबाणाक्षिनागर्त्तुरसाद्र्यर्काः शनेस्ततः ।
भानां रविखशून्याङ्कवसुरन्ध्रशराश्विनः ॥ ८९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खव्योमखत्रयखसागरषट्कनाग-
व्योमाष्टशून्ययमरूपनगाष्टचन्द्राः ।
ब्रह्माण्डसम्पुटपरिभ्रमणं समन्ता-
दभ्यन्तरे दिनकरस्य करप्रसारः ॥ ९० ॥

इति सूर्यसिद्धान्ते भूगोलाध्यायः ॥ १ ॥

हिदीधितेश्चन्द्रस्य	कक्षा = ३२४३०	योजनानि ।
बुधशीघ्रोच्चस्य	कक्षा = १०४३२०९	योजनानि ।
शुक्रशीघ्रोच्चस्य	कक्षा = २६६४६३७	योजनानि ।
सूर्यबुधशुक्राणां	कक्षा = ४३३१५००	योजनानि ।
भौमस्य	कक्षा = ८१४६९०९	योजनानि ।
चन्द्रोच्चस्य	कक्षा = ३८३२८४८४	योजनानि ।
बृहस्पतेः	कक्षा = ५१३७५७६४	योजनानि ।
स्वर्भानोः राहोः	कक्षा = ८०५७२८६४	योजनानि ।
शनैश्चरस्य	कक्षा = १२७६६८२५५	योजनानि ।
भानां नक्षत्रणां	कक्षा = २५९८९००१२	योजनानि ।
आकाशस्य	कक्षा = १८७१२०८०८६४००००००	यो० ।

इयमेव ब्रह्माण्डसम्पुटस्य परिभ्रमण परिधिः । अस्याभ्यन्तरे समन्ताच्चतुर्दिक्षु दिनकरस्य सूर्यस्य करप्रसारः किरणानां प्रसृतिर्भवति । खकक्षा ग्रहभगणहृता खकक्षेति पूर्वं प्रतिपादिता । तत्र लब्धावर्धाधिके रूपं ग्राह्यमर्धाल्पे त्याज्यमिति नियमेन सर्वा निरवयवाः पठिताः । प्रथमं सावयवां रविकक्षामानीय तां षष्टिगुणां कृत्वा नक्षत्रकक्षा पठिताऽतः षष्टिगुणितपठितरविकक्षा समा सा नेति सुधियामतिरोहितमेव । ग्रहभगणानां खकक्षायाश्च भेदाद्—भास्करोक्तग्रहकक्षाः सौरोक्तादबहुत्र भिन्ना इति । खकक्षाविषये भास्करोऽपि मतान्तरमाह—

"करतलकलितामलकवदमलं सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहततमसो नभसः स परिधिरुदितस्तैः ॥" इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रग्रहाणामुच्छ्रितिषु प्रायः सिद्धान्तेषु बहुत्र भेदः। सम्प्रति वेधोपलब्ध-मानतोऽपि महदन्तरमिति सुज्ञैर्ज्ञेयम्। एवं ग्रहकक्षैव तत्पाततुङ्गयोः कक्षाऽत्र कक्षाप्रकारेण तदानयनार्थं तदीया कक्षा पृथक् कल्पितेति भास्करोक्तिरतिरमणीयति। ८६—९० ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा।
सुखायामृतवर्षिण्यां गतो भूगोलसिद्धिदः॥

॥ इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यां भूगोलाध्यायः॥ १॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ ज्योतिषोपनिषदध्यायः

तत्र तावदाचार्यो गोलं कथं रचयोदित्युपदिशति—

अथ गुप्ते शुचौ देशे स्नातः शुचिरलङ्कृतः ।
सम्पूज्य भास्करं भक्त्या ग्रहान् भान्यथ गुह्यकान् ॥ १ ॥
पारम्पर्योपदेशेन यथाज्ञानं गुरोर्मुखात् ।
आचार्यः शिष्यबोधार्थं सर्वं प्रत्यक्षदर्शिवान् ॥ २ ॥
भूभगोलस्य रचनां कुर्यादाश्चर्यकारिणीम् ।

प्रथमोऽथ शब्दो मङ्गलवाची द्वितीयः पूर्वोक्तानन्तर्यार्थकः । आचार्यो गुप्ते एकान्ते शुचौ पवित्रे देशे स्नातः कृतस्नातः शुचिः शुद्धमना । अलंकृत स्वोपास्य देवताघोतकचन्दनादिभिर्भूषितो भक्त्या भास्करं रविं चन्द्रदीन् ग्रहान् दास्रादीनि नक्षत्राणि यन्त्ररचनायां कुशलान् गुह्यकान् यक्षादींश्च सम्पूज्य समभ्यर्च्य । पारम्पर्योपदेशेन गुरोर्मुखाच्छ्रथाश्रुतं ज्ञानं सर्वं शिष्यबोधार्थं प्रत्यक्षदर्शिवान् प्रत्यक्षं दृष्टिवान् । आश्चर्यकारिणीं भूभगोलस्य भूगोलसहितस्य भगोलस्य रचनां कुर्यादिति मेरुपृष्ठे मुनीन्न प्रति स विशिष्टो मुनिरुक्तवान् । मन्मते रङ्गनाथव्याख्यानमत्र न समीचीनमिति सुधीभिर्भृशं विभावनीयम् ।१-२॥

इदानीं गोलरचनामुपदिशति—

अभीष्टं पृथिवीगोलं कारयित्वा तु दारवम् ॥ ३ ॥
दण्डं तन्मध्यगं मेरोरुभयत्र विनिर्गतम् ।
आधारकक्षाद्वितयं कक्षा वैषुवती तथा ॥ ४ ॥
भगणांशाङ्गुलैः कार्या दलितैस्तिस्त्र एवताः ।
स्वाहोरात्रार्धकर्णैश्च तत्प्रमाणानुमानतः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रान्तिविक्षेपभागैश्च दलितैर्दक्षिणोत्तरैः ।
स्वैः स्वैरपक्रमैस्तिस्रो मेषादीनामपक्रमात् ॥ ६ ॥
कक्षाः प्रकल्पयेत् ताश्च कर्क्यादीनां विपर्ययात् ।
तद्वत् तिस्रस्तुलादीनां मृगादीनां विलोमतः ॥ ७ ॥
याम्यगोलाश्रिताः कार्याः कक्षाधाराद् द्वयोरपि ।
याम्योदग्गोलसंस्थानां भानामभिजितस्तथा ॥ ८ ॥
सप्तर्षीणामगस्त्यस्य ब्रह्मादीनां च कल्पयेत् ।
मध्ये वैषुवती कक्षा सर्वेषामेव संस्थिता ॥ ९ ॥
तदाधारयुतेरूर्ध्वमयने विषुवद्द्वयम् ।
विषुवत्स्थानतो भागैः स्फुटैर्भगणसञ्चरात् ॥ १० ॥
क्षेत्राण्येवमजादीनां तिर्यग्ज्याभिः प्रकल्पयेत् ।
अयनादयनं चैव कक्षा तिर्यक् तथाऽपरा ॥ ११ ॥
क्रान्तिसञ्ज्ञा तया सूर्यः सदा पर्येति भासयन् ।
चन्द्राद्याश्च स्वकैः पातैरपमण्डलमाश्रितैः ॥ १२ ॥
ततोऽपकृष्टा दृश्यन्ते विक्षेपान्तेष्वपक्रमात् ।

सच्छिद्रं दारवं काष्ठघटितमभीष्टं स्वेच्छाकल्पितव्यासप्रमाणं भूगोलं निपुणशिल्पिना कारयित्वा तन्मध्यगं मेरोर्दडं मेरुसञ्ज्ञकं दण्डमुभयत्र विनिर्गतं कुर्यात् । तत्र दण्डे प्रोतं कक्षाद्वितयं कुर्यात् । एकं याम्योत्तरवृत्तानुरूपमपरं तदर्धच्छेदेन क्षितिजाकारं मेरुदण्डाग्रयोः प्रोतं कार्यमित्यर्थः । तथा तत्र वैषुवती कक्षा च देया । मेरुदण्डाग्राभ्यां वृत्तयोर्नवत्यंशान्तरे चिह्ने कार्ये, तच्चिह्नद्वयोपरि आधारवृत्तद्वयतुल्यं वृत्तं बध्नीयात्, तत् पूर्ववृत्तद्वयोपरि लम्बरूपत्वाद्विषुवद्वृत्तसञ्ज्ञं ज्ञेयमित्यर्थः । तास्तिस्रः पूर्वोदिताः कक्षा भगणांशाङ्गुलैर्दलितैभागैरङ्किता एव कार्याः । न्यूनाधिक्यं न भवेदिति सर्वदा ध्येयम् । मेषादीनां क्रान्तीनां ये विक्षिप्तभागा याम्योत्तरवृत्ते दलिता अङ्कितास्तैर्दक्षिणोत्तरैः क्रान्तिविक्षेपभागैः स्वैः स्वैरपक्रमैः क्रान्त्यंशैः स्वस्वाहोरात्रव्यासार्धैस्तस्य विषुवद्वृत्तस्य प्रमाणानुमानतस्तिस्रः कक्षाः कार्याः । त्रिज्याव्यासार्धेन यदि विषुवद्वृत्त तदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्युज्याव्यासार्धेन किमित । लब्धं द्युज्यावृत्तप्रमाणं भवेदेवं मेषादित्रयाणां द्युज्यावृत्तकक्षाः कार्यास्ता विषुवद्वृत्तसमानान्तरा दक्षिणोत्तरवृत्तस्थस्वस्वक्रान्त्यग्रगताः कार्या इत्यर्थः । ताः स्वस्वापक्रमात् स्वस्वक्रान्त्यग्रात्—मेषादिराशित्रयाणां-कक्षाः कल्पयेत्, ता एव विलोमेन कर्कटादित्रयाणामहोरात्रवृत्तानि च कल्पयेद्-गणक इतिशेषः । तद्वन्मेषादित्रत् तुलादीनामहोरात्रवृत्तकक्षाः याम्यगोलाश्रिताः स्वस्वापक्रमात् कार्यास्ता एव विपर्ययात् —मृगादीनामिति ।

अत्र 'अपक्रमात्' इत्यस्य रङ्गनाथकृता व्याख्या गोलयुक्तिविरुद्धा विदा ज्ञेया । एवं कक्षाधाराद्विषुवद्वृत्तस्याधाराद् द्वयोर्दक्षिणोत्तरभागयोरपि याम्योदग्गोलसंस्थानां नक्षत्रणां तथाऽभिजितो नक्षत्रस्य सप्तर्षीणामगस्त्यस्य चाहोरात्रवृत्तकक्षाः कल्पयेद्गणक इति शेषः । सर्वेषामहोत्रवृत्तानां मध्ये तु वैषुवती कक्षा विषुवद्वृत्त संस्थितेति द्युज्यावृत्तानां निवेनैव स्फुटम् । तस्य विषुवद्वृत्तस्य तथाऽऽधारवृत्तस्यैकस्य क्षितिगानुकार्युन्मण्डलस्य च या युतिस्तस्या ऊर्ध्वमुपरि प्राचि पश्चिमे च त्रिभान्तरे यत्र कर्किमृगादिद्युज्यावृते याम्योत्तरे लग्ने तत्रायने दक्षिणोत्तरायणसन्धिस्थाने भवतः । तदाधारयुतिश्च विषुवद्द्वयं भवति । यत्र नाडीमण्डलोन्मण्डलयोः प्राचि सम्पातस्तत्र सायनमेषादिर्यत्र च पश्चिमे सम्पातस्तत्र सायनतुलादिरित्यर्थः । विषुवत्स्थानतः सायनमेषादेः सकाशात् स्फुटे राशिसम्बन्धिभिर्भागैस्त्रिशन्मितैर्भगणसञ्चाराद्राशिसमूहनिवेशात् तिर्यग्-ज्याभिरेवमजादीनां मेषादीनां क्षेत्राणि प्रकल्पयेद्गणक इति शेषः । मेषादिज्याः कर्णास्तत्क्रान्तिज्या भुजाः । भुजकर्णवर्गान्तरमूलं तद्द्युज्यावृत्तेषु कोटय इति क्रान्तिक्षेत्राणि प्रकल्पयेदित्यर्थः । तथा प्रथमायनाद् द्वितीयमयनं यावत् तत्र गता तिर्यगेकाऽपरा कक्षा तथा विषुवद्वृत्तसदृशी कार्या । अयनयोरुपरिगता विषुवत्स्थानगता चैका विषुवद्वृत्तसमा कक्षा कार्येत्यर्थः । सा क्रान्तिसञ्ज्ञा क्रान्तिवृत्तं ज्ञेयम् । तया कक्षया सूर्यो जगद्भासयन् प्रकाशयन् सदा पर्येति भ्रमति । चन्द्राद्या ग्रहाश्च क्रान्तिमण्डलामाश्रितैः स्वकैः पातैरपकृष्टाः स्थानीय-क्रान्त्यन्ताद्विक्षेपान्तेषु शरान्तेषु ततस्तस्मादाकर्षणवशाद् दृश्यन्ते । ते च स्वस्वविमण्डलेषु भ्रमन्तीत्यर्थः ॥ ३—१२½ ॥

इदानी मुदयलग्नाद्याह—

उदयक्षितिजे लग्नमस्तं गच्छच्च तद्वशात् ॥ १३ ॥
लङ्कोदयैर्यथासिद्धं खमध्योपरि मध्यमम् ।

तत् क्रान्तिवृत्तमुदयक्षितिजे प्राचिक्षितिजे यत्र लग्न तदेवोदयलग्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञेयम् । तद्वशादुदयलग्नवशादरतमस्तक्षितिजं पश्चिमक्षितिजं गच्छत् क्रान्तिवृत्तमस्तलग्नं ज्ञेयम् । उदयलग्नकाले पश्चिमक्षितिजे क्रान्तिवृत्तस्य यः प्रदेशस्तदस्तलग्नं ज्ञेयमित्यर्थः । एवं खमध्योपरि याम्योत्तरवृत्ते लङ्कोदयैस्त्रिप्रश्नाधिकारोक्तविधिना यथासिद्धं भवति तन्मध्यमं मध्यलग्नं खलग्नं च ज्ञेयमिति ॥ १३½ ॥

इदानीमन्त्या चरज्ये आह—

मध्यक्षितिजयोर्मध्ये या ज्या साऽन्त्याऽभिधीयते ॥ १४ ॥
ज्ञेया चरदलज्या च विषुवत् क्षितिजान्तरम् ।

अहोरात्रवृत्तं यत्र याम्योत्तरवृत्ते लग्नं तदेव मध्यम् । तत्क्षितिजयोर्मध्ये या ज्याकारा रेखा साऽन्त्या कथ्यते गणकैः । मध्यस्थानात् क्षितिजगतोदयास्तसूत्रोपरि यो लम्बः साहोरात्रवृत्तधरातले हृतिः । सेव त्रिज्यापरिणताऽन्त्येत्यर्थः । एवं विषुवत्क्षितिजमुन्मण्डलम् । नामैकदेशेन नामग्रहणात् । तस्य स्वक्षितिजस्य चान्तरं ज्यारूपं तत् त्रिज्यावृत्तपरिणतं चरदलज्या चरखण्डकालज्या ज्ञेयेति । अत्रोपपत्तिः । त्रिप्रश्नाधिकारोक्तेव सुगमेति ॥ १४½ ॥

इदानीं स्वक्षितिजमाह—

कृत्वोपरि स्वकं स्थानं मध्ये क्षितिजमण्डलम् ॥ १५ ॥

भूगोले स्वकं स्वीयं स्थानमुपरि कृत्वा तद्वशेन भूमेर्यावूर्ध्वाधरौ प्रदेशौ तयोर्मध्ये परिकरवद्यद्वृत्तं तत् क्षितिजमण्डलं ज्ञेयम् । इदं क्षितिजं दृष्टान्तगोले कल्पितखगोले स्थिरं कार्यमिति ॥ १५ ॥

अथ भगोलस्य भ्रमणार्थमाह—

वस्त्रच्छन्नं बहिश्चापि लोकालोकेन वेष्टितम् ।
अमृतस्रावयोगेन कालभ्रमणसाधनम् ॥ १६ ॥
तुङ्गबीजसमायुक्तं गोलयन्त्रं प्रसाधयेत् ।
गोप्यमेतत्प्रकाशोक्तं सर्वगम्यं भवेदिह ॥ १७ ॥

बहिर्गोलोपरि वृत्ताकारेण वस्त्रेण छन्नं भगोलं लोकालोकेनोदयास्तसञ्ज्ञकवृत्तेन पूर्वोदितक्षितिजवृत्तेनावेष्टितध्रुवयष्ट्युपरि अमृतस्य जलस्य स्रावयोगेन धाराप्रवाहाभिघातेन तथा कालभ्रमणसाधनं तं कुर्याद्यथा नाक्षत्रघटीषष्ट्या पश्चिमाभिमुखं तस्यैकं भ्रमणं भवेद्यथा साक्षाद्भगोलस्य प्रवहवायुना भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि जलधाराभिघातेन स्थलविशेषे पर्याप्तस्थानाभावाद् दृष्टान्तगोलस्य भ्रमणं न भवेत्तदा तुङ्गस्य महादेवस्य बीजेन पारदेन समायुक्तं तद्गोलयन्त्रं तथा साधयेद्विरचयेद्यथा नाक्षत्रघटीषष्ट्या पश्चिमाभिमुखं तस्यैकं पूर्णं भ्रमणं ध्रुवयष्ट्युपरि भवेत् । एतद्यद्गोलवर्णनं कृतं तद्गोप्यं कस्मैचिन्न प्रकाश्यं यतः प्रकाशोक्तं तद्वर्णनं सर्वगम्यं सर्वविदितं भवेद्येनास्य महिमा नष्टा भविष्यतीति ॥ १६—१७ ॥

ननु त्वया कथनुक्तमित्याशङ्कां परिहरन्नाह—

तस्माद्गुरूपदेशेन रचयेद्गोलमुत्तमम् ।
युगे युगे समुच्छिन्ना रचनेयं विवस्वतः ॥ १८ ॥
प्रसादात् कस्यचिद्भूयः प्रादुर्भवति कामतः ।
कालसंसाधनार्थाय तथा यन्त्राणि साधयेत् ॥ १९ ॥
एकाकी योजयेद्बीजं यन्त्रे विस्मयकारिणि ।

तस्माद्गोप्यत्वाद्गुरूपदेशेन परम्पराप्राप्तगुरोः शुद्धभावकथनेनोत्तममम् गोलं गणकः कुर्यात् । अत एव मया गोप्यत्वेन नातिव्यक्ता तुभ्यं गोलरचना निगदितेति भावः । विवस्वतः सूर्यमण्डलान्तर्गतविशिष्टदेवस्येयं गोलरूपा रचना युगे युगे समुच्छिन्ना लुप्तप्राया कस्यचिन्मादृशस्य सूर्यांशपुरुषस्य प्रसादादनुग्रहाद्भूयः कामतस्तत्सूर्येच्छात एव प्रादुर्भवति व्यक्ता भवतीत्यर्थः । यथा मत्तस्त्वया गोलरचना ज्ञाता तथाऽन्यस्मान्मादृशादन्यतोऽवगन्तव्यो कालस्यानाद्यनन्तत्वादित्याशयः । एवं तथा गोलयन्त्रवत् कालसंसाधनार्थाय गणकोऽन्यानि यन्त्राणि साधयेद्रचयेत् । विस्मयकारिणि स्वयंवहादियन्त्रे च गोप्यत्वादेकाकी निःसङ्गस्तत्र बीजं पारदं योजयेदिति ॥ १८-१९½ ॥

इदानीमन्यानि यन्त्राण्याह—

शङ्कुयष्टिधनुश्चक्रैश्छायायन्त्रैरनेकधा ॥ २० ॥
गुरूपदेशाद्विज्ञेयं कालज्ञानमतन्द्रितैः ।
तोययन्त्रकपालाद्यैर्मयूरनरवानरैः ॥
ससूत्ररेणुगर्भैश्च सम्यक्कालं प्रसाधयेत् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारदाराम्बुसूत्राणि शुल्वतैलजलानि च ।
बीजानि पांसवस्तेषु प्रयोगास्तेऽपि दुर्लभाः ॥ २२ ॥

शङ्कुर्यष्टिधनुश्चक्रैः प्रसिद्धैश्छायायन्त्रैश्छायासाधकयन्त्रैरनेकधा नानाविधगणितप्रकारैर्गुरूपदेशान्निर्व्याजकथनादतन्द्रितैरभ्रान्तैः पुरुषैः कालज्ञानं विज्ञेयम् । तोययन्त्रं जलयन्त्रं तत् कपालाख्यं घटपूर्वकपालनिभं वक्ष्यमाणं तदाद्यं प्रथमं येषां तैर्यन्त्रैर्बालुकायन्त्रप्रभृतिभिर्मयूरनरवानरैः मयूराकारं नराकारं वानराकारं यन्त्रं यत् तैः ससूत्ररेणुगर्भैः । सूत्रसहिता रेणवो धूलयो गर्भे मध्ये येषां तैः । मयूराद्युदरस्थापितबालुकाघटिकाङ्कितसूत्रमार्गेण घटीषष्ट्या तत्तन्मुखेभ्यः स्वतो निःसरन्तीति लोकप्रसिद्धैस्तादृशैर्यन्त्रैश्च गणकः सम्यक् कालं प्रसाधयेदित्यर्थः । तेषु मयूरादिषु यन्त्रेषु स्वयंवहार्थमेते प्रयोगाः प्रकर्षेण योजनयोग्याः । ते क इत्याह । पारादाराम्बुसूत्राणीति । पारदो रसः । आरा यन्त्रपालिगता अङ्कुशाकृतयो रसप्रक्षेपार्थं धातुजाः काष्ठजा वा रूपविशेषाः । अम्बु जलम् । सूत्रं मुखविवराद्वालुकादिनःसरणार्थं लोहतन्तुरूपम् । शुल्बं ताम्रम् । तैलजलानि तैलमिश्रितपानीयानि । वा बीजानि केवलं पारदप्रयोगः । वा केवलं पांसवो बालुकाः । ते प्रयोगा अपि निश्चयेन दुर्लभाः सन्ति । आरादिषु कियत्पारादिदानेन तद्यन्त्रं स्वयं भ्रमेदित्यस्य ज्ञानं दुर्घटं देशकालयन्त्रपरिमाणाधीनमीश्वरैकगम्यमित्यर्थः ।

शङ्कुयष्ट्यादीनां निर्माणं भास्कराचार्येण सिद्धान्तशिरोमणियन्त्राध्याये विस्तरतः कृतमिति प्रसिद्धम् ॥ २०—२२ ॥

इदानीं पूर्वोदितेषु यन्त्रेषु प्रसिद्धं कपालयन्त्रमाह—

ताम्रपात्रमधश्छिद्रं न्यस्तं कुण्डेऽमलाम्भसि ।
षष्टिर्मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम् ॥ २३ ॥

घटदलाकारं ताम्रपात्रमधश्छिद्रम् । अधोभागे छिद्रं यस्मिन् तत् । अत्र तथा छिद्रं कार्यं यथाऽमलजलपूर्णे कुण्डे न्यस्तं सदहोरात्रे षष्टिः षष्टिवारं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मज्जति। एवं चेत्तदा तदेव स्फुटं कपालाख्यं यन्त्रं ज्ञेयम्। यथा मलादीनां प्रवेशाच्छिद्रेऽवरोधो न भवेद्‌तोऽमलाम्भसि कुण्डे न्यस्तमिति। अत्र सिद्धान्तशेखरे श्रीपतिश्छिद्रादिसाधने विशेषमाह।

तद्वाक्यं च—

शुल्वस्य दिग्भिर्विहितं पलैर्यत् षडङ्गुलोच्चं द्विगुणायतास्यम्।
तदम्भसा षष्टिपलैः प्रपूर्यं पात्रं घटार्धप्रतिमं घटी स्यात्॥
सत्र्यंशमाषत्रयनिर्मिता या हेम्नः शलाका चतुरङ्गुला स्यात्।
विद्धं तया प्राक्तनमत्र पात्रं प्रपूर्यते नाडिकयाम्बुना तत्॥ इति।

इदानीं पूर्वोदितेषु यन्त्रेष्वतिप्रसिद्धं शङ्कुमाह—

नरयन्त्रं तथा साधु दिवा च विमले रवौ।
छायासंसाधनैः प्रोक्तं कालसाधनमुत्तमम्॥ २४॥

दिवा दिवसे रवौ चाकाशस्य स्वच्छत्वाद्विमले सति तथा कपालयन्त्रवन्नरयन्त्रं शङ्कुयन्त्रं च प्रसिद्धमस्ति। 'मयूरनरवानरैः' इत्यत्र यन्नरयन्त्रं तच्च नराकृति ज्ञेयमिदं च द्वादशाङ्गुलाङ्कितं सूच्याकारं वा समतलमस्तकपरिधिरूपं प्रथमं 'शङ्कुयष्टिधनुश्चक्रैः' इत्यादिना कथितं तद्भिन्नं ज्ञेयमिति। अस्य शङ्कोश्छायासंसाधनैराचार्यैरुत्तमं साधु कालसाधनं प्रोक्तम्। छायाज्ञानात् छायाकर्णज्ञानम्। ततः शङ्कोरिष्टहृतेश्च ज्ञानम्। इष्टहृतेरिष्टान्त्या ततश्चरज्यासंस्कारेण सूत्रज्ञानं तत उन्नतकालावबोधः सम्यग्भवतीति सर्वं सिद्धान्तशिरोमणि-आदिषु स्फुटमिति॥ २४॥

इदानीं ग्रन्थोपसंहारमाह—

ग्रहनक्षत्रचरितं ज्ञात्वा गोलं च तत्त्वतः।
ग्रहलोकमवाप्नोति पर्यायेणात्मवान् नरः॥ २५॥

इति सूर्यसिद्धान्ते ज्यौतिषोपनिषदध्यायः॥ २॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र रङ्गनाथ: 'यथा वेदे आत्मस्वरूपनिरूपणान्नारायणोपनिषदुच्यते तथा ज्योति:शास्त्रे प्रतिपादितानां ग्रहनक्षत्राणामेतद्ग्रन्थैकदेशे स्वरूपादिनिरूपणाज्ज्योत: सारं 'ज्यौतिषोपनिषदुच्यते' इत्याह। ग्रहनक्षत्राणां चरितं पूर्वार्धे युदुक्तं तत् तथा तत्त्वत: सूक्ष्मरूपेण नि:संशयं गोलं भूगोलभगोलस्वरूपप्रतिपादकमिदमुत्तरखण्डीयमध्यायद्वयं च ज्ञात्वा नर: पुरुष: पर्ययेण जन्मान्तरेण स्वाभिलषितं ग्रहलोकमवाप्नोति—इति।

अथ वेधार्थं खगोलभगोलस्थितिस्ततो वेधक्रिया च गणकानां—

विनोदायात्र कथ्यते—

(१) यत्र खगोले नक्षत्रणां ग्रहाणां च दर्शनं भवति स च पृथिव्या अनन्तदूरे कल्प्यते। अत एव तदपेक्षया सर्वा ग्रहकक्षा: शून्यरूपा इव प्रतिभान्ति। तेन खगोलस्य केन्द्रं कस्यापि ग्रहस्य कक्षाया अभ्यन्तरे यत्रकुत्र बिन्दौ कल्पयितुं शक्यत इति। सर्वदृष्टिस्थानतो नक्षत्रोपरि गता रेखा: समानान्तरा इव दृश्यन्ते। अत एकदृष्टिवशतो यो दृग्गोलस्तत्र यानि नाडीमण्डलादिवृत्तानि तत्समानान्तराणि चान्यदृष्टिजाते दृग्गोले च नाडीवृत्तादीनि भवन्तीति मुहुर्विचार्य मनसि धार्यम्। अथ खगोलभगोलदृग्गोलानां रचना च भास्करगोलबन्धाधिकारतो ज्ञेया, सर्वेषां वृत्तानां स्थितिश्च तत एव बोध्येति। प्राचीनैर्भुव आकृतिर्गोलनिभा स्वीकृता, परन्तु सम्प्रति समुद्रयात्रादिभिर्नव्यैस्तदाकृतिर्लघुव्यासोपरि दीर्घवृत्तार्धभ्रमणेन यद्घनक्षेत्रं तत्सदृशी स्थिरीकृता। तत्र यदि स्वपृष्ठस्थान अबिन्दौ भवेत् तदा तद्बिन्दौ या स्पर्शरेखा तत्र यो मुख्यो लम्ब: अग सञ्ज्ञस्तेन निरक्षीयो व्यास: आआ' सञ्ज्ञो यं ∠अगआ=ष, कोणं निर्माति स वेधोपलब्धपल:। दीर्घवृत्तकेन्द्रात् के–सञ्ज्ञकाद्या केअ–रेखा सा च निरक्षीयव्यासेन यं ∠अकेआ=षं कोण निर्माति स च वास्तवपल: कथ्यते। अथ वेधोपलब्धता वास्तवपलज्ञानं क्रियते। अ=पृथिव्या बृहद्व्यासार्धम्। क=पृथिव्या लघुव्यासार्धम्। (महोर्घवृत्तलक्षणं द्रष्टव्यम्) अ बिन्दो: कोटि:=र। के–केन्द्रात् तद्भुज:=य तदा रूपत्रिज्यायाम्—

$$\text{स्पषं} = \frac{\text{र}}{\text{य}},\ \text{स्पष} = \frac{\text{र}}{\text{य}\,(१-\text{इ}^२)};$$

$$\text{अत: स्पषं} = (१-\text{इ}^२)\ \text{स्पष} \cdots\cdots\cdots (१)$$

अथवा

$$\text{स्प}\,(\text{ष}-\text{षं}) = \frac{\text{स्पष} - (१-\text{इ}^२)\ \text{स्पष}}{१+(१-\text{इ}^२)\ \text{स्प}^२\ \text{ष}} = \frac{\text{इ} \times २\ \text{स्पष}}{१-\text{इ}\ \ \text{ज्या}^२\ \text{ष}} \cdots$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतः स्वल्पान्तरतः ष – षं



$$= \frac{अ - क}{अ} ज्या\ २\ ष = \frac{ज्या\ २\ ष}{३००} \quad \ldots\ldots\ \ldots\ldots\ \ldots\ldots \quad (२)$$

एतेन 'अथवाक्षिपलांशघातजीवा त्रिशतीहृत्' इत्यादि मदीयं पद्यमुपपद्यते ।

एऽमत्र केअ – ऊर्ध्वाधररेखावशेन दीर्घवृत्तकेन्द्रतो ग्रहाणां नतांशादिज्ञानायायं वास्तवफ्ल उपयुक्त इति ।

अथ $\frac{र}{य} = \frac{क^२}{अ^२}$ स्प ष,

$$\frac{\frac{र}{क}}{कज्याष} = \frac{\frac{य}{अ}}{अ \times कोज्याष}$$

$$\frac{\left(\frac{र}{क}\right)^२}{क^२\ ज्या^२\ ष} = \frac{\left(\frac{य}{अ}\right)^२}{अ \times {}^२कोज्या^२ष} = \frac{१}{अ\ कोज्या^२\ ष + क^२\ ज्या^२\ ष};$$

$$अतः\ र^२ = \frac{क^४\ ज्या^२\ ष}{अ^२कोज्या^२ष + क^२ज्या^२ष},\ य^२ = \frac{अ४\ कोज्या^२\ ष}{अ^२कोज्या^२ष + क^३ज्या^२ष},$$

$$अतः\ के\ अ^२ = \frac{अ४\ कोज्या^२\ ष + क^२\ ज्या^२\ ष}{अ^२\ कोज्या^२\ ष + क^२\ ज्या^२\ ष}$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः स्वपान्तरतः केअ = अ (१ − गज्या² ष) (यदि ग = $\frac{\text{अ} - \text{क}}{\text{अ}}$)⋯(३)

अनेन भूकेन्द्रात् स्वपृष्ठस्थानस्योच्छ्रितिज्ञानं भवति—

(२) एतदुच्छ्रितिव्यासार्धेन यो गोलः स स्वपृष्ठस्थाने ग्रहवेधादौ भूगोलो भवितुमर्हतीति कल्प्यतेऽस्य गोलस्य केपृ − ऊर्ध्वाधररेखा, ग्र − ग्रहविम्बम्। ∠खपृग्र = पृष्ठीयनतांशाः = पृ। ∠पृकेग्र = गर्भीयनतांशाः = ग। ∠पृग्रके = गर्भपृष्ठनतांशान्तरं दृग्लम्बनम् = दृलं। तदा त्रिकोणमित्या पृकेग्र − त्रिभुजे रूपव्यासार्धे



ज्यादृलं = $\frac{\text{केपृ} \times \text{ज्यापृ}}{\text{केग्र}}$ = ज्या × ज्यापृ, यदि $\frac{\text{केपृ}}{\text{केग्र}}$ = ज्या, केप = पूर्वसाधिता भूकेन्द्रात् पृष्ठोच्छ्रितिः = छ्रि। यदि पृ = ९°। तदा दृग्लम्बनं परमं दृग्लम्बनम् = प। इति प्रसिद्धम्।

एवम् ज्यादृलं = ज्याप × ज्यापृ⋯⋯⋯⋯⋯(४)

(३) कल्पयते। एकस्मिन्नेव या म्योत्तरवृत्ते पृ१, पृ२, द्वे पृष्ठस्थाने ययोर्वेधोपलब्धे पलमाने ष, ष१ संज्ञे। ततस्ताभ्यां वास्तवपलमाने ष', ष'१ विदिते भविष्यतः। अथ ग्र − ग्रहवेधेन क्रमेण पृष्ठीया नतांशाः पृ१ पृ२ सञ्ज्ञकाः। तदा ∠खपृ१ ग्र = पृ१ ग्र = पृ¹।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$<$खंपृ$_2$ ग्र $=$ पृ$_2$ । तत्र पृष्ठस्थानद्वयवशेन क्रमेण दृग्लम्बने दल$_1$, दृल$_2$, अर्थात् $\angle$के ग्रपृ$_1$ $=$ दल$_1$, $\angle$के ग्रपृ$_2$ $=$ दृल$_2$ । तदा क्षेत्रेण

$\angle$पृ$_1$ग्रपृ$_2$ $+$ $\angle$पृ$_1$केपृ$_2$ $=$ $\angle$ख$_1$पृ$_2$ग्र $+$ $\angle$ख$_1$पृ$_2$ग्र $=$ पृ$_1$ $-$ (ष $-$ ष$'$) $+$ पृ$_2$ $-$ (ष$_1$ $-$ षं$_1$) $=$ दृल$_1$ $+$ दल$_2$ $+$ षं $+$ षं$_1$ ।

अतः दल$_1$ $+$ दृल$_2$ $=$ पृ$_1$ $+$ पृ$_2$ $-$ ष $-$ ष$_1$ । अतः

दृलं$_1$ $+$ दृल$_2$ इति विदितं ज्ञातम् । तन्नाम म ज्ञेयम् । अतः

ज्यादल$_2$ $=$ ज्या (म $-$ दल$_1$) यदि पृ$'_1$ $=$ पृ$_1$ $-$ (ष $-$ ष$'_1$)



के:पृ$_1$ $=$ र$_2$, केपृ$_2$ $=$ र$_2$, केग्र $=$ का, तदा ज्यादृल$_1$ $= \frac{\text{र}}{\text{का}}$ ज्यापृ$'_1$ $=$

$\frac{\text{अ}}{\text{का}}$(१ $-$ गज्या^{2} ष) ज्यापृ$'_1$ $=$ ज्या प (१ $-$ गज्या^{2}ष) ज्यापृ$'_1$

एवं ज्यादृल$_2$ $=$ ज्याप (१ $-$ गज्या^{2}ष$_1$) ज्यापृ$'_2$ $=$ ज्या (म $-$ दृल$_2$) $=$ कोज्या दृल$_1$ ज्याम $-$ ज्यादृल$_1$ कोज्याम

अयं ज्यादृल$_1$ अनेन भक्तः

को स्पदृल$_1$ ज्याम $-$ कोज्याम $= \frac{(\text{१} - \text{गज्या}^2 \text{ ष}_1)}{(\text{१} - \text{गज्या}^2 \text{ ष})} + \frac{\text{ज्यापृ}'_2}{\text{ज्यापृ}'_1}$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेन दृल१ इत्यस्य मानं विदितं स्यात्

ततः ज्याप $= \frac{\text{ज्यादृल}_1}{(१ - \text{गज्या}^2 \text{ ष}) \text{ ज्यापृ}'^1}$ । एवं परमदृग्लम्बनं विज्ञाय तत्तः पृष्ठोच्छ्रितिज्ञानतो ग्रहकर्णज्ञानं सुलभमिति ।

(४) अथ याम्योत्तररेखाज्ञानार्थं रात्रौ भूपृष्ठस्थदृष्ट्या त्रिज्यातुल्यया यष्ट्या किमपि नक्षत्रं विध्येत् । यष्ट्यग्रं नक्षत्रविम्बोपरिस्थिरं कार्यम् । एवं रात्रौ कतिपयवारं तन्नक्षत्रविम्बं विद्ध्वा तदुपरि यष्ट्यग्राणि न्यसेत् । यष्टिमूलानि तु सर्वाणि दृष्टिस्थाने मिलितानि स्थाप्यानि । ततो रेखागणितयुक्त्या यष्ट्यग्रत्रयोपरि गतं वृत्तं कार्यं तच्चेतरयष्ट्यग्रगतं भवति । तद्वृत्तं च नक्षत्राहोरात्रवृत्तसमानान्तरम् । तत्केन्द्रं ज्ञात्वा दृष्टिस्थानात् केन्द्रगता रेखा कार्या । सैव ध्रुवयष्टिर्भवति । यष्ट्यग्रात् क्षितिजोपरि यो लम्बो दृष्टिस्थानात्तन्मूलगता रेखा स्वस्थाने याम्योत्तररेखा स्यात् । तद्रेखास्थनलिकया दूरस्थामुच्छ्रितां पताकां तथा विध्येद्यथा याम्योत्तररेखास्थनलिकामूलाग्रगरेखायामेव पताकादर्शनं भवेदेवं पताकास्थानं याम्योत्तररेखायां जातम् । पुनः पताकास्थाने याम्योत्तररेखायां नलिकां विन्यस्य तदग्रे उत्तरदिशि दूरे पताकां संस्थाप्य पूर्वविधिनाऽन्यो याम्योत्तररेखागतो बिन्दुर्विज्ञेयः । एवं याम्योत्तररेखास्थानां बिन्दूनां तदन्तरयोजनानां च युगपज्ज्ञानं जायत इति ।

(५) अथ वेधोपलब्धग्रहनतांशादितो गर्भीयनतांशादिज्ञानं क्रियते । कल्प्यते दृष्टिस्थानतो योजनग्रहकर्णः = क । दिगंशाः = दि । उन्नतांशाः = उ । तदा प्रसिद्धज्यौतिषसिद्धान्ततो भुजादिमानम् ।

सर्वत्रात्र रूपमिता त्रिज्या बोध्या ।

भु = क × को ज्या उ × ज्यादि ।

को = क × को ज्या उ × कोज्यादि ।

शं = क × ज्या उ ।

भूकेन्द्राभिप्रायेण दृष्टस्थानीयक्षितिज—सममण्डलादीनां समानान्तरैः क्षितिजसममण्डलादिभिः (तत्र तेषां मानानि क', उ', दि' कल्पयित्वा)

भु = क', कोज्या उ' × ज्यादि' ।

को' = क'×कोज्या उ × कोज्यादि' ।

शं' = क' × ज्या उ' ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूकेन्द्रतो दृष्टिस्थानरूपग्रहस्य भुजकोटिशङ्कवः (भु", को", श")

भु" = छि्र ज्या (अ – अ')

को" = ०

श" = छि्र को ज्या (अ – अ)

द्वितीयतृतीययोरन्तरेण

अत्र वेधोपलब्धा अक्षांशाः=अ । वास्तवाक्षांशाः भूकेन्द्राभिप्रायेण=अं ।

भूकेन्द्रात् पृष्ठस्थानोच्छि्रतिश्च=छि्र ।

पक्षद्वयं कं मानेन विभज्य यदि $\frac{\text{क}}{\text{कं}}$ = फ । तदा

फ को ज्या उ ज्यादि=को ज्या उं ज्यादिं–ज्या प ज्या (अ – अं) ।

फ को ज्या उ को ज्यादि=को ज्या उं को ज्यादिं ।

फ × ज्या उ=ज्या उं – ज्या प को ज्या (अ – अं)

अत्र ज्या प = स्वदेशीय परमदृग्लम्बनज्या ।

अत्र प्रथमं को ज्यादिं अनेन द्वितीयं ज्यादिं अनेन च सङ्गुण्यान्तरतः

फ को ज्या उ ज्या (दं – दि) = को ज्यादिं ज्या प ज्या

(अ – अं) ··· ··· ··· ··· ··· ··· ···· (अ)

एवमेव प्रथमं ज्यादि अनेन द्वितीयं को ज्यादिं अनेन च सङ्गुण्य योजनतः

फ कोज्या उ को ज्या (दिं – दि)

= को ज्या उ – ज्यादिं ज्यापज्या (अ – अं) ··· ··· ···(क)

(अ) इदं (क) अनेन विभज्य

$$\text{स्प (दिं – दि)} = \frac{\text{कोज्यादिं ज्याप ज्या (अ – अं)}}{\text{कोज्या उं – ज्यादिं ज्याप ज्या (अ–अं)}} \cdots (+१)$$

$$(+१) \text{ अत्र यदि म} = \frac{\text{ज्याप ज्या (अ – अं)}}{\text{को ज्याउं}}$$

$$\text{तदा स्प (दिं – दि)} = \frac{\text{म × को ज्यादिं}}{\text{१–म ज्यादिं}} \cdots \cdots \cdots \cdots \cdots \text{(ग)}$$

वा सरलत्रिकोणमितिश्रेणीतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$$\text{दि}' - \text{दि} = \text{म ज्याग} + \frac{\text{म}_2 \text{ज्या}_2 \text{ग}}{२} + \frac{\text{म}^3 \text{ज्या}^3 \text{ग}}{३} + \cdots$$

अत्र ग=९० – दि'।

अनुपातेन विकलात्मकमानम्

$$\text{दि}' - \text{दि} = \frac{\text{म} \times \text{ज्याग}}{\text{ज्या}_1''} + \frac{\text{म} \times ^2 \text{ज्या}^2 \text{ग}}{२ \text{ ज्या}_1''} + \frac{\text{म}^3 \text{ ज्या}_3 \text{ ग}}{३ \text{ ज्या}_1''} + \cdots$$

अथवा यदि (ग) समीकरणे यदि ज्या च = मज्यादि' तर्हि

$$\text{स्प}\ (\text{दि}' - \text{दि}) = \frac{\text{ज्या च} \times \text{को स्प दि}'}{१ - \text{ज्या च}}$$

$$= \text{स्प च} \times \text{स्प}\ (४५^\circ + \frac{\text{च}}{२})\ \text{को स्पदि}' \cdots \cdots \cdots \cdots (\text{घ})$$

एवं (ग), (घ) वलेन दि'–ज्ञानतो दि – ज्ञानम्। दि – ज्ञानतश्च दि' – ज्ञानमिति स्फुटं गणितविदाम्।

अथ (अ), (क) एतद्द्वयं क्रमेण ज्या ½ (दि' – दि),

को ज्या ½ (दि' – दि) आभ्यां सङ्गुण्य ततो योजयित्वा पुनः को ज्या½ (दि' – दि) अनेनापवर्त्यं फ × कोज्याउ = को ज्याउ' – ज्यापज्या (अ–अ') $\frac{\text{कोज्या } \frac{1}{2} (\text{दि}' + \text{दि})}{\text{कोज्या } \frac{1}{2} (\text{दि}' - \text{दि})}$

अत्र यदि स्प छ = स्प (अ – अ') $\frac{\text{कोज्या } \frac{1}{2} (\text{दि}' + \text{दि})}{\text{कोज्या } \frac{1}{2} (\text{दि}' - \text{दि})}$ तदा

फ कोज्या उ=कोज्या उ' – ज्याप कोज्या (अ – अ')। स्पछ

फ ज्याउ = ज्याउ – ज्याप कोज्या (अ – अ)।

दिगंशान्तरसाधनवत्

फज्या (उ' – उ)—ज्याप (कोज्या अ – अ') $\frac{\text{ज्या } (\text{उ}' + \text{छ})}{\text{कोज्या छ}}$।

फ कोज्या (उ' – उ) = १ – ज्याप कोज्या (अ – अ') $\frac{\text{ज्या } (\text{उ}' + \text{छ})}{\text{कोज्या छ}}$।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$$\therefore \text{स्प}\,(\text{उ}' - \text{उ}) = \frac{\text{ज्याप कोज्या}\,(\text{अ} - \text{अ}')\ \dfrac{\text{कोज्या}\,(\text{उ}' + \text{छ})}{\text{कोज्या छ}}}{1 - \text{ज्याप कोज्या}\,(\text{अ} - \text{अ}')\ \dfrac{\text{ज्या}\,(\text{उ}' + \text{छ})}{\text{कोज्या छ}}}$$

$$\text{अत्रापि यदि म} = \frac{\text{ज्याप कोज्या}\,(\text{अ} - \text{अ}')}{\text{कोज्या छ}}$$

$$\text{तदा स्प}\,(\text{उ}' - \text{उ}) = \frac{\text{मकोज्या}\,(\text{उ}' + \text{छ})}{1 - \text{मज्या}\,(\text{उ}' + \text{छ})}$$

$$\therefore \text{उ}' - \text{उ} = \frac{\text{म ज्याग}}{\text{ज्या}_1''} + \frac{\text{म}^2\ \text{ज्या}^2\ \text{ग}}{2\ \text{ज्या}1''} + \frac{\text{म}^3\ \text{ज्या}^2\ \text{ग}}{3\ \text{ज्या}_1''} + \cdots \cdots$$

अत्रापि $\text{ग} = 9^\circ - (\text{उ}' + \text{छ})$

अथवा यदि ज्या च=मज्या (उ'+छ) तदा

$$\text{स्प}\,(\text{उ}' - \text{उ}) = \text{स्प त्रस्प}\left(45 + \frac{\text{च}}{2}\right)\ \text{स्प ग}\ ।$$

अत्र दक्षिणदिगंशान् प्रकल्प्य सर्वं गणितं प्रदर्शितम् । उत्तरदिगंशांश्च ऋणं प्रकल्प्य पूर्ववद्गणितं कार्यम् ।

(६) विषुवद्वृत्तं क्षितिजमुन्मण्डलं याम्योत्तरवृत्तमयनप्रोतं च सममण्डलं प्रकल्प्य पूर्वप्रक्रमोक्तविधिना

भूगर्भाभिप्रायेण	भूपृष्ठाभिप्रायेण
भु=क कोज्या क्राकोज्यावि	भु'=क' × कोज्या क्रा' कोज्यावि"
को=ककोज्याक्राज्यावि	को'=क' कोज्या क्रा' ज्यावि"
शं=कज्याक्रा	शं'=क' ज्याक्रा'

गर्भाभिप्रायेण पृष्ठस्थानरूपग्रहस्य यदि विषुवांशाः=वि" तदा तस्य

भुजादयः=भु", को", श"—

भु=छ्रिकोज्या अ'कोज्यावि

को"=छ्रिज्याअ"

गर्भीयभुजादिभ्य एतान् विशोध्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क' कोज्या क्रा' कोज्यावि' = क कोज्याक्रा कोज्यावि
—छि्रकोज्या अ' ज्यावि" ।

क' कोज्या क्रा' ज्यावि' = क कोज्या क्रा' ज्यावि
—छि्र कोज्या अ' ज्यावि" ।

क' ज्याक्रा' = कज्याक्रा —छि्रज्या अ' ।

तत एतेभ्यः पूर्ववत् ।

फ कोज्या क्रा' कोज्यावि' = कोज्या क्रा कोज्यावि
—ज्याप कोज्या अ' ज्यावि" ।

क कोज्या क्रा' ज्यावि' = कोज्या क्रा ज्यावि
—ज्याप कोज्या अ' ज्यावि" ।

फ ज्याक्रा' = ज्याक्रा - ज्याप ज्याअ'

एतेभ्यश्च पूर्ववत् ।

फ कोज्याक्रा' ज्या (वि'—वि)
= ज्याप कोज्या अ' ज्या (वि – वि")………(अ)

फ कोज्याक्रा' कोज्या (विं – वि)
= कोज्याक्रा – ज्याप कोज्या अ' कोज्या (वि – विं')………(क)

$$\text{अतः स्प (विं – वि)} = \frac{\text{ज्याप कोज्या अज्या (वि – विं')}}{\text{कोज्याक्रा–ज्यापकोज्याअ'कोज्या (वि – वि'')}}\text{ ।}$$

$$\text{यदि म} = \frac{\text{ज्याप कोज्याअ'}}{\text{कोज्याक्रा}}\text{ तर्हि}$$

$$\text{स्प (वि' – वि)} = \frac{\text{मज्यान}}{\text{१ – मकोज्यान}}\text{ अत्र वि – वि'' = नतकालः = न ।}$$

अस्मात्

$$\text{वि' – वि} = \frac{\text{म ज्यान}}{\text{ज्या१''}} + \frac{\text{म}^{२}\text{ ज्या२न}}{\text{२ज्या१''}} + \frac{\text{म}^{३}\text{ ज्या३ न}}{\text{३ज्या१''}} + \cdots (१)$$

यदि च = म × कोज्या न तर्हि पूर्ववदेव ।

$$\text{स्प (विं – वि)} = \text{स्प च स्प ४५°} + \frac{\text{च}}{२}\text{स्पन ।}$$

(अ), (क) एतद्द्वयं क्रमेण ज्या $\frac{१}{२}$ (वि' – वि),

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोज्या $\frac{1}{2}$ (विं − वि) अनेन सङ्गुण्य ततो योजनतः पश्चात्
कोज्या $\frac{1}{2}$ (विं − वि) अनेनापवर्त्य

$$\text{फ फो ज्या क्रा}' = \text{कोज्या क्रा} - \text{ज्याप कोज्या अं} \frac{\text{कोज्या } \frac{1}{2} (\text{वि}' + \text{वि} - २\text{वि}'')}{\text{कोज्या } \frac{1}{2} (\text{विं} - \text{वि})} ।$$

फ ज्याक्रा′ = ज्याक्रा′ − ज्याप ज्या अ′ । अत्र यदि को स्पछ

$$= \text{को स्प अ}' \frac{\text{कोज्या } (\text{न} + \text{ल}^{२})}{\text{कोज्या } \frac{\text{ल}}{२}}$$ तदा (ल = विषुवांशलम्बनम्)

फ कोज्या क्रा′ = कोज्या क्रा − ज्याप ज्या अ′ कोस्पछ ।

फ ज्या क्रा′ = ज्याक्रा − ज्याप ज्या अ′ ।

ततः पूर्वरीतिवदेव

$$\text{फ ज्या} (\text{क्रा}' - \text{क्रा}) = \text{ज्याप ज्या अ}' \frac{\text{ज्या } (\text{क्रा} - \text{छ})}{\text{ज्याछ}} \ldots\ldots\ldots (\text{ग})$$

$$\text{फ कोज्या } (\text{क्रा}' - \text{क्रा}) = १ - \text{ज्याप ज्या अ}' \frac{\text{कोज्या } (\text{क्रा} - \text{छ})}{\text{ज्याछ}} \ldots (\text{घ})$$

$$\therefore \text{स्प } (\text{क्रा}' - \text{क्रा} = \frac{\text{ज्याप ज्याअ}' \frac{\text{ज्या } (\text{क्रा} - \text{छ}}{\text{ज्या छ}}}{१ - \text{ज्याप ज्याअ}' \frac{\text{कोज्या } (\text{क्रा छ})}{\text{ज्या छ}}}$$

$$\text{यदि म} = \frac{\text{ज्याप ज्याअ}'}{\text{ज्या छ}} । \text{ग} = \text{क्रा} - \text{छ} ।$$

$$\text{तदा क्रा} - \text{क्रा} = \frac{\text{मज्या ग}}{\text{ज्या } १''} + \frac{\text{म}^{२} \text{ ज्या२ग}}{२ \text{ ज्या}_{१}''} + \frac{\text{म}^{३} \text{ ज्या३ म}}{३ \text{ ज्या}_{१}''} + \cdots\cdots (२)$$

यदि च = मको ज्याग तर्हि

$$\text{स्प } (\text{क्रा} - \text{क्रा}) = \text{स्प च स्प } (४५^{०} + \frac{\text{च}}{२}) \text{ स्प ग} ।$$

(ग), (घ) एतद्द्वयं क्रमेण कोज्या (क्रा − छ) ज्या (क्रा − छ) अनेन सङ्गुण्य, संयोज्य, ज्या (क्रा′ − छ) अनेनापवर्त्य

$$\text{फ} = \frac{\text{ज्या } (\text{क्रा} - \text{छ})}{\text{ज्या } (\text{क्रा}' - \text{छ})} । \text{ ज्या } \frac{1}{2} \text{ द्विं} = \frac{\text{ज्या } \frac{1}{2} \text{ ग्रविं}}{\text{फ}} ।$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वकपाले नतकालं प्रकल्प्य विषुवांशे लम्बनमानीतं पश्चिमकपाले नतकालमानमृणं ज्ञेयम् । एवमुत्तरां क्रान्ति प्रकल्प्य क्रान्तौ नतिमानमानीतं दक्षिणक्रान्तौ च क्रान्तिमानमृणं प्रकल्प्य नतिमानमानेयम् ।

(७) क्रान्तिवृत्तीयभुजांशान् विषुवांशान् शरं क्रान्ति वित्रिभनतांशान् पलभागान् प्रकल्प्य चतुर्थप्रक्रमयुक्तिवत्—भुजांशसम्बन्धिलम्बनं शरसम्बन्धि-नतिमानं चागमिष्यति ।

(८) पूर्वोक्तप्रकारतो ग्रहयोः परमलम्बनवशेन कर्णयोर्ज्ञानं कृत्वा यष्टिद्वितयेन मूलमिलितेन वेधेन तयोरन्तरांशान् विज्ञाय त्रिकोणमित्या बिम्बान्तरसूत्रज्ञानं कर्त्तव्यम् । एवं रवितः सर्वेषां ग्रहाणां विम्बान्तरसूत्राणि प्रत्यहं साध्यानि । प्रत्यहं रविलग्नकोणज्ञानेन द्वयोर्द्वयोर्विम्बान्तरसूत्रयोरन्तर-कोणज्ञानं च भवति । ततो विम्बान्तरसूत्रैस्तदन्तर्गतकोणैश्च रविवशेन ग्रहकक्षा-कृतिज्ञानं सुलभम् ।

(९) कल्प्यते । एकस्य स्थिरनक्षत्रस्य याम्योत्तरवृत्ते यदाऽऽगमनं जातं ततोऽनन्तरं क – कालान्ते र=रवेरागमनमभूत् ।

तत्र ध्रुवप्रोतकरणेन तत्क्रान्तिः रमा=क्रा ज्ञाता । ततो द्वितीयदिने



तस्यैव स्थिरनक्षत्रस्य याम्योत्तरवृत्तागमनानन्तरं रवेर्याम्योत्तरवृत्ते स्थितिः क'—कालान्तरेऽभूत् । वेधेनैतत्क्रान्तिः र' मा'=क्रा' जाता । क – क' – कालयोरन्तरं च गोलयुक्त्या रविविषुवांशान्तरेण समं मामा' – तुल्यं प्रसिद्धमेव । अथ गोले विषुवांशान्तरितं नाडीमण्डले बिन्दुद्वयं कृत्वा तत्र ध्रुवप्रोतकरणेन तत्र क्रान्ति-दानेन च र, र' बिन्दुद्वयस्य क्रान्तिवृत्तगतस्य ज्ञान बिन्दुद्वयोपरिगं महद्वृत्तं क्रान्तिवृत्तं स्यात् । ततो नाडीमण्डले क्रान्तिमण्डलसम्पातोत्पन्नकोणस्य परमक्रान्तेर्मानं सुलभम् । अथ यदि मामा' अ संमा=वि, समा'=वि', मार= क्रा, मा'र'=क्रा', परमक्रान्तिमानम्=पा तदा चापीयत्रिकोणमित्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्यावि = कोस्पपा स्प क्रा ।

ज्या (वि + अ) = कोस्प पा स्पक्रा' ।

$$\text{अतः} \quad \frac{\text{ज्या (वि + अ)}}{\text{ज्यावि}} = \frac{\text{स्प क्रा'}}{\text{स्प क्रा}}$$

वा, कोज्या अ+ज्याअ कोस्पवि = स्पक्रा कोस्प क्रा ।

$$\text{ततः कोस्पवि} = \frac{\text{स्पक्रा' कोस्पक्रा} - \text{कोज्याअ}}{\text{ज्याअ}} \text{ ।}$$

अनेन विषुवांशज्ञानं ततः परमक्रान्ते सम्पातस्य ज्ञानं सुलभम् । अत्रैकस्मिन् दिनेऽयनांशगतिरनिर्वाच्या सूक्ष्मयन्त्रतोऽपि वेधेनानिश्चिता व्यवहारानर्हा गणकेन ध्येयेति । एवं रविकक्षाक्रान्तिवृत्तस्य तन्नाडीवृत्तसम्पातस्य परमक्रान्तेश्च ज्ञानं सुलभमिति । एकदिने परमक्रान्तेश्चलनं च व्यवहारानर्हं सुधीभिर्न ध्येयमिति ।

(१०) पूर्वोक्तप्रकारेणेष्टसमये क्रान्तिमृत्तं स्थिरं कृत्वा नक्षत्रोपरि कदम्बप्रोतेन सम्पातात् सायना ध्रुवाः शराश्च कदम्बप्रोतीयाः शराश्च विज्ञेयाः । एवं बहूनां नक्षत्रणां ध्रुवाः शराश्च वेधेन निर्णीय सारण्यां विलेख्याः । द्वितोयवर्षे पुनः क्रान्तिवृत्तं स्थिरं कृत्वा तद्वशतस्तेषामेव नक्षत्राणां सम्पाताद् ध्रुवाः कदम्बवृत्ते शराश्च वेधेन बोद्धव्याः । अथ प्रत्येकनक्षत्रस्य गतवर्त्तमानध्रुवयोरन्तरं समानुपलभ्यते शराश्च गतवर्त्तमानवर्षयोः समा एवोपलभ्यन्ते । अतो लाघवेन नक्षत्रध्रुवान्तरसमा क्रान्तिवृत्ते सम्पातगतिरयनांशगत्याख्या प्राचीनैः कल्पितेति ।

(११) रात्रौ क्रान्तिवृत्तगतनक्षत्रेभ्यो ज्ञातध्रुवेभ्यः क्रान्तिवृत्तं स्थिरीकृत्य ग्रहविम्बोपरि कदम्बप्रोतवृत्तेन सम्पाततस्तत् स्थानं ज्ञेयम् । ग्रहविम्बकर्णेन कदम्बप्रोते ज्ञातशरांशेभ्यश्च त्रिकोणमित्या स्थानीययोजनकर्णस्य क्रान्तिवृत्तधरातलगतस्य ज्ञानं च सुलभम् । एवं प्रत्यहं स्थानवेधः स्थानीयकर्णज्ञानं च सुलभम् । एवं प्रत्यहं स्थानवेधः स्थानीयकर्णज्ञानं च कार्यं भगणान्तं यावत् । ततो भगणभोगकालेन चक्रकला भक्ताः फलं गतिकला सा कल्पकुदिनगुणा कल्पभगणकलास्ततः कल्पभगणमानं सुबोधम् । स्थानीयकर्णज्ञानेन यत्र दिने परमं कर्णमानं देवोच्चस्थानं ज्ञेयम् । द्वितीयभगणपरिवर्त्तनसमये पुनर्वेधेनोच्चस्थानं विदितं स्यात् तदनन्तरकालेन तदुच्चान्तरकलातस्तद्दिनगातस्ततो भगणमानं सुबाधम् । एवं वेधेन सर्वदा सायनभगणमानमेवोपलभ्यत, अयनांशानामज्ञानात् प्राचीनैर्निरयणभगणा उच्यन्ते । एवं कदम्बप्रोते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यहं शरमानं विद्धा तदभावस्थानं पातस्थानं ज्ञेयम्। द्वितीयपरिवर्त्तनसमये पुनः पातस्थानं विज्ञाय तदन्तरवशात्तद्भगणज्ञानं कार्यम्। ग्रहयोराकर्षण-वशेनैकस्य कक्षा न वृत्ताकारा, किन्तु दीर्घवृत्ताकाराऽस्तीति सम्प्रति नव्यैर्वेधेन निश्चितम्। दीर्घवर्त्तुले कथं ग्रहा भ्रमन्ति तत्र स्पष्टीकरणं कथमित्याद्यर्थं मद्दीर्घ-वृत्तलक्षणं द्युचरचारश्चैतद्वयं द्रष्टव्यम्।

(१२) अथ ध्रुवतारा या लोके प्रसिद्धा सा सम्प्रति नाडीवृत्तपृष्ठीयकेन्द्रेण, अतस्तद्वेधेन प्राचीनरीत्या पलज्ञानं न भवति। तद्वेधेन कथं पलज्ञानं भवेदेतदर्थं क्रिया प्रदर्श्यते।



कल्प्यते ख = खस्वस्तिकम्। ख पृ = वास्तवयाम्योत्तरवृत्तं नाडीमण्डल-पृष्ठकेन्द्रगतम्। नाडीमण्डलपृष्ठकेन्द्रं च = पृ। ध्रुववेधेन प्राचीनरीत्याऽक्षांशाः = अ, तल्लम्बांशाश्च खध्रु = ९० − अ। ख पृ = वास्तवपलकोटिः = ९० − प। न = नतकालमानम्। खध्रु = दृ। ख पृ = ल।

ल − दृ = ध्रुवोन्नतांशाः − वास्तवाक्षांशाः = य। पृध्रु = द्युज्याचापांशाः = द्यु।

अथ चापीयत्रिकोणमित्या

$$\text{कोज्यादृ} = \text{कोज्याल} \times \text{कोज्याद्यु} + \text{ज्याल ज्याद्यु कोज्यान}$$

$$= \text{कोज्या}\,(\text{दृ} + \text{य})\,\text{कोज्याद्यु} + \text{ज्या}\,(\text{दृ} + \text{य})\,\text{ज्याद्यु कोज्यान}$$

$$= \left(\text{कोज्यादृ} - \text{यज्यादृ} - \frac{\text{य}^2}{2}\text{कोज्यादृ} + \frac{\text{य}^3}{6}\,\text{ज्यादृ} + \cdots\right)$$

$$\left(1 - \tfrac{1}{2}\,\text{द्यु}^2 + \cdots\right)$$

$$+ \left(\text{ज्यादृ} + \text{य कोज्यादृ} - \frac{\text{य}^2}{2}\text{ज्यादृ} + \cdots\right)\left(\text{द्यु} - \frac{\text{द्यु}^3}{6} + \cdots\right)\text{कोज्यान}$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्मात् य मानं द्यु – वर्गघनादिघातरूपायां श्रेण्यामानीयते । ज्यादृ अनेन विभक्ते लघुसङ्ख्यायाश्चतुर्थघातादिमानानि स्वल्पान्तरात् त्यक्त्वा

$$\text{कोस्पदृ} = \text{कोस्पदृ} - \text{य} + \text{द्युकोज्यान} - \frac{\text{य}^2}{2}\ \text{कोस्पदृ} - \frac{\text{द्यु}^2}{2}\ \text{कोस्पदृ}$$

$$+ \text{द्युयकोस्पदृकोज्यान} + \frac{\text{य}^3}{6} + \frac{\text{यद्यु}^2}{2} - \frac{\text{य}^2\text{द्यु}}{2}\text{कोज्यान} - \frac{\text{द्यु}^3}{6}$$

—कोज्यान;

$$\text{अतः य} = \text{द्युकोज्यान} - \tfrac{1}{2}\ \text{कोस्पदृ}\ (\text{य}^2 + \text{द्यु}^2 - 2\ \text{द्युयकोज्यान})$$

$$+ \tfrac{1}{6}\ (\text{य}^3 + 3\ \text{यद्यु}^2 - 3\ \text{य}^2\ \text{द्युकोज्यान} - \text{द्यु}^3\ \text{कोज्यान})$$

अत्र द्वितीयादिपदानां त्यागात् प्रथमं य=द्युकोज्यान ।

य² – आदिषूत्थापनेन द्वितीयं य = द्यु कोज्यान – ½ द्यु² कोस्पदृ ज्या² न । इदं मानं यवर्गे, प्रथमं य मानं य – घने समुत्थाप्य

$$\text{य} = \text{द्युकोज्यान} = \frac{\text{द्यु}^2}{2}\ \text{कौस्पदृज्या}^2\ \text{न} + \frac{\text{द्यु}^3}{3}\text{कोज्यान ज्या}^2\ \text{न}$$

यदि य, द्यु विकलासु प्रकाश्येते तदा

$$\text{य} = \text{द्युकोज्या न} - \frac{\text{द्यु}^2}{2}\ \text{ज्या}\ 1''\ \text{कोस्पदृज्या}^2\text{न} + \frac{\text{द्यु}^3}{3}\text{ज्या}^2\ 1''\ \text{को}$$

ज्यानज्या² न । अन्तिमपदस्य तात्कालिकीं गतिं शून्यां प्रकल्प्य महत्तममानम् ३ कोज्या² – १ = ० अनेन समीकरणेन

$\frac{2}{\sqrt{\text{९}_3}}$ द्यु³ ज्या² १″ इदमायाति । संप्रति द्युमानं वेधेन १° । ३० अस्मान्न्यूनमायाति । अतः परमाधिकस्यान्तिमपदस्य

मानं ०″ × ५ अस्मादल्पं तत्त्यागेन वास्तवाक्षांशाः

$$= \text{अ} - \text{द्यु कोज्यान} + \frac{\text{द्यु}^2}{2}\ \text{ज्या}\ 1''\ \text{स्प अज्या}^2\ \text{न}$$

ध्रुवतारा न नाडीमण्डलपृष्ठे स्थिरेत्यस्य ज्ञानं कमलाकरस्याप्यासीदत एव स स्वसिद्धान्ततत्त्वविवेके ।

> "ध्रुवतारां स्थिरां ग्रन्थे मन्यन्ते ते कुबुद्धयः ।
> साकं तैस्तु विवादोऽपि सतां मूढत्वमेव हि ॥ इति लिखति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं पूर्वोदितवेधविधिना ग्रहाणां सर्ववस्तुज्ञानं भवति ग्रन्थगौरवभयेन संक्षिप्तमुक्तम् ।

ईषदीषदिह मध्यागमादौ ग्रन्थगौरवभयेन मयोक्ता ।
वासना मतिमता सकलोह्या गोलबोध इदमेव फलं हि ॥

इति भास्करोक्तिश्चेत्यलं पल्लवितेन । यष्ट्या शङ्कुत्रितयमित्यादि यष्टि यन्त्रे रवेरहोरात्रं स्थिरं प्रकल्प्य भास्करेण सर्वं स्थूलमानीतं तच्च गोलविदां स्फुटमेव । एवं तस्य फलकादियन्त्रेष्वपि स्थूलता सुधिया विज्ञेयेति ।

सीताप्रियालीसम्पीत्यै सुधाकरहृदस्तथा ।
सुखायामृतवर्षिण्यां ज्यौतिषोपनिषद्गता ॥ २ ॥

॥ इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां सुधावर्षिण्यां ज्यौतिषोपनिषदध्यायः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ मानाध्यायः

तत्र तावत् प्रसिद्धानि नव मानान्याह—

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा ।
सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव ॥ १ ॥

'मानानि कति किञ्च तैः' इति प्रश्नोत्तरार्थं पूर्वोदितान्यप्याह । तत्र प्रथमं ब्राह्मं "कल्पो ब्राह्ममहः प्रोक्तमित्यादेः परमायुः शतं तस्येत्याद्यन्तं मध्यमाधिकार उक्तम् । द्वितीयं दिव्यं देवज्ञानम् । दिव्यं तदह उच्यते— इत्यादि । तत्षष्टिः षड्गुणा दिव्यं वर्षमित्यन्तं मध्यमाधिकार एवोक्तम् । तृतीयं पित्र्यं पूर्वकथितमपि तद्दिनं विशेषरूपेणाग्रे वक्ष्यति । चतुर्थं प्राजापत्यं च वक्ष्यमाणम् । पञ्चमं गुरोर्बृहस्पतेः पूर्वकथितमपि विशेषतो वक्ष्यति । सौरं च षष्ठं मानम् । सप्तमं सावनमानम् । चान्द्रमानमष्टमम् । नाक्षत्रं च नवममिति सर्वं प्रसिद्धमपि विशेषतोऽग्रे वक्ष्यत्याचार्यः । अत्र दिव्यसममासुरमानमपि कलयित्वा परे दश मानान्याहुरिति ॥ १ ॥

अथ किञ्च तैरिति प्रश्नोत्तरार्थमाह—

चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः ।
बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः ॥ २ ॥

अत्र मनुष्यलोके सौरचान्द्रार्क्षसावनैश्चतुर्भिर्व्यवहारो दृश्यते ।

तथा चोक्तं भास्करेण—

वर्षायनर्तुयुगपूर्वकमत्र सौरान्
मासास्तथा च तिथयस्तुहिनांशुमानात् ।
यत् कृच्छ्रसूतकचिकित्सितवासराद्यं
तत्सावनाच्च घटिकादिकमार्क्षमानात् ॥ इति ॥

षष्ट्यब्दं विजयादिषष्ट्यब्दं च नित्यशो बार्हस्पत्येन मानेन ज्ञेयं 'द्वादशघ्ना गुरोर्याताभगणाः' इत्यनेन । अन्यैस्तु न ज्ञेयं तेनैवादृष्टफलजनकत्वादिति ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ सौरेण व्यवहारं दर्शयति—

सौरेण द्युनिशोर्मानं षडशीतिमुखानि च।
अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता ॥ ३ ॥

अहोरात्र्योर्मानं वक्ष्यमाणानि षडशीतिमुखानि। अयनं दक्षिणमुत्तरं वा। विषुवत् सायनमेषतुलादिमानं वक्ष्यमाणा संक्रान्तेः पुण्यकालता चैतत्सवं सौरेण प्रत्यहं सूर्यगतिभोगेनोत्पद्यत इति ॥ ३ ॥

इदानीं षडशीतिमुखमाह—

तुलादि षडशीत्यह्नां षडशीतिमुखं क्रमात्।
तच्चतुष्टयमेव स्याद्द्विस्वभावेषु राशिषु ॥ ४ ॥
षड्विंशे धनुषो भागे द्वाविंशे निमिषस्य च।
मिथुनाष्टादशे भागे कन्यायास्तु चतुर्दश ॥ ५ ॥

तुलादेः षडशीतिसौरदिवसानां षडशीतिमुखं भवति। एवं द्विस्वभावेषु राशिषु तच्चतुष्टयं स्यात्। तुलादेः षडशीतिसौरदिवसास्त्रिंशत्सौरदिनैरेकः सौरमास इति गणनया धनुषः षड्विंशे भागेऽतस्तदेकं षडशीतिमुखम्। ततः षडशीतिसौरदिवसा मीनस्य द्वाविंशे भागेऽतस्तद्द्वितीयं षडशीतिमुखम्। ततः षडशीतिदिवसा मिथुनस्याष्टादशे भागेऽतस्तत् तृतीयं षडशीतिमुखम्। ततः षडशीतिदिवसाः कन्यायाश्चतुर्दशे भागेऽतस्तच्चतुर्थं षडशीतिमुखम्। एवं धनुर्मीनमिथुनकन्याराशिषु द्विस्वभावेषु षडशीतिमुखचतुष्टयं स्यात्। चतुर्षु षडशीतिमुखेषु सौरा दिवसाः $=४\times८६=३४४$। ततः सौरवर्षेऽवशिष्टा दिवसाः षोडश जाता इति ॥ ४—५ ॥

अवशिष्टषोडशसौरदिवसानां माहात्म्यमाह—

ततः शेषाणि कन्याया यान्यहानि तु षोडश।
क्रतुभिस्तानि तुल्यानि पितृणां दत्तमक्षयम् ॥ ६ ॥

ततः कन्याया यानि षोडशदिनानि सौराण्यवशिष्टानि तानि क्रतुभिर्यज्ञैस्तुल्यानि तेषु पितृणां तुष्ट्यर्थं यद्दत्तं भवेत् तदक्षयमनन्तफलदातृ भवति ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीं संक्रान्तिविशेषेषु नामान्याह—

भचक्रनाभौ विषुवद्द्वितयं समसूत्रगम् ।
अयनद्वितयं चैव चतस्रः प्रथितास्तु ताः ॥ ७ ॥
तदन्तरेषु संक्रान्तिद्वितयं द्वितयं पुनः ।
नैरन्तर्यात्तु संक्रान्तेर्ज्ञेयं विष्णुपदीद्वयम् ॥ ८ ॥

भचक्रनाभौ भगोलगर्भे विषुवद्द्वितयं समसूत्रगं भवति। गोलगर्भात् प्रथमं विषुवन्मेषादिगतं सूत्रमन्यविषुवत्तुलादिगतं भवतीत्यर्थः। एवमयनद्वितयं च भचक्रनाभौ समसूत्रगम् । गोलगर्भात् कर्क्यादिगतं सूत्रं मकरादिगतं स्यादित्यर्थः। एवं ताश्चतस्रः संक्रान्तयो मेषकर्कितुलामकराख्याः प्रथिताः प्रसिद्धाः सन्ति लोक इति। तदन्तरेषु विषुवायनान्तरालेषु सङ्क्रान्तिद्वितयं द्वितयं भवति। द्वौ द्वौ राश्यादिभागौ भवत इत्यर्थः। यथा मेषाख्यविषुवकर्क्याख्यायनयोर्मध्ये वृषमिथुनयोरादी । कर्क्याख्यायनतुलाख्यविषुवयोर्मध्ये सिंहकन्ययोरादी। तुलामकरयोरन्तरे वृश्चिकधनुषोरादी। मकरमेषयोर्मध्ये कुम्भमीनयोरादी । एवं विषुवमनन्तरं सङ्क्रान्तिद्वयं तदनन्तरमयनम् । अयनानन्तरं पुनः सङ्क्रान्तिद्वयं तदनन्तरं विषुवमेवं पुनः पुनर्ज्ञेयमित्यर्थः। सङ्क्रान्तेर्नैरन्तर्यात् तु विष्णुपदीद्वयं ज्ञेयम्। प्रथमविषुवमेषसङ्क्रान्तेरनन्तरं सङ्क्रान्तिद्वयमध्ये प्रथमा वृषसङ्क्रान्तिर्विष्णुपदीसञ्ज्ञा। मिथुनस्य सञ्ज्ञा षडशीतिमुखमिति पूर्वोक्तैव। कर्क्यनन्तरं सिंहसङ्क्रान्तिर्विष्णुपदी सञ्ज्ञा। कन्यासङ्क्रान्तिः षडशीतिमुखम्। तुलानन्तरं वृश्चिकसङ्क्रान्तिर्विष्णुपदीसञ्ज्ञा। धनुःसङ्क्रान्तिः षडशीतिमुखम्। मकरानन्तरं कुम्भसङ्क्रान्तिर्विष्णुपदी सञ्ज्ञा। मीनसङ्क्रान्तिः षडशीतिमुखम्। एवं द्वे विषुवत्सञ्ज्ञे द्वे अयनाख्ये चतस्रः षडशीतिमुखसञ्ज्ञाः चतस्रो विष्णुपदीसञ्ज्ञा-इति द्वादश सङ्क्रातयो जाता इति॥ ७—८॥

इदानीमुत्तरायणाद्याह—

भानोर्मकरसङ्क्रान्तेः षण्मासा उत्तरायणम् ।
कर्क्यादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम् ॥ ९ ॥
द्विराशिनाथा ऋतवस्ततोऽपि शिशिरादयः ।
मेषादयो द्वादशैते मासास्तैरेव वत्सरः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्कमानकलाः षष्ट्या गुणिता भुक्तिभाजिताः ।
तदर्धनाड्यः सङ्क्रान्तेरर्वाक् पुण्यं तथा परे ॥ ११ ॥

सूर्यस्य मकरसङ्क्रान्तेः सकाशात् षण्मासा उत्तरायणं भवति । तथैव कर्किसङ्क्रान्त्यादेः षण्मासा दक्षिणायनं स्यात् । ततो मकरसंङ्क्रान्तेरपि द्विराशिनाथाः शिशिरादयश्च ऋतवो भवन्ति । द्वयोर्द्वयो राश्योरेकैक ऋतुनाथः स्यात् । मकरकुम्भयोः शिशिरः । मीनमेषयोर्वसन्त इत्यादयः । तथा श्रीपतिना च सिद्धान्तशेखरे लिखितम् ।

मृगादिराशिद्वयभानुभोगात् षड्त्तंवः स्युः शिशिरो वसन्तः ।
ग्रीष्मश्च वर्षाश्च शरच्च तद्वद्धेमन्तनामा कथितोऽत्र षष्ठः ॥ इति ।

एते सङ्क्रान्तिविशिष्टा मेषादयो द्वादश सौरमासाः कथ्यते । तैरेव द्वादशसौरमासैर्वत्सरः सौरवर्षं भवतीत्यर्थः । रविकेन्द्रं यस्मिन् समये राश्यादौ याति स सङ्क्रान्तेर्मध्यकाल उच्यते । अथ यावद्रविविम्बार्धकलातुल्यमन्तरं केन्द्रात् प्रागनन्तरं च स्यात् तावद्विम्बैकदेशस्य राश्यादौ सञ्चारात् सङ्क्रान्तेः कालो भवति । तत्कालानयनार्थमनुपातः । यदि रविगतिकलाभिः षष्टिघटिकास्तदा रविविम्बमानकलाभिः किं जाताः । सङ्क्रान्तिनाड्यः केन्द्राभिप्रायेण सङ्क्रान्तेः प्राक् तथा परे च यास्तत्र स्नानदानादौ पुण्यं भवतीत्यर्थं ॥ ९-११॥

इदानीं चान्द्रमानं पितृदिनं चाह—

अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी ।
तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः ॥ १२ ॥
तिथिः करणमुद्वाहः क्षौरं सर्वक्रियास्तथा ।
व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते ॥ १३ ॥
त्रिंशता तिथिभिर्मासश्चान्द्रः पित्र्यमहः स्मृतम् ।
निशा च मासपक्षान्तौ तयोर्मध्ये विभागतः ॥ १४ ॥

दर्शान्ते संयोगानन्तरमर्काद्विनिःसृतः शशी चन्द्रोऽहरहो दिने दिने यत् प्राचीं दिशं याति तदेव चान्द्रमानं, तत्र द्वादशभिरंशैः सूर्याच्चन्द्रेऽन्तरिते तु एका तिथिर्ज्ञेयाऽर्थाच्चान्द्रं दिनं ज्ञेयमित्यर्थः । तिथिः । करणं बवादि । उद्वाहो विवाहः । क्षौरं क्षुरकर्मं । तथा व्रतबन्धादिकाः सर्वक्रियाः । व्रतोपवासयात्राणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्ये च या क्रिया तत्सवं चान्द्रेण मानेन गृह्यत आचार्यैरिति । तिथिभिस्त्रिशता त्रिशत्तिथिभिरेकश्चान्द्रो मासो भवति । स एव पित्र्यमहो दिनं निशा रात्रिश्चोच्यत इति पूर्वमेव प्रतिपादितम् । मासपक्षान्तौ दशान्तपूर्णान्तौ च विभागतः क्रमेण तयोरहोरात्रयोर्मध्ये दले भवतः । दर्शान्तो दिनार्धं पूर्णान्तो रात्र्यर्धं भवति । अर्थात् कृष्णपक्षाष्टम्यर्धे दिनारम्भः । शुक्लपक्षाष्टम्यर्धे च निशारम्भ इति ॥ १२—१४॥

इदानीं नाक्षत्रं दिनं नक्षत्रवशतो मासनामानि चाह—

भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते ।
नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः ॥ १५ ॥
कार्त्तिक्यादिषु संयोगे कृत्तिकादिद्वयं द्वयम् ।
अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम् ॥ १६ ॥

नित्यं प्रवहवायुना भचक्रस्यैकं भ्रमणं यद्भवति तदेव नाक्षत्रं दिनमुच्यते प्राचीनैरिति । पर्वान्तयोगतो नक्षत्रनाम्ना तु मासाश्चान्द्रमासाज्ज्ञेयाः । पर्वान्तः पूर्णिमान्तस्तत्र नक्षत्रयोगेन मासानां सञ्ज्ञा । यथा कृत्तिकासम्बन्धात् कार्त्तिकः । मृगशीर्षसम्बन्धान्मार्गशीर्षः । पुष्यसम्बन्धात्पौषः । मघासम्बन्धान्माघः । फाल्गुनीसम्बन्धात् फाल्गुनः । चित्रासम्बन्धाच्चैत्रः । विशाखासम्बन्धाद्वैशाखः । ज्येष्ठासम्बन्धाज्ज्यैष्ठः । ज्येष्ठ इति प्रामादिकः प्रयोगः । आषाढासम्बन्धादाषाढः । श्रवणसम्बन्धाच्छ्रावणः । भाद्रपदासम्बन्धाद्भाद्रपदः । अश्विनीसम्बन्धादाश्विन इति । ननु पूर्णिमान्ते तत्तन्नक्षत्राभावे कथं तत्सञ्ज्ञा मासानामुचितेत्यत आह । कार्त्तिक्यादिषु कार्त्तिकमासादीनां पौर्णमासीषु कृत्तिकादिद्वयं द्वयं नक्षत्रं कथितम् । यथा कृत्तिकारोहिणीभ्यां कार्त्तिकः । मृगार्द्राभ्यां मार्गशीर्षः । पुनर्वसुपुष्याभ्यां पौषः । आश्लेषामघाभ्यां माघः । चित्रास्वातीभ्यां चैत्रः । विशाखानुराधाभ्यां वैशाखः । ज्येष्ठामूलाभ्यां ज्यैष्ठः । पूर्वोत्तराषाढाभ्यामाषाढः । श्रवणधनिष्ठाभ्यां श्रावणः । इति फलितार्थः । अथावशिष्टमासार्थमाह । अन्त्योपान्त्याविति । अत्र कार्त्तिकस्यादित्वेन ग्रहणादन्त्य आश्विनः । उपान्त्यो भाद्रपदः । पञ्चमश्च फाल्गुनः । इति मासत्रयं त्रिधा नक्षत्रत्रयवशतः स्मृतम् । रेवत्यश्विनीभरणीभिराश्विनः । शततारापूर्वोत्तराभाद्रपदैर्भाद्रपदः । पूर्वोत्तराफाल्गुनीहस्तैः फाल्गुन इत्यर्थः । एवं निरयणमानागतनक्षत्रैर्मासानां सञ्ज्ञाऽत्र लिखिता तथैवाथर्ववेदेऽपि मासाना सञ्ज्ञा । सायनमानवशात् तत्तन्नक्षत्राणां सम्बन्धाभावात् सञ्ज्ञास्वनर्थापत्तिरतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निरणयमानेनैव व्यवहारः समुचित इत्येव प्राचीनानां वैदिकानां सम्मतिरिति स्फुटम् ॥ १५—१६ ॥

अथ प्रसङ्गात् कार्त्तिकादीनि गुरुवर्षाण्याह—

वैशाखादिषु कृष्णे च योगः पञ्चदशे तिथौ ।
कार्त्तिकादीनि वर्षाणि गुरोरस्तोदयात्तथा ॥ १७ ॥

यथा पौर्णमास्यां नक्षत्रसम्बन्धेन तत्सञ्ज्ञो मासो भवति तथा वैशाखादिषु द्वादशमासेषु कृष्णपक्षे पञ्चदशे तिथावमायाम् । 'तिथिर्द्वयोः' इत्यनेन 'सकलानपि पूर्णिमातिथीनुपतस्थे तिथिरेकिकाऽतिथि' रिति श्रीहर्षोक्तेश्चात्र तिथिः पुंल्लिङ्गः । कृतिकादिनक्षत्रसम्बन्धात् कार्त्तिकादीनि गुरोर्वर्षाणि ज्ञेयानि । यथा वैशाखामायां कृत्तिकासम्बन्धाद्गुरोर्वर्षं कार्त्तिकसञ्ज्ञम् । ज्यैष्ठामायां मृगशीर्षसम्बन्धान्मार्गशीर्षमित्यादि ज्ञेयम् । अत्रापि प्रोक्तनक्षत्रद्वयत्रयसम्बन्धः प्रागुदितो बोध्य इति । तथा गुरोरस्तोदयाच्च कार्त्तिकादीनि वर्षाणि वेद्यानि । यद्दिने वृहस्पतेरुदयोऽस्तो वा तद्दिने यच्चन्द्राधिष्ठितपञ्चाङ्गस्थनक्षत्रं तत्सञ्ज्ञं गुरुवर्षं भवतीति तदाशयः । "संहिताग्रन्थेऽस्तोदयवशाद्वर्षोक्तिः परमिदानीमुदयवर्षव्यवहारो गणकैर्गण्यते येनोदितेज्य इत्युक्तेरिति" इति गूढार्थप्रकाशके रङ्गनाथोक्तिरिति ॥ १७ ॥

इदानीं भूदिनमाह—

उदयादुदयं भानोः सावनं तत् प्रकीर्त्तितम् ।
सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः ॥ १८ ॥
सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा ।
मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते ॥ १९ ॥

सूर्यस्योदयादुदयमारभ्य यावता कालेन द्वितीय उदयस्तदुदयं तदुदयपर्यन्तं सावनं दिनं प्रकीर्त्तितं कथितमाचार्यैः । एतेनोदयद्वयान्तरकालेनैकं सावनं दिनमिति गणनया मध्यमाधिकारे सावनानि युगसावनानि कथितानि । अत्र भानोरुदयेन नाडीवृत्तस्थकल्पितभानोरुदयो ग्राह्योऽन्यथा विलक्षणसावनदिनमानानि पाठायोग्यान्यहर्गणादावनुपयुक्तानि च भवन्तीति विदां विदितानीति । तैः सावनदिनैर्यज्ञकालविधिः कार्यः । तथा सूतकादीनां जननमरणसम्बन्धि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूतकानामादिशब्देन चिकित्सितचान्द्रायणादीनां च परिच्छेदो निर्णयः। तथा दिनमासवर्षपतयश्च मध्यमा ग्रहाणां गतिश्च गणकैः सावनेनैव दिनेन गृह्यत इति सर्वं स्फुटम् ॥ १८—१९ ॥

इदानीं दिव्यमानमाह—

सुरासुराणामन्योन्यमहोरात्रं विपर्ययात् ।
यत्प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात् ॥ २० ॥

देवदैत्यानां मिथो विपर्ययाद्यदहोरात्रं भानोर्भगणपूरणात् प्रथमं प्रोक्तं तदेव दिव्यं मानमुच्यत इति ॥ २० ॥

इदानीमवशिष्टे प्राजापत्यब्राह्ममाने आह—

मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम् ।
न तत्र द्युनिशोर्भेदो ब्राह्मं कल्पः प्रकीर्त्तितम् ॥ २१ ॥

मन्वन्तरव्यवस्था या मध्यमाधिकारे 'युगानां सप्ततिः सैका' इत्युक्ता तदेव मानविद्भिः प्राजापत्य मानमुदितं मनूनां प्रजापतिपुत्रत्वात् । यथा देवादीनां माने दिनरात्रिव्यवस्था तथा तत्र प्राजापत्ये माने द्युनिशोर्भेदो विवेको नेति वेदितव्यम् । यो युगसहस्रात्मकः कल्पः प्रागुदितस्तदेव ब्राह्मं दिनं प्रकीर्त्तितं कथितं तावती तस्य रात्रिश्च । मेरोरूर्ध्वस्थदृष्टिवशेन कमलाकरेण ब्रह्मणो दिनमानं सयुक्तिकमुपपादितम् । रात्रिसिद्ध्यर्थं तु भास्करेण "दिनान्ते रव्यादीनुपसंहृत्य शेत इत्यर्थः" इत्युक्तम् । परन्त्वाप्रलयं 'ब्रह्मा रविं पश्यतीत्यत्र न काऽपि युक्तिः प्रदर्शिता । "दूरगत" इत्यस्य गणितविधिना किमपि प्रमाणं न दत्तमिति । भूगोलाध्याये ५९—६७ श्लोकटीकासु दर्शितक्षेत्रयुक्त्या ब्रह्मणो यदुच्छ्रितिमानमागच्छेत् तद्वशतस्तस्य सततं रविदर्शनं भवेदिति ॥ २१ ॥

इदानीं स्वोक्तमुपसंहरति—

एतत्ते परमाख्यातं रहस्यं परमाद्भुतम् ।
ब्रह्मैतत् परमं पुण्यं सर्वपापप्रणाशनम् ॥ २२ ॥
दिव्यं चार्क्षं ग्रहाणां च दर्शितं ज्ञानमुत्तमम् ।
विज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शाश्वतम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हे मयासुर ? ते तुभ्यमेतत् परं द्वितीयखण्डमाख्यातं तच्च त्वत्प्रश्नानन्तरमुक्तं, वस्तुत इदमुत्तरखण्डं रहस्यं परमाद्भुतं च। अत एवैतदुत्तरखण्डं गुह्यत्वात् परमाद्भुतत्वाच्च ब्रह्मरूपं परमं पुण्यं पुण्यस्वरूपं सर्वपापप्रणाशनञ्चापि।

अधुनोत्तरखण्डस्यास्य माहात्म्यं वर्णयति। दिव्यमिति। पूर्वार्धस्य माहात्म्यं तदुपसंहारे कथितमित्यस्यात्र कथयति। इदं दिव्यं दिव्यमानमार्क्षं नक्षत्रमानं ग्रहाणां कक्षादीनां प्राग्दर्शितमुत्तमं ज्ञानं विज्ञाय नरः स्वाभिलषितेऽवर्कादिलोकेषु शाश्वतं नित्यं ब्रह्मसायुज्यरूपं स्थानं प्राप्नोति। ब्रह्मरूपस्थानप्राप्तेर्ब्रह्मरूपो नरो भवतीत्यर्थः॥ २--२३॥

अत्र रङ्गनाथः—

"यत्त्वेतत् ते परमाख्यातमित्यादिश्लोकः क्वचित् पुस्तकेऽस्मात् श्लोकात् (२३ श्लोकात्) पूर्वं नास्ति, किन्तु माननिरूपणान्तस्थे दिव्यं चार्क्षमित्यादिश्लोकान्ते मानाध्यायसमाप्तिं कृत्वाऽग्रे—

यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम्॥ १॥

न देयं तत् कृतघ्नाय वेदविप्लावकाय च।
अर्थलुब्धाय मूर्खाय साहङ्काराय पापिने॥ २॥

एवंविधाय पुत्रायाप्यदेयं सहजाय च।
दत्तेन वेदमार्गस्य समुच्छेदः कृतो भवेत्॥ ३॥

व्रजेतामन्धतामिस्रं गुरुशिष्यौ सुदारुणम्।
ततः शान्ताय शुचये ब्राह्मणायैव दापयेत्॥ ४॥

चक्रानुपातजो मध्यो मध्यवृत्तांशजः स्फुटः।
कालेन दृक्समो न स्यात् ततो बीजक्रियाच्यते॥ ५॥

राश्यादिरिन्दुरङ्कघ्नो भक्तो नक्षत्रकक्षया।
शेषं नक्षत्रकक्षायास्त्यजेच्छेषकयोस्तयोः॥ ६॥

यदल्पं तद्भजेद्भानां कक्षया तिथिनिघ्नया।
बीजं भागादिकं तत्स्यात् कारयेत् तद्धनं रवौ॥ ७॥

त्रिगुणं शोधयेदिन्दौ जिनघ्नं भूमिजे क्षिपेत्।
द्व्यश्वमघ्नमृणं ज्ञाच्चे खरामघ्नं गुरावृणम्॥ ८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋणं व्योमनवघ्नं स्याद्दानवेज्यचलोच्चके ।
धनं सप्ताहतं मन्दे परिधीनामथाच्यते ॥ ९ ॥
युग्मान्तोक्ताः परिधयो ये ते नित्यं परिस्फुटाः ।
ओजान्तोक्तास्तु ते ज्ञेयाः परबीजेन संस्कृता ॥ १० ॥
वच्मि निर्बीजकानोजपदान्ते वृत्तभागकान् ।
सूर्येन्द्वोर्मनवो दन्ता धृतितत्त्वकलोनिताः ॥ ११ ॥
बाणतर्का महीजस्य सौम्यस्याचलबाहवः ।
वाक्पतेरष्टनेत्राणि द्योमशीतांशवो भृगोः ॥ २ ॥
शून्यर्त्तवोऽर्कपुत्रस्य बीजमेतेषु कारयेत् ।
बीजं खाग्न्युद्धृतं शोध्यं परिध्यंशेषु भास्वतः ॥ १३ ॥
इनाप्तं योजयेदिन्दोः कुजस्याश्वहृतं क्षिपेत् ।
विदश्चन्द्रहृतं योज्यं सूरेरिन्द्रहृतं धनम् ॥ १४ ॥
धनं भृगोर्भुवा निघ्नं रविघ्नं शोधयेच्छनेः ।
एवं मान्दाः परिध्यंशाः स्फुटाः स्युर्वच्मि शीघ्रकान् ॥१५॥
भौमस्याभ्रगुणाक्षीणि बुधस्याब्धिगुणेन्दवः ।
वाणाक्षा देवपूज्यस्य भार्गवस्येन्दुषड्यमाः ॥ १६ ॥
शनेश्चन्द्राब्धयः शीघ्रा ओजान्ते बीजवर्जिताः ।
द्विघ्नं स्वं कुजभागेषु बीजं द्विघ्नमृणं विदः ॥ १७ ॥
अत्यष्टिघ्नं धनं सूरेरिन्दुघ्नं शोधयेत् कवेः ।
चन्द्रघ्नमृणमार्केश्च स्युरेभिर्दृक्समा ग्रहाः ॥ १८ ॥
एतद्बीजं मया ख्यातं प्रीत्या परमया तव ।
गोपनीयमिदं नित्यं नापदेश्यं यतस्ततः ॥ १९ ॥
परीक्षिताय शिष्याय गुरुभक्ताय साधवे ।
देयं विप्राय नान्यस्मै प्रतिकञ्चुककारिणे ॥ २० ॥
बीजं निःशेषसिद्धान्तरहस्यं परमं स्फुटम् ।
यात्रापाणिग्रहादीनां कार्याणां शुभसिद्धिदम् ॥ २१ ॥

इत्यस्य क्वचित्पुस्तके लिखितस्य बीजोपनयनाध्यायस्यान्ते लिखितो दृश्यते तत् तु न समञ्जसम् । उत्तरखण्डे ग्रहगणितनिरूपणाभावात् तन्निरूपण-प्रसङ्गनिरूपणीयस्याध्यायस्य लेखनानौचित्यात् स्पष्टाधिकारे तदन्ते वाऽस्य लेखनस्य युक्तत्वाच्च । किञ्च "मानानि कति किं च तैः" इति प्रश्नानामभावात् प्रश्नोत्तरभूतोत्तरखण्डेऽस्य लेखनमसङ्गतम् । अपि च । उपदेशकाले बीजाभावा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दग्रेऽन्तरदर्शनमनियतं कथमुपदिष्टमन्यथान्तभूंतत्वेनैवोक्तः स्यादित्यादिविचारेण केन चिद्धृष्टेन बीजस्यार्षमूलकत्वज्ञापनायान्त्येऽत्र बीजोपनयनाध्यायः प्रक्षिप्त इत्यवगम्य न व्याख्यात इति मन्तव्यम् ।" इति लिखितवान् ।

अहो अत्रैवं वदता रङ्गनाथेन "युगानां परिवर्त्तेन कालभेदोऽत्र केवलम्" इति पूर्वार्धभागश्लोकटीकायां "एवं च युगमध्येऽप्यवान्तरकाले ग्रहचारेषु अन्तरदर्शने तत्तत्काले तदन्तरं प्रसाध्य ग्रन्थांस्तत्कालवर्त्तमानाभियुक्ताः कुर्वन्ति । तदिदमन्तरं पूर्वग्रन्थे बीजमित्यामनन्ति" इति सर्वं व्यर्थं लिखितमिति बुद्धिभद्भिभृंशं विचिन्त्यमित्यलं प्रसङ्गागतविचारेणेति ।

अथ मुनीन् प्रति स विशिष्टो मुनिः कथितसम्बादस्योपसंहारमाह—

इत्युक्त्वा मयमामन्त्र्य सम्यक् तेनाभिपूजितः ।
दिवमाचक्रमेऽर्कांशः प्रविवेश स्वमण्डलम् ॥ २४ ॥

मयोऽथ दिव्यं तज्ज्ञानं ज्ञात्वा साक्षाद्विवस्वतः ।
कृतकृत्यमिवात्मानं मेने निर्धूतकल्मषम् ॥ २५ ॥

ज्ञात्वा तमृषयश्चाथ सूर्यलब्धवरं मयम् ।
परिवव्रुरुपेत्याथो ज्ञानं पप्रच्छुरादरात् ॥ २६ ॥

स तेभ्यः प्रददौ प्रीतो ग्रहाणां चरितं महत् ।
अत्यद्भुततमं लोके रहस्यं ब्रह्मसम्मितम् ॥ २७ ॥

॥ इति सूर्यसिद्धान्ते मानाध्यायः ॥ ३ ॥

॥ समाप्तोऽयं सूर्यसिद्धान्तः ॥

सूर्यांशः पुरुषो मयं दैत्यमामन्त्र्य सम्यगनुसन्धानतः सर्वं ग्रहभूगोलचरितमुपदिश्य 'एतत् ते' इत्याद्युक्त्वा दिवं स्वर्गमाचक्रमे स्वर्गगमनाय मतिं चक्रे । कीदृशः स सूर्यांशः । तेन मयदैत्येनाभिपूजितः । गन्धधूपादिभिरभ्यर्चितः । स्वमण्डलं सूर्यविम्बं प्रविवेश, तदन्तरे लीन इति ।

अथ सूर्यांशान्तर्धानानन्तरं मयस्तद्दिव्यं ज्ञानं साक्षाद्विवस्वतः सूर्यात् प्राप्तमिति ज्ञात्वाऽऽत्मानं निर्धूतकल्मषं प्रक्षालितपाप कृतकृत्यं सम्पादितमनोरथमिव मेने मन्यतेस्म । भवतेदंज्ञानं कथं प्राप्तमिति श्रोतृमुनिभिः पृष्टः स विशिष्टो मुनिर्वदति स्म । ज्ञात्वेति । अथाहं सर्वे ऋषयश्च मयं सूर्यलब्धवरम् । सूर्याल्लब्धो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरो येनेति तम् ज्ञात्वा तमुपेत्य तन्निकटे गत्वा तं परिबव्रुः परिवेष्टितवन्त आदरात् तत् सूर्यलब्धज्ञानं च पप्रच्छुः पृष्टवन्तः। स च प्रीतो मय इत्यस्तेभ्यो ऽस्मत्प्रभृतिभ्यो मुनिभ्यो महदपरिमितमत एव रहस्यं गुप्तं ब्रह्मसम्मितं ब्रह्मणा समं लोकेसंसारेऽत्यद्भुततमं च ग्रहाणां चरितं प्रददावादरेण दत्तवानिति ॥२४-२७॥

प्रियसुताविरहज्वरजर्जरोऽकृत-
सुधाकर ऐनिसुधाकरम्।
गतसुताऽऽत्मसुखाय सुखायनं
शुभकरम्भकरं तिलकं वरम् ॥ १ ॥

गोलतत्त्वविदुषां निरामया
सौरकृत्यमृतवर्षिणी मया।
संस्कृतेयमथ विद्गणे तया
सत्सुखं भवतु कण्ठसक्तया ॥ २ ॥

आषाढशुक्लनवमीशनिवासरे या
लोकाङ्गनन्दविधुसम्मितविक्रमाब्दे।
तस्यां समाप्तिमगमत् तिलकः सुधाभृ-
च्छ्रीराघवेन्द्रकृपयैव सुधाकरोत्थः ॥ ३ ॥

सुधावर्षिणीं विन्मनोहर्षिणीं वै
दुरुक्तिक्रियाकर्षिणीं सद्विचारैः।
इमां सज्जना वीक्ष्य सौधाकरीं स्वं
मनो मोदयन्त्वैनिलीलाविलासैः ॥ ४ ॥

सरलया किल देवगिरा मया
विलिखिता निखिलाऽर्ककलाकृतिम्।
बहुविधां परिचिन्त्य मतान्तरै-
र्निजकृतिर्गतिविद्भिरिहादृता ॥ ५ ॥

सीताप्रियालीसम्प्रीत्यै सुधाकरहृदस्तथा।
सुखायामृतवर्षिण्यां गतो मानाधिकारकः ॥ ३ ॥

॥ इति सुधाकरद्विवेदिकृतायां सूर्यसिद्धान्तटीकायां
सुधावर्षिण्यां मानाध्यायः ॥ ३ ॥

29889

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu